ॐ

श्रीमथुराधीशो विजयतेतराम् ।

सप्रकाशतत्वदीपनिबन्धः ।

सर्वनिर्णयग्रन्थः

श्रीमदखिलदैवजीवोद्धारप्रयत्नैकपरायण जगद्गुरुसकलाचार्यचूडामणिश्रीवल्लभदीक्षित-
महाप्रभुविरचितः

विद्वज्जनमण्डलमण्डन गोस्वामी श्रीपुरुषोत्तम-
प्रणीतावरणभङ्गाख्यव्याख्यानसहितः ।

कोटाग्रामस्थ श्रीवल्लभाचार्यवंशभूषण गोस्वामि श्रीरण-
छोडात्मजजैवातृकश्रीजीवनेशप्रकटितसुलोचन-
नामकव्रजभाषाव्याख्यानयुक्तः

साचीहरद्विजकुलोद्भवमुख्यसेवक गोवर्द्धनदासपौत्र पण्डित गोकु-
लदासप्रकाशितः । प्रतिपुस्तकाभावेपि तैलङ्गकुलोद्भवपोत-
कूर्चवाडू बालशास्त्रिणा जांभेकरोपाभिधेन सीतारामशा-
स्त्रिणा च यथामति संशोधितः ।

स च

मुम्बापुर्यां
पं० श्रीधर शिवलालजी इत्येतेषां
ज्ञानसागर यन्त्रालये मुद्रापितः
संवत् १९६४ शके १८२९

सूचीपत्र ब्रजभाषाटीका का।

सूचीपत्र व्रजभाषाटीका का ।

श्रीतत्वदीपनिबन्धकी छपाईमें जिन महाशयोंने सहायता देवेकी प्रतिज्ञा की है उनके नाम

३००)—पुष्टि मार्गाचार्य कोटास्थ श्री १०८ रणछोडलालजी महाराज।

६००)—झालावाडराणीजी अखंड सौभाग्यवती श्रीमती कृष्णगडबाई साहिबा कृष्ण कुँवर बाई.

२००)—अलवर माजी साहिब श्रीमती कृष्ण गडबाई साहिबा श्रृंगार कुँवर बाई.

२००)—श्रीमथुरेशजीके मुखियाजी साचोरा स्वर्गवासी गोवर्द्धनदासजी.

१००)—अमदाबादके हरि वल्लभ मूलचंदवाले माणि भाई अचरज भाई.

१००)—लाभचंदजी सेठ बीकानेर

पहले प्रकरण की छपाईमें ७३५॥)

दूसरे प्रकरणकी छपाईमें ८९३)

एकून जोड १६२८॥)

अधिक पुस्तकलेनें द्वारा सहायता देनेंवालेके नाम पुस्तककी संख्या अङ्क.

११—नरसिंहसाह मदन गोपाल सेठ जमना दासजी बीकानेर.

५—राजा बाबू दामोदरदासजी कलकत्ता.

५—मधुवन दास द्वारकादासवाले सेठजी श्यामदासजी बनारस.

५—दीवान कुँवर फतेलालजी उदेपुर.

५—गोवर्धन दासकी बहू गंगाबाई मुंबई.

१०—नाथा कृष्णदासजी मुंबई.

५—सेठ नरसिंहदासजी कोटा.

३—सेठ माधोलालजी कोटा.

५ माणिकलालद्वारकादासवाले गुजरात.

५—लक्ष्मी नारायणजी भंडारी कोटा.

५—सेठ धीरजरामजी कोटा.

५—श्रीमान् वेगू रावजी साहिब.

२—महाराजा बलभद्र सिंहजी झालावाड.

२—बीजोल्या रावजी साहिब.

५—श्रीनाथदासजी कृष्णगढ.

५—जाम नगरसे नारायणजी लालजी.

श्रीकृष्णायनमः ।

भाषाभूमिका.

विज्ञापनम्.

हे सज्जन पुरुषो ! जीव मात्रके यह अभिलाषा रहती है कि हमारें दुःख कभी न होवें सदा सुखही बना रहै और यही इच्छा पूर्ण होनेके लिये हमेशा प्रयत्न भी करते रहते हैं तथापि आनन्दनिधि श्रीपुरुषोत्तम परब्रह्मकी प्राप्ति बिना पूर्ण आनन्द नहि मिलता सर्वथा दुःखभी नहि मिटता ऐसी दशा देखके परमात्माने अपनी प्राप्तिके उपाय बतानेके लिये वेदस्मृति पुराणोंकों स्वयं तथा ऋषियोंके द्वारा प्रगट किये जिनोमें कर्म ज्ञान भक्ति योगादि अनेक मार्ग तथा अनेक देवताओंकी उपासना बताई है उनको देखकर कलियुगके मंद बुद्धिवाले मनुष्योंको संदेह होता है कि हम किस देवता की उपासना करैं और कौन मार्गका आश्रय करैं तहां अपार सुखके अनधिकारी आसुर जीव तो ऐसे संदेह को देखकर शास्त्रको छोडकर खोटे मार्गमें चलते हुवे "मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्" अर्थ–हे अर्जुन! आसुरजीव मुझको विना पाये नरकको प्राप्त होते हैं, इस गीतावाक्यके अनुसार अधम गतिको पाते हैं और सुखाधिकारी दैव जीव तो संदेह दूर करनेकी तथा भगवान्‌की प्राप्तिके मुख्य साधन जाननेकी बहुत अभिलाषा रखते हैं उन जीवोंके लिये परब्रह्मके मुखाग्निरूप श्रीवल्लभाचार्यजीनें सर्वनिर्णय नामके ग्रन्थको प्रगट किया है इस ग्रन्थके देखनेसे सब संदेह दूर होते हैं इस्में लिखे साधनोंके करनेसे अवश्य भगवान् प्राप्त होते हैं (रसं ह्लब्ध्वानन्दी भवति) उनको प्राप्त होकर भक्त परमसुखी होजाताहै, इस ग्रन्थमें पृष्ठ ३०६ तीनसौ छह पृष्ठसे लेकर समाप्ति पर्यन्त भक्तिमार्ग का वर्णन है वह अवश्य देखने योग्य है विशेष करके श्रीवल्लभाचार्यजीके संप्रदायवाले वैष्णवोंसे हाथ जोडके यह प्रार्थना है जो आप श्रीवल्लभाचार्यजीके मतके अनुसार साधन करके भगवान्‌की प्राप्ति चाहते हो तो इस ग्रन्थको अवश्य देखिये इस ग्रन्थके बिना देखे भक्ति मार्गके सिद्धान्त को नहीं जानसक्ते हैं इस मार्गमें परब्रह्मकी प्राप्तिको मुख्य फल माना है 'परंब्रह्म कृष्ण इत्यभिधीयते' इत्यादि श्रुतियोंके अनुसार कृष्ण यह परब्रह्मकाही नाम है न्यारे न्यारे कल्पोंमें न्यारे २ गणेश देवी आदि देवताओंका रूप धारण करके परब्रह्मही सृष्टि कर्ता है इससे उन उन पुराणोंमें उन २ देवताओंको परब्रह्मही कहा है, परब्रह्म स्वतन्त्र है प्रेम सहित सेवा (टहल) करनेसेही प्रसन्न होताहै इसका नामही भक्ति है इसका

स्वरूप इस ग्रन्थके देखनेसे ठीक मालुम होताहै इस प्रकरणके आगे इससे दुगुना श्रीभागवतरूप प्रकरण है उसमें श्रीभागवतकी लीलाओंके तात्पर्य तथा शास्त्र स्कन्धप्रकरण अध्यायोंके अर्थ लिखे हैं जिनोंके जाननेसे अवश्य दृढ भक्ति सिद्ध होवे ऐसी श्रीवल्लभाचार्यजीनें प्रतिज्ञा करीहै परन्तु डेढ हजार रुपैया विना श्रीभागवतरूप प्रकरण नहीं छप सक्ता इसकारण पांचसौ या चारसौ ग्राहक बननेसे छपाया जायगा जिनको ग्राहक बनना हो वे यह सूचना देखकर ग्राहकोंमें नाम लिखवा देवें इस पुस्तकके मिलनेका पता—बम्बई पं० श्रीधर शिवलालजी "ज्ञानसागर" छापाखाना श्रीकृष्णगंज. पता—दूसरा-कोटा राजपूताना बडा मथुरानाथजीके मंदिरमें विठ्ठलनाथ पाठशाला कार्याधिकारी पं.गोकुलदास.

ब्रह्मवैवर्तपुराणान्तर्गत कृष्णजन्मखण्डाध्याय ४१
हिमाचलं प्रति वसिष्ठवाक्यम्।

श्रीकृष्णमाहाम्यम्।

निर्गुणः परमात्माच य ईशः प्रकृतेः परः। स एकः सृष्टिसंहारे स सर्वः सृष्टिकर्मणि ॥ सृष्टिस्थित्यन्तकरणे ब्रह्मविष्णुशिवाभिधः। ब्रह्माच ब्रह्म लोकस्थो विष्णुः क्षीराब्धिवासकृत् ॥ शिवः कैलासवासी च सर्वाः कृष्णविभूतयः। श्रीकृष्णश्च द्विधा भूतो द्विभुजश्च चतुर्भुजः॥ चतुर्भुजश्च वैकुण्ठे गोलोके द्विभुजः स्वयम् ॥ केचिद्देवाः कलास्तस्य कलांशाश्चापि केचन ॥ कृष्णः सृष्ट्युन्मुखश्चापि प्रकृतिं तत्र निर्ममे ॥ निर्मायताश्च तयोनौ वीर्याधानं चकारह ॥ ततोडिंभः समुद्भूतस्तन्मध्ये च महाविराट् ॥ महाविष्णुः सविज्ञेयः श्रीकृष्णः षोडशांशकः। नाभिपद्मोद्भवो ब्रह्मा तस्यैव जलशायिनः। तस्य भालोद्भवः स्रष्टुः शंकरश्चन्द्रशेखरः ॥ महाविष्णोर्वामपार्श्वात्संभूतो विष्णुरेवच। कृष्णवामाङ्गसंभूताराधारासेश्वरी स्वयम् ॥ वक्षस्थलोद्भवा लक्ष्मीः सर्वसंपत्स्वरूपिणी ॥ इति शुभम्।

अर्थ—श्रीकृष्णचन्द्र निर्गुण परमात्माहै प्रकृति (माया) सों परे है प्रलयमें एकरूप है सृष्टिके समय वेही श्रीकृष्ण सर्वरूप है सृष्टिकी उत्पत्ति पालन नाश करनेके लिये ब्रह्मा विष्णु शिव नामवाले हैं ब्रह्मा विष्णु शिव उनकी विभूति हैं वेही श्रीकृष्ण गोलोकमें द्विभुज वैकुण्ठमें चतुर्भुजरूप हैं कितनेक देवता कला हैं कितनेक देवता उनकी कलाके अंशहैं जब श्रीकृष्णचन्द्रकी सृष्टि करनेकी इच्छा हुई तब प्रकृति को प्रगट किया आपने उस प्रकृतिमें महाविराट् महाविष्णु प्रकट किया वह आपका सोलवाँ अंश है उन महाविष्णुकी नाभिसे ब्रह्मा ललाटसें शिव, वामपार्श्वसे विष्णु प्रगट हुये कृष्णके वामाङ्गसें रासेश्वरी श्रीराधाजी सदा प्रगटे रहे है वक्षस्थलसों श्रीलक्ष्मीजीका उद्भव है "एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयम्" भ्रम प्रमादसें जो इस पुस्तकमें न्यूनाधिक हो सारग्राही पुरुष क्षमा करेंगे, प्रार्थक—साचोरा, पं० गोकुलदास.

तत्वदीपनिबन्धका शुद्धिपत्र ।

शुद्धम्	अशुद्धम्	पृ०	पं०
मित्येव	मिवत्येव	२	१०
यज्ञःपश्व	यज्ञः । यश्व	६	१०
सेवायाम्	सेवाय	८	१३
माहेत्यर्थः	मोहेत्यर्थः	९	११
मोक्षम्	मोक्षे	१०	२८
हेसोतो	हेतो	१२	८
शिष्टाद्दतो	शिष्टाद्दत	१३	१५
होजायवेसों	होजावेंसों	१३	१९
कूर्मं	कूर्वं	१५	२२
तद्दत्वा	तद्रत्वं	१५	२४
एवोक्त	एवाक्त	१६	९
बालो है	वालोहै हैं	१८	१८
शुद्धित्वेन	शुद्धित्वन	१८	१२
दापस्तम्भ	दाआपस्तंब	२१	१६
सम्भवदुक्तिकत्वा	संभवदुक्तिसीत्तावा नग्निष्टोमकत्वात्	२१	२२
दग्निहोत्रमासीसावान निष्टोमइति	दग्निहोत्रमा इति	२१	२३
तच्चात्म	तपचात्म	२१	२५
तात्पर्य	तात्पर्य	२६	१०
आधिक्य है	आधिक्य	२७	६
साक्षादङ्गं धर्मः ॥	साक्षादङ्ग धर्मः	२७	२३
द्रव्याम्नानाच्च	द्रव्यम्नानाच्च	२८	२३
जपतीर्थं	जषतीर्थं	२८	२५
अग्नीदग्नीन्	अग्निदग्नीन्	३३	७
गदानिविदा	गदा—निविदा	३३	८
अवाधिताज्ञात	अवाधिताज्ञान	३४	४
मुख्यता"	मुच्यते"	३६	१६
सर्वसाक्षात्	सर्वसाक्षात्	३७	४
तदुक्तिर्नंनु	तदुक्तिर्ननतु	४०	२१
स्मृतेश्व	स्मृतिश्व	५५	१७
तदतिरिक्ताः । ।	तदतिरिक्तभाव	५६	२८
वाक्यकहे हैं	वाक्यहै	५८	७

शुद्धम्	अशुद्धम्	पृ०	पं०
नापीष्टकोपधान	नाप्पवीष्टकोपधान	६१	१५
भिन्नशेषाणाम्	भिन्नशिष्याणाम्	६१	१८
पातकादीनाम्	प्रायश्चितादीनाम्	६३	५
वेदभागमें	वेदमार्गमें	६५	२
कर्तव्यम्	कृर्तव्यम्	६५	२२
समंविभागम्	साम्विभागम्	६६	१९
यातयेदित्यादि	पातयेदित्यादि	६६	२५
निर्दयपर्णो	निर्दयप्रणों	६७	१८
स्थलमें	स्थालमें	६९	१२
परिचयार्थम्	परिचर्यार्थम्	७०	१४
भेदाद्वैजात्यतः	भेदद्वैजात्यतः	७१	९
स्मार्तकल्पसूत्रवदेवहि	स्मार्तकल्पसूत्रवदेवहि	७२	१९
बिम्बवदाभासो	बिम्बवेदाभो	७३	१
तादृशस्याभासः	तादृस्याभासः	७३	१
सर्व आश्रमाः	सर्वाआश्रमाः	७३	९
रूपेर्थे	रूपेरसे	७४	१७
प्रसङ्गः	प्रङ्गः	७४	८
दर्पणकोमुखमुखको	दर्पणको मुखको	७४	२५
उपनिषत्त्व	उपनिषदत्व	७५	२३
ब्रह्मविद्या	बह्मविद्या	७७	१८
नराधमाः	नरधमाः	७७	२०
नित्यकामो	नित्यकाम्यो	७८	५
क्वचित् क्वचिन्	क्वचिन्	७९	२१
दाशंक्येत्यर्थः	दशंक्येत्यर्थः ॥	८०	२
विकृतियज्ञसाध्योर्थः	यज्ञाविकृतिसाध्योर्थः	८०	१२
तत्पुराणप्रकारतः	तत्प्रकारपुराणतः	९५	५
नविकृतित्वम्	नवीकृतित्वम्	९७	१६
परिपाकएवम्	परिपाके एकं	१०३	६
रजसस्तु	राजसस्तु	१०५	१३
नकल्पप्रतिपादकता	कल्पप्रतिपादकता	१०७	९
परम्परा है	परम्पार है	११७	१४
पुराणत्वेन	पुराणार्थत्वेन	११८	१७
सांख्यश्च	सोख्यश्च	१२२	२२
सर्वोपनिषद्	सर्वोपनिषद्	१२४	२१

शुद्धम्	अशुद्धम्	पृ०	पं०
स्वरूपरक्षा अर्थरक्षा	स्वरूपरक्षार्थरक्षा	१२५	१७
प्ययन्दोष:	प्यपन्दोष:	१२९	६
लक्षणञ्च	लक्षलञ्च	१३१	१६
असत्यत्व	सत्यत्व	१३२	२२
परमाणवन्त	पस्माणवन्त	१३८	१८
प्रमाविषय	प्रभाविषय	१४४	१८
प्रविष्टत्वंस्फुट	प्रविष्टत्वंस्फुट	१४४	२७
प्राप्नुत:	प्राप्नुम:	१४५	५
लोकादेर्धर्म्यं विना	लोकादर्धर्म्यं विना	१४४	२४
प्रत्ययार्थ:प्रेम। धात्वर्थ:सेवा।	प्रत्ययार्थ:प्रेमधात्वर्थ:॥सेवा	१४६	२४
मत्पादसेवा	मत्पादिसेवा	१४७	२७
शक्तोपिंतिकिन्	शक्तोप्यक्तिन्	१४७	२०
अनीश्वरकापिले	अनीश्वरकपिले	१५१	१०
ऐवासन्यावतारो	ऐवासत्यावतारो	१५१	२६
तादृगाकारा	तादृगकरा	१५२	१६
प्रकृतिभर्तु:	प्रकृतिभर्तृ:	१५६	७
स्तच्चरणारविन्द	स्तच्चरणारविन्द	१५८	१
णाविर्भवतीति	णाविर्भतीति	१५८	२१
बहिरन्तस्तु	बहिरम्तस्तु	१६०	१०
सदंशशक्तिरिति	संदशक्तिरिति	१६१	६
कश्चुसिद्धि	कश्चुसिद्ध	१६२	९
तच्छक्ति:	तच्छक्ति	१६२	१६
सवस्येति	सर्वस्यंति	१६४	२२
प्रतिकर्म	प्रतिसर्म्म	१६५	२०
भोगानन्तर	भोगान्तर	१६६	१
प्राय:पाठ	प्रायपाठ	१६६	१४
स्वभावोद्दुष्टानां	स्वभावदुष्टानां	१६७	२२
ध्वंसश्चापि	ध्वसञ्चापि	१७१	४
स्वरूपएव	स्वरूमेव	१७१	१७
ननुसंख्यादयो	ननुसंख्यदयो	१७१	२२
सकलकपाल	सकलपाल	१७२	१४
ईशो	इशो	१७७	२२
ब्रह्माण्ड	ब्रह्मार्यण्ड	१७९	२२
जीवकार्य नहिं है	जीवका नहिंहै	१७९	७


शुद्धम्	अशुद्धम्	पृ०
नोक्ताअप्येव	नोक्ताऽप्येव	१८२
विधयाअविद्याया	विधीया विद्याया	१८३
तूलाविधा	तूलविद्या	१८३
भेदोक्तिरेवात्र	भेदोक्तेरेवात्र	१८८
समायाति	सपायाति	१९५
वक्ष्यमाण	वक्ष्यपाण	१९६
ध्वनिद्वय	ध्वनिदय	१९६
सार्वज्ञ्या	सार्वज्ञा	१९८
विद्योपहित	विद्यापहित	१९८
प्रकाशितान्त	प्रकाशितान्त	१९८
तदवभासे	तदाभासे	१९८
जीवाभिन्नं	जीभिन्नं	१९८
समारूढा	समारूढा	१९८
मप्रकाशमानतया विषया	मप्रकाशमानतयाविद्याकारकज्ञानापत्तिरधिकाया याविषया	१९९
विषयाप्रमिति	विषयाग्रमिति	२०१
सावृत्तिः	यावृत्तिः	२०२
जन्यज्ञान	जन्मज्ञान	२०२
तदननुभवेनेन्द्रियेपि तदभावात्	दतननुभवेनेन्द्रियेपि दतभावाद्	२०३
घट्टकुटी	भट्टकुटी	२०३
वाभावात्	वाण्यात्	२०३
अविद्या	विद्या	२०४
वाधक रह्योनाहि	वाधकह्योनाहि	२०४
ह्रीच्छादीनाम	हिच्छादीनाम्	२०६
सेत्स्यति	त्स्येत्यति	२०७
भौतिकबुद्धि	भौतिकंबुद्धि	२०८
पेक्षाबुद्धिरिति	पेक्षाबुरिति	२०९
नन्दभाने	नंदभावे	२०९
तारतम्यादुक्त	तारम्यायुक्त	२०९
नानानुव्यवसाय	नानातुव्यवसाय	२१०
ननुस्वरूपे	ननस्वरूपे	२११
कारणं	कारण	२१२
धर्मीवाच्यएव	धर्म्येवाच्यएव	२१२

शुद्धम्	अशुद्धम्	पृ०	पं०
जातेत्यादि	जानेत्यादि	११२	२९
भाविनींसत्ता	भाविनसत्ता	२१३	५
विषयत्व	विषयात्व	२१४	१७
दोषाभावार्थं	दोषभावार्थं	२१८	१६
रूपैवाविर्भाव	रूपीवाविर्भाव	२१९	१
विजातीयामिति	विजातीमिति	२२१	९
भावस्तुतथेच्छाभावात्	भावस्तुतथेच्छाभा वस्तुतथेच्छाभावात्	२२१	१७
सत्यांपुन	सत्यपुन	२२१	१७
प्युच्येत	ण्युच्येत	२२२	८
याथार्थ्यं	यथ्यार्थ्यं	२२४	१
सौम्य	सीम्य	२२४	८
साधारणो	साधाणो	२२५	३
मेकाकाला	मेककाला	२२५	१७
सर्वतोता	सर्वतोंता	२२८	२१
एषा	एषां	२३०	३
अज:	अण्ड:	२३०	७
प्रयत्नविशेषेण	प्रयत्नविशे	२३०	१०
संदृब्धानि	संदब्धानि	२३०	१३
तारतारतर	तारतर	२२६	४
अशरीरिण्या	शर्रारिण्या	२३४	१
सार्वदिकत्वा	सार्वदिक्त्वा	२३६	२४
अक्षरपाठान्	अक्षरपादात्	२३८	२
रज्जुमल्ल	रज्जल्ल	२३८	४
दीर्घटयम्	दार्घटयम्	२३८	१०
योऽव्यक्त	ऽऽयक्त	२३८	२४
नामधेयं	मामध्येय	२३९	४
कांक्षतायाम्	कांतायाम्	२३९	२३
नैयायिक	नैयायक	२४१	१८
सत्त्व	सत्व	२४२	१९
लक्षणीय	लक्षणिय	२४२	३
पत्न्यादि	पत्यादि	२५२	३
वेदस्य गदे	वेदस्य गदेश्व	२५२	५
वाक्यार्थ:	वाक्यार्थं	२५२	२२

शुद्धम्	अशुद्धम्	पृ०	पं०
याप्रकार	प्रकार	२५४	९
निर्माण	निमाण	२५८	१२
विभेदतः	विभेतः	२६३	३
प्रवर्तकत्व	प्रतवर्कत्व	२६४	९
वृत्यन्तरस्य	वृस्यस्तरस्य	२६५	३
साहाय्येन	सहीप्येन	२६६	५
तेनैवनान्यथा	तेनैवन्यथा	२७२	६
त्यवोचाम	त्यवोचामः	२७३	१८
भागवत	भागवत्	२७६	५
एकादशाध्याय	एकाशाध्य	२७७	३
नैकदण्डस्य	दण्डस्यैकस्य	२७८	१०
स्ववृत्यन्नस्य	स्ववृत्यन्यस्य	२७९	७
स्थितेःप्रतिपत्तिः	स्थितिः प्रतिपत्ति	२७९	१७
स्मृतिपुराणादिषु	स्मृपुराणादिषु	२८०	१९
कालादीनाम्	कलादीनाम्	२८०	२४
मयथात्वेनुकल्पै	पयाथात्वेनुकल्पै	२८०	२४
लक्षणधर्महान्या	लक्षणमहान्या	२८१	४
ब्रह्मभावोभक्तेरपि	ब्रह्मभावभक्तेरपि	२८८	५
वाकीभी	वाकोभी	२९७	११
नरकस्त्वन्यथा	नरकंस्त्वन्यथा	२९८	११
भक्तान्‌ःजन्म	भक्तानाजन्म	३०४	११
भगवतोक्तेन	भगतोक्तेन	३०५	११
स्थिति	स्थित	३०६	१७
वाक्याच्चाबुद्धि	वाक्याच्चबुद्धि	३०६	६
परस्यमेते	परस्वमेते	३०७	१६
संशयादपगमे	संशयावनपगमे	३१३	४
भक्तिभावतः	भक्तिभावितः	३१३	९
स्वस्यवेदार्थ	स्वस्ववेदार्थ	३१३	१३
दवोचाम	दवोचामः	३१९	६
फलमुख्याधिकारः।	फलमुख्याधिकारः।	३२०	६
करणेननफलसिद्धिः	करणेनफलसिद्धिः	३२०	१२
भगवतिकृतं भवति	भगवतीकृतंभवति	३२०	१७
भगवदलंकरणम्	भवदलंकरणम्	३२१	३
परंनिद्यते	परंनिविद्यते	३२१	११

शुद्धम्	अशुद्धम्	पृ०	पं०
तदिदम्	तदितम्	३२१	१६
आत्माशब्दको	आत्माकूंशब्दको	३२७	१०
पापनाशहोजावेहीहै	मुक्तहोजावेहीहै	३२८	५
भगवानकेस्वरूपमें	भगवानकीस्वरूपमें	३२९	१५
राजाधिराजको	राजाधिराजका	३३०	२०
परुषम्	पुरुषम्	३३१	९
ष्याहारशुद्धौ	ष्याहारेशुद्धौ	३३३	२२
वयमिति	यवमिति	३३४	१५
प्रतिपत्ति	प्रतिपःत्ति	३३४	३०
पेक्षांपरित्यज्य	पेक्षपरित्यज्य	३३५	७
इत्यादिप्रमाणा	इयादिप्रमाणां	३३६	१०
सबजीव	पव जीव	३३६	१४
भिसंहितत्वात्	भिंहितत्वात्	३४१	२३
विस्तारस्यात्र	विसारत्वस्यात्र	३४१	२४
यह बात हमकूँ	याबातहमकूँ	३५०	५
लियेभी	लियेकभी	३५१	१४
नित्येतु	नित्येपि	३५३	९
मंन्त्रोच्चारणमात्रसोंस्त्रीपुत्र	स्त्रीपुत्र	३६२	१३
भजने	भजनं	३६६	२४
निवृत्ति	निवृत्त	३८१	७
पदार्थेन्यथा	पदार्थअन्यथा	३८८	१४
दुर्वेशास्तु	दुर्वेषांस्तु	३८९	२८
दृष्टफल	दृढफल	३९०	१३
जिननें	जिमतें	३९२	१
सार्वदिकत्वाद्येन	सार्वदिक्त्वाद्येन	३९६	२६
मविपक्कानि	मविपकानि	३९६	३१
वहाँसर्वात्मा	वहसर्वात्मा	३९८	११
एकडालसों	एकलसों	४००	१
रयिक्स्यपामा	रयिक्स्ययामाः	४०६	२६
शब्दस्यासहकारिसंपन्नस्य	शब्दस्यसहकारिसंपन्नस्य	४०६	२९
निकटवर्तीन्द्रियाणाम्	निकटवर्तिमिन्द्रियाणाम्	४०७	११
अवयुत्स	अवयुज्य	४०२	१३
करण	शब्दकरण	४११	२५
ऐसेशब्दसों	ऐसोंशब्दसों	३१२	२०

शुद्धम्	अशुद्धम्	पृ०	पं०
शरीरस्थजीव	शरीरजीव	४१५	५
कहेहै	कहावेहै	४१५	२२
देहसोंभिन्न	देहाभिन्न	४१३	२०
योग्यतानुसारेण	योग्यानुसारेण	४१९	१२
माक्षिपति	माक्षिपाते	४२०	९
तत्वभावात्	तत्वाभावात्	४२०	३१
वरणश्च	आवरणंच	३२१	२७
विचारेणासाधनम्	विचारेण साधमम्	४२२	१
योग्यतातश्चा	योग्यतश्चा	४२२	६
भवतोग्रन्थस्य	भगवतः	४३०	१६
सेवाभिरतामदीहाः	सेवाभिरतिर्मदीहाः	४३१	५
लोकप्रसादः	लोकप्रवाहः	४३१	१७
साधनसों	साधनों	४३३	२१
वहाँवर्णन	यहाँवर्णन	४३३	२३
प्रेमसेवासों	प्रेमसे वासों	४३४	८
याप्रेमसोंवशहोयवेमें	यावाक्यमें		



श्रीमद्वल्लभाचार्यविरचतनिबन्धस्य सर्वनिर्णयाख्यं द्वितीयं प्रकरणमारभ्यते ।

तत्त्वदीपानिबन्धः ।

पंचात्मकं द्विरूपश्च साधनैर्बहुरूपकम् ॥
स्वानन्ददायकं कृष्णं ब्रह्मरूपं परं स्तुमः ॥ १ ॥
अग्निहोत्रं तथा दर्शपूर्णमासः पशुस्तथा ॥
चातुर्मास्यानि सोमश्च क्रमात्पञ्चविधो हरिः २

तत्वदीपप्रकाशः ।

श्रीकृष्णाय नमः ॥ प्रमाणेन प्रमेयेन फलतः साधनेन च ॥ सर्वनिर्णयबोधाय द्वितीया प्रक्रियोच्यते ॥ तत्र प्रथमं वेदार्थरूपं भगवन्तं मंगलार्थं स्तौति ॥ पंचात्मकमिति ॥ अग्निहोत्रादिभेदेन पञ्चरूपत्वम् । तेषां प्रकृतिविकृतिभेदेन द्विरूपत्वम् ॥ उभयोरनेकरूपत्वं वक्तुं साधनैर्बहुरूपत्वमाह ॥ साधनैरिति ॥ सर्वेषां समुदायफलमाह ॥ स्वानन्ददायकमिति ॥ धर्मस्वरूपेणैव फलदानं भविष्यतीत्याशंक्येश्वररूपेणैव फलदानमित्याह ॥ कृष्णमिति ॥ उत्तरकाण्डार्थमाह ॥ ब्रह्मरूपमिति ॥ स्वानंददायकं कृष्णमित्यत्रापि तयो रूपयोरुत्तरं श्रेष्ठमित्याह ॥ परमिति ॥ स्तुमः स्तोत्रमेव यथाज्ञानं कुर्मो न तु स ज्ञायत इत्यर्थः ॥ १ ॥ पञ्चरूपाणि गणयति ॥ अग्निहोत्रमिति ॥ प्रमेयं निर्णीय हि बलं वक्तव्यम् । तच्च प्रमेयं द्विविधं प्रमाणानुरोधि स्वतन्त्रं चेति ॥ तत्राद्यन्निरूप्यते ॥ दर्शपूर्णमासावेकः "परमेष्ठिनो वा एष यज्ञ" इत्यत्र तयोरेकत्वनिर्णयात् ॥ पशुर्निरूढः ॥ चातुर्मास्यानि स्वतंत्राणि ॥ सोमोग्निष्टोमः ॥ एते क्रमेणैव कर्त्तव्याः ॥ एतेषां क्रियारू-

पत्वेन भगवत्प्रीतिसाधकत्वं न भगवत्वमित्याशंक्याह ॥ पंचविधो हरिरिति ॥ २ ॥

॥ आवरणभंगः ॥

श्रीकृष्णाय नमः ॥ करेण स्वीयानां हृदयमिव हैयङ्गवमयन्दधानः संप्रीणन्नमृतमधुरैर्बालचरितैः ॥ हसन्नल्पैर्दन्तैः करचरणजान्वञ्चनपरः शिशुः कृष्णोऽस्माकं दिशतु दृशमीशः स्वविषयाम् ॥ १ ॥ पूर्वप्रकरणे एतन्मतमज्ञात्वा सात्विका अपि हरिन्न सेवन्ते येऽपि सेवन्ते तेऽपि मतान्तरैरेव सेवन्त इति तन्निवारणार्थमयमुद्यम इति प्रतिज्ञाय प्रयत्नसाफल्याय "प्रपञ्चो भगवत्कार्यं" इत्यादिना जडजीवान्तर्यामिणां स्वरूपन्तेषां भगवदंशत्वं भगवत्स्वरूपसामर्थ्यं भगवतः परमफलत्वञ्चोक्त्वा भगवद्भजनमेव जीवानां परमफलावान्तरफलसाधनमिति तदेव जीवैः कर्त्तव्यमित्यत्ये सर्वेषां श्रुत्यादीनां पूर्वोक्तप्रमाणानां तदविरुद्धानामन्येषां यथार्हमभिधेयस्तात्पर्यगोचरश्चार्थ इति निर्द्धारितम् ॥ तदिदं मंदमध्यमानां हृदये तदा स्थिरीभवति यदा तेषां प्रमाणानामैदम्पर्यमुपपाद्योच्यते ॥ नत्वन्यथापि ॥ असम्भावनाविपरीतभावनाभ्यां व्युत्थानसम्भवात् ॥ व्युत्थानप्रकारस्तु पूर्वप्रकरणे जीवजडान्तर्यामिणां भगवदंशत्वन्तदभिन्नत्वं च यत्प्रतिपादितं तच्छ्रुत्यादिबलेनेति शब्दादेव सिद्धम् ॥ शब्दश्च मानान्तरविरोधे आदरणीयत्वन्नार्हति । न खलु प्रत्यक्षविरुद्धं श्रुतिशतैरपि निर्णेतुं शक्यते । नहि प्रत्यक्षतो निर्णीतोऽश्वः शब्दशतैरपि गोत्वेन प्रत्यायितुं शक्यते तस्मान्न तद्युज्यते ॥ किंचास्तिकानां श्रुत्यादौ प्रामाण्यनिर्धारे सत्यपि तदर्थस्यास्मदाद्यविषयत्वेन तदर्थनिर्णेतारः सर्वज्ञाः स्मृतिकारास्तन्निर्णयायाश्रयणीयाः । पूर्वप्रकरणोक्तन्तु तद्विरुद्धत्वादश्रौतमित्यपि संभाव्यत इत्याद्याकारः । अतस्तदुभयनिवृत्त्यर्थं द्वितीयप्रकरणमावश्यकमिति तद्व्याचिख्यासवः पूर्वप्रकरणविवृत्तिसमाप्तौ कृतायाः सर्वनिर्णयकथनप्रतिज्ञाया युक्तिसम्बन्धकथनमुखेन प्रकरणसंगतिमपि बोधयन्ति ॥ ॥ प्रमाणेनेत्यादि ॥ ॥ तथा च प्रमाणादिचतुष्करूपया युक्त्या ज्ञानादेर्मार्गस्य प्रापञ्चिकपदार्थस्य प्रमाणादेश्च स्वरूपयाथात्म्यनिश्चयात्मको बोधस्तेन चासंभावनादिनिवृत्त्या मन्दानां मध्यमानां च हृदये पूर्वप्रकरणोक्तार्थस्थैर्येण शास्त्रनिरूपणसाफल्यम् । मुख्यानान्तु योर्थः पूर्वमुत्पत्त्या निरूपितः सोत्रोपपत्त्या निरूप्यत इति स्थूणाखननवदार्ढ्यमित्येककार्यत्वं सङ्गतिः । प्रमाणादीनां यथासम्भवं साङ्गानां युक्तत्वेन प्रतिपाद्यत्वन्तेषाञ्च धर्माङ्गपदार्थादिस्वरूपबोधहेतुत्वन्तस्य चासम्भावनादिनिवर्त्तकत्वमिति सम्बन्धघटना च बोध्या । प्रमाणादिचतुष्केन निरूपणं तु चतुर्लक्षण्यनुसारित्वबो-

धनार्थम् ॥ किञ्चोक्तरीत्या असम्भावनाशुद्ध्ये तन्निवृत्त्यर्थं प्रमाणानांस्वबलाबलं निर्णेयम् ॥ तच्च प्रमाणस्वरूपादिनिर्णयाधीनमतः प्रमाणप्रकरणमावश्यकम् । ततस्तेन सिद्धे वेदादेर्बलिष्ठत्वे पुनराशङ्कान्तरमुदेति ॥ जीवादयस्त्रयोऽपि चेद्ब्रह्मांशास्तर्हि कुतस्तेषु तारतम्यमिति॥सर्वं चेद्ब्रह्माभिन्नन्तर्हि को विशेषो ब्रह्मणीति च तन्निवृत्त्यर्थं हेतुपूर्वं सर्वस्य स्वरूपनिरूपणं कर्त्तव्यमिति प्रमेयप्रकरणमावश्यकम् ॥ ततस्तारतम्यभावे वृद्धेऽपि श्रौतानां साधनान्तराणामपि विद्यमानत्वाद्भक्तौ कुत आधिक्यमिति शङ्काऽवतिष्ठते तन्निवृत्त्यर्थं सर्वेषां साधनानां फलतः सुखदुःखसाध्यतया च तारतम्यबोधनाय फलप्रकरणमप्यावश्यकम् ॥ तेन फलतः सुखसाध्यतया च भक्तेराधिक्ये सिद्धेऽपि यथैव वेदोक्तैर्मार्यादिकैः साधनैः फलं तथैव भक्त्यापि चेन्न कश्चिद्विशेष इति फलतो विशेषं वक्तुं साधनस्वरूपनिर्णयाय साधनप्रकरणमप्यावश्यकम् ॥ एवञ्चतुर्भिः पूर्वोक्ते दृढीकृते ततस्तन्निगमनं तेन सर्वनिर्णयबोध इति तदप्यावश्यकमित्यतोऽप्येवन्निरूपणमिति बोध्यम् ॥ एवमुपोद्घातप्रेक्षावतोऽभिमुखीकृत्य पूर्वप्रकरणे " वेदाः श्रीकृष्ण " इत्यादिना वेदादिशब्दात्मकस्य प्रमाणस्य तन्मध्येऽपि वेदस्य प्रथमोद्दिष्टत्वात्तस्य च सविषयत्वात्तत्प्रमेयं तत्स्वरूपादिकञ्च निर्णिनीषन्तो मङ्गलमाचरितुमवतारयन्ति ॥ ॥ तत्रेत्यादि ॥ ॥ तत्रेति सर्वस्मिन्निर्णेतव्ये । एतेन सर्वमूलभूतत्वाद्वेदस्य तदर्थ एव मङ्गलत्वेन प्रथममुपनिबन्धनीय इत्यौचित्यमपि दर्शितम् । तत्र सम्पूर्णस्य वेदस्य काण्डद्वयात्मकत्वात्प्रथमपादत्रयेणोक्तं पूर्वकाण्डार्थं विशदीकुर्वन्ति ॥ ॥अग्निहोत्रेत्यादि॥ ॥तेषामिति ॥अग्निहोत्रादीनाम्॥ ॥उभयोरिति ॥ ॥ प्रकृतिविकृतिरूपयोः ॥ ॥ साधनैरिति ॥ ॥ शाखाभेदेन नानाप्रकारोक्तैरितः ॥ तथाच पूर्वमीमांसायां " अथातो धर्मजिज्ञासा " इति शास्त्राधिकरणे वेदार्थरूपधर्मजिज्ञासाम्प्रतिज्ञाय को धर्म इत्याकाङ्क्षायां " चोदनालक्षणोऽर्थो धर्म " इति समनन्तराधिकरणे चोदनालक्षणपदेन लौकिकमर्थपदेनानर्थभूतमेवादिकं श्येनादिकञ्च व्युदस्योभयधर्मविशिष्टो धर्मो द्वादशलक्षण्याम्प्रकृतिविकृतिभेदेन द्विरूपोऽग्निहोत्रादिरश्वान्तको यज्ञस्वरूपो विचारितस्तेन स एव पूर्वकाण्डार्थः । तत्रैव शाखान्तराधिकरणे किञ्चित्साधनभेदेन शाखान्तरीयमाणाङ्गलक्षणस्वरूपसंस्थानतोऽपि गुणान्वितोपनिषत्पुरुषवत्त्वेन प्रतीयमानैः स एव शास्त्रार्थ इति विचारितम् ॥ तेन काण्डार्थविशेष एव शास्त्रार्थ इति भावः । एवं प्रमाणप्रमेयसाधनैः पूर्वकाण्डार्थ उक्तः ॥ एतमेव फलेन वक्तुमाहुः । ॥ सर्वमित्यादि ॥ ॥ स्वानन्ददायकमिति ॥ ॥ स्वानिपश्वादीन्यानन्द आनन्दसुखं तयोर्दायकम् ॥ एतावान् पूर्वमीमांसासिद्धोऽर्थः । उत्तरविचारे तु

" एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति " इति श्रुतेः ॥ स्वांशो
य आनन्दस्तस्य दायकमित्यर्थः ॥ इति फलतः स उक्तः ॥ फलमत उपपत्तेरिति
न्यायमनुसृत्य जैमिनीयमतनिराकरणायाहुः ॥ ॥ धर्मेत्यादि ॥ ॥ काण्ड-
भेदायाहुः॥ ॥उत्तरेत्यादि॥ ॥ काण्डद्वयस्यैकवाक्यत्वायाहुः ॥ ॥ स्वान-
न्देत्यादि ॥ ॥ अत्रापीति ॥ ॥ उत्तरकाण्डे । तथा च उत्तरकाण्डे ब्रह्मरूपेण
प्रतिपाद्यत्वे फलदानमीश्वररूपेणैव नतु ज्ञानादिरूपेण पूर्वोक्तन्यायात् ।
तेन काण्डभेद एकवाक्यत्वं चेत्यर्थः ॥ उभयो रूपयोर्वेदार्थत्वाविशेषेऽपि
तारतम्यज्ञापनायाहुः ॥ ॥ तयोरित्यादि ॥ ॥ उत्तरस्योत्कृष्टत्वे गमकमाहुः।
॥ स्तुम इत्यादि ॥ ॥ " यतो वाचो निवर्तन्ते " इत्यादिश्रुतेस्तथेत्यर्थः ॥
एवं मङ्गलमुखेन सर्ववेदार्थकथनात् प्रमाणतो निर्णय उक्तः । अतःपरं प्रमेयेणैत-
न्निर्णिनीषन्त आहुः ॥ १ ॥ ॥ पञ्चेत्यादि ॥ ॥ पूर्वोक्तप्रतिज्ञासिद्ध्यर्थमाहुः
॥ प्रमेयमित्यादि ॥ ॥ हिर्हेतौ यतः प्रमेयनिर्णयाभावे तद्बलनिर्णयाभा-
वस्तदभावे सर्वनिर्णयाभावः । अतोहेतोः ॥ प्रमाणानुरोधीति ॥ ॥ शब्दै-
कसमाधिगम्यं शब्दोक्तसाधनाभिव्यंग्यमिति यावत् ॥ ॥ स्वतन्त्रमिति ॥ ॥
तद्व्यतिरिक्तम् ॥ ॥ निरूप्यतइति ॥ ॥ इत आरभ्य विचार्यत इत्यर्थः ॥
तत्र " यावज्जीवमग्निहोत्रं जुहोति " इत्यादावेकत्वसंख्यायाः स्फुटत्वेऽपि "दर्श-
पूर्णमासाभ्यां स्वर्गकामो यजेत " इति वाक्येन दर्शपौर्णमासयोर्द्वित्वात्पंचत्वसं-
ख्याया विरुद्धत्वमाशङ्क्य परिहरन्ति ॥ ॥ दर्शेत्यादि ॥ ॥ तथाच यथा
" यदाग्नेयोऽष्टाकपालोमावास्यायां पूर्णमास्यां चाच्युतो भवति । तावब्रूतामग्नी-
षोमावाज्यस्यैवोपांशुपूर्णमास्यां यजन्निति । ताभ्यामेतमग्नीषोमीयमेकादशकपालं
पूर्णमासे प्रायच्छत् । ऐन्द्रं दध्यमावास्यायामैंद्रं पयोमावास्यायाम् " इति षड्वा-
क्योक्तानां यागानांदर्शपूर्णमासाभ्यामिति श्रौत द्विवचनानुरोधादेकैकस्य त्रिकरू-
पतामङ्गीकृत्य द्वावङ्गीक्रियेते ॥ तथैष यज्ञ इत्येकवचनानुरोधादुभावेक इत्यंगी-
क्रियत इति न संख्या न्यूनेत्यर्थः ॥ अत एवं द्वितीयस्य तृतीयपादे दाक्षाय-
णाधिकरणे " दाक्षायणयज्ञेन सुवर्गकामो यजेत " इति दर्शपूर्णमासप्रकरणी-
यवाक्येऽपि " द्वे पौर्णमासे यजेत द्वे अमावास्ये " इत्यादिवाक्यशेषोक्तप्रकारे
णावर्त्यमानावपि दर्शपूर्णमासावेकवचनेनैव निर्दिष्टाविति युज्यते । वायव्यादयो-
ऽनेके पशुयागाः सन्ति तेभ्यः परिछेत्तुमाहुः ॥ ॥ निरूढ इति ॥ ॥ निरूढत्वेन
यः प्रसिद्धः स इत्यर्थः ॥ चातुर्मास्यानि सोमाङ्गभूतान्यपि संतीति तेभ्यो विवक्तु-
माहुः ॥ ॥ स्वतंत्राणीति ॥ ॥ चातुर्मास्यानि च वैश्वदेववरुणप्रघाससाकमे-
धसुनासीरीयाख्यचतुःपर्वात्मकानि ॥ तान्यपि प्रतिपर्वसु नानायागविशिष्टान्येको

यागः ॥ ॥ सोमोऽग्निष्टोम इति ॥ ॥ एवं सोमपदस्य यागनामत्वबोधनेन सोमेन यजेतेत्यत्र न मत्वर्थलक्षणेति बोधितम् ॥ नच द्रव्यलाभाभावः शंक्यः ॥ सोमसंस्कारादिचोदनार्थापत्त्यैव तत्प्राप्तेः ॥ यद्वा सोमोऽस्मिन्नस्तीति सोमवानिति मतुबर्थे "अर्शआदिभ्योऽच्" इत्यनेनाचि कृते सोम इति भवति ॥ एवं योगसिद्धेः प्रसिद्ध्या रूढेरपि निश्चयान्निर्मथ्य न्यायेन योगरूढः सोमशब्द आदरणीयः ॥ एवं च "यदग्निष्टोमः सोमः पुरस्तात्स्यादुक्थ्यं कुर्वीत तथान्यत्रापीति न काप्यनुपपत्तिरित्यर्थः ॥ यद्युक्थ्यः स्यादतिरात्रं कुर्वीत" इति श्रुतिरपि संगता भवति ॥ अग्निष्टोमोक्थ्यादीनां संस्थात्वेन संस्थावतो यागस्य नामकथनस्यावश्यकत्वात् ॥ "देवा वै यद्यज्ञम कुर्वन्त तदसुरा अकुर्वन्त ते देवा एव तं महायज्ञमपश्यन्" इत्युपक्रम्य "आग्नेय एवं विद्वान् सोमेन यजेत" इति विधानदर्शनस्यैवमेव साम अस्याञ्चेति ॥ ॥ क्रमेणेति ॥ ॥ यथासंभवं श्रुतेन कल्पाद्यनुमितेन वेत्यर्थः ॥ सर्वैवं बोध्यः । अग्निसिद्धिमन्तरेण यागासम्भवात्प्रथमत आधानं कर्त्तव्यम् ॥ ततः सायंप्रातरग्निहोत्रं जुहुयादिति वाक्यात्सायमग्निहोत्रारम्भः ॥ होमश्च यावज्जीववाक्यान्नित्यः ॥ उक्तवाक्यान्नियतकाल इत्यादि बोध्यम् ॥ ततो दर्शपूर्णमासौ क्रमेण । यदि मुमुहूर्त्तादिवशात्पूर्णमासः प्रथममापतेत तदा सारस्वतौ होमौ अपक्षयपरिहारार्थं विधाय पूर्णमासः कार्यस्ततो दर्शः ततो दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति श्रुत्या सोमप्राप्तावप्यनुष्ठाने कल्पस्य नियामकत्वात्तत्र चातुर्मास्यपशुसोमक्रमदर्शनात्तदुभयानन्तरं सोमः । कात्यायनशांखायनादिकल्पे चातुर्मास्यानन्तरं पशोर्दर्शनेऽपि "ते देवा एतं महायज्ञमपश्यन्" इति श्रुतावसुरेभ्यो गुप्ततयानुष्ठानबोधने "पौर्णमासं यज्ञमग्नीषोमीयं पशुमकुर्वत, तदाशं यज्ञमाग्नेयं पशुमकुर्वत, वैश्वदेवं प्रातःसवनमकुर्वत, वरुणप्रघासान्माध्यंदिनः सवनः साकमेधान्पितृयज्ञाः स्त्रियंबकाः स्तृतीयसवनमकुर्वत" इति पौर्णमासादिकं बहिःप्रसार्याग्नीषोमीयादिपश्वोर्वैश्वदेवादिकं प्रसार्य प्रातरादिसवनानां करणानुवादाद्दर्शपूर्णमासपश्वोश्चातुर्मास्यसोमयोश्च सामीप्यप्रतीतेः पश्वनन्तरं चातुर्मास्यप्रतीतेश्च तथा क्रमः ॥ अतएवापस्तम्बेन कल्पसूत्रे पशुबंधं व्याख्याय तदनन्तरं चातुर्मास्यानि व्याख्यातानि ॥ अतोऽसुरेभ्यो गोपनेऽभिप्रेते तथाक्रमः॥ अनभिप्रेते त्वन्यः। अतएव श्रीभागवते पंचमस्कन्धे भरतचरिते श्रद्धया तनाग्निहोत्रदर्शपूर्णमासचातुर्मास्यपशुसोमानां प्रकृतिविकृतिक्रम उच्यते । अतस्तत्तत्कल्पशिष्टाचाराभ्यां व्यवस्था द्रष्टव्या । अत्र प्रमेयनिरूपणस्य सर्वसाधारणत्वेन क्रमोक्तेरपि तथात्वात् ॥ ॥ एतेषामित्यादि ॥ ॥ अग्निहोत्रादीनामिज्यारूपत्वेनेज्यप्रीतिसाधकत्वं युक्तं न भगवत्त्वम् ॥ इज्यायामिज्यरूपत्वस्य प्रत्यक्षविरु-

द्धत्वादित्यर्थः ॥ ॥हरिरिति॥ ॥ "यज्ञो वै विष्णुः" इतिश्रुतेः "मांविधत्तेऽभि धत्ते माम्" इत्येकादशे भगवद्वाक्याच्च सिद्धे यागस्य भगवत्त्वे तद्विरुद्धं प्रत्यक्षं नादरणीयमित्यर्थः ॥ नचाग्निहोत्रस्य जुहोति चोदनासिद्धत्वेन होमत्वात्पञ्चानां न भगवत्त्वमिति शंक्यम् । "यस्य भूयांसो यज्ञक्रतव" इत्यत्र देवतोद्देशेन हविस्त्यागस्यैव यज्ञनामकत्वेनांगीकारात् ॥ नच जुहोतेस्त्यागार्थत्वे मानाभावः । तदुक्तेः "श्रवणाज्जुहोति रासेचने स्यात्" इति जैमिनिसूत्रस्यैवात्र मानत्वात् । भाष्यकारादिभिरपि तथांगीकारात् । नवीनैरपि यजतिजुहोत्योः प्रक्षेपविशिष्ट-त्यागार्थत्वं तुल्यमङ्गीकृत्य प्रक्षेपस्य यजनावङ्गत्वं जुहोतौ प्राधान्यमिति विशेषा-भ्युपगमाच्च ॥ अतो हविस्त्यागरूपेण यज्ञत्वस्याग्निहोत्रेऽप्यक्षतत्वम् । स एष यज्ञः । पंचविधोग्निहोत्रं दर्शपूर्णमासौ " इति मीमांसकप्रसिद्धश्रुतेश्चेति ॥ २ ॥

व्रजभाषाटीका ।

प्रथम शास्त्रार्थप्रकरणमें सात्विक दैव जीवनकी भगवत्सेवामें प्रवृत्ति होयवेकेलिये जडजीवअन्तर्यामिनको स्वरूपवर्णन कियो तथा भगवान्को भजनही ऐहिकपारलौकिक फलको देवेवारो है तथा उत्तमाधिकारीनकों भगवान्ही फलरूप माननेचाहिये यह बात वेदभागवतादिग्रंथनसों सिद्धकरी, तासों उत्तमाधिकारी तो भगवत्सेवामें प्रवृत्त होजांयगे परन्तु मन्दमध्यमाधिकारीनके हृदयमें यह सिद्धान्त स्थिरकरवेकेलिये प्रमाणप्रमेयफलसाधनके द्वारा ज्ञानादिकमार्गनको तथा जगत्के पदार्थनको यथार्थस्वरूप-निश्चयार्थ सर्वनिर्णयप्रकरणनामसों प्रसिद्ध जो दूसरो प्रकरण है ताकों प्रारम्भ करेहैं। तहाँ कितनेक वादी शब्दप्रमाणवेदादिकनकी अपेक्षा प्रत्यक्षप्रमाणकूं बडो माने हैं उनके सन्देह दूरकरवेकूं प्रमाण-नको बलाबलरूप निश्चितकरवेकेलिये प्रथम प्रमाणप्रकरणको प्रारम्भ करतेभये मङ्गलहोयवेकेलिये वेदार्थरूप भगवानकी स्तुति करें हैं ॥ अग्निहोत्र दर्शपूर्णमास पशु चातुर्मास्य सोम इन भेदन-करके पांचरूपवाले प्रकृतिविकृतिभेदकरकें दोरूपवाले तथा अनेक शाखोक्तसाधननके भेदकरकें बहुतरूपवाले तथा स्वरूपानन्दके

देवेवारे ब्रह्मरूप पर जे श्रीकृष्ण हैं उनकी स्तुति करूं हुं ॥ उनकी अपने ज्ञानके अनुसार स्तुतिही होयसकेहै ॥ याश्लोकमें स्वानन्द-दायकपदकरके स्वपशुपुत्रादिक आनन्द अर्थात् आत्मसुखके देवेवारे श्रीकृष्णचन्द्रकों बताये हैं तासों धर्मरूपसों फलदान नहीं होय है किन्तु ईश्वररूपकरकेही आप फलदे हैं, ऐसेही उत्तरकाण्ड-मेंभी ज्ञानादिरूपमों फल नहीं मिले है किन्तु ईश्वररूपसोंही फल-दान होवेहै । इनदोनोंरूपमें उत्तरकाण्ड वेदान्तप्रतिपाद्य जो रूप है वह श्रेष्ठहै, पहले पांचरूपवाले भगवानकूं बताये उन पञ्चरूपनकी दूसरेश्लोकमें गणना करी है ॥ १ ॥ प्रमेयको निर्णय करके वाको बल कहनाचाहिये । वह प्रमेय दोप्रकारको है एक प्रमाणके अनुसार प्रमेय होय है, एक स्वतन्त्रप्रमेय होयहै, तहां प्रमाणके अनुसार जो प्रमेय है ताको निरूपण करें हैं । अग्निहोत्र भगवान्को प्रथमरूप है, याकूं वेदमें जहांतक जाय तहांताई करनोलिख्यो है । दर्शपूर्णमास भगवानको दूसरो रूप है । निरूढपशुयज्ञ आपको तीसरोरूप है । वै-श्वदेवादिचारों पर्वरूप जे चातुर्मास्य हैं ते भगवान्को चौथोरूप है । सोम जो अग्निष्टोमयज्ञ है वह भगवानको पंचमरूप है ॥ या क्रम-सोंही इनयज्ञनकों कियेजायहैं । प्रतिदिन अग्निहोत्र प्रतिमास दर्श-पूर्णमास छःमहीनामें पशुयज्ञ वर्षकेवर्ष सोमयज्ञ करनोलिख्यो है ॥ शंका—ये यज्ञ तो क्रियारूप हैं इनकरके भगवान्की ईज्या अर्थात पूजा करीजाय तो भगवान् प्रसन्न होतेहोंयगे तासों भग-वानकी प्रीतिके साधक इनयज्ञनकूं कहनोचाहिये इनकूं भगवान्-को रूप कैसे समुझलेवें ॥ उत्तर—पंचविधो हरिरिति ॥ " यज्ञो वै विष्णुः " ॥ " मां विधत्तेऽभिधत्ते माम् " ॥ इत्यादिश्रुति भागव-तादिवाक्यनमें यज्ञको भगवद्रूपता लिखी है तासों वेदादिविरु-द्धमत आदरणीय नहीं है ॥ २ ॥

तत्साधनं च स हरिः प्रयाजादि स्रुगादि यत् ॥ प्राकृतं रूपमेतद्धि नित्यं काम्यन्तु वैकृतम् ॥ ३ ॥ ज्ञानिनस्तदभिव्यक्तौ कर्तुर्मोक्षः क्रमाद्भवेत् ॥ अन्यथा स्वर्गसौख्यन्तु द्विरूपं तत क्रमाद्भवेत् ॥ ४ ॥

तत्त्वदीपप्रकाशः ।

साधनसाध्यरूपता नैकस्येत्याशंक्य सर्वत्र भगवत एव द्विरूपत्वमिति वक्तुमाह ॥ **तत्साधनञ्च स हरिरिति** ॥ साध्यरूपःस एव हरिः साधनरूपोऽपि ॥ चकारात्साधनसाधनरूपोपि ॥ साधनद्वैरूप्यन्निरूपयन्ति ॥ **प्रयाजादिस्रुगादीति** ॥ यत्किञ्चित् तत्फलोपकारि स्वरूपोपकारि वा नातोन्यदस्तीत्यर्थः ॥ गणितानां नाम्ना प्रसिद्धानां प्रकृतिरूपत्वमित्याह ॥ **प्राकृतमिति** ॥ एतदेव नित्यं कर्म्म नित्यकाम्यव्यवस्था एषैव ॥ यद्यावदुक्तं कर्त्तव्यं नियतफलं तन्नित्यम् । नतु फलरहितम् । अकरणे राजदण्डवत् प्रत्यवायः ॥ नहि राजसेवाय फलाभावः ॥ एतत्प्रतिपादकत्वमेव मुख्यतया वेदस्य ॥ द्वितीयं रूपमाह ॥ **काम्यन्तु वैकृतमिति** ॥ कामनायामेव फलदं विकृतत्वात्स्वभावतो न नित्यफलं प्रयच्छति ॥ ३ ॥ एवमुद्देशतो रूपद्वयं निरूप्य फलं निरूपयति ॥ **ज्ञानिन इति** ॥ भगवदानन्दरूपं फलं ब्रह्मज्ञानयुक्तस्य यथोक्तकर्म्मकर्त्तुरेव । तत्र हेतुः ॥ तदभिव्यक्तौ सत्यां षोढा विहितश्चेदभिव्यक्तो भवति तदैव फलं प्रयच्छतीति भावः ॥ मर्यादाया क्रममोक्ष एव फलं सद्योमुक्तिस्त्वतिकृपया ॥ ब्रह्मज्ञानाभावे तु पञ्चात्मकात् भगवतः स्वर्गसुखं भवति भिन्नवाक्येष्वपि फलत्वेन निरूपणात् ॥ ४ ॥

आवरणभंगः ।

साधनेत्यादि ॥ ॥ पूर्वमानन्दस्यैव फलत्वेन कथनात्प्रीतेर्यापारत्वमेव वाच्यम् । आनन्दश्च भगवान् यज्ञश्च स एवेति साधनसाध्यरूपता एकस्य हरेर्न वक्तुं शक्येत्याशंक्य सर्वत्र यागविषये प्रपञ्चादौ च भगवत एव तथात्वमिति वक्तुं सांप्रतं यागविषये तथात्वमाहेत्यर्थः ॥ ॥ साध्यरूप एवेत्यादि ॥ ॥ साधनानामपि यागप्रकरणएवश्रावितत्वेन पुरुषसूक्ते तद्विवरणरूपद्वितीयस्कन्धाध्याये च तेषां भगवदवयवत्वस्य निर्णीतत्वेन यथैकस्यैव रूपभेदाद्विरूपत्वं तथान्यत्रापीति न काप्यनुपपत्तिरित्यर्थः । एवं पञ्चात्मकत्वं सपरिकरं विवृतम् ॥ अतःपरं द्विरूपत्वं विवरीतुमाहुः ॥ ॥ गणितानामित्यादि ॥ ॥ अग्निहोत्रमित्यादीनां संख्यातानां नाम्ना प्रसिद्धानां कौण्डपायिनामयनेति वायव्यपशुरित्येवं नामान्तरादिना न किन्तु स्वनाम्ना प्रसिद्धानां प्रकृतिरूपत्वं निखिलमङ्गजातं यत्र निरूप्यते सा प्रकृतिस्तादृशत्वमोहत्यर्थः ॥ ननु नित्यकाम्यभेदेनापि द्वैरूप्यं दृश्यत इति तत्कुतो नोच्यत इत्याहुः ॥ ॥ एतदेवेत्यादि ॥ ॥ तथाच पर्यायमात्रमेव भिद्यते नतु स्वरूपमित्यर्थः ॥ ॥ एषेति ॥ ॥ उच्यमानप्रकारिका । प्रकृतेः कथन्नित्यत्वमित्याकाङ्क्षायां नित्यलक्षणकथनमुखेनोत्तरमाहुः ॥ ॥यदित्यादि॥ ॥ यत् यावदुक्तं तत्प्रकरणे कृत्स्नमुक्तमङ्गजातं कर्त्तव्यं ॥ यत्र तादृशं नियतफलं अवश्यंभाविफलं यस्य तादृशं च तन्नित्यमित्यर्थः॥एकदेशिभिर्नित्ये फलन्नाद्रियत इति तन्निराकर्तुमाहुः॥ ॥ नान्वित्यादि ॥ ॥ नन्वकरणे प्रत्यवायजनकत्वमेव नित्यत्वमस्तु "आश्विनं धूम्रललाममालभेत यो दुर्ब्राह्मणः सोमं पिपासेत" "वीरहा वा एष देवानां योग्निमुद्वासयते" इत्यादिष्वकरणोद्वासनादिना दौर्ब्राह्मण्यवीरहत्यादिश्रावणात् । नतु फलवत्त्वमपि।काम्ये व्यभिचारादित्यत आहुः ॥ ॥अकरण इत्यादि ॥ ॥ अयमाशयः ॥ वेदानां भगवन्निश्वासरूपत्वात्प्रवर्त्तको विधिस्तदाज्ञारूपः ।"श्रुतिस्मृती ममैवाज्ञे" इति स्मृतेश्चायजधातोः पूजार्थत्वाद्यागः पूजारूपः । ईज्यश्च भगवानेव । "यज्ञेन यज्ञमयजन्त देवाः" । "मां यजेताहरेत् क्रतून्" । "नतु श्रौतेन पशुना मां यजेत वनाश्रमी" इत्यादिश्रुतिस्मृतिभ्यः ॥ एवं सति यागो भगवदाज्ञप्ततत्पूजारूप इति सिद्ध्यति । तथासति तदकरणे प्रत्यवायः करणे फलं चोक्तन्यायेन युक्तमिति ॥ नच यत्र यजतिर्नश्रुतस्तत्र पूजारूपत्वव्यभिचार इति शंक्यम् । "ईजे नु यज्ञं विधिवदग्निहोत्रादिलक्षणैः ॥ प्राकृतैर्वैकृतैर्यज्ञैर्द्रव्यज्ञानक्रियेश्वरम् ॥" इति दशमस्कन्धीयवाक्येन तादृशैरन्यैश्च सर्वेषां पूजात्वनिर्णयात् ॥ एवमेव स्मार्त्तकर्मण्यपि बोध्यम् ॥ "सन्ध्योपास्त्यादि

कर्माणि विधिना नोदितानि मे ॥ पूजां तैः कल्पयेत्सम्यक्" इति तत्रापि तथावाक्यात् ॥ नन्वेवंसति काम्येऽपि यजत्यादिश्रवणेनोक्तरूपतायास्तुल्यत्वात्तदकरणेऽपि प्रत्यवायापत्तिः । नचेष्टापत्तिः कर्तुं शक्या । तथावाक्याभावात् । अतः पूर्वोक्तमसंगतमित्याशंकायामाहुः ॥ ॥ एतदित्यादि ॥ ॥ इदमनुपदमेव व्युत्पाद्यम् । एवञ्चाकरणे प्रत्यवायजनकत्वे सति नियतफलत्वं नित्यत्वमित्येव नित्यलक्षणम् । यावदुक्तेत्यादि तु प्रकृतित्वबोधनायेति बोध्यम् ॥ काम्यन्तु वैकृतमित्यत्र वैकृतमित्युद्देश्यम् ॥ ॥ फलन्निरूपयतीति ॥ ॥ "जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे" । "कर्मणा मृत्युमृषयो निषेदुः प्रजावंतो द्रविणमिच्छमानाः । अथापरेमनीषिणः कर्मभ्योऽमृतत्वमानशुः" इत्यादिश्रुतिभ्यो "ज्ञात्वाऽज्ञात्वा च कर्माणि जनोऽयमनुतिष्ठति ॥ विदुषः कर्मसिद्धिः स्यात्तथा नाविदुषो भवेत् ॥" इति भगवद्वाक्याच्चाधिकारिभेदात्फलभेद इत्यधिकारिणं व्यापारं कर्मस्वरूपञ्च ज्ञापयितुं नित्यानां यागानां फलं निरूपयतीत्यर्थः । ॥ भगवदानन्देति ॥ ॥ एतेन सिद्धान्ते मोक्षस्वरूपमधिकारी चेति द्वयं विवृतं ज्ञेयम् ॥ एवञ्च भवाय नाशायेति पञ्चमस्कन्धे प्रियव्रतं प्रति ब्रह्मवाक्येन देहयोगस्य भगवद्विचारितकार्यार्थत्वादेते ब्रह्म ज्ञात्वा निष्कामा अपि कर्म कुर्वन्त्वित्येवंरूपेण ये विचारितास्तेषामिदम्फलम् । अयं चार्थ उत्तरमीमांसायां साधनाध्यायतुरीयपादे जैमिनिमतेन सिद्ध्यति ॥ 'तत्र पुरुषार्थोऽतः शब्दादिति बादरायणः' इति सूत्रे केवलविद्यायाः वेदनविषयात्केवलाद्भगवत एव वा पुरुषार्थो मोक्षादिर्नतु कर्मणः "ब्रह्मविदाप्नोति परं नायमात्मा" इत्युपक्रम्य "यमेवैष वृणुते तेन लभ्यः" इत्यादिशब्दादिति सिद्धान्तमुक्त्वा शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिरित्यादिसूत्रेषु विद्यायाः कर्मांगत्वात्कर्मणो वा विद्यासमुच्चितात्कर्मणो वा पुरुषार्थ इति जैमिनिमतस्य दर्शितत्वात् ॥ ॥ हेतुरिति ॥ ॥ व्यापारः ननु ज्ञानाभावेऽपि यागत्वस्याविशिष्टत्वाज्ज्ञानिनं प्रत्येव तदभिव्यक्तौ को हेतुरित्यत आहुः ॥ ॥ षोढेत्यादि ॥ ॥ औपनिषदं शाब्दमग्निहोत्रादि पञ्चकम्पूर्वकाण्डोक्तमित्येवं षोढा विहितश्चेत्तदा वेदार्थरूपो भगवान् व्यक्तो भवति "यथा विश्वसृजः प्रथमाः सत्रमासत" इति सहस्रसमे सत्रे "ततो ह जज्ञे भुवनस्यगोपाः । हिरण्मयः शकुनिर्ब्रह्मनामा" इत्यत्र तदैव फलं मोक्षरूपं प्रयच्छति नान्यथेत्यर्थः ॥ नन्वभिव्यक्तश्चेत्सद्य एव मोक्षे कुतो न प्रयच्छतीत्यत आहुः । ॥ मर्यादायामित्यादि ॥ ॥ एवञ्च पूर्वकाण्डेऽपि विराजमभिसम्पद्यते । अमृतीभवतीत्येवं जातीयकेषु वाक्येषु यो मोक्ष उक्तः सोऽपि ज्ञानसाहित्य

एवेति ज्ञेयम् । क्रमिकत्वं चार्चिरादिमार्गबोधकश्रुतिभ्य इति च तत्प्रकारस्त्वग्रे साधनप्रकरणे सर्वं जानन्नित्यारभ्य तथाविधानित्यन्तेन स्फुटीकरिष्यते॥ननु यदि मर्यादायां क्रममुक्तिरेव तदा सद्योमुक्तिर्योगादिनापि न स्यात् । मर्यादायास्तत्रापि तुल्यत्वात् । तथाच तद्बोधकवाक्यविरोध इत्यत आहुः ॥ ॥ अतिक्रूपयेति ॥ ॥ तथाच वाक्यानि पुष्टिमार्गपराणीति न विरोध इत्यर्थः ॥ एवमुत्तमाधिकारिणां फलमुक्त्वा मध्यममन्दयोः क्रमेण फलमाहुः ॥ ॥ ब्रह्मेत्यादि ॥ ॥ ॥ भिन्नवाक्येष्विति ॥ ॥ ज्ञानमन्तरेण यत्र केवलो यागो बोध्यते तादृशेषु स्वर्गकामादिवाक्येषु । तथाच तदन्यथानुपपत्त्या मध्यमादेरपि फलमङ्गीक्रियत इत्यर्थः ॥ एवञ्च द्विरूपं तत्क्रमाद्भवेदित्यत्र अधिकारिक्रमादित्यर्थो बोध्यः ॥४॥

व्रजभाषाटीका ।

साध्यरूप तथा साधनरूप तथा साधनके साधनरूपभी हरिही हैं क्योंकि "यज्ञेन यज्ञमयजन्त देवाः" या मन्त्रमें तथा यामन्त्रके विवरणरूप "पुरुषावयवैरेते संभाराः संभृता मया" ॥ इत्यादि भागवतद्वितीयस्कन्धश्लोकमें साध्यसाधनरूपता भगवानकीही वर्णनकरीहै। साधन दोप्रकारके होवे हैं, प्रयाजादिक तथा स्रुकआदि ॥ फलको अथवा स्वरूपको उपकारकरिबेवारो जो कोई पदार्थ होय वासों साधन कहनो। गिनेभये अग्निहोत्रादिक जे पाँच हैं ये प्रकृतिरूप कहावेहैं इनमेंही नित्यकर्म कहेहैं । नित्यकर्म वाहीसों कहे हैं जो कर्म वेदमें जितनो सम्पूर्ण कह्योहोय तितनो समग्र करनोपडे तथा जाको फल अवश्य होनोहोय और जैसें राजाकी आज्ञा नहिं करिवेवारेकूँ राजा दण्ड देतहैं ऐसेंही जा कर्मके नहीं करिवेमें प्रायश्चित्त लगनोहोय यह नित्यकर्मको लक्षणहै। यहाँ फलरहितकर्मसूं नित्यकर्म नहिं कहे हैं. जैसें राजसेवामें फलको अभाव नहिं होय तैसें नित्यकर्मको फलभी अवश्य होयहीहै॥ वेदभी मुख्यताकरिकें नित्यकर्मकोही प्रतिपादन करे हैं, जो काम्यकर्म है वाहीसों विकृति कहे हैं. काम्यकर्म है सो कामना होय तो

फल देहै स्वभावसों नित्यफलकूँ नहिदेहै। याप्रकार उद्देशसों दोनों-रूपनको निरूपण करकें फलको निरूपण करें हैं ॥ ३ ॥ ज्ञानिन इति ॥ उत्तमाधिकारी जो ब्रह्मज्ञानवालो निष्काम होयकै वेदोक्त यज्ञादिकर्मकूं यथार्थ करेहै वाकूं भगवान्के स्वरूपानन्दकी प्राप्ति होवेहै. अर्थात् उपनिषदनको उक्त जो ज्ञान तथा अग्निहोत्रादिक पञ्चसाधन ये ६ पदार्थ यथार्थ सिद्धहोंय तब यज्ञको आधिदैविकरूप प्रकटहोय तबही जीवकूं भगवदानन्दरूपफलकी प्राप्ति होय, क्योंकि मर्यादामें क्रममोक्ष है सोई फल है, सद्यमुक्ति हैतो अत्यन्त कृपासों होय है। ब्रह्मज्ञानविना तो अग्निहोत्रादि पञ्चात्मक भगवान्सों स्वर्ग-सुखकी प्राप्ति होवेहै. वो स्वर्ग दोप्रकारको है ॥ ४ ॥

वाक्यशेषादात्मसुखं प्रसिद्धेर्लौक उच्यते॥यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्॥ अभि-लाषोपनीतश्च तत्सुखं स्वःपदास्पदम् ॥ ५ ॥

तत्त्वदीपप्रकाशः ।

स च स्वर्गो द्विविध इत्याह ॥ वाक्यशेषादिति ॥ सुष्टु अर्ज्यत इति स्वर्गः । सत्वाकारान्तःकरणे सर्वेहानिवृत्तौ यदात्मसुखं प्रकटी-भवति तदग्निहोत्रादिसाध्यम् ॥ सर्वदेवानामधिकृतानान्तुष्टावाध्यात्मि कत्वे यागस्य जाते आत्मानन्दः प्रकटो भवति ॥ एतदभावे भौ-तिकत्वे स्वर्गलोको भवतीत्यर्थः ॥ प्रसिद्धिर्लौकिकी ॥ वाक्यशेषमा-ह ॥ यन्न दुःखेनेति ॥ स्वर्गकाम इति सर्वत्र स्वर्गशब्दार्थः सन्दि-ग्धः ॥ संदिग्धेषु वाक्यशेषादिति ॥ वाक्यशेषः शाखान्तरे प्रसिद्धः ॥ दुःखानुभवसहितः सुखानुभवो लौकिकः स्वर्गः ॥ अन्यथा अलौ-किकत्वात्सुखानुभवश्चानन्तरमेव कालेन ग्रस्यते ॥ त्रिक्षणावस्थायित्वान्न तथा वैदिकः ॥ लौकिको ह्यभिलाषानन्तरम्प्रयत्नसम्पाद्यः ॥ वैदि-को न तथा ॥ ५ ॥

आवरणभंगः ।

स चेति ॥ ॥ ज्ञानाभावे उच्यमानः सुखात्मकः स्वर्गः। फलद्वयमेकस्मिन्वाक्ये कथं संगृहीतुं शक्यमित्याकांक्षायां द्वयोरप्यनुगतं रूपमाहुः ॥ ॥ सुखमित्यादि ॥ ॥ तथाचात्मसुखे लोके च योगरूढ्योस्तुल्यत्वात्स्वर्गपदेनोभयं संगृहीतुं शक्यत इत्यर्थः ॥ पूर्वस्य स्वरूपमाहुः । सत्त्वेत्यादि । आत्मसुखमित्यत्रात्मपदेनान्तःकरणं बोध्यम् । तच्च जीवोपभोग्यं जैवानन्दान्न्यूनमित्युक्तं "तुलयामलेन" इत्यस्य सुबोधिन्याम् । तत्रैव व्यापारं व्यापारिस्वरूपञ्चाहुः ॥ सर्वेत्यादि ॥ ॥ द्वितीयस्याहुः ॥ ॥ एतदभाव इत्यादि ॥ ॥ एतदभाव इति । देवतोषाभावे ॥ अत्रापूर्वं व्यापारो बोध्यः ॥ ॥ लौकिकीति ॥ ॥ एषैव गीतायां "त्रैविद्या मां सोमपा" इत्यादिनाऽनूक्ता ज्ञेया । अन्यथा यामिमामित्यादि न वदेत् ॥ एकादशेच इष्ट्वेह देवता यज्ञैरित्यादि च न वदेत् । अतस्तथेत्यर्थः ॥ ननु स्वर्जनरूपस्यार्थस्य लोकेऽपि तौल्ये किं वाक्यशेषोपन्यासेनेत्याशंकायां तदाहुः ॥ ॥ स्वर्गकाम इत्यादि ॥ ॥ वाक्यशेषादितीत्यत्र इतिर्हेतौ । तथाच जैमिनिना तस्यैव निर्णायकत्वकथनात्तदुपन्यास आवश्यक इत्यर्थः ॥ तस्य निर्मूलत्वभ्रमनिरासायाकरप्रमाणं चाहुः ॥ ॥ शास्त्रेत्यादि ॥ ॥ यत्नाकरः स्यात् शिष्टाद्दत न स्यात्तथासति न शिष्टेषु प्रसिद्धयेतेति प्रसिद्धिरेव मानमित्यर्थः ॥ ५ ॥

व्रजभाषाटीका ।

वाक्यशेषादिति ॥ मध्यमाधिकारीकूं आत्मसुखरूप स्वर्ग मिलेहै, हीनाधिकारीकूं स्वर्गलोक मिलेहै, तहाँ जो ब्रह्मज्ञानरहित होय परन्तु यथार्थ कर्मकरिके अग्निहोत्रादिके अधिकारी देवता सन्तुष्ट होजावें सो जाको यज्ञ आध्यात्मिक होजावे वाको अन्तःकरण सत्वाकार होयकें सबप्रकारकी चेष्टाकरके रहित शुद्ध होजावेहै तब वाकूं (आत्मसुख) आत्मानन्द प्रकट होजावे है और जो ब्रह्मज्ञानकरिकेंभी रहित होय और जाके यज्ञमें देवताभी सन्तुष्ट नहीं होय वाकूं स्वर्गलोक प्रसिद्ध है वाकी प्राप्ति होय. तहाँ आत्मसुखको नाम स्वर्ग कैसें सम्भवसकेहै ऐसे सन्देहमें शास्त्रान्तरमें प्रसिद्ध जो वाक्यशेष है तासों निर्णयकरें हैं॥ वाक्यशेषादिति।-अर्थ

जो दुःखसहित नहोय जासुखको काल ग्रास नहींकरिसके जो सुख अभिलाषाकरिके प्राप्तहोजाय ऐसो जो सुख है सो स्वर्गपदको अर्थ है "देवासुराः संयत्ता आसन्" इत्यादिश्रुतिमें स्वर्गमें स्पर्धा आदि होनो लिख्योहै तासों स्पर्धा ईर्षाआदि दुःख होयवेसों स्वर्गको सुखभी दुःखसहितही है । लौकिकसुखभी कालकरिके ग्रस्त है तथा दुःखसहित है तथा अभिलाषकरिके प्राप्त नहींहोय किन्तु प्रयत्नसोंही प्राप्तहोय है, ऐसेंही परमात्माको आनन्द है सोभी जीवकी अभिलाषासों प्राप्त नहींहोय ईश्वराधीन है । ईश्वर जाकूं दियो चाहै वाकूंही मिलैहै तासों दुःखरहित कालग्रासरहित अभिलाषासों प्राप्तहोयवेवारो एसो आत्मसुख अर्थात् अन्तःकरणको आनन्दही है वोही स्वर्गपदको अर्थ होयसकेहै ॥ ५ ॥

स्पर्द्धासूयादिदुःखानि स्वर्गिणां स्युःसदा ध्रुवम् ॥ प्रवृत्तिमार्गनिष्ठत्वान्न ध्रुवोपरि तद्गतिः॥ न च स्वर्गादिलोकेषु वाक्यशेषात्क्रमीयते॥६॥ अत आत्मसुखं वाक्ये वाच्यं तत्सत्वतोभवत्॥ शुद्धे सत्वगुणोद्भेदः स्वर्गः सत्वगुणोदयः॥७॥

तत्वदीपप्रकाशः ।

तादृशं सुखं किमित्याकाङ्क्षायां विषयजन्यन्तथा भवितुं नार्हति दुःखसम्भेदकस्यावश्यकत्वात् ॥ नापि परमानन्द ईश्वराधीनत्वादत आत्मसुखमेव तादृशं भवति तदाह ॥ स्पर्द्धेति ॥ स्वर्गलोके विद्यमानानामिन्द्रादीनां स्पर्द्धादिकं श्रूयते तच्च दुःखरूपम् ॥ नच ब्रह्मलोकः स्वर्गशब्दवाच्यः प्रवृत्तिमार्गनिष्ठत्वात् ॥ ज्ञानाभावेन केवलकर्मकरणं प्रवृत्तिमार्गः ॥ अत एव क्रममुक्तिमार्गे ते न गच्छन्तीत्याह ॥ न ध्रुवोपरि तद्गतिरिति ॥ नापींद्रलोकेषु वाक्योक्तं सुखं सम्भवति अनुपपत्ते-

रुक्तत्वात् ॥ ६ ॥ अतः पारिशेष्यादात्मसुखमेव वाक्यार्थः ॥ अत एव स्वर्गशब्दः स्वसाधने भगवता प्रयुक्त इत्याह ॥ तत्सत्वतो भवेत् ॥ सत्वगुणप्रवृद्धावेव तदात्मसुखम्भवेत् ॥ सत्ववृद्धिश्च शुद्धया ॥ अतः पञ्चानामावृत्तेः स्वसाधने भगवदुक्तेश्चोपयोगः ॥ भगवद्वाक्यमाह ॥ स्वर्गः सत्वगुणोदय इति ॥ सत्वगुणाद्वा उदयो यस्येति ॥ ७ ॥

आवरणभंगः ।

नन्वत्र लोकविशेष एव तादृशं सुखमुच्यतामात्मसुखे किं मानमित्याकांक्षायां वाक्यं व्याकुर्वन्तस्तद्वदन्ति ॥ ॥ दुःखेत्यादि भवतीत्यन्तम् ॥ ॥ तथाच दुःखासंभिन्नत्वे सति ध्वंसाप्रतियोगित्वे सत्यभिलाषातिरिक्तासाधरणकारणसम्पाद्यं सुखं स्वर्ग इत्यर्थः । अत्र प्रथमं सत्यन्तं लौकिकसुखवारणाय । द्वितीयन्तु नित्यत्वबोधनायैव विशेष्य दलम्परमानन्दवारणायेत्येवं द्वयोर्वारण आत्मसुखमेव पारिशेष्यात्सिध्यतीति श्रुतार्थापत्तिरेव मानमित्यर्थः ॥ ॥ तदाहेति ॥ ॥ तस्माद्धेतोः पारिशेष्यं व्युत्पादयितुं लोकेषु तदभावं सार्द्धेनाहेत्यर्थः ॥ ॥ स्पर्द्धादिकं श्रूयत इति ॥ ॥ "देवासुराः संयत्ता आसन्। तदग्नि र्न्यकामयत तेनापाक्रामत् ॥ तदिन्द्रो चायत् । आदित्या वा अस्माल्लोकादमुं लोकमायन्। तेऽमुं लोकं गत्वा पुनरिमं लोकमभ्यध्यायन्" इत्यादिषु श्रूयत इत्यर्थः ॥ नन्वेवं सति पूर्वोक्तदोषाणां ब्रह्मलोके अभावात् स एव स्वर्गत्वेन वाच्य इत्यत आहुः । नचेत्यादि ॥ ॥ प्रवृत्तीत्यादि ॥ ॥ फलशेषिणः कर्तुरित्यर्थः ॥ तावता कथन्तस्य स्वर्गत्वेनाग्रहणमित्याहुः ॥ ॥ अतएवेत्यादि ॥ ॥ अयमाशयः । द्विविधो हि ब्रह्मलोकः । प्रवृत्तिमार्गगम्योनिवृत्तिमार्गगम्यश्च । तत्राद्यः क्षयादिदोषवान्। तस्य तादृशत्वं स्कांदे कुमारिकाखंडे इंद्रद्युम्नकथायां प्रसिद्धं । स हि मार्कण्डेयतालजंघादीनां स्वनामयशः पृष्ट्वा तैर्न जानीम इत्युक्ते पाताद्भीतो मार्कंडेयाद्युपदेशेन कश्चिद्बहुकल्पजीविनं कूर्मं पृष्ट्वा तेन तद्यशस्युक्ते भूमौ यशःसत्वेन पुनर्ब्रह्मलोकं जगामेति कथनात्। रामायणेऽपि अन्नदानाभावेन ब्रह्मलोके क्षुधापीडितस्य कस्यचित्सहस्राश्वमेधयाजिनः पुनर्भूमावागत्य तद्दत्वं पुनस्तत्र गमनोक्तेश्च ॥ द्वितीयस्तु वेदान्तविज्ञानेतिश्रुत्या अक्षयः पूर्वोक्तदोषरहितः । तत्र यथा योगयुक्तस्य परिव्राजो रणभिमुखे हतस्य च सूर्यमण्डलम्भित्वा मार्गस्तथा क्रममुक्तिगन्तुर्ध्रुवं नीचैःकृत्य तदुपरिमार्गस्तेन पथा द्वितीये मार्गे गम्यते । स च प्रवृत्तिमार्गनिष्ठस्य कर्तुस्तादृशाधिकाराभावादगम्य इति तन्मार्गगमनाभावान्न-

तस्य तत्प्राप्तिः । अत एव तदभिलाषेण न तस्योपनय इत्यभिलाषोपनीतत्वाभावान्न स स्वर्गशब्दवाच्य इति ॥ प्रथमस्योक्तस्कान्दादिसिद्धस्वरूपत्वमभिसन्धायाहुः ॥ ॥ नापीत्यादि ॥ ॥ अनुपपत्तेरिति ॥ ॥ दुःखसम्भेदादिरूपायास्तस्या इत्यर्थः ॥ ६ ॥ ॥ अत इति ॥ ॥ लक्षणाप्रवेशात् । नन्वात्मसुखं जैवानन्द एव भवतु तस्य आन्तःकरणत्वे किं मानमित्याकांक्षायामुक्तार्थदार्ढ्याय गमकमाहुः ॥ ॥ अत एवेत्यादि ॥ इत्याहेति ॥ ॥ अनेनाशयेनाहेत्यर्थः । ननु लक्षणानुरोधाद्भवत्वेवं तथापि प्रवृद्ध एव सत्व आत्मसुखं भवति नाप्रवृद्ध इत्यत्र किङ्गमकमतआहुः ॥ अतः पश्चानामित्यादि ॥ ॥ अन्यथा फलस्य विधिवाक्यएवोक्तत्वादेकस्यैव करणे सकृदेवच करणे फलावश्यंभावाद्दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेत । "यावज्जीवमग्निहोत्रञ्जुहोति प्रतिसम्वत्सरं सोमः पशुः प्रत्ययनन्तथेत्यादिवाक्यबोधितम्पश्चानाङ्करणमनावर्त्तनञ्च व्यर्थमेव स्यादतः प्रवृद्धिरेव भगवद्वाक्येऽभिप्रेतेत्यर्थः।पुरः स्फूर्तिकार्थकथने भगवद्वाक्ये लक्षणापत्तिरिति तत्परिहारायाहुः ॥ ॥ सत्वगुणादेति ॥ ७ ॥

ब्रजभाषाटीका ।

शङ्का। स्वर्गशब्दसों आत्मसुखको ग्रहण करोहो तैसें स्वर्गशब्दसों ब्रह्मलोकको ग्रहण करनो चाहिये क्योंकि पहिले कह्यो दोष ब्रह्मलोकमें नहीं है ॥ उत्तर । प्रवृत्तिमार्गनिष्ठत्वादिति । ब्रह्मलोक दोयहैं जो प्रवृत्तिमार्गीनकरके जावेजोग्य है वो क्षयादिदोषवालोहै, हैं इन्द्रद्युम्नराजाने मार्कण्डेयतालजंघादिऋषिनसों पूछा मेरो यश पृथ्वीमें है या नहीं ? उननें कहा राजा ! हमकूँ खबर नहिं है यह सुनिकें राजाकूँ भय भयो जो मेरो यश नहिं होयगो तो मैं ब्रह्मलोकसों गिरिजाऊँगो, फिर राजानें बहुतकल्पजीवी कूर्मसों पूछा वानें कही तेरो यश है तब राजा ब्रह्मलोकमें गयो,ये बार्ता स्कान्दकुमारिकाखण्डमें प्रसिद्ध है,तासों ब्रह्मलोक नाशशाली है तासें स्वर्गशब्दवाच्य होयनहींसके और जो अक्षय ब्रह्मलोक है तामें योगयुक्त ब्रह्मज्ञानी परिव्राट् तथा रणमें सन्मुख मरवेवालो ये दोनों सूर्यमण्डलको भेदकरके जावें हैं,अथवा जो ब्रह्मज्ञानी कर्म

करे है वो मुक्तिमार्गकरिकें ध्रुवके ऊपर होयकरके जावेहै. वा अक्षय सत्यलोकमें धूममार्गवालो मध्यमाधिकारी नहींजाय-सकें है तासों मध्यमाधिकारीकेलिये स्वर्गशब्दसों आत्मसुखकोही ग्रहणकरनो ॥ ऐसेंही इन्द्रलोकभी दुःखमिश्रितसुखवालो है तासों वहभी स्वर्गपदको अर्थ नहीं होयसकेंहै ॥ ६ ॥ तहाँ आत्म-सुखसों अन्तःकरणके सुखकोही ग्रहण करनो याहीसों (स्वर्गः सत्वगुणोदयः) इत्यादिवाक्यमें भगवाननें अन्तःकरणके सुखको साधन जो सत्वगुणको उदय है तासों स्वर्ग कह्यो है, सत्वगुण बढे है तब आत्मसुख होवेंहै और अन्तःकरण शुद्ध होयवेसों सत्वगुण बढेहै. अग्निहोत्र दर्श पूर्णमास चातुर्मास्यपशु सोम इन पाँचकर्मकी प्रवृत्तिसों अन्तःकरण शुद्ध होय है ॥ ७ ॥

अतस्तदेव हि फलङ्कामाभावेऽपि सिध्यति ॥
यागादेर्भगवद्रूपात्कामितं फलति स्फुटम् ॥८॥
श्लिष्टप्रयोगाद्वेदस्य परोक्षकथनं मतम् ॥ बा-
लानुशासनार्थाय रोचनार्थं तथा वचः ॥ ९ ॥

तत्वदीपप्रकाशः ।

एतदात्मसुखस्वस्वरूपफलं नित्यमाह ॥ अतस्तदेवेति ॥ तैः स्व-भावत एव शुद्धिः सम्पाद्यत इति भोजने तृप्तिवन्न कामनामपेक्षते ॥ तर्हि विकृते कथं कामनापेक्षा अधिभौतिकं वा फलं कथमित्याकांक्षा-यामाह ॥ यागादेरिति ॥ भगवद्रूपत्वात् काम्यो नित्यो वा यागादिः कामितम्फलति ॥ स्फुटमिति ॥ लौकिकम्फलं यतः स्पष्टमेव कारी-र्यादेः फलमनुभूयते ॥ ८ ॥ ननु स्वर्गो नाम लोक एव ॥ " सुवर्गाय वा एतानि लोकाय हूयन्ते " इति ॥ " देवेभ्यो वै स्वर्गो लोकस्तिरो-भवत् " इति " सुवर्गो वै लोको नाकः " इति सर्वत्र स्वर्गलोक एव

स्वर्गशब्दार्थस्तत्कथमुच्यत आत्मसुखं स्वर्ग इति ॥ सत्यम् ॥ अङ्गेषु स्वर्गशब्देषु लोकसामानाधिकरण्यात्तद्वाचकत्वम् ॥ प्रधाने च वाक्यशेषस्य विद्यमानत्वादात्मसुखवाचकत्वमेव ॥ अन्यथा वाक्यशेषो व्यर्थः स्यात्संदेहाभावात् ॥ अतः स्वर्गशब्देनोभयमपि ग्राह्यं ॥ तर्हि वेदे प्रधानवाक्येषु निःसंदिग्ध एव स्वर्गशब्दः कथं न प्रयुज्यते । तत्राह ॥ श्लिष्टप्रयोगादिति ॥ श्लिष्टप्रयोगार्थन्तथा न प्रयोगः श्लिष्टप्रयोगस्य च फलम्परोक्षकथनम् ॥ परोक्षकथनस्यापि प्रयोजनम्बालानुशासनम् ॥ तेषामनुशासनं रुच्युत्पादनमेव ॥ अतस्तथा वचनं श्लिष्टप्रयोगइत्यर्थः ॥ ९ ॥

आवरणभंगः ।

॥ नित्यमिति ॥ ॥ कामनासहकराभावेऽपि यागस्वरूपमर्यादया जायमानमित्यर्थः ॥ एतत्कथनप्रयोजनमाहुः ॥ ॥ तैरित्यादि ॥ ॥ तर्हीति ॥ यदि यागत्वेन शुद्धित्वेन कार्यकारणभावात्प्रकृतौ कामनानपेक्षा तर्हीत्यर्थः ॥ ॥ वेति ॥ वाशब्दः समुच्चये ॥ ॥ अधिभौतिकमिति ॥ ॥ लोकात्मकं ॥ ॥ कथमिति ॥ कामनासद्भावेपि यागत्वेन शुद्धित्वेन यागत्वेनात्मसुखत्वेन च यः कार्यकारणभावस्तस्याभङ्गान्नित्ययागस्वरूपस्य च तुल्यात्वान्नित्यं फलं विहाय कामितम्फलङ्कुतो जायत इत्यर्थः॥मूले भगवद्रूपादिति प्रयोगो भावप्रधान इति ज्ञापयितुमाहुः ॥ भगवद्रूपत्वादिति ॥ ॥ तथाच भगवतः सर्वफलदातृत्वात्तत्कामानुरोधात्सिद्धेत्यर्थः ॥ ननु भगवद्रूपत्वस्य कामनाभावेपि तौल्यात्तदापि कामितं कुतो न फलतीत्याकांक्षायां युक्तिं समाधायिकामाहुः ॥ ॥ स्फुटमित्यादिना ॥ अयमर्थः यथा नित्यकरणे यावज्जीवादिवाक्यं नियामकं न तथा विकृतिकरणे किमपि नियामकमस्ति। अतस्तत्र कामनयैव प्रवृत्तिरिति निर्श्चीयते । सा चेत्कामना यागेन न पूर्येत तदा विश्वासाभावे पूर्वकाण्डमेवोच्छिद्येत ततः कामितमेव तस्माद्भवतीति ननु सत्वशुद्धिरपीति भगवत्कृता मर्यादा तादृशफलदर्शनानुरोधाज्ज्ञायते ॥ अतो विकृतौ कामनापेक्षा । तत एव चाधिभौतिकात्प्रकृतिरूपादपि लोकरूपम्फलमिति दृष्टानुरोधादेवासन्देह इत्यर्थः ॥ ८ ॥ पुनः किञ्चिदाशंक्य परिहरन्ति ॥ ननु स्वर्ग इत्यादि ॥ ॥ लोकसामानाधिक रण्यादिति ॥ लोकशब्दसामानाधिकरण्यादित्यर्थः ॥ ॥ सन्देहाभावादिति ॥ प्रधानवाक्ये लोकपदसामानाधि-

करण्याभावेन"स्वर्गः सत्त्वगुणोदयः"इति भगवद्वाक्ये च सन्देहाभावादित्यर्थः ॥ सिद्धमाहुः ॥ ॥ अत इति ॥भगद्वाक्यस्य लौकिक फलस्य च दर्शनादुक्तरीत्या व्यवस्थासामञ्जस्याच्चेत्यर्थः ॥ तर्हीति ॥ यत्तुभयमपि वेदाभिप्रेतं तदेत्यर्थः ॥ परोक्षकथनमित्यादि ॥ ॥ तदुक्तमेकादशस्कन्धे।"परोक्षवादो वेदोऽयं बालानामनुशासनम् ॥ कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा " इति फलश्रुतिरियं नृणां न श्रेयोरोचनम्परं श्रेयोर्विवक्षिस्तया प्रोक्तं यथा भैषज्यरोचनमिति च ॥ ९ ॥

ब्रजभाषाटीका ।

अर्थात् वर्षके वर्ष सोमयज्ञ कियोजाय, छःमहीनामें पशुयाग कियोजाय नित्य अग्निहोत्र कियोजाय, याप्रकार बारंबार आवृत्ति करवेसों अन्तःकरणशुद्धिकी कामना जानराखीजाय तोभीकर्मके स्वभावसोंही अन्तःकरण शुद्धहोजाय है । जैसें तृप्तिकी कामना न राखकेभी जो भोजन कियोजाय तो तृप्ति स्वतः होजायहै ॥ शङ्का–प्रकृति अग्निहोत्रादिकनकरिकें अन्तःकरणशुद्धिरूप कार्य होयवेमें कामनाकी अपेक्षा नहीं है तो विकृति कारीर्यादियागमें कामनाकी अपेक्षा क्यों होनीचाहिये,तथा प्रकृतियाग अन्तःकरणकी शुद्धिकेप्रति कारण है तो कामनावारे हीनाधिकारीकोभी अन्तःकरणशुद्धि होनीचाहिये वाकूँ आधिभौतिकयज्ञकरिकें वांछित स्वर्गलोकादिककी प्राप्ति कैसें होयजावें है? उत्तर–यागादेरिति ॥ यागादिक भगवानको रूप है,भगवान् सब फलके दाता हैं तासों कामनाकी अनुसार फल देंहै अर्थात् नित्ययाग अग्निहोत्रादिकनमें तो"यावज्जीवं अग्निहोत्रञ्जुहुयात्"इत्यादिवाक्य नियामक है तासों वेदकी आज्ञासों प्रवृत्ति होयगी परन्तु वृष्टिपुत्रादिकनकेलिये कियेजाँय जो कारीरीआदि याग हैं उनमें तो कामनासोंही प्रवृत्ति होयहै, यदि उनसों कामना नहिं सिद्धहोय तो विश्वास नहिं रहेगो तो कोईकी प्रवृत्ति नहिंहोयगी तथा पूर्वकाण्ड उच्छिन्न होजायगो ॥८॥ शङ्का–"सुवर्गाय वा लोकाय हूयन्ते"इत्यादि अने-

कवाक्यनमें सुवर्गलोककोही नाम स्वर्गलोक है यहां स्वर्गनामसों आत्मसुख कैसे कहोहो ॥ उत्तर–अङ्गनमें स्वर्गलोक लिख्योहै "सोमेन यजेत स्वर्गकामः" इत्यादि मुख्यवाक्यनमें केवल स्वर्ग लिख्योहै, वाक्यशेषसोंभी आत्मसुखकोही वाचक स्वर्ग मालुमहोवे है । "स्वर्गः सत्वगुणोदयः" इत्यादिभगद्वाक्यसोंभी आत्मसुखही स्वर्गशब्दको अर्थ निःसन्देह मालुमपडेहै परन्तु लोकमें हीनाधिकारीनकूँ स्वर्गलोकभी प्राप्तहोजावेहै तासों स्वर्गशब्दके दोनोंही अर्थ हैं ॥ कदाचित् कहोगे वेदमें ऐसो सन्देह क्यों राख्यो सन्देहरहित स्वर्गशब्द क्यों नाहिं उच्चारणकियो तहाँ कहेंहैं सन्देहसहित स्वर्गशब्दको जो प्रयोग है सो परोक्षकथनकेलिये है । परोक्षकथन बालानुशासनार्थ है अर्थात् हीनाधिकारीकी रुचि बढायवेकेलिये है ॥ ९ ॥

"पशुबंधयाजी सर्वाँल्लोकानाप्नोति निश्चयः"॥ अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्भवति॥१०॥अक्षय्यं सर्वलोकाख्यमात्मरूपं नचान्यथा ॥ नित्ये स्वर्गः फलं नान्यत्पश्वादिर्विकृतौ फलम् ॥ ११ ॥ रूपन्तदेव विकृतेः किञ्चित्साधनमन्यथा ॥ विकृताद्धि हरेः किञ्चिद्विकृतम्फलमीर्यते ॥ १२ ॥

तत्वदीपप्रकाशः ॥

पञ्च कर्माणि नित्यानि तत्र त्रिषु स्वर्गः फलम् ॥ यथा "अग्निहोत्रञ्जुहुयात्स्वर्गकामः" "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" ॥ "ज्योतिष्टोमेन स्वर्गकामः" इति ॥ पशुबन्धचातुर्मास्ययोस्तु न स्वर्गः

फलं श्रूयत इति वक्तुं वाक्यद्वयमाह ॥ सर्वांल्लोकानिति ॥ १० ॥ समाधानमाह ॥ अक्षय्यमिति ॥ "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतम्भवति" इत्यत्र "सर्वांल्लोकान्पशुबन्धयाज्यभिजयति" इत्यत्रापि यदक्षय्यशब्देन सर्वलोकशब्देनोच्यते तदात्मसुखमेव वाक्यशेषोक्तम् ॥ तदेव पञ्चानां नित्यानामेकं फलं भवति ॥ इतोऽपि हेतोः स्वर्गशब्देनात्मसुखम् । पञ्चात्मकस्य भगवत एकत्वादन्यथा लोकपक्षे नैतदुपपद्यत इत्यर्थः ॥ उपसंहरति ॥ नित्ये स्वर्गः फलमिति ॥ बालाबालभेदेनोभयमपि॥ अन्यत्पश्वादिकं न नित्यस्य फलं विकृतौ तत्फलम् ॥ ११ ॥ विकृतस्य कथं फलसाधकत्वमित्याशंक्याह ॥ रूपं तदेव विकृतेरिति ॥ तदेव भगवद्रूपं विकृतेरपि परं साधनं किञ्चिदन्यथा भवति ॥ तेन विकृतत्वं स च विकारो वेदोक्त इति सफलः ॥ तर्हि नित्यमेव फलं कुतो न साधयति तत्राह ॥ विकृतादिति ॥ १२ ॥

आवरणभंगः ।

स्वर्गविषये पुनः किञ्चिदाशङ्क्यन्ते ॥ ॥ पञ्चेत्यादि इति वक्तुमिति ॥ अनेन हेतुना वाक्यशेषस्य निर्णायकत्वंवक्तुं ॥ तथाच निःसन्दिग्धेन संदिग्धनिर्णयः ॥ वाक्यशेषोऽपि स्वर्गशब्दमात्रयुक्तत्वेनात्मसुखस्य न विनिगमकः। अनुपपत्त्यग्रस्य विद्यमानत्वादतो न तेन निर्णय इत्यर्थः ॥ वाक्यद्वयं चैतदापस्तंबकल्पस्थम् ॥ तथाच चतुर्थे लोकपदात्पञ्चमे चाक्षय्यपदेन ध्वंसप्रतियोगित्वनिवारणाद्वाक्यशेषोक्तसुखत्वं लोकनिष्ठसुखस्य वक्तव्यं तावता प्रसिद्धिरपि न विरोत्स्यत इति भावः ॥ १० ॥ सुखमेवेत्येवकारेण लोकसुखव्यवच्छेदः ॥ तत्र युक्ति माहुः ॥ तदेवेत्यादि ॥ ॥ पञ्चकर्तुरेकंफलं वक्तव्यम् ॥ नानात्वे कस्य फलम्पूर्वं कस्य पश्चादिति निर्णेतुमशक्यत्वात् । नच यज्ञक्रमान्निर्णयः "अत्युग्रपुण्यपापानामिहैव फलमश्नुते" इति न्यायेन पूर्वं महायागफलस्यापि संभवदुक्तिसत्त्वादग्निष्टोमकत्वात् । नच तस्यैवेत्यपि "प्रजापतिर्यज्ञानसृजत" इति श्रुतौ यावदग्निहोत्रमा इति तुल्यत्वोक्तेः पौष्कल्यस्य तदप्रयोजकत्वात् ॥ न च यत्पश्चात्तस्यैवेत्यपि । नियामकाभावात् ॥ अत एकमेव निश्चेयं । त्पञ्चात्मसुखमेवेति तत्रापि हेतुः ॥ पंचात्मकेत्यादि ॥ ॥ स एव यज्ञः पंचविधोऽग्निहोत्रं दर्शपूर्णमासाविति श्रुतावे-

कत्वेनैव निरूपणादित्यर्थः॥नन्वेकएव लोकस्ताहृशः स्वीकार्य इति शंकायामाहुः ॥ अन्यथेत्यादि ॥ ॥ एतस्यैव विवरणं ॥ ॥ लोकेत्यादि ॥ सर्वान् लोकानित्यत्र सर्वपदस्यासङ्कुचितवृत्तिकत्वे लोकान्तरस्यापि प्राप्तेः पंचकर्तुः स्वर्गो न नियतः स्यात् ॥ स्वर्ग एव संकोचे उक्तरीत्या क्रमविरोधः । एकोत्तरं द्वितीयभवनादक्षय्यपदविरोधः ॥ यजमानार्थं तल्लोकागमनाभावेनाभिलाषोपनीतत्वविरोधश्च । अतः फलस्यैक्यं वाच्यम् ॥ तदात्मसुखानङ्गीकारेनोपपद्यत इत्यर्थः ॥ नच वाक्यविरोधः । विश्वेदेवा इतिवत्पदद्वयेन नानाविधात्मसुखानाङ्कथनेनाविरोधात् ॥ तस्मादात्मसुखमेव वाक्यशेषार्थ इति निश्चयः ॥ अतएवार्थवादाधिकरणे "सर्वत्वमाधिकारिकम्" इतिसूत्रे यथाधिकारं सर्वत्वं ग्राह्यमिति बोधितम् ॥ तेन पूर्णाहुत्या सर्वान्कामानाप्नोतीत्यत्र यथा तदधिकारापेक्षं तथात्रैतदधिकारापेक्षमिति निष्कामाधिकारे आत्मसुखानुकूलं सकामाधिकारे च सङ्कुचितं तद्ग्राह्यमतो न तद्विरोधः ॥ भाष्यकारमतन्त्वत्र नादरणीयम् ॥ तदस्माभिः पूर्वप्रकरण एवोपपादितमिति न दोषः । तर्हि प्रसिद्धेः का गतिः ॥ इन्द्रादीनाञ्च कथं लोकप्राप्तिरित्यत आहुः ॥ ॥ बालेत्यादि ॥ ॥ नेति ॥ ॥ प्रधानवाक्येऽनुक्तत्वात्तथेत्यर्थः ॥ ११ ॥ एवं प्रकृतिरूपं विचारितम् ॥ अतःपरं विकृतिरूपं विचारयितुं फलकथनमुखेनोपाक्षिपन्ति ॥ ॥ विकृताविति ॥ ॥ तदेवेति ॥ ॥ अग्निहोत्राद्यात्मकम् ॥ ॥ तर्हीति ॥ ॥ अवेदोक्तत्वे यागत्वे च तुल्य इत्यर्थः । मूले किञ्चित्पदं विकृतविशेषणं किञ्चिद्विकृतादित्यर्थः ॥ १२ ॥

व्रजभाषाटीका ।

प्रकृतिरूप जे नित्य पांच कर्म बतायें उनमें तीन कर्मको स्वर्ग फल लिख्योहै, चातुर्मास्यको अक्षयसुकृत तथा पशुबन्धयज्ञको सर्वलोकजय फल लिख्योहै । अब यहां वाक्यशेषकरिकैं पांचों नित्यकर्मनको आत्मसुखरूप एकही फल मानैं तबतो एकवाक्यता होयसकैं है, जो लोकान्तरवाचक स्वर्गादिशब्दनकूं मानैं तो न्यारे २ फल होयवेसों एकवाक्यता नाहिं होयसकेगी, याकारणसों भी स्वर्गशब्दसों आत्मसुखकोही ग्रहण करनो ॥ १० ॥ उपसंहार करें हैं नित्ययज्ञको स्वर्ग फल है । बाल जो ब्रह्मज्ञानरहित आधि-

भौतिक यज्ञ करवेवालो है वाकूं इन्द्रादिलोकरूप स्वर्ग मिले है तथा आध्यात्मिकयज्ञ करवेवालो है वाकों आत्मसुखरूप स्वर्ग मिले है । अबाल जो ब्रह्मज्ञानी आधिदैविकयज्ञ करवेवारो है वाकूं परब्रह्मपुरषो [illegible]प्ति होयहै। पशुधनादिकनकी प्राप्ति होनोंनो नित्ययज्ञको फल नहीं है विकृतियज्ञनको फल है तहाँ विकृति-यज्ञ कैसें फल देतेहोंगे यह शङ्का नहीं करनी ॥११॥ रूपन्तदेवेति । विकृतिरूप यज्ञभी भगवान्कोही स्वरूप है तासों फल देवेमें कछु आश्चर्य नहिं, प्रकृतियज्ञ जे अग्निहोत्रादिक हैं वेही साधनके थोडे फर्कसों विकृतिरूप होजावें हैं। जैसें प्रकृतियज्ञमें जो जलकूं चमसक-रके लावनों पशुकी कामना होय तो दुग्धदोहवेके पात्रसों जल लावै प्रतिष्ठाकी कामना होय तो मिट्टीके पात्रमें जल लावे और सब कर्म वैसोही करें इत्यादि थोडेसे विकारसों विकृतिरूप होजावें है परन्तु वे विकार वेदोक्त है।तासों फल है। वेदमें तो नहिं लिखोहोय स्वेच्छाकरिकेंही चमससों जल नहिंलावें और पीतलके पात्र वगैरे-सों जल लेआवे तौ प्रकृतिरूप तथा विकृतिरूप इन दोनोंमेंसों एकरूपभी नहिंहोवे परिश्रम निष्फल होजावै. और विकृतिया-गसों विकृतही फल होवेहै नित्यफल नहिं होवे है ॥ १२ ॥

नित्यकर्मप्रसिद्ध्यर्थं काम्यादीनां विधिः श्रुतौ ॥ पशुपुत्राद्यभावेपि न नित्यङ्कर्म सिध्यति ॥१३॥ अङ्गेऽपि तत्फलं नित्ये ज्ञानादिभिरुदीर्यते ॥ यथाकथञ्चिन्नित्यस्य सिद्धिर्वेदेन बोध्यते ॥ १४ ॥ ध्यानादिभिर्यथामूर्तेरभिव्यक्तिः परात्मनः ॥ आधानादिक्रियातोभिव्यक्तिर्यज्ञस्वरूपिणः ॥ १५ ॥

तत्त्वदीपप्रकाशः।

ननु वेदे किमिति विकृतं विकारफलं चोक्तमित्याशंक्याह ॥ नित्यकर्मप्रसिध्यर्थमिति॥ तत्र साधकमाह॥ पशुपुत्राद्यभाव इति ॥१३॥ नन्वेवमेव श्रुत्यभिप्राय इति किम्प्रमाणन्तत्राह ॥ अङ्गेपीति ॥ यतो वेदे नित्याङ्गेषु अपःप्रणयनादिष्वपि पश्वादिकम्फलमुदीर्यते ॥ नहि एकस्य कर्मणः फलद्वयं सम्भवति ॥ अत एकस्यामावृत्तौ यजमानकामनया साङ्गस्यैव तस्य पश्वादिफलम् ॥ तथा ज्ञानादिभिरपि फलमुदीर्यते ॥ "य एवं वेद स पशुमान् भवति" इति ॥ तत्रापि कामनायामेव भवतीति मन्तव्यं ॥ तच्च ज्ञानं कर्मांगम् ॥ ननु कथमेवं वेदस्याभिप्रायोध्यवसीयते स्वतन्त्रतयैव पश्वादीनाम्फलतास्त्विति चेत्तत्राह ॥ यथाकथंचिदिति ॥ नित्यस्याविकृतस्य भगवतो रूपस्य सिद्धिर्निष्पत्तिर्वेदेन बोध्यते ॥ १४ ॥ ननु कृतिसाध्यो यागादिः कथन्नित्य इति चेत्तत्राह ॥ ध्यानादिभिरिति ॥ यथा ध्यानधारणादिभिर्भगवन्मूर्तेरानन्दरूपस्याभिव्यक्तिस्तथा आधानादिसोमान्तक्रियाभिर्वेदबोधितदेहचेष्टारूपाभिध्यानादिसहिताभिर्यज्ञरूपिणोऽपि भगवतोभिव्यक्तिरित्यर्थः ॥ १५ ॥

आवरणभंगः।

॥ पशुपुत्राद्यभाव इति ॥ ॥ फलाकांक्षाविरहस्य स्वर्गकामनायाश्च सर्वेषामभावाद्यदि कामितफलार्थं साधनं वेदेन नोच्येत ततः फलञ्च यदि न स्यात्तदा वेदे अनाश्वासप्रसङ्गान्नित्ये प्रवृत्तिः कुण्ठिता स्यादतस्तथेत्यर्थः ॥ हविःसहायादिसापेक्षत्वाद्यथाश्रुतो वार्थः ॥ १३ ॥ ॥ अङ्गेपीति ॥ ॥ मूलस्थोऽपिशब्दो ज्ञानादिभिरित्यनेनाप्यन्वेति ॥ ॥ उदीर्यत इति ॥ ॥ "चमसेनापः प्रणयेत् गोदोहनेन पशुकामस्य मृण्मयेन प्रतिष्ठाकामस्य कांस्येन [illegible]मस्य" इत्यादिषु वाक्येषूच्यते ॥ तथाच विकृतौ यत्प्रधानफलन्तन्नित्ये अङ्गफलत्वेनोच्यते तेन विकृतापेक्षया प्रकृतस्याधिक्यं बोध्यते ततश्च विकृतेस्तादर्थ्यं ज्ञायते॥ यथा अर्थवादस्य ॥ अतो न विकृतेर्नित्यफलसाधकत्वमित्यर्थः ॥ ननु चतुर्थस्य तृतीये विचारितं । द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यात् । "यस्य

पर्णमयी जुहूर्भवति न स पाप १ श्लोकं शृणोति यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते। यत्प्रयाजानुयाजा इज्यन्ते वर्म वा एतद्यज्ञाय क्रियते वर्म यजमानाय" इत्यादिषु द्रव्यसंस्कारकर्मसु या फलश्रुतिः सार्थवादः। एतेषां क्रत्वर्थत्वात् तन्निवर्तनातिरिक्तस्य कामादिपदाभावेन कल्पयितुमशक्यत्वात् प्रकृते वर्तमानप्रयोगाच्च। क्रतुसम्बन्धश्चैषां वाक्यादिगम्यः। नैमित्तिके विकारत्वात्क्रतुप्रधानमन्यत्स्यादित्यधिकरणे अपःप्रणयनादिवाक्यान्युदाहृत्य तेषां पात्राणां नैमित्तिककाम्याङ्गतैव व्यवस्थापितेति जुह्वादिषु फलाभावात्तादृशापःप्रणयनादिषु नित्याङ्गत्वाभावाच्च कथमेवमुच्यत इति चेन्मैवं। एतस्य फलवादस्य गुणवादत्वेन जुह्वादिप्राशस्त्ये गौणत्वेऽपि तद्विशिष्टयागगुणबोधने बाधकाभावात्। असद्गुणस्य सद्बोधने तद्यागस्य प्रताणरत्वापत्तेर्विध्यंशेप्युपप्लवाच्च। अतो यागस्यैव तत्फलमित्यदोषः॥ एवमग्निहोत्रादीनां नित्यत्वेऽपि "अग्निहोत्रं जुहुयात्स्वर्गकामः प्रजाकामः पशुकामः सर्वेभ्यो वै कामेभ्यो दर्शपूर्णमासौ" इत्यादिवाक्यान्तरेण काम्यत्वस्यापि श्रावणान्नित्यानामेव कामनामात्रेण काम्यत्वमिति स्वरूपभेदाभावान्नित्याङ्गत्वमप्यपःप्रणयनादीनामदुष्टमेवेत्येवमुच्यत इति गृहाण॥ नन्वेवंसति काम्यविधिवैय्यर्थ्यापत्तिः। नित्याङ्गादिभिरेव तत्फलसिद्धेस्तयैव नित्यप्राशस्त्यस्यापि सिद्धेश्चेति चेत्तत्राहुः॥ ॥ नहीत्यादि॥ ॥ द्वितीयस्य चतुर्थे यावज्जीवपादे चिन्तितम्। "अग्निहोत्रं जुहुयात्स्वर्गकामः प्रजाकामः पशुकामः" इति। यावज्जीवमग्निहोत्रं जुहोतीति च। एवं "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" इति काम्यं प्रयोगं विधायाम्नायते यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेति। तत्र किं काम्यो नित्यश्च प्रयोगो भिन्न उत नित्यकाम्ये कर्मणी भिन्ने अथवा काम्यस्यैवाभ्यासो विधीयत इति संशयः। यावज्जीवशब्दस्य मरणावधिककालवाचकत्वात् तस्य च प्रकृते काम्याग्निहोत्रादौ पूर्वमप्राप्तत्वाज्जुहोति यजेतेत्यनेनानूदिते तस्मिन् कर्मणि स काले विधीयते॥ नच सकृदनुष्ठानेनैव फलसिद्धेरेतदङ्गीकारो व्यर्थ इति वाच्यम्। तस्य काम्यवाक्येनैव सिद्धत्वादत्रैतत्कालानङ्गीकारे विधिवैयर्थ्यप्रसङ्गात्। अग्निहोत्रवाक्ये प्रकरणभेदेऽपि दर्शपूर्णमासवाक्ये तदभावेन कर्मभेदाङ्गीकारे प्रकरणबाधापत्तेश्च। अतः काम्यकर्मणोऽभ्याससिद्धये तत्रायङ्कालरूपधर्मविधिरिति पूर्वपक्षः॥ सिद्धान्तस्तु जीवनकार्त्स्न्यवाचकस्य यावज्जीवपदस्य न कालवाचकत्वमपि तु लक्षकत्वम्। जुहोतियजत्योरप्यभ्यासलक्षकत्वमेव न तु वाचकत्वं। जीवनञ्च पुरुषधर्मो न कर्मतया विधातुं शक्यः। प्रकरणवशेन श्रुतेर्लक्षणाप्यन्याय्या। अतोऽत्र जीवनं पुरुषधर्मं निमित्तीकृत्य प्रयोगभेदएव विधीयते कर्मभेदकानां शब्दान्तरादीनामभावात्॥ निमित्तविशेषसद्भावेनाविशेषःपुनः। श्रुतेरभाव-

नाभावस्यापि तथात्वाभावात् ॥ अतोऽत्र जीवनस्य निमित्तत्वेन तस्मिन् सति नैमित्तिकत्यागायोगात्तस्य नित्यत्वमर्थसिद्धम् ॥ नच प्रयोगनैरन्तर्यापत्तिः ॥ सायं-प्रातर्वाक्यस्य अमावास्यायाममावास्यायां यजेतेत्यादेश्च नियामकत्वात् ॥ तस्मान्नित्यकाम्यप्रयोगौ भिन्नाविति । तदेतदुक्तम् ॥ नहीत्यादिफलमित्यन्तेन ॥ उक्तं न्यायं ज्ञानफलेऽपि स्मारयन्ति ॥ ॥ तत्रेत्यादि ॥ ॥ ज्ञाने ब्रह्मज्ञानत्वभ्रमवारणाय तत्स्वरूपं परिच्छिन्दन्ति ॥ ॥ कर्माङ्गमिति ॥ ॥ जैमिनीयमतं निरसितुं तन्मतेनाशङ्कन्ते ॥ ॥ नन्वित्यादि ॥ ॥ अस्त्विति ॥ ॥ विधिवाक्ये दर्शनादस्त्वित्यर्थः ॥ ॥ यथाकथञ्चिदित्यादि ॥ ॥तथाच काम्यफलानां नित्याङ्गेषु श्रावणान्नित्ये यावज्जीवाधिकारस्याकरणे प्रत्यवायस्य च श्रावणान्नित्य एव श्रुतेस्तात्पर्यं ज्ञायते । तत्रच स्वर्ग एवात्मसुखात्मा फलत्वेन प्रतिपाद्यते न पश्वादिकमतो न तेषां स्वतन्त्रतया फलत्वमित्यर्थः ॥ १४ ॥ यज्ञेषूक्तस्य भगवद्रूपत्वस्य दृढीकरणाय नित्यत्वं परिच्छेतुं शङ्कन्ते ॥ ॥ ननु कृतीत्यादि ॥ ॥ यथेत्यादि ॥ ॥ तथाच तेषु यावज्जीवाधिकारकत्वादिरूपमेव न नित्यत्वङ्किन्तु त्रैकालिकाबाधविषयत्वरूपमतो यज्ञेषु भगवद्रूपत्वं निराबाधम् । मुख्येष्वधिकारिषु तथाभिव्यज्यत इति भावः ॥ अत्र ध्यानादिभिरित्यर्द्धेन दृष्टान्तमुखेनोत्तरकाण्डीयसाधनं व्यापारश्चोक्तः ॥ फलन्तु ज्ञानिनस्तदभिव्यक्तावित्यनेनैवोक्तम् ॥ १५ ॥

व्रजभाषाटीका ।

शङ्का—वेदमें पशुपुत्रादिक तुच्छफल देवेवारे विकृतिप्रयुक्तके क्यों वर्णन कियो ताको उत्तर देहैं ॥ नित्यकर्मेति ॥पशुपुत्रादिक नहिंहोय तो नित्य अग्निहोत्रादि कर्म नाहिं बनसकें तथा पशुपुत्रादिक यालोकके फल नहिं सिद्धहोय तो परलोकके विनादेखें स्वर्गादिफलमेंसों विश्वास जातोरहैगो तो कोई वेदके कर्ममें प्रवृत्त नाहिंहोयगो तासों पशुपुत्रादिक विकृतफलभी वेदसों सिद्ध होवे है ॥१३॥ ऐसोही श्रुतिको अभिप्राय है तामें कहा प्रमाण है तहाँ कहेहैं ऐसो वेदको अभिप्राय नाहिं होयतो नित्यकर्मके अङ्ग जे अपःप्रणयनादिक हैं उनके पशुप्रतिष्ठा आदि फल क्यों बतावते क्योंकी एककर्मके दो फल नाहिंहोयसकें हैं तासों साङ्गनित्यकर्मकीभी यज-

मान जो पशुपुत्रादिकी कामनासों एक आवृत्ति करें तो वोभी फल सिद्धहोय ॥ ऐसेंही कामनाकरके ज्ञानकूं सिद्धकरे तो ज्ञानसोंभी पशुआदिकी प्राप्ति होय "य एवं वेद पशुमान् भवति" परन्तु कामनार्थ होयतो होय वो ज्ञान कर्मको अङ्ग है विकृतियाग प्रकृतियागके फलकूं नहिं सिद्धकरसकेहै और प्रकृतियागके तो अङ्गभी विकृतियागके मुख्यफल देवेवारे कहेहैं येही प्रकृतिको आधिक्य तासों स्वतन्त्रतासों पशुपुत्रादिक फल नहिंहै किन्तु जैसे बने तैसे नित्य अविकृत अग्निहोत्रादिक यज्ञात्मक भगवान्की सिद्धिही वेदनें जताई है ॥ १४ ॥ शङ्का। यज्ञादिक तो हमारी कृतिसों सिद्ध होयहैं अर्थात् हमारे बनाये बने हैं ये नित्य कैसें होयसकें ? उत्तर–ध्यानादिभिरिति ॥ जैसे ध्यानधारणादिकसों आनन्दरूपभगवान् मूर्तिमें प्रगटहोजावें हैं तैसें अग्निस्थापनसों आदिलेके यज्ञ पूर्ण होय जहाँताँईकी ध्यानादिकनकरकें सहित जे वेदकी बताईभई देहचेष्टारूप क्रिया तिनकरकें यज्ञरूपी भगवान् प्रकट होवेहै अर्थात् नित्य सर्वदा विद्यमान जो यज्ञभगवान् हैं उनको वैदिकक्रियाकरके प्रकटहोनामात्रही है उनकी उत्पत्ति नहिं है ऐसें व्याख्यानकरवेको अभिप्राय वर्णनकरें हैं ॥ १५ ॥

दुःखाभावः सुखं चैव पुरुषार्थद्वयं मतम् ॥ मोक्षः कामस्तयोरङ्गं धर्मो ह्यर्थेन साधितः ॥१६॥

तत्त्वदीपप्रकाशः।

नन्वेवमर्थव्याख्याने कोभिप्रायस्तत्राह ॥ दुःखाभाव इति ॥ पुरुषार्थपर्यवसायी वेदः। पुरुषार्थाश्च चत्वारः ॥ तत्र साक्षात्पुरुषार्थद्वयं सुखं दुःखाभावश्चेति ॥ तत्र सुखं स्वर्गादिपदेनोच्यते ॥ दुःखाभावो मोक्षपदेन॥तयोः साक्षादङ्गंधर्मः ॥ आत्मचिन्तनस्यापि धर्मत्वात्॥ज्ञान-

साध्यत्वं धर्मयोग एवेति मतम् ॥ अतएव न ज्ञानस्य पुरुषार्थेषु गणना धर्मस्य च साधनं अर्थः ॥ एवं साक्षात्परंपरया चत्वारः पुरुषार्था भवन्ति ॥ अतः पश्वादिरर्थो यागसाधनम् ॥ यागश्च धर्मः कामसाधनं ज्ञानसहितो मोक्षसाधनञ्च ॥ अत एव व्याख्यायत इत्यर्थः ॥ १६ ॥

आवरणभंगः ।

जैमिनीयमतमनादृत्य यज्ञानामधिकारिभेदेन मोक्षादिसाधकत्वं नतु लौकिकपरत्वं यज्ञानां भगवद्रूपत्वञ्चेत्येवं व्याख्याने इत्यर्थः ॥ कामपदस्य सुखवाचकत्वं "कामान् समर्धयंतु नः" "आत्मनस्तु कामाय जाया प्रिया भवति" "गतागतङ्कामकामा लभन्ते" इत्यादौ काम्यते असौ काम इति योगेन सिद्धम् ॥ विधिवाक्यादौ तदेव स्वर्गाक्षय्यसर्वलोकपदैरुच्यत इत्याशयेनाहुः ॥ ॥ तत्र सुखमित्यादि ॥ ॥ मोक्षपदममृतादिपदसंग्राहकम्। तयोः साक्षादङ्गं धर्म इति क्लृप्तद्वारातिरिक्तानन्तरितत्वेन साधनतया शेषभूत इत्यर्थः ॥ ननु "आत्मा वारे द्रष्टव्यः" इत्यादिश्रुत्यात्मऽऽज्ञानादौ मोक्षसुखसाधनत्वोक्तेः कथन्धर्मएव तथात्वमत आहुः ॥ आत्मेत्यादि ॥ ॥ "अयं हि परमो धर्मो यद्योगेनात्मचिन्तनम्" इति याज्ञवल्क्यस्मृतेस्तस्य धर्मत्वात्सुखमोक्षयोर्ज्ञानसाध्यत्वं ज्ञानस्य धर्मान्तःपातएव सर्वेषां संमत इत्यर्थः॥अत्र गमकमाहुः॥ ॥अतएवेत्यादि ॥ ॥ तथाच स्मृतिपुराणानां सर्वतन्त्रसाधारणत्वात्तेषु ज्ञानत्वेन पुरुषार्थत्वानुक्तेर्धर्मत्वस्य चोक्तेस्तेनैवंरूपेण पुरुषार्थत्वं निश्चीयत इत्यतस्तथेत्यर्थः ॥ नन्वस्तु धर्मस्य सुखमोक्षसाधकत्वन्तथापि पश्वादीनां स्वतन्त्रफलत्वानङ्गीकारे किं बीजमत आहुः ॥ ॥ धर्मस्य चेत्यादि ॥ अयमाशयः । पश्वादीनां स्वतंत्रफलत्वाभ्युपगन्तृमते तेषां न तेन रूपेण फलत्वं सर्वसाधारणत्वात् ॥ किन्तु स्वेष्टत्वेन रूपेण॥ इष्टेस्तु मेऽस्त्विदमित्याकारस्तत्र प्रविष्टाया ममताया अविद्याकार्यत्वेन दुःखरूपत्वात्तत्सम्बन्धेन पश्वादीनामपि तथात्वात्तेषामनर्थरूपतया नार्थत्वम् ॥ किञ्च यागदानादौ धर्मत्वेनार्थत्वेन साध्यसाधनफलभावः प्रत्यक्षाद्व्यभ्रानाच्च निश्चितः॥ अर्थत्वेन धर्मत्वेन तु शाब्दः । " को हि वेद यदमुष्मिंल्लोकेऽस्ति वा नवा " इति श्रुतेरन्तरायबाहुल्याच्च सन्दिग्धोऽपि । एतेन जयतीर्थयात्रादावर्थैनैरपक्ष्यमपि व्याख्यातम् ॥ अदृष्टाच्च दृष्टं बलवत् । अत इदं धर्मस्य ह्यापवर्ग्यस्येत्यत्रोक्तं तदनङ्गीकारे बीजमित्यर्थः ॥ ॥ एवमिति ॥ ॥ अनेन प्रकारेण ॥ ननु " धर्मादर्थ श्च कामश्च " इत्याद्युक्तप्रकारेण ॥ नच तद्विरोधःशंक्यः । तत्राऽपि काम्यकर्मत्यागएव व्यासचरणानान्तत्पर्यात् । भारतस्य वेदव्याख्यानरूपत्वात् । अप्रियवाक्ये-

"धर्मो नित्यः सुखदुःखे त्वनित्ये" इति निन्दाकथनाच्चेत्यर्थः ॥ अतोतिरागिणः कामाद्यर्थं काम्ये प्रवृत्तौ तत्फलानन्तरं धर्मे आदरोत्पत्तौ ततः सुखदुःखानामनित्यत्वदर्शनात्तत्परित्यज्य नित्यफलसांमुख्येन तत्करणे तत्सिद्धौ परम्ब्रह्माधिगच्छतीत्युपसंहारोक्तफलप्राप्तिर्मोक्षो वा भवतीति तत्तात्पर्यं बोध्यम् ॥ एवं तावत् पञ्चात्मकमिति मङ्गलकारिकायां भगवद्रूपो यो वेदार्थ उद्दिष्ट आसीत्स सर्वोऽपि अग्निहोत्रमित्यादिषु व्याख्यासहितासु कारिकासु यथाक्रमम्प्रकृतिस्वरूपनित्यकाम्यस्वरूपतत्तारतम्याधिकारभेदतत्फलोक्तिप्रयोजनविकृतिस्वरूपतत्फलसाधकत्वबीजयागनिष्ठभगवत्त्वबाधकनिरासधर्मनिष्ठनान्तरीयकसाधनता चेत्येवमादिरूपेणोपपादितः ॥ १६ ॥

व्रजभाषाटीका ।

दुःखाभाव इति ॥वेद पुरुषार्थको सिद्धकरवेवारो है।पुरुषार्थ चार हैं तहाँ साक्षात् पुरुषार्थ दोय हैं।दुःखभाव दुःख नहिं होनो सुखको प्राप्तहोनो तहां स्वर्ग अक्षय्य सर्वलोकादिपदनकरकें सुख कह्यो है मोक्ष अमृतआदिपदनकरके दुःखाभाव कह्योहै इन दोनोंकी प्राप्ति धर्मकरकें होवे है तहां "अयं हि परमो धर्मो यद्योगेनात्मचिन्तनम्" यावाक्यसों ज्ञानभी धर्ममेंही गतार्थ है याहीसों ज्ञानकी न्यारी पुरुषार्थमें गणना नहिं है। धर्मको सिद्धकरवेवारो अर्थ है याप्रकार साक्षात् परम्पराकरके चार पुरुषार्थ हैं ॥ यहां धर्म अर्थ काम मोक्ष इन चारपुरुषार्थनमें कामनाम सुखको है, मोक्षनाम सर्वथा दुःख दूरहोयेसों कहेहैं, तहां पशुपुत्रादिक अर्थ यज्ञरूप धर्मको सिद्धकरवेवारो है, ज्ञानरहित यज्ञरूपधर्म स्वर्गरूप कामको सिद्धकरवेवारो है, और ज्ञानसहित यज्ञ दुःखाभावरूप मोक्षको सिद्धकरवेवारो है ॥ तात्पर्य यह है अत्यन्त अनुरागी मनुष्य कामनासिद्धिके लिये काम्यकर्मनकूं करेगो वाकी कामना सिद्धभयेसों वाको धर्ममें विश्वास होयगो। फिर लौकिकसुखदुःखनको अनित्य देखकें सकामकर्मनकूं छोडके नित्यफलप्राप्तिकेलिये नित्यकर्म करेगो,ज्ञानयुक्त नित्यकर्म करके परब्रह्मप्राप्ति होयगी १६

साधनञ्च फलञ्चैव हरिर्वेदे निरूप्यते ॥ तदभिव्यक्तितः सर्वं पुरुषार्थस्वरूपतः ॥ १७ ॥ रूपप्रपञ्चकरणादासक्तःस्वांशवारणे ॥ श्रुतिमात्मप्रसादाय चकारात्मानमेव सः ॥ १८ ॥

तत्त्वदीपप्रकाशः ।

उपसंहरति ॥साधनञ्च फलञ्चैवेति॥ उभयात्मको हरिर्वेदे निरूप्यते ततश्च वेदानुसारेण तदभिव्यक्तौ सत्यां सर्व एव पुरुषार्थः सिध्यति ॥ यतो भगवान् पुरुषार्थस्वरूपः ॥ १७ ॥ एवं वेदार्थं निरूप्य वेदस्य स्वरूपं विनिरूपयन् प्रयोजनञ्चाह ॥ रूपेति ॥ विचित्रो रूपप्रपञ्चः ॥ जीवाश्चांशाः । अल्पानां विचित्रे भ्रमो भवत्येवातस्तन्निवारणार्थं श्रुतिञ्चकार ॥ तस्याः स्वरूपमाह ॥ आत्मानमिति ॥ नन्वन्तर्यामिणैव कथं न निवार्यन्त इति तत्राह ॥आत्मप्रसादायेति॥अन्तःकरणप्रसादाय जीवान्तर्यामिणौ पूर्वमेव हृदये प्रविष्टौ भोगभोजनार्थं तदनुभोगेन मालिन्यञ्चित्ते जातं नान्तःस्थितेन दूरीकर्त्तुं शक्यमतो बहिःस्थितेन प्रवेशसमर्थेन तद्दूरीकर्त्तव्यमिति श्रुतिनिर्माणमित्यर्थः ॥ १८ ॥

आवरणभंगः ।

तत्सर्वं संगृह्याहुः ॥ ॥ उपसंहरतीति ॥ ॥ यदीयपरिकरत्वेनेदं सर्वमुक्तं तं वेदार्थं सङ्गृह्य दर्शयतीत्यर्थः ॥ ॥ उभयात्मक इति ॥ ॥ द्रव्यदेवतासम्बन्धो देवतोद्देशेन द्रव्यत्यागो वा याग इति लोके प्रसिद्धः ॥ तत्र देवतानाम्भगवद्रूपत्वम्भगवदवयवत्वात् ॥ " मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूप " इत्यादिश्रुतिभ्यो " नासत्यदस्रौ परमस्य नासे " इत्यादि " देवा नारायणाङ्गजाः " इत्यादिवाक्यैः सिद्ध्यति ॥ भगवत एव सर्वशब्दाभिधेयत्वेन च । "इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः ससुपर्णो गरुत्मान्॥एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः" इतिश्रुतेस्तल्लिङ्गाद्यधिकरणैश्च ॥ त्यागसम्बन्धकर्माणान्तु " मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहं " इत्येकादशस्कन्धीयभगवद्वाक्यैः ॥ उपकरणस्य तु पुरुषसूक्तेन द्वितीयस्कन्धस्थपुरुषसूक्ताध्यायेन च सिद्ध्यति ॥ फलस्य भगवद्रूपता स्वा-

नन्दात्मकत्वादेव सिद्धा। एवं सति "सर्वे वेदा यत्पदमामनन्ति" "वेदैश्च सर्वैरहमेव वेद्यः" इत्यादौ सर्वशब्दस्यासङ्कुचितवृत्तिकत्वाद्वैदिकैः सर्वैः शब्दैर्मुख्यवृत्त्या भगवानेव बोध्यते॥ सङ्कुचितवृत्त्या च तत्तत्कार्यार्थं तत्तद्रूपः॥ ॥ तदिदमुक्तं ॥ हरिर्वेदे निरूप्यत इति॥ ॥ सिद्ध्यतीति॥ ॥ यथाधिकारं सिद्ध्यति॥ तत्रहेतुमाहुः॥ ॥ यत इत्यादि॥ ॥ यदि प्रकारान्तरेण सिद्ध्येत् पुरुषार्थरूपो न स्यादत एवं सिद्ध्यतीति सर्वोऽपि पूर्वोक्तार्थो सङ्गृहीतः। तेन बलनिरूपणार्थं प्रमाणानुरोधि प्रमेयमेकं निरूपितम्॥ १७॥ अतःपरम्प्रमाणस्य बलवत्त्वाय तत्स्वरूपं निरूपयितुमाहुः॥ ॥ एवमित्यादि॥ ॥ अन्यथा पूर्वप्रकरणोक्ते शब्दएव प्रमाणमित्यादिरूपे संदर्भासम्भावनाद्यनुपशमे ग्रन्थप्रयासवैफल्यमिति तत्प्रयोजनस्यान्तःकरणशुद्धिरूपस्य तत्स्वरूपादिकथनस्य चावश्यकत्वमिति भावः॥ ॥ श्रुतिं चकारेति॥ ॥ एतेनापौरुषेयवाक्यत्वं पौरुषेयत्वेनाभगवत्त्वं च वदन्तो निरस्ताः॥ "एतस्यैव महापुरुषस्य निश्वसितं यदृग्वेदो यजुर्वेदः सामवेद इति" "प्रचोदिता येन पुरा सरस्वती" इति "वेदो नारायणः साक्षात्" इत्यादिश्रुतिस्मृतिविरोधात्॥ ॥ अन्तर्यामिणेति॥ ॥ अल्पत्वेऽपि स्वरूपात्मकतयान्तरतया च व्यापकत्वादभ्रान्तत्वात्सम्भावितसामर्थ्येनेत्यर्थः॥ ॥ भोगभोजनार्थमिति॥ "ऋतम्पिबन्तौ" इतिश्रुतेः॥ यद्यप्यनशनश्रुत्या जीववन्न भोगस्तथापि नियतकार्यकत्वादसमर्थत्वम्॥ तदेतदुक्तं॥ ॥अन्तःस्थितेनेति॥ ॥ उत्करीत्यान्तःपातिनेत्यर्थः॥ अत एव "परमात्मा मे शुद्ध्यन्ताम्" इतिश्रुतिः॥ "हृदि स्थितो यच्छति भक्तिपूतः" इति तृतीयस्कन्धे विदुरवाक्यश्चातो न चोद्यावकाशः॥ १८॥

व्रजभाषाटीका।

वेदमें साध्यसाधनरूप करकें हरिको निरूपण कियो है वेदानुसार बर्ताव करवेसों साध्यसाधनरूप भगवान्के प्रगट होयवेसों सब पुरुषार्थ सिद्ध होवें हैं क्योंकी भगवान्ही पुरुषार्थस्वरूप हैं। या प्रकार वेदके अर्थको निरूपण करकें वेदके स्वरूपको निरूपण करते भये प्रयोजन कहें हैं॥ १७॥ रूपेति॥ भगवान्को जगत्रूप बडो विचित्र है या विचित्र जगत्में अल्पभगवदंश जीवनकूं भ्रम होजावे है वा भ्रमके दूरकरवेकेलिये श्रुति वेदरूपकरके भगवान्ही प्रकटभये

तहाँ अन्तर्यामीरूपकरकेही जीवको भ्रम क्यों नहिं दूरकियो यह शङ्का नहिंकरनी क्योंकि जीव तथा अन्तर्यामी वे दोनों भोगवेकेलिये हृदयमें पहिलेसोंही प्रविष्ट होरहेहैं तहाँ भोगकरके भई जो चित्तकी मलिनता है वाकूँ भीतरस्थित अन्तर्यामी नहिंदूरकरसके है तासों भीतर हृदयमें धसवेकों समर्थ ऐसें बाहिरस्थित वेदरूपसों प्रकट होयके चित्त प्रसन्न होयवेकेलिये भ्रम दूरकरे हैं येही वेदको प्रयोजन है॥ १८ ॥

इति नित्यः श्रुतेरर्थः सात्विकानाम्प्रकाशते ॥
उत्पन्नास्त्रिविधा जीवा देवदानवमानवाः॥१९॥

तत्वदीपप्रकाशः ।

इदमेव श्रुतेः प्रयोजनमित्याह ॥ **इतीति** ॥ अध्यापनादिना धर्मादिकमपि साधयति परं नित्योयमेवार्थः प्रयोजनम् ॥ अथवा पञ्चात्मको भगवाम्वेदार्थ इति निरूप्य सर्वेषां तथा बुद्ध्यभावमाशंक्य तेषां दोषं कथयन् स्वोक्तमुपसंहरति ॥**इतीति** ॥ सात्विकानामेवायमर्थः प्रकाशते न सर्वेषामित्यर्थः ॥ ननु सर्वे भगवदंशास्तत्र कथञ्चन सात्विका अन्ये नेति व्यवस्था तत्राह॥ **उत्पन्ना इति** ॥ "प्रजायेय" इति भगवदिच्छया विनिर्गताश्चिदंशा जीवास्तुल्या मा भवन्त्विति भगवन्मायागुणैस्त्रिविधैस्ते व्याप्तास्त्रिविधरसभोगाय ॥ अन्यथा तामसवस्तूनां भोगो न स्यात् ॥ अतएव श्रुतौ "त्रयः प्राजापत्याः" इति देवा मनुष्या असुरा गणिताः ॥ पञ्चरात्रेऽपि " त्रिविधा जीवसंघास्तु देवमानुषदानवाः ॥ तत्र देवा मुक्तियोग्या मानुषेषूत्तमा अपि ॥ मध्यमा मानुषा ये तु सृतियोग्याः सदैव हि ॥ अधमा निरयायैव दानवास्तुतमोलयाः "इति ॥अतो जीवानान्त्रैविध्यात्तदनुगुणा एवान्तःकरणादयोऽपि तेषां भवन्ति ॥ १९ ॥

आवरणभंगः ।

अर्थशब्दस्याभिधेयार्थकत्वमादाय किञ्चित्परिहर्तुं व्याख्यानान्तरमाहुः॥ अथ-
वेत्यादि ॥ स्वोक्तमिति ॥ वेदस्वरूपफलार्थविषये यदुक्तन्तदित्यर्थः ॥ सात्विकाना-
मेव प्रकाशने हेतुरग्रेनुपदमेव व्युत्पाद्यः । प्रसङ्गाद्वेदविषये व्युत्पादनाय किञ्चि-
त्परोक्तमेव लिख्यते । तत्रापि यो विशेषः क्वचित्सोऽपि तत्र प्रकाश्यते ॥ तथाहि ॥ स
च वेदो मन्त्रब्राह्मणात्मकः। तत्र मन्त्रा अनुष्ठानप्रकारभूतद्रव्यदेवतादिप्रकाशकाः ।
तेऽप्युत्सर्गतस्त्रिविधाः।ऋग्यजुःसामभेदात् । तत्र गायत्र्यादिछन्दोविशिष्टा ऋचः ।
ता एव गानयुक्ताः सामानि । तदुभयविलक्षणानि यजूंषि । अग्निदग्नीन्विहरेत्यादि-
सम्बोधनरूपाणि गद्यानि विदादयश्चान्येऽत्रैवान्तर्भवन्ति ॥ ब्राह्मणमपि त्रिविधं
विध्यर्थवादतदुभयविलक्षणभेदात ॥ विधिरपि चतुर्विधः । उत्पत्त्यधिकारिविनियो-
गप्रयोगभेदात् ॥ तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिः । "यदाग्नेयो-
ष्टाकपालोमावास्यायां भवति" इत्यादिः । सेतिकर्तव्यताकस्य यागादेः फलसं-
बन्धबोधको विधिरधिकारिविधिः । यथा "दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत"
इत्यादिः । अङ्गसंबन्धबोधको विधिर्विनियोगविधिः । यथा "व्रीहिभिर्यजेत स_
मिधो यजति" इत्यादिः ॥ साङ्गप्रधानप्रयोगैक्यबोधको विधिः पूर्वोक्तविधित्रय_
मेलनरूपः प्रयोगविधिः । स च श्रौत इत्येके काल्प इत्यपरे ॥ कर्मस्वरूपमपि च_
तुर्विधम् । उत्पत्त्याप्तिविकृतिसंस्कृतिभेदात् । तत्र "वसन्तेऽग्नीनादधीत" "यूप_
न्तक्षति" इत्यादिना संस्कारविशेषविशिष्टाग्नियूपादेरुत्पत्तिः ॥ "स्वाध्यायोध्येत-
व्यः" "गाम्पयो दोग्धि" इत्यादावध्ययनदोहनादिना विद्यमानस्यैवाध्ययनपयः-
प्रभृतेराप्तिः । "सोममभिषुणोति व्रीहीनवहन्त्याज्यं विलापयति" इत्यादावभि-
षवणावघातविलापनैः सोमादीनां विकारः।"व्रीहीन्प्रोक्षति" "पत्न्यवेक्षते" इत्या-
दौ प्रोक्षणावेक्षणादिभिर्व्रीह्याज्यादिद्रव्यसंस्कारः । एतच्चतुष्टयं चाङ्गकर्मैव । तथा
कर्तृकारकाण्यनाश्रित्य विहितमर्थकर्म । तच्च द्विविधम् । अङ्गम्प्रधानञ्च । अन्या-
र्थमङ्गम् । अनन्यार्थम्प्रधानम् ॥ अङ्गमपि द्विविधम् । संनिपत्त्योपकारकमाराद्उपका-
रकञ्च । तत्र प्रधानस्वरूपनिर्वाहकम्प्रथमम् । फलोपकारि द्वितीयम् । एवं सम्पूर्णा-
ङ्गसहितो विधिः प्रकृतिः । विकलाङ्गसहितो विकृतिः । तदुभयविलक्षणो विधिरङ्ग-
विधिः एवमन्यदप्यूह्यम् । तदेवं निरूपितो विधिभागः ॥ प्राशस्त्यनिन्दान्यतरल-
क्षणया विधिशेषभूतं वाक्यमर्थवादः । स च त्रिविधः।गुणवादोऽनुवादो भूतार्थवाद-
श्चेति । तत्र प्रमाणान्तरविरुद्धार्थबोधको गुणवादः । यथा आदित्यो यूप इत्यादिः ।
प्रमाणान्तरप्राप्तार्थबोधकोऽनुवादः । यथाग्निर्हिमस्य भेषजमित्यादिः। प्रमाणान्तर-

विरोधतत्प्राप्तिरहितार्थबोधको भूतार्थवादः । इन्द्रो वृत्राय वज्रमुदयच्छदित्यादिः ॥ तदुक्तम् । "विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानावर्थवादस्त्रिधा मतः" इति । तत्र त्रिविधानामप्यर्थवादानां विधिस्तावकत्वे समानेऽपि भूतार्थवादानां स्वार्थे प्रामाण्यं देवताधिकरणन्यायात् ॥ अबाधिताज्ञातज्ञापकत्वं हि प्रामाण्यं तच्च बाधितविषयत्वाज्ज्ञातज्ञापकत्वाच्च न गुणवादानुवादयोः। भूतार्थवादस्य तु स्वार्थे तात्पर्यरहितस्यापि औत्सर्गिकम्प्रामाण्यं न विहन्यते । तदेवं निरूपितोऽर्थवादभागः। विध्यर्थवादोभयविलक्षणन्तु वेदान्तवाक्यम् ॥ तच्चाज्ञातज्ञापकत्वेप्यनुष्ठानाप्रतिपादकत्वान्न विधिः । स्वतः पुरुषार्थपरमानन्दविज्ञानात्मकब्रह्मणि स्वार्थे उपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गवत्तया स्वतःप्रमाणभूतम् । सर्वानपि विधीनन्तःकरणशुद्धिद्वारा स्वशेषतामापादयदन्यशेषत्वाभावाच्च नार्थवादः ॥ तस्मादुभयविलक्षणमेव वेदान्तवाक्यम् । तच्च क्वचिदज्ञातज्ञापकत्वमात्रेण विधिरिति व्यपदिश्यते ॥ विधिपदरहितप्रमाणवाक्यत्वेन च क्वचिद्भूतार्थवाद इति व्यवह्रियत इति न दोषः । तदेवं निरूपितं त्रिविधं ब्राह्मणम् ॥ एवमुभयकाण्डात्मको वेदो धर्मार्थकाममोक्षहेतुः । स च प्रयोगत्रयेण यज्ञनिर्वाहार्थमृग्यजुःसामभेदभिन्नः । तत्र होत्रे ऋग्वेदेन । आध्वर्यवे यजुषा । औद्गात्रे साम्ना । ब्राह्मयाजमानौ त्वत्रैवान्तर्भूतौ ॥ अथर्ववेदस्तु यज्ञानुपयुक्तः शान्तिकपौष्टिकाभिचारिकादिकर्मप्रतिपादकत्वेनात्यन्तविलक्षण एव ॥ एवम्प्रवचनभेदात् प्रतिवेदं भिन्ना भूयस्यः शाखाः । एवञ्च कर्मकाण्डे व्यापारभेदेऽपि सर्वासां वेदशाखानामेकरूपत्वमेव ब्रह्मकाण्ड इति चतुर्णां वेदानाम्प्रयोजनभेदेन भेद उक्त इति मधुसूदनसरस्वती आह ॥ अत्रेयान्विशेषो बोध्यः ॥ मन्त्राश्चतुर्विधाः । आथर्वणानामपि मन्त्रत्वात् ॥ वेदेषु च यत्र यत्प्राचुर्यन्तत्र तन्नामकत्वं यथाऋग्बाहुल्येन ऋग्वेदः॥एवमन्येपि॥अथर्वलक्षणन्तु तथा न प्रसिद्धम्॥तेनोक्तत्रयातिरिक्तो वेदोऽथर्ववेदो ज्ञेयः।अथर्ववेदस्य ब्रह्मत्व उपयोगः पूर्वमासीद्यज्ञस्य चातुर्होत्रत्वात्तेन यज्ञ उपयुक्तः॥इदानीन्तु सुमन्तुना ऋषीणामपचारात्क्रुद्धेन स्ववेदमात्रादेवाथर्वणानाम्पृथक् यज्ञं कुर्वाणेनेतरोपयोगो निवारित इत्यनुपयुक्त इत्याथर्वणेषु प्रसिद्धत्वाच्च ॥ किञ्च । गुणवादानुवादयोरपि वाचन्धेनुमुपासीतेतिवत् ॥ गो अश्वा एव पशवोऽन्ये त्वपशव इत्यादावपि अन्येषामपशुत्वज्ञानपूर्वकं गोअश्वानाम्पशुत्वमनुसन्दधानेन तत्कर्म कर्त्तव्यम् ॥ तथा वायुर्वै क्षेपिष्ठेत्यादावपि शीघ्रगामिनीं देवतां ज्ञात्वा कर्म कर्तव्यमित्येवमाशयेनौत्सर्गिकम्प्रामाण्यं न विहन्यत इति ॥ अन्यत्स्वाहृतमेव ॥ प्रकृतमनुसरामः ॥ इच्छयेति पदं व्याप्ता इत्यनेनाप्यन्वेति ॥ अन्यथेत्यव्याप्तत्वे ॥ न स्यादिति ॥ तामसानामसमीचीनत्वेन

हेयत्वात्तद्योग्यभोक्त्रभावे वैयर्थ्यमेव स्यादित्यर्थः ॥ त्रिगुणव्याप्तत्वे किं मानमित्यत आहुः ॥ अतएवेत्यादि ॥ अन्यथा बृहदारण्यके स्तनयित्नुब्राह्मणे यत्त्रैविध्यमुक्तन्तत्तादृशगुणव्याप्तिं विना सम्भवद्बाधितमेव स्यादिति भावः॥ ननु श्रुतौ देहत्रैविध्यमुक्तन्तु जीवत्रैविध्यम् ॥ असुरशरीरे प्रवेशान्यथानुपपत्त्या तथाकल्पनन्तु न युक्तिसहम् ॥ अदृष्टविशेषादप्युपपत्तेरित्याकांक्षायाम्पूर्वोक्तनिश्चायकं मानान्तरमाहुः ॥ पञ्चरात्रेपीति ॥ तदनुगुणा इति ॥ तथा चादृष्टस्य मनःसम्बन्धोत्तरभावि कर्मजन्यत्वात्ततःपूर्वन्तदसम्भवान्नादृष्टेनोपपत्तिरिति भावः ॥ अदृष्टानादित्वन्तु ब्रह्मवादविरोधादेवोपेक्ष्यम् ॥ १९ ॥

व्रजभाषाटीका ।

वेदके पाठ करवेसों धर्मादिकभी सिद्ध होयहै ये नित्यप्रयोजन है। अथवा श्रीवल्लभाचार्यजी वेदार्थरूप जे पञ्चात्मक भगवान हैं उनको निरूपण करके सदोप जीवनकूँ याप्रकारको वेदार्थ नहिं मालुम पडेहै किन्तु सात्विक जीवनकूँही अर्थ प्रकाशमान होवेहै औरकूँ नहिंहोवेहै तहाँ सब जीव भगवानके अंश हैं ये कैसे मालुम होय यह सात्विकहै ये जीव सात्विक नहिं हैं ॥ तहाँ व्यवस्था करेहैं॥ उत्पन्नेति ॥ जब भगवानकी क्रीडाकेलिये बहुतहोयके प्रकट होयवेकी इच्छा भई तब चिदंश जीव आपके स्वरूपसों प्रकटभये वे सब जीव तुल्यही नहिं होयजाँय याकेलिये त्रिविधरसभोग करवेकेलिये तीनप्रकारके मायाके गुणनकरके व्याप्तभये त्रिविध जीव प्रकटकिये। अन्यथा तामसवस्तूनको भोग नहिं होयगो याहीसों श्रुतिमें "त्रयः प्राजापत्याः" या वाक्यमें देव मनुष्य असुर तीन प्रकारके जीव गिनेहैं। नारदपञ्चरात्रमेंभी तीनप्रकारकेही जीव लिखेहैं। तहाँ देवजीव तथा मनुष्यनमेंसों उत्तम जीव मुक्तियोग्य हैं, मनुष्यनमेंसों मध्यमजीव संसारके योग्य हैं, मनुष्यमेंसों अधमजीव नरककेलिये हैं, असुरजीव तामिस्र अन्धतामिस्रमें लय होयवेकेलिये हैं ॥ १९ ॥

सर्वे वेदविदो जाताःस्वभावगुणभेदतः ॥ तेषा-
म्प्रकृतिवैचित्र्याच्छ्रुत्यर्थो बहुधोदितः ॥ २० ॥
भावस्याज्ञानतः कर्म्ममात्रङ्केचिद्वदन्ति हि ॥
लोकप्रतीतं स्वीकृत्य कदाचिद्भगवान् वदेत् २१

तत्त्वदीपप्रकाशः ।

ततः किमत आह ॥ **सर्वे वेदविद इति** ॥ यथार्थं श्रुत्वापि ते यदा व्याचक्षते तदा स्वरुच्या वेदार्थं वर्णयन्ति स्वभावगुणानाम्भेदात् ॥ ततः किमत आह ॥ **श्रुत्यर्थो बहुधोदित इति** ॥ २० ॥ तानेव प्रकारानाह ॥ **भावस्येति** ॥ उपक्रमादिप्रकरणार्थस्य भावस्याज्ञानात्केवलं वाक्यार्थमेवानुभूय क्रियामात्रं वेदार्थं इति केचिदाहुः ॥ ननु महतां वाक्यात्तथा न भविष्यतीत्याशंक्याह ॥ **लोकप्रतीतमिति** ॥ महान्तो हि भगवदनुगुणाः॥ भगवाँश्च सर्वमार्गप्रवर्तकः॥ अतः कर्ममार्गवक्तॄननुसरति "एवन्त्रयीधर्म्ममनुप्रपन्नाः" इति । "वेदवादरताः पार्थ" इति "त्रैगुण्यविषया वेदाः" इति च ॥ अतो योगादिप्रचारार्थम्प्रकारान्तरापन्नश्रुत्यर्थनिन्दया तथा बोधयतीति महान्तोऽपि तमर्थं न निवारयन्तीत्यर्थः ॥ २१ ॥

आवरणभंगः ।

यथार्थमित्यादि ॥ तदेतदेकादशस्कन्धे । "वदन्ति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः । तेषां विकल्पप्राधान्यमुताहो एकमुच्यते" इत्युद्धवप्रश्ने "कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता" इत्यादिषु भगवद्वाक्येषु चतुर्दशाध्यायस्थेषु स्फुटति । "तेषाम्प्रकृतिवैचित्र्याच्चित्रा वाचः स्रवन्ति हि" इति तत्रोक्तेः ॥ बहुधोदित इति ॥ तथाच बहुधा प्रसृतत्वान्न सर्वेषान्तदर्थबोधोऽपि तु सात्त्विकानामेवेत्यर्थः ॥ २० ॥ प्रकारानिति ॥ "धर्ममेके यशश्चान्ये कामं सत्यन्दमं शमम् ॥ अन्ये वदन्ति वै स्वार्थमैश्वर्यं त्यागभोजनम् ॥ केचिद्यज्ञन्तपो दानं व्रतानि नियमान् यमान्" इत्यत्रोक्तानित्यर्थः ॥ एतेषु प्रथमोद्दिष्टमेव पक्षं लोकप्रसिद्धत्वादनुवदन्ति दूषणार्थम् ॥ भावस्येत्यादि ॥ उपक्रमेत्यादि ॥ अत्रैवम्भाति वेदस्योप-

क्रमो हि मन्त्रैर्देवतास्तुत्यादावुपयुक्तेः॥ प्रकरणञ्च यागस्य स च "यज्ञो वै विष्णुः" इति श्रुतेर्भगवद्रूपः ॥ देवताश्चाग्न्यादयो यागशेषा भगवदंगभूताः ॥ कर्ता पुरुषोऽपि यागशेषो भगवदंशः । पुरुषशेषभूतं फलमप्येतस्यैवानन्दस्यान्यानीत्यादिश्रुतेर्भगवदंशभूतम् । तथैवोपकरणान्यपि । एवं सर्वसाक्षात्परम्परया च भगवद्रूपमिति भगवत्येव श्रुतेस्तात्पर्यमिति प्रकरणार्थस्येत्यर्थ इति ॥ ननु यदि क्रियैव वेदार्थो न स्यात्फलञ्च लोकाद्यात्मकं यागानां न स्याद्वेदार्थश्च यदि गुणातीतः स्यात्तदा 'त्रैगुण्यविषया वेदा' इत्यादि भगवान्न वदेत् । यतो वदति ततः क्रियैव वेदार्थ इत्याशङ्कां हृदि निधायाहुः ॥ नन्वित्यादि ॥ महताञ्जैमिन्यादीनां विचारकाणां वाक्यान्छास्वरूपात्तथा न भविष्यति क्रियावादिनां वेदार्थस्याज्ञानं न भविष्यतीत्याशंक्य महतामाशयमाहेत्यर्थः ॥ लोकप्रतीतमिति ॥ क्रिया लौकिक्येव वेदार्थः फलञ्च लोकादिकमेवेत्येवं साधारणजनप्रतीतं स्वीकृत्य कदाचित् यागादिप्रचारावसरे भगवान् वदेदित्यर्थः ॥ तथा बोधयतीति लोकसिद्धम्मतान्तरं वेदार्थत्वेन बोधयति ॥ एवं सति गीतावाक्येष्वयमर्थो बोध्यः ॥ ये त्रैविद्याः स्वर्गतिम्प्रार्थयन्ते ते एवं त्रयीधर्ममनुप्रपन्नाः लोकप्रतीतप्रकारन्त्रयीधर्मपरम्परया प्रपन्ना नतु मदुक्तप्रकारकम् । अतएव कामकामा लौकिकसुखेप्सवो गतागतं लभन्ते नतु मुच्यन्त इति ॥ वेदवादरता इत्यत्रापि वेदे ये वादरताः नतु तात्पर्यज्ञातारः। अतएव "नान्यदस्तीति वादिनः" इत्यादिरूपास्तेषाञ्च समाधौ न बुद्धिरिति त एव निंद्यन्ते ॥ त्रैगुण्यविषयेत्यत्रापि त्रैगुण्यं गुणत्रयसमुदायः विषयो बोध्यो येषान्ते तथा इत्यलौकिकीम्प्रतीतिमादायैव वक्तीति ज्ञायते ॥ " वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे ॥ परोक्षवादा ऋषयः परोक्षञ्च मम प्रियम् " इत्येकादशस्कन्धीयभगवद्वाक्यात् ॥ अस्य गीतावाक्यस्य सांख्यस्तावकतायाः प्रकरणेन निश्चयाच्च । एवञ्च प्रथमवाक्यमप्यनन्याश्चिन्तयन्तो मामित्यग्रिमग्रन्थस्वारस्यादुपासनास्तावकम् ॥ तथैव द्वितीयं योगस्येति न तैः कृत्वा क्रियार्थोपष्टम्भ इति भावः ॥ २१ ॥

व्रजभाषाटीका ।

उन त्रिविधजीवनके अन्तःकरणभी गुणनके अनुसार न्यारे २ हैं तासों ये सब जीव वेदके अर्थकूं यथार्थ सुनके जब अपने मुखसों वर्णन करेहैं तब अपनी अपनी रुचिके अनुसार न्यारे२ वेदार्थ वर्णनकरे हैं, क्योंकि इनके स्वभावगुणनके भेदसों वेदार्थ बहुतप्रकारको होजावेहै॥२०॥उन प्रकारनकूँ कहे हैं॥भावस्येति॥उनप्रका-

रनको वर्णन भागवत११स्कन्धमें " धर्ममेके यशश्चान्ये" इत्यादि-श्लोकमें है ॥ उपक्रम उपसंहारकरकें प्रकरणार्थको विनाजाने केवल वाक्यार्थको अनुभव करकें कियामात्र वेदार्थ है ऐसें कितनेक कहेहैं॥शङ्का—जैमिन्यादिक ऋषिके वाक्यसोंभी तो क्रियाही वेदार्थ सिद्धहोवेहै तासों और क्रियावादिनकूँभी अज्ञान नहिं होयगो ? उत्तर—जैमिन्यादिमहर्षि भगवान्के अनुगुण हैं,भगवान् सब मार्गके प्रवर्तक हैं तासों कर्ममार्गके वक्तानकोभी अनुसरण करें हैं ॥ जैसे " एवन्त्रयीधर्ममनुप्रपन्नाः " इत्यादिस्थलनमें । तासों भगवान् योगादिकनको प्रचार होयवेकेलिये औरप्रकारसों किये श्रुत्यर्थकी निन्दा करकें लौकिकी क्रियाही वेदार्थ है स्वर्गलोकादिककी प्राप्तिही फल है यारीतिकी साधारणजनप्रतीतिकूँ वेदार्थ बतावें हैं यासों बडे ऋषिभी भगवदुक्तको निवारण नहिं करेंहैं॥ २१ ॥

फलन्तु सर्वमेवात्र तदंशत्वाद्भविष्यति ॥ अतः कामनिषेधो हि क्वचिद्भगवतोदितः॥ २२ ॥ यथोक्ते ह्यपुनर्जन्म ह्यन्यथा पुनरुद्भवः॥तदर्चिरादिधूमादिमार्गद्वयमुदीरितम ॥ वैराग्यार्थं तदप्युक्तं पञ्चाग्निख्यापने श्रुतौ ॥ २३ ॥

तत्त्वदीपप्रकाशः ।

ननु फलविसंवादात्स्वयमेव त्यक्ष्यन्तीत्याशंक्याह ॥फलन्त्विति॥ यागानाम्भगवदंशत्वात्सर्वमेव कामितं फलं भवति नतु नित्यन्तत् ॥ अतोऽन्यथा भगवता कामनिषेधो नोच्येतेत्याह ॥ अत इति ॥ "एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च" इति वाक्यात् ॥ २२ ॥ ननु वेदार्थश्चेदेक एव स्यात्कथं सहजाः फलत्वेन मार्गा भिन्नाः स्युः ॥

अर्चिरादिमार्गो धूमादिमार्गस्तृतीयो मार्गश्चेति ॥ अतो वेद एव तथा तथा वदतीति मन्तव्यमित्याशंक्याह ॥ **यथोक्त इति** ॥ नात्र वेदानुसारेण मार्गद्वयं किन्त्वेक एव मार्गो वेदोक्तस्तमाह ॥ **यथोक्ते ह्यपुनर्जन्म** ॥ अयथाज्ञानतः कर्मकरणाद्धूमादिमार्ग इत्याह ॥ **अन्यथेति** ॥ अनेन जायस्वेत्यपि मार्गः सङ्गृहीतः ॥ "येन स्यात् सृष्टिरेषोत्तरोत्तरा" इति ॥ एवमेव शास्त्रकारैर्भगवता चाभिप्रेत्य मार्गद्वयमुदीरितं नतूभयमपि साक्षाद्वेदाभिप्रेतामित्यर्थः ॥ नन्वस्य धूमादिमार्गस्य कथने किम्फलं नहि भ्रममार्गाः केनचिदुच्यन्ते किञ्च धूमादिमार्गीयकर्मणोऽविहितत्वे तत्फलं न स्यान्न ह्यविहितस्य भ्रमप्रतिपन्नस्य फलं सम्भवतीत्याशंक्याह ॥ **वैराग्यार्थमिति** ॥ तदपि भ्रमत्वेन प्रतिपन्नमपि जगति तस्य मार्गस्य प्रतीयमानत्वात् ॥ किञ्च पञ्चाग्निख्यापने श्रुतौ पञ्चाग्निख्यापनार्थन्तदुक्तम् ॥ पञ्चाग्न्युपासकस्य फलसिद्ध्यै यथा वेदे लोकसिद्धोऽनूद्यते "धन्वन्निव प्रपा असि" इत्यादौ तथा भ्रमसिद्धोप्यनूद्यत इति ॥ यदुक्तङ्किञ्चित्यादि तत्रोच्यते ॥ न ह्यत्रावैदिकत्वमुच्यते किन्तु कर्मण्येव पश्चादावेव तात्पर्यं श्रुतेरितिप्रकारकस्तात्पर्यभ्रमः ॥ एतस्य भ्रमत्वं "वेदवादरताः" इत्यादिवाक्यैर्निन्दितत्वेन ज्ञायते ॥ एवं सति तदुक्तिस्तु सर्वथा सन्मार्गविमुखस्यातिरागिणः पुंसः कथञ्चित्सन्मार्गे प्रवृत्त्यर्था ॥ तदुक्तं "रोचनार्था फलश्रुतिः" 'यथा भैषज्यरोचनम्' इत्यादि॥तथाच तत्फलस्य निरूपणे तुच्छत्वज्ञानेन वैराग्यार्थं तन्निरूपणमिति ॥ २३ ॥

आवरणभंगः ।

ननु फलसम्वादे निंदानवसर इत्यत आहुः ॥ नतु नित्यन्तादिनि ॥ ननु तथापि लोकसिद्धस्य वेदार्थत्वाभावे गीतायाङ्किङ्गमकमित्यत आहुः ॥ ॥ अन्यथेत्यादि ॥ अतइति ॥ यतस्तन्न नित्यं नापि पावनं वेदार्थस्तु तद्विलक्षणः अत इत्यर्थः ॥ तथाच गीतायामपीदमेव तात्पर्यमतो न सन्देह इत्यर्थः ॥ २२ ॥

किञ्चिदाशङ्कन्ते ॥ ॥ ननु वेदार्थ इत्यादि ॥ ॥ फलत्वेनेति । श्रद्धातपआदिफलत्वेन प्रतिपाद्यमाना इत्यर्थः ॥ ते च त्रयो मार्गाश्छान्दोग्ये "य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिरभिसम्भवन्ति" इत्यादिना "देवयानः पन्थाः" इत्यन्तेन "अथेमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति" इत्यारभ्य "चाण्डालयोनिं वा" इत्यन्तेन ॥ अथैतयोः पथोर्नैकतरेण च नेत्यारभ्य तृतीयं स्थानमित्यन्तेन पञ्चाग्न्युपासनकरणे प्रतिपादिताः ॥ अत इति ॥ ॥ इष्टापूर्तकर्तुर्धूममार्गगमनप्रतिपादनादित्यर्थः ॥ समादधते ॥ नात्रेत्यादि ॥ ॥ यथोक्ते ह्यपुनर्जन्मेति ॥ हि शब्दो हेतौ ॥ श्रुतावर्चिरादिमार्गस्य ज्ञानफलत्वकथनादितरयोश्च जघन्यतया निन्दनाद्गीतायाङ्कामनिषेधकथनात् ॥ श्रीभागवते च 'कर्ममोक्षाय कर्माणि विधत्त' इति ॥ भिदां मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदतीति कथनादेवमवसीयते तस्मादित्यर्थः ॥ ॥ संगृहीत इति ॥ अनभिप्रेतत्वेन संगृहीत इत्यर्थः ॥ ॥ एवमिति ॥ येन लोको न पूर्यत सृष्टिश्चोत्तरोत्तरा स्यादित्यर्थः ॥ किञ्चिदाशंक्य परिहरन्ति ॥ ॥ नन्वस्येत्यादि ॥ यद्ययं वेदानभिप्रेतस्तर्हीति शेषः ॥ किञ्चेत्यादिनोक्त आभासग्रन्थः प्रभूणाम् ॥ ॥ तत्फलमिति ॥ अविकाराविध्युक्तम्फलमित्यर्थः ॥ प्रतिपन्नमपीति पदं उक्तमिति मूलस्थपदेनान्वेति ॥ ॥ जगतीत्यादि ॥ जगत्क्लेशस्यानुभवसाक्षिकत्वात्तदनुवादेन जुगुप्सोत्पादनाय धूमादिमार्गकथनमिति तेनासौ लोको न सम्पूर्यते तस्माज्जुगुप्सेतेति तदुपसंहारग्रन्थादवसीयतेऽतस्ताद्दृशकर्मणस्तत्फलेभ्यश्च वैतृष्ण्यार्थन्तदुक्तिरिति सापि नित्यफलादिपोषणार्थैवेति भावः ॥ तत्प्रकरणमनुरुद्ध्य प्रयोजनमप्याहुः ॥ ॥ किञ्चेत्यादि ॥ ॥ पञ्चाग्निफलस्योत्कृष्टत्वकथनाय तदुक्तिर्न न तु तस्य तत्र तात्पर्यम् ॥ नहि निन्दान्यायादिति भावः ॥ ननु तथापि प्रतिपन्नस्य कथं श्रुतावनुवाद इत्यत आहुः ॥ ॥ यथेत्यादि ॥ अनूद्यत इति ॥ ॥ "त्वष्टा हतपुत्रो वीन्द्र ९ सोममाहरत्" इत्यादावनूद्यते ॥ नहि वीन्द्रः सोमो विहितो नवोच्छिष्टसोमहवनन्त्रवा मन्त्रस्वरत्यागः ॥ तथाच यथा तत्र तथात्रापीति नायन्दोष इति यदुक्तमित्यादिर्निरूपणमितीत्यन्तः प्रभूणां ग्रन्थो निगदव्याख्यातः ॥ २३ ॥

व्रजभाषाटीका ।

यद्यपि नित्यफलमेंही वेदको तात्पर्य है तथापि वैसे अधिकारीकों अनित्य काम्यफलमेंभी फरक नाहिंआवेहै क्योंकि याग भगवदंश है

तासों सब अभिलषित फलभी होयजाय है ॥ वह फल नित्य नहिं है परन्तु या प्रकारको लोकसिद्ध वेदार्थ नहिंहै । जो क्रियामात्रही वेदार्थ होय तो स्वर्गलोकादिकहीमात्र फल होय तब तो "एतान्यपितु कर्माणि संगं त्यक्त्वा फलानि च" इत्यादिगीतावाक्यमें कामनाको निषेधकरकें कर्म करवेको उपदेश नहिंकरते ॥ २२ ॥ शङ्का—वेदको अर्थ एकही होय तो फलरूप मार्ग न्यारे २ क्यों होने चाहिये. जैसे श्रद्धा तपश्चर्या इष्टापूर्ति आदिकनके फलरूप अर्चिरादिमार्ग जामार्गकरके जीव सूर्यलोकमें होयके गयो-भयो फिर नहिं आवेहै धूमादिमार्ग जामार्गकरके गयो जीव चन्द्रलोकमें जावेहै और धर्मक्षयहोवेमों पीछोभी चलोआवेहै तथा तीसरो मार्ग ये तीनों मार्ग छान्दोग्य उपनिषदमें लिखेहैं तासों वेदही न्यारे २ फल तथा न्यारे २ साधन बतावेहैं तब आत्मसुखकी प्राप्ति तथा नित्यकर्मकी प्रवृत्ति करवेमेंही वेदको तात्पर्य है ॥ ये बात कैसें बनसके ॥ उत्तर वेदके अनुसारमों दो मार्ग नहिं हैं किन्तु वेदोक्तमार्ग तो एकही है. ज्ञानसहित यथार्थकर्मकरके जामार्गमें गयो जीव पीछो जन्म नहिं ग्रहण-करे है और जो जीव यथार्थज्ञानविना कर्म करेहै वाको फेर जन्म होवेहै ॥ ऐसेही ज्ञानरहित सकाम कर्म करवेवालेकूं सृष्टि-वृद्धिकेलिये "जायस्व म्रियस्व" इति वाक्यानुसार अपनेही वशमें वारम्वार जन्ममरणको प्राप्त होनों पड़ेहै याहीमों अभिप्रा-यकूं विचारिके शास्त्रकारनने तथा भगवाननेंभी गीतामें दो-मार्गको वर्णनकियो है. परन्तु वेदको साक्षात अभिप्राय दोमार्गमें नहिं है । वेदको अभिप्राय तो यथार्थज्ञानसों कर्म करवायके "अपुनर्भव" फिर जन्म न हिं होय ऐसें अर्चिरादिमार्गमें

जीवको प्रवेश करवायवेमें है ॥ अब जो जीव यथार्थज्ञानसों कर्म नहिंकेंरहे वाकूँ पुण्यक्षय भयेसों पीछो जन्म लेनोपडेहै ॥ तहाँ शङ्का होयहै धूमादिमार्ग वेदमें क्यों वर्णनकियोहै जो कहोगे धूमादिमार्ग वेदसें विहित नहिंहै ताको यह उत्तर है जो विधान नहिंहै तो केवल भ्रममात्रसों जानेभये मार्गको फल कैसे होजायहै ताको उत्तर देवेंहै ॥ वैराग्यार्थमिति ॥ भ्रमसों प्रतिपन्नभी धूमादिमार्ग वेदमें वैराग्य होयवेकेलिये कह्योहै अर्थात् वारम्वार जन्ममरणादिक्लेश देखकै वैराग्य आवेगो तब नित्यकर्म करवेमें प्रवृत्त होयगो याकेलिये पञ्चाग्निविद्याके उपासककों फल सिद्धहोयवेकेअर्थ कह्योहै। जैसे अग्निकी स्तुतिके लिये "धन्वन्निव प्रपा असि" इत्यादिकनमें लोकसिद्ध मारवाडदेशकी प्याऊको अनुवाद है तैसे भ्रमसिद्ध धर्मादिमार्गकोभी वेदमें वैराग्य होयवेकेलिये अनुवाद है यासोंही पशुपुत्रादिक तथा स्वर्गादिकनमेंही वेदको तात्पर्य है यारीतिको जिनकूं भ्रम है उनकी गीताजीमें "वेदवादरताः पार्थ" "कामात्मानः स्वर्गपराः" इत्यादिश्लोकमें निन्दा लिखीहै ॥ भ्रमसिद्धकी उक्ति तो अत्यन्त विमुख अनुरागी मनुष्यकूं कोईप्रकारसों सन्मार्गमें प्रवृत्तिकरवेकेलिये है जब उनफलनसों वाकी तृष्णा मिटजायगी तब तुच्छ समुझके उनसों वैराग्य होयजायगो तापीछे जन्ममरण छूटवेकेलिये नित्यकर्ममें प्रवृत्त होयगो। तात्पर्य यह सिद्धभयो अनेकप्रकारके विकृतियाग तथा अनेकफलनको निरूपण वेदमें कियोहै सो पञ्चात्मकनित्यकर्ममें प्रवृत्तिकेलियेही कियोहै ॥ २३ ॥

बहुप्रकारमेकं हि कर्म वेदे प्रकाश्यते॥ भगवन्मूर्तितासिद्ध्यै ते सर्वे पूर्वजैर्धृताः॥२४॥अल्प-

ज्ञत्वादाधुनिकाः पाठज्ञानाक्षमा द्विजाः ॥ मन्दाः सुमन्दमतयो मन्दभाग्या ह्युपद्रुताः॥२५॥ द्वापरान्ते हरिर्व्यासस्तदर्थम्प्रथमं पृथक् ॥ चातुर्होत्रविभागेन न्यस्तवान् वेदरूपतः॥ शाखाभेदास्तु तच्छिष्यैस्तेनैव प्रेरितैः कृताः॥२६॥

तत्त्वदीपप्रकाशः ।

एवं वेदं वेदार्थञ्च निरूप्य शाखाभेदानां रूपमर्थञ्चाह ॥ बहुप्रकारमिति ॥ एको ज्योतिष्टोमो भगत्वात्सहस्रमूर्तिर्यावता वेदेनोच्यते सैका शाखा ॥ सर्वेषां सर्वशाखाज्ञानन्नास्तीति सामान्यधर्मसहित एव विशेषः सर्वत्रोच्यते ॥ तेन न सामान्यकथनेन पुनरुक्तिः ॥ यज्ञेषु भगवद्बुद्धिसिद्ध्यर्थमनेकरूपेण निरूपणं ते सर्वे विशेषप्रकाराः पूर्वजैर्मरीच्यादिभिर्धृताः ॥ २४ ॥ आधुनिकानान्तथा सामर्थ्याभावात् शाखाप्रणयनम् ॥ तत्राप्येका मूर्त्तिर्यावता वेदभागेन निरुक्ता भवति तावतोऽप्यध्ययनं दुर्लभमिति प्रथमतश्चतुर्धा मूर्तेश्चतुर्थांशो यावता प्रतिपाद्यते तावन्तं व्यासः पृथक् कृतवान् ॥ तस्य खण्डस्य सहस्रमूर्त्तावप्युपयोग इति स एवांश एको यावता निरुक्तः सन् ऋगादीनामेका शाखेति तथा व्यासशिष्यैः कृतामित्यर्थः ॥ २५ ॥ २६ ॥

आवरणभंगः ।

अवसरसङ्गत्या साधनैर्बहुरूपमित्यस्यार्थं वक्तुमाहुः ॥ ॥ एवं वेदमित्यादि ॥ चाहेति चकारःप्रयाजनेस्यानुष्ठानप्रकारादेश्च संग्राहकः ॥ ॥ बहुप्रकारमित्यादि ॥ ॥ तथा च यदि भगवत्त्वं यज्ञस्य नाभिप्रेयात्तदैकमेव तं नानारूपेण न ब्रूयात् ॥ एकेनैव रूपेण तस्य फलस्य सिद्धेः ॥ यद्यशक्तार्थं रूपान्तरन्तर्हि तेनैव शक्तस्य फलसिद्धेस्तदेव ब्रूयात् ॥ यदि पौष्कल्यार्थं रूपान्तरन्तर्हि तदेव फलत्वेन वदेन्नतु सर्वत्रैकम्फलं वदेत् । तस्माद्भगवन्मूर्तित्वसिद्ध्यर्थमेव तथा वदन्तीति निश्चयः ॥ ननु प्रकारबाहुल्ये कर्मणः कथमेकत्वमित्याकांक्षायाम्बहु-

प्रकारस्य कर्मण एकत्वे शाखान्तराधिकरणसिद्धार्थमुपदर्शयन्ति ॥ ॥ एक इत्यादि ॥ ॥ अयमर्थः । शाखान्तराधिकरणे नामरूपधर्मविशेषपुनरुक्तिनिन्दाशक्तिसमाप्तिवचनप्रायश्चित्तान्यदर्शनाच्छाखान्तरेषु कर्मभेदः स्यादितिसूत्रेण भेदमाशंक्य "एकं वा संयोगरूपचोदनाख्याऽविशेषात्" इतिसूत्रेण सर्वशाखासु "जोतिष्टोमेन स्वर्गकामो यजेत" इति स्वर्गफलसंयोगस्य द्रव्यदेवतयोर्यजनचोदनया ज्योतिष्टोमेत्याख्यायाश्चाविशेषात्सर्वशाखाप्रत्ययमेकमेव कर्मेति व्यवस्थाप्यन् नाम्ना स्यादचोदनाभिधानत्वादित्यादिभिश्चतुर्विंशतिसूत्रैः पूर्वपक्षहेतवो निराकृताः ॥ तथाहि ॥ काठककौथुमादिनामभेदान्न कर्मभेदः ॥ तत्तच्छाखोक्ता ज्योतिष्टोमादयः शाखान्तरोक्तेभ्यस्तेभ्यो भिन्नाः काठककौथुमादिभिन्ननामवत्त्वात् ॥ ज्योतिर्ज्योतिष्टोमादिवदिति साधने हेतोः स्वरूपासिद्धत्वात् । काठकमधीत इति प्रयोगदर्शनेन काठकेन यजेतेत्याद्यदर्शनेन तेषां ग्रन्थनामतया ग्रन्थसंयोगेन कर्मणि लाक्षणिकतया च कर्मनामत्वाभावेन पक्षे हेत्वभावात् ॥ अथ काठके भवङ्काठकमिति समाख्यामाश्रित्य यौगिकत्वेन हेतुं विशेष्यार्चिकयाजुषहौत्राध्वर्यवकर्मवदिति दृष्टान्तेन भेदः साध्यते । तदप्यसङ्गतम् ॥ नानाशास्त्रभवलंघनाद्येकचिकित्सावदिति दृष्टान्तेन हेतोः साधारणत्वात् ॥ किश्चैवं योगिकनामभेदेन कर्मभेदसाधने एकशाखोक्तानामग्निहोत्रदर्शपूर्णमासादीनामप्येकत्वेनैककर्म्यापत्तेश्च । किंञ्च ॥ काठकादिसंज्ञानाम्प्रवचनानन्तरभावित्वेन ततःपूर्वमभेदात्तदनन्तरम्भेदवैरूप्यापत्तेश्च । नापि रूपभेदात् । वाचनिकत्वेन तस्यापि साधारणत्वात् "पयसा जुहोति यवैर्जुहोति विष्णुरुपांशु यष्टव्यः विश्वेदेवा उपांशु यष्टव्याः" इत्यादिषु रूपभेदेप्यग्निहोत्रोपांशुयागयोरभेदात् ॥ नापि धर्मविशेषात् । कारीरीवाक्यान्यधीयानास्तैत्तिरीया भूमौ भोजनमाचरन्ति नान्य इति विशेषस्याध्ययनधर्मत्वेन कर्मधर्मत्वस्यैवाभावात् ॥ नाप्यविशेषपुनर्वचनात् । एकत्र प्रकरणे बहुकृत्वः श्रवणाभावेन तस्यैवाभावात् । तच्छ्रवणेन स एवायं याग इति प्रत्यभिज्ञोदयाच्च । न च क्वाप्यग्नीषोमीयमेकादशकपालं क्वचिद्द्वादशकपालमिति गुणविशेषविधानार्थायाः पुनरुक्तेरनुवादकत्वं शंक्यम् । तथासत्येककर्मत्वस्यैव सिद्धेः । वस्तुतस्तु नानुवादकत्वं । शाखात्वानुपपत्तिप्रसङ्गात् ॥ यथा वृक्षे यावन्ति पुष्पफलपत्राणि शाखाभेदेन तत्र तत्र भवन्ति तथात्र वेदस्थं कृत्स्नं गुणकाण्डं तत्र तत्र शाखाभेदेन वर्तत इति सादृश्येन तस्य तस्य भागस्य शाखात्वव्यपदेशात् । तथा सति यथा तत्तच्छाखीयकुसुमादिषु न गुणप्रधानभावस्तथात्रापि तौल्येनानुवादा-

भावात् । नचैवं सति कर्मप्रत्यभिज्ञायाः सजातीयविषयकत्वेन कर्मभेदः शंक्यः । सिद्धान्तसूत्रोक्तयुक्तिभिस्तास्मिन्निरस्ते प्रत्यभिज्ञायाःसजातीयविषयत्वस्याशक्यशङ्कत्वात् । किञ्चैकम्प्रत्यविशेषपुनरुक्तौ तत्सार्थक्याय कर्मभेद आद्रियते । प्रकृते तु प्रतिपत्तृभेदान्न कर्मभेदः शंक्यः। वस्तुतस्तु प्रतिपत्तृभेदेऽपि न कर्मभेदः शक्यशंकः। अन्यथैकमग्निहोत्रवाक्यमपि तांस्तान्प्रति प्रोच्यमानमग्निहोत्रमपि भिन्द्यात् । किञ्चासमाप्तिवचनसमाप्तिवचनाभ्यामपि कर्मैक्यम् । यथाऽन्वारोहेषु मैत्रायणीयानामग्निः समाप्यतेऽस्माकन्तु न समाप्यत इति हि वदन्ति । यदि कर्मभेदस्तदा तत्समाप्त्यसमाप्त्योर्भेदात्तत्कर्मानूद्य तेनोत्प्रेक्षयेयुः ॥ नापि निन्दातो भेदः "प्रातः प्रातरनृतन्ते वदंति पुरोदया जुह्वति येऽग्निहोत्रन्दिवाकीर्त्य यदि वा कीर्त्तयन्तःसूर्ये ज्योतिर्न तदा ज्योतिरेषाम्" इत्यनुदितहोमनिन्दाया उदिते जुहोतीति विधिसमीपे यथातिथये प्रद्रुतायान्नमाहरेयुस्तादृक् तद्यदुदिते जुह्वतीत्युदितहोमनिन्दायाश्चानुदिते जुहोतीति विधिसमीपे पाठेन तस्या विधेयस्तुत्यर्थत्वेन तयोः पक्षयोर्निन्द्यत्वाभावाद्विकल्पपर्यवसायित्वेनाभेदकत्वात् ॥ नाप्यशक्तितो भेदः । तस्या इदानीन्तनेष्वेव सत्वेन पूर्वान्सर्वशाखाज्ञान् शक्तान्प्रत्यभेदकत्वात् ॥ नचैवम्प्रतिपत्त्रैक्यापातेन पुनरुक्ततापत्तिः । तस्याऽनन्तरूपबोधनार्थत्वात् । रूपाद्यभेदेन तथानिश्चयात् । नापि समाप्तेर्भेदः । दत्तोत्तरकत्वात् ॥ आध्वर्यवसमाप्तौ ज्योतिष्टोमसमाप्तिव्यपदेशवत्किञ्चित्कर्मसमाप्तावपि तद्दर्शनाच्च । नापि प्रायश्चित्ताद्भेदः । तस्य प्रक्रमनिमित्तकत्वात् ॥ उदिते होष्यामीति प्रक्रम्यान्यथाकरण एव तद्दर्शनात् ॥ नाप्यन्यार्थदर्शनाद्भेदः । द्वादशाहे यदि पुरादिदीक्षमाणाः स्युर्यदि वैषां ग्रहपतिश्चानुसत्रिण इति ॥ अथ यद्यदीक्षमाणा इति द्वादशाहे इष्टज्योतिष्टोमानामनिष्टज्योतिष्टोमानान्दर्शनश्रुतेर्यदि दीक्षमाणा द्वादशाहेनेत्येवम्परत्वात् ॥ नचात्र मानाभावः । एतस्याः श्रुतेः सामवेदीयत्वेन सामवेदे च ज्योतिष्टोमस्याविहितत्वेन तदीयताण्ड्यब्राह्मणस्थाया " एष एवाव प्रथमो यज्ञानां यज्ज्योतिष्टोमः । य एतेनानिष्ट्वाऽन्येन यजेत गर्तपत्यमेव तज्जायेत प्रवामीयेत" इति प्रत्यवायादिबोधिकायां श्रुतौ वेदान्तरविहितज्योतिष्टोमानुवादेन तत्प्राथम्यबोधनस्य लिङ्गस्य वेदान्तरविहितसर्वज्योतिष्टोमसाधारणतया तमनिष्ट्वा यागान्तरकरणे तस्य दोषस्यापि साधारणताया एवेष्टत्वात्कर्मभेदपक्षेप्यस्मदुक्तकल्पनाया एवावश्यकत्वात् ॥ किञ्च ॥ यदि सर्वशाखाप्रत्ययमेकङ्कर्म न स्यात्तदा शाखान्तरविहितस्य शाखान्तरे गुणो न विधीयेत ॥ स च दृश्यते ॥ यथा मैत्रायणीयानां ऋतवो वै प्रयाजाः समास्तत्र होतव्या इति समत्वं गुणः श्रूयते समिधादयः प्रयाजास्तु नाम्नायन्ते

अतो बाधकानामभावात्साधकानां सत्वाच्च सर्वशाखाप्रत्ययमेकङ्कर्मेति सिद्धान्तिनम् ॥ २४ ॥ एवमेकस्य कर्मणो बहुप्रकारत्वे सिद्धे तत्कुत इत्याकांक्षायां "यज्ञो वै विष्णुः" "वेदैश्च सर्वैरहमेव वेद्यः" इत्यादिश्रुतिस्मृतिभिर्वेदार्थस्य भगवद्रूपत्वादेव तदौचित्यबलान्निर्णीयते ॥ "यदेकमव्यक्तमनन्तरूपम्" इति श्रुतेर्भगवतोनन्तरूपत्वादिदित्येवमेतत्सर्वं हृदि कृत्वा एक इत्यादिनिरूपणमित्यंतमुक्तम् ॥ ननु भवतु भगवतोनन्तरूपत्वाद्यज्ञरूपस्य बहुप्रकारैर्निरूपणन्तथापि शाखाप्रणयनस्य किम्प्रयोजनमित्याकांक्षायाम्पुराणसिद्धम्प्रयोजनन्ते सर्वे इत्यादिभिः पादोनत्रिभिर्मूले यदुक्तन्तद्विवृण्वन्ति ॥ ॥ तइत्यादि कृतमित्यन्तेन ॥ धृना इति ॥ अवधारिताः ॥ निरुक्तेति ॥ ॥ कथं सम्यग् ज्ञाताः ॥ चतुर्द्धेत्यस्य विवरणन्तावंतमित्यन्तम् ॥२५॥ तस्येति । ऋग्यजुःसामाथर्वरूपस्य ॥ स इति ॥ व्यासविभक्तमध्यस्थःप्रतिनियतऋगादिरूपेण यागस्वरूपोपयोगी ॥ २६ ॥

व्रजभाषाटीका ।

ऐसें वेद तथा वेदार्थको निर्णय करके शाखाभेदनको स्वरूप तथा उनको प्रयोजन कहेंहै ॥ बहुप्रकारमिति ॥ जैसें भगवान् सहस्रमूर्तिवाले हैं तैसें ज्योतिष्टोमरूप यज्ञात्मक भगवान्भी सहस्रमूर्तिवालेहैं। जिसनें वेदके भागसों एकमूर्तिको वर्णन होयसके वो वेदभाग शाखा कहावे है। सबनकूँ सबशाखानको ज्ञान नहिं है तासों सामान्यधर्मके प्रतिशाखा वर्णन करवेमें पुनरुक्तिदोष नहिंसमझनो। यज्ञनमें भगवतबुद्धि होयवेकेलिये अनेकरूप यज्ञभगवान्के वर्णन कियेहैं । मरीचिभृगुआदिऋषिननें तो जितने २ विशेषप्रकार हते सब साधारण कररखेहते ॥ २४ ॥ अभीके मनुष्यनकी वैसी सामर्थ्य नहिंहै तासों शाखाको विभाग करके एक विशेषप्रकारको एकएकशाखामें वर्णनकियोहै तहाँ एकमूर्ति जितने वेदभागमें वर्णनकरीहै वितनेकोभी पढनो दुर्लभ है. प्रथमसों व्यासजीने चारप्रकारकी मूर्तिवाले भगवान्को एक चोथो अंश जितने वेदसों प्रतिपादन कियोजायहै वितनो अंश न्यारो करके एकवेदके चारभाग किये, वे भाग ऋग्वेद, अथर्ववेद, यजुर्वेद, साम-

वेदनामसों प्रसिद्ध हैं॥ ऐसे विभागको सहस्रमूर्ति होयवेमें उपयोग है, यज्ञकी सहस्रमूर्तिनमें एकमूर्ति जा वेदके जितने अंशकरके सिद्धहोयहै वो अंश वाही वेदकी शाखा कहावेहै. याविभागनिको विभाग व्यासजीके शिष्यननें कियो है ॥ २५ ॥ २६ ॥

प्रकारभेदे पूर्वन्तु विकल्पो ह्यैच्छिको मतः ॥
अधुना नियतः शाखाभेदात्तत्तदधीतिषु ॥२७॥
कर्म्मवद्ब्रह्मभेदाश्च गीयन्ते बहुधर्षिभिः ॥
तेषाम्भिन्नतया पाठे उच्छेदो भवतीति हि ॥
कर्मशाखागताश्चैक्ये निर्णयः पृथगेव हि ॥२८॥

तत्त्वदीपप्रकाशः ।

इदानीमनुष्ठाने कः प्रकारः केनानुष्ठेयः किमिच्छया व्यवस्थया वेति सन्देहे निर्णयप्रकारमाह ॥ **प्रकारभेद इति** ॥ ब्रह्मादीनामैच्छिक एव आधुनिकानां व्यवस्थित इत्यर्थः ॥ २७ ॥ पुरुषः षोढा विहित इति पञ्चात्मके कर्म्मणि निरुक्त षष्ठांशस्यापेक्षा भवति तत्प्रतिपादक-मुत्तरकाण्डं तच्च ब्रह्म तदप्यनन्तरूपमन्यथानन्तमूर्त्तित्वं न स्यात् ॥ अतो यत्रैव पञ्चात्मके यच्छिरो भवितु युक्तन्तत्प्रतिपादिकोपनिष-त्तत्रैव योजिता ॥ तथैव हौत्रादिकमपि ज्ञातव्यम् ॥ तदेतदाह ॥ **क-र्मवद्ब्रह्मभेदा इति** ॥ इदमलौकिकम्भवतीत्यत्र प्रमाणमाह ॥ **गीयन्ते बहुधर्षिभिरिति** ॥ तेषामध्ययनसिद्ध्यर्थमाह ॥ **तेषामिति** ॥ तावतैव सम्पूर्णशाखाध्यायित्वं विध्यभावादुच्छेदो भवत्येक एवार्थः प्रयोज-नं वाच्यञ्च स्यात् ॥ अन्यथा एकवाक्यता न भवेदिति तत्राह ॥ **निर्णयः पृथगेव हीति** ॥ व्यासेन कृतस्तेषाम्पाठार्थमेवैकवाक्यता निर्णय-स्तु पृथगेव व्यासेन कृतः ॥ अतो ज्ञायते वाक्यैकत्वम्प्रयोजनैकत्वञ्च काण्डद्वयस्य नास्तीति ॥ द्वितीयस्यार्थावबोधपर्यन्तमध्ययनम् । स्वाध्या-

यविधिनैव तस्यापि परिग्रहात् ॥ अन्यथा ब्रह्मणि सन्देहाभावान्निर्णयो व्यर्थः स्यात् ॥ अतः काण्डद्वयं भिन्नमपि एकत्र पठितमंशतः परस्परोपकारार्थं च । आधिभौतिकैर्यज्ञैश्चित्तशुद्धिर्वेदान्तैर्जीवस्वरूपविज्ञानमिति॥मुख्यरूपत्वसिध्यर्थन्तु पृथङ्निर्णय इति हिशब्दार्थः॥२८॥

आवरणभंगः ।

इदानीमित्यादि।ननु यागानांभगवद्रूपत्वेन साधारणत्वात्तत्प्रकाराणामपि तथात्वेन शाखाप्रणयनस्य मन्दार्थत्वेऽपि तासां प्रसिद्धत्वेन च सर्वेषां सर्वानुष्ठानप्राप्तावष्टदोषदुष्टस्यैच्छिकविकल्पस्य प्रसक्तिरिति तदभावायाधिकारिभेदोऽवश्यमभ्युपेयो यथा "वसन्ते ब्राह्मणोऽग्नीनादधीत" इत्यादौ । तथा सति तत्तदधिकारिणाम्फलसिद्ध्यै एकस्य कर्मणो बहुप्रकारत्वं नतु भगवन्मूर्तित्वसिद्ध्यै इत्याशयेनोक्तविधे सन्देहे पूर्वोक्तसाधनाय निर्णयमाहेत्यर्थः ॥ ॥ ब्रह्मादीनामित्यादि ॥ ॥ तथा चाष्टदोषदुष्टस्य विकल्पस्य पूर्वं सत्वान्नाधिकारिफलं कर्मभेदप्रयोजकङ्किन्तु भगवन्मूर्तित्वमेव प्रयोजकं शाखाभेदश्च मन्दार्थमेव नत्वधिकारिभेदज्ञापनार्थ इत्यर्थः ॥ एते न पूर्वन्तावता आयुषा तथानुष्ठानेनाभिव्यक्तादिरिदानीमेवमेतावत्करणेऽपि तदिति भगवतो व्यासस्य च कृपालुतापि सूचिता ज्ञेया ॥ २७ ॥ एवं पूर्वकाण्डार्थं सपरिकरन्निरूप्योत्तरकाण्डस्यैकवाक्यत्वाय तत्तच्छाखासु तत्तदुपनिषदाम्पाठे बीजमाहुः ॥ ॥ पुरुष इत्यादि ॥ ॥ तदिति ॥ ॥ उत्तरकाण्डप्रतिपाद्यमित्यर्थः ॥ एतेनोत्तरकाण्डप्रमेयमुक्तम् ॥ उक्तार्थपोषायाहुः ॥ तथैवेत्यादि॥ ॥एकमेव ब्रह्म तत्स्वरूपमनन्तविधमिति ॥ ॥ कथन्तज्ज्ञेयमित्याद्याशङ्कायामाहुः ॥ इदमित्यादि ॥ ॥ ऋषिभिरिति ॥ उपनिषद्रूपैर्वेदवाक्यैरित्यर्थः ॥ ऋषिपदस्य वेदवाचकत्वं " तदेतदृषिः पश्यन्नवोचत् " इत्यादिश्रुतौ अत ऋषयो दधुस्त्वयि मनोवचनाचरितमिति श्रुतिगीते चोक्तम् ॥ तावतैवेति ॥ पूर्वकाण्डमात्रेणेत्यर्थः ॥ विध्यभावादिति ॥ अध्यापनाध्ययनविध्योः पूर्वकाण्डाध्ययनमात्रेणैव नैराकांक्ष्याद्वेदान्ताध्ययनाय तदतिरिक्तविध्यभावात् अर्थ इत्यस्यैव विवरणम्प्रयोजनमित्यादि ॥ अन्यथेति ॥ ॥ वाच्यप्रयोजनयोर्भेदात्तथा चोभयतःपाशारज्जुरिति भावः ॥ भिन्नवाक्यत्वमेकवाक्यत्वञ्चेति द्वयमपि समर्थयितुमाहुः ॥ तेषामित्यादि ॥ ॥ तेषामिति ॥ ॥ वेदान्तानाम् ॥ मूले कर्मशाखागता इति ॥ ॥ उपनिषद इति शेषः ॥ विवृतौ एकवाक्यतेति ॥ ॥शाखान्तर्गतत्वं नास्तीति ॥ ॥ अतो भिन्नवाक्यत्वमेवेतिभावः॥ उपनिषदां शाखान्तर्गतत्वस्य पूर्वोक्तम्प्रयोजनं विशदीकुर्वन्ति ॥ द्वितियस्येत्यादि ॥

द्वितीयस्येत्युत्तरकाण्डस्य ॥ अन्यथेति ॥ ॥ पाठमात्राध्ययनेनध्ययने चार्थज्ञानाभावेनेत्यर्थः ॥ भिन्नवाक्यत्वं समर्थयित्वैकवाक्यत्वं समर्थयन्ति ॥ ॥अंशत इत्यादि॥ ॥अंशत इति शास्त्रैकदेशात् ॥ उपकारं विवृण्वंति ॥ ॥ आधिभौतिकेत्यादि ॥ तथाच विज्ञाते जीवस्वरूपे कर्तृनित्यत्वावगत्या जन्मान्तरभाविविश्वासः कर्ममार्गीयस्य । वेदान्तिन उपकारस्तु स्फुट एव । अयञ्च शास्त्रैकदेशजन्य एव ॥ ननु यागस्य भौतिकत्वे स्वर्लोकस्य फलत्वेनोक्तत्वात्कथञ्चित्तशुद्धेः फलत्वेन कथनमिति चेन्न आनुषङ्गिकत्वेन तस्या अदोषात् ॥ अन्यथा देहात्मवादस्मार्तवादादिभिरन्यथाप्रतिपत्त्या मतभेदेन विप्रतिपत्तौ संशये फलाभावप्रसङ्गादिति दिक् ॥ नन्वेवं सति स्वार्थबोधे समाम्नानामङ्गाङ्गित्वाद्यपेक्षया वाक्यानामेकवाक्यत्वम्पुनः संहत्यजायत इति प्रयोजनैक्ये भिन्नवाक्यत्वव्याघात इत्यत आहुः॥ मुख्येत्यादि ॥ तथाच रूपभेदेनोभयमप्यविरुद्धमितिभावः ॥ २८ ॥

व्रजभाषाटीका ।

अभी अनुष्ठान कोनरीतिसों करनो यज्ञ तो सहस्रमूर्तिवालो है कोन मूर्तिको अनुष्ठान करनोचाहिये अथवा अपनी इच्छाके अनुसार चाहे जा शाखाके अनुसार यज्ञभगवानकी एकमूर्तिको अनुष्ठान करलेनो ऐसो सन्देह प्राप्तभयो तहाँ निर्णय करें हैं ॥ प्रकारभेद इति ॥ ब्रह्मादिक तो अपनी इच्छाके अनुसारही सहस्रमूर्तिवाले यज्ञभगवानको अनुष्ठान करें हैं क्योंकी उननें सहस्रप्रकारही धारणकररखेहैं । आधुनिक जीव तो अल्पायुष्यवाले मन्दबुद्धिवाले हैं तासों सहस्रमूर्तिनमेंसों एकही मूर्तिको अनुष्ठान करसकें हैं, तहाँ जाशाखाको अध्ययन परम्परामों चलो आतोहोय वा शाखामें जाप्रकारकी यज्ञमूर्तिको वर्णन होय वाके अनुसार वा यज्ञमूर्तिकोही अनुष्ठान करनो. अर्भाके कालमें यही नियम है पुरुषके छ अङ्ग होवें हैं, चरण २ हस्त २ (मध्यभाग) धड १ मस्तक १ उनमेंसों पांच अङ्गको तो पूर्वकाण्डमें वर्णन आयो,छठो अङ्ग जो शिर है वाको प्रतिपादन करवेवार उत्तरकाण्डको उपनिषद्भाग है.

जैसे पूर्वकाण्डोक्त पांच अङ्ग अनन्तरूप हैं तैसेंही उत्तरकाण्ड वेदान्तमें वर्णन कियो जो ब्रह्म है वोभी अनन्तरूप है अर्थात् जैसें हस्तपादादिक हजारन हैं वैसे मस्तकभी हजारन हैं ॥ २७ ॥ कर्मवदिति ॥ ये अलौकिक है जैसे न्यारी २ शाखानकरके कर्मके अनेक भेद हैं तैसें न्यारे २ उपनिषदनमें ब्रह्मभी अनन्तरूपवालो प्रतिपादन कियोहै । केवल पूर्वकाण्डके अध्ययनमात्रसों अपनी सम्पूर्णशाखाको अध्ययन भयो नहिंकहावेहैं, जो ऐसें होय तो उत्तरकाण्डात्मक उपनिषदनके अध्यनकी न्यारी विधि नहिंहोयवेके कारणसों कोईभी उपनिषदनकों नहिं पढेंगे तो उपनिषदनको (उच्छेद) तिरोभाव होयजायगो तासों दोनों काण्डनको एकही प्रयोजन कहनो चाहिये अन्यथा एकवाक्यता नहोयगी और वेदभी दोनोंकाण्डकोही नाम है ॥ २८ ॥

असन्दिग्धोऽपि वेदार्थः स्थूणाखननवत्कृतः ॥
मीमांसानिर्णयैः प्राज्ञैर्दुर्बुद्धेस्तु ततो द्वयम् ॥ २९
जैमिनिः कर्मतत्त्वज्ञो निर्णयम्पूर्व उक्तवान् ॥
व्यासः स्वयं हि सर्वज्ञ उत्तरे निर्णयं जगौ ॥ ३० ॥

तत्त्वदीपप्रकाशः ।

नन्वर्थावबोधेनैव निःसन्देहो जात इति किं निर्णयेन अर्थार्थावबोधेन सन्देहनिवृत्तिस्तदा दुष्टा परम्परा स्यादित्याशंक्याह ॥ असन्दिग्धोपीति ॥ पाठदशायां यद्यपि न सन्देहस्तथापि कालान्तरे सन्देहो भविष्यतीति लक्षणकरणवन्मीमांसाकरणं ॥ तत्र लौकिको दृष्टान्तः ॥ स्थूणाखननवदिति ॥ स्थूणा निखातापि पुनरुद्धृत्य निखात्यते तथा निःसान्दिग्धोऽपि सन्देहमापद्य दार्ढ्याय निरूप्यते मीमांसानि-

र्णयकारैः॥ इदमुक्तमम्प्रति तेषाम्प्रयोजनं सफलं भवति ॥ मन्दमध्यमान्प्रति तु सन्देहाभावो दार्ढ्यं चेति द्वयम् ॥ २९ ॥ तत्र निर्णयकर्तारमाह ॥ जैमिनिरिति ॥ कर्मज्ञानं निर्णयकरणे हेतुः॥ उत्तरत्र व्यासः ॥ असर्वज्ञेन तान्निर्णयः कर्त्तुमशक्य इति सर्वज्ञो व्यास उत्तरत्र कर्त्ता ॥ ३० ॥

आवरणभंगः ।

मीमांसयोः सार्थकत्वबोधनाय किञ्चिदाशंक्य परिहरन्ति ॥ नन्वित्यादि ॥ अंगादिविचारेणैव काण्डद्वयात्मको वेदो निःसन्देहो जात इति निर्णयेन जैमिनिना व्यासैश्च कृतेन तेन किमित्यर्थः॥ लक्षणकरणवदिति ॥ लक्षणग्रन्थस्य प्रातिशाख्यादेः करणवदित्यर्थः ॥ तथाच सन्देहनिराकरणार्थं मीमांसाकरणमावश्यकमितिभावः ॥ इदञ्च ब्रह्मसूत्रभाष्ये प्रथमाधिकरणसिद्धान्ते सम्यक्तया प्रपञ्चितम् ॥ २९ ॥ व्यासोक्तस्य बलिष्ठत्वज्ञापनाय निर्णयकर्त्रौंस्तारतम्यं ज्ञापयन्त आहुः ॥ तत्रेत्यादि ॥ ॥ करण इति ॥ ॥ निर्णयकरणे ॥ कर्मज्ञानमित्यादि ॥ ॥ एतेन मीमांसयोः प्रमाणप्रमेयसाधनफलैः प्रमेयबलं सूचितम् ॥ यद्वैदिकं बलन्तदेव बलमिति ॥ ३० ॥

व्रजभाषाटिका ।

पूर्वकाण्डकेसाथ उत्तरकाण्डको अध्ययन होयवेकेलिये दोनोंकाण्डनकी एकवाक्यता है. निर्णय तो उत्तरकाण्डको व्यासजीनें न्यारेही कियो है तासों प्रयोजन न्यारो है तथा वाक्यभेदभी है ॥ परन्तु (स्वाध्यायोऽध्येतव्यः) इत्यादिश्रुतिमें वेदके अध्ययनमें उपनिषदनकोभी ग्रहण है तासों उत्तरकाण्डकोभी अर्थज्ञानपर्यन्त अध्ययन करनो,जो अर्थ जानेविना पाठमात्रसोंही अध्ययन सिद्ध होयजातोहोय तो मूलके पाठमें कोईकूँभी सन्देह नहिं होयगो तब तो ब्रह्मसूत्रनकेद्वारा कियो भयो निर्णय व्यर्थही जायगो तासों उपनिषदनकों अर्थसहित पढनों।दोनों काण्ड भिन्न हैं परन्तु एकही स्थानमें पढे हैं सो एकदेशकेद्वारा परस्पर उपकार होयवेकेलिये पढे हैं अर्थात् वेदान्तकेद्वारा जीव नित्य है ऐसो ज्ञान होय तब· दूसरे

जन्ममें स्वर्गादिकप्राप्ति होयवेकेलिये यज्ञादिकर्ममें विश्वास होय यहही वेदान्तको पूर्वकाण्डमें उपकार है॥ऐसेंही आधिभौतिकयज्ञन करके आनुषङ्गिक चित्तशुद्धि होय तब वेदान्तको ज्ञान स्थिर होय येही पूर्वकाण्डको वेदान्तमें उपकार है तथापि उपनिषदनको मुख्यार्थ नाहिं सिद्धभयो तब व्यासजीनें ब्रह्मसूत्र बनायके मुख्यार्थ सिद्ध करवेकेलिये न्यारो निर्णय कियो ॥ प्रश्न—अर्थज्ञानसोंही वेदको सन्देह दूरहोजायगो जैमिनिऋषि तथा व्यासजीनें दोनोंमीमांसासूत्र क्यों बनाये उत्तर—पाठसमयमें सन्देह नाहिं है तथापि कालान्तरमें सन्देह आवश्य होयगो तब प्रातिशाख्यभाष्यद्वारा जैसें शब्दनके सन्देह दूरकियेजाय हैं तैसें अर्थको सन्देह मीमांसाद्वारा दूर होयगो ॥ गाडीभईभी थूणी दृढताकेलिये फिर उखाडके गाडीजावे है ऐसेंही उत्तमाधिकारीनके हृदयमें निःसन्देह वेदार्थ है तामेंभी सन्देह उत्पन्नकरके दृढता होयवेकेलिये सूत्रनद्वारा निर्णयकारननें निर्णय कियोहै और जिनके हृदयमें सन्देह है ऐसे जे हीनाधिकारी तथा मध्यमाधिकारी उनके तो सन्देह मीमांसासूत्रनके द्वाराही दूरहोयहैं तथा दृढताभी होयहै ॥ २९ ॥ जैमिनि कर्मतत्वके जानववारे हैं तासोंपूर्व काण्डको निर्णय जैमिनिऋषिनें कियो और व्यासजी सर्वज्ञ हैं तासों उत्तरकाण्डको निर्णय व्यासजीने पोतेही कियो है ॥ ३० ॥

उभयोर्हि परिज्ञाने सर्ववेदार्थनिर्णयः ॥ निर्णयो बहुभिर्नष्टःपश्चाद्वक्ष्ये तयोर्गतिम् ॥ ३१ ॥
पुरुषो विहितः षोढा करौ पादौ शिरोन्तरम् ॥
शिरो ब्रह्म हरिः पूर्वं यज्ञः पञ्चविधः स्वयम् ॥
अनन्तमूर्तिर्भगवान् तेन शाखास्तथा कृताः ३२

तत्त्वदीपप्रकाशः ।

अतः सर्ववेदार्थज्ञानायोभयं ज्ञातव्यमित्याह ॥ **उभयोर्हीति** ॥ ननु निर्णायके विद्यमाने कथं वेदार्थाज्ञानङ्कथं वा भगवद्भजनमिति तत्राह ॥ **निर्णयो बहुभिर्नष्ट इति** ॥ अन्यथा व्याख्यातृभिः श्रुति-सूत्रमविचार्य स्वेच्छया वदद्भिः ॥ तर्हि कथन्निस्तारस्तत्राह ॥ **पश्चादिति** ॥ गतिमुद्धारप्रकारम् ॥ ३१ ॥ उपसंहरन् पूर्वोक्तमर्थं स्पष्टमाह ॥ **पुरुष इति** ॥ षोढा षट्प्रकारः ॥ अन्तरं मध्यं तत्र षट्सु शिरो-ब्रह्म ॥ सम्पूर्णः पुरुषोऽनन्तमूर्तिस्तेनानन्ताः शाखाः कृता इति सर्वो वेदः प्रमाणम् ॥ ३२ ॥ **इति श्रुतिप्रकरणम्** ॥

आवरणभंगः ।

॥ पश्चादिति ॥ ॥ उत्तरग्रन्थे वर्णाश्रमवतान्धर्म इत्यत्र ज्ञाने यर्हीत्यत्र च यथायथं वक्ष्यत इत्यर्थः॥३१॥ ॥ पूर्वोक्तमर्थमिति ॥ ॥ यज्ञस्य भगवद्रूपत्वरू-पम्पूर्वकाण्डीयम्ब्रह्मणो हरित्वरूपमुत्तरकाण्डीयञ्चेत्यर्थः ॥ ॥ षोढेत्यादि ॥ तथाचाग्निहोत्रदर्शपूर्णमासौ करौ । पशुचातुर्मास्ययागौ पादौ । सोमो मध्यम् । अत्राऽपि श्रुतिर्द्रष्टव्या शाखान्तरे ॥ शिरो ब्रह्मेति ऋचाम्मूर्द्धानं यजुषामुत्त-माङ्गम् । साम्नां शिरोऽथर्वणां मुण्डमिति कौषीतकिश्रुतेरित्यर्थः ॥ अत्र पूर्वकाण्ड-प्रमेयविचार इदं सिद्धम् । यज्ञोभगवदात्मकः क्रियारूपः प्रमेयन्तदभिव्यञ्जिका लौकिकी क्रिया साऽपि वेदान्तोक्तज्ञानसहितैव तथेति मर्यादायां ज्ञानकर्मसमुच्चय एवेति साधनम् । तथाच मुक्तसङ्गोनहम्वादीतिलक्षणकः सात्विकः कर्त्ता सर्वभूतेषु येनैकमिति सात्विकज्ञानयुक्तफलाकांक्षिभिर्यज्ञ इत्युक्तप्रकारेण सात्विकं यज्ञङ्करोति तदा स्वाज्ञाकरणसन्तुष्टेन भगवता यज्ञरूपाभिव्यक्तिद्वारा क्रममुक्ति-र्दीयते । अतिकृपया तु सद्योमुक्तिः । अत्र यथायथं यज्ञाभिव्यक्तिः । कृपा च द्वार-भूता । सात्विकज्ञानाभावे पृथक्त्वेन तु यज्ज्ञानमिति राजसज्ञानवांश्चेत्सात्विकः सात्विकं यागङ्करोति तदा नित्यकर्मणामाध्यात्मिकत्वे फलाकांक्षाराहित्येन यथोक्तकर्मकरणात्कर्मसचिवानान्देवानान्तोषद्वारा वाक्यशेषोक्तमात्मसुखं योगि नामिव यथासङ्कल्पम्भवति ॥ तत्र देवताप्रीतिर्वा द्रव्येण प्रीता देवतैव वा व्यापारः। राजसज्ञानवान् रागी कर्मफलप्रेप्सुरितिलक्षणको राजसश्चेत् अभिसन्धाय तु फलमिति लक्षणकं राजसं यागं करोति तदा यागस्य भौतिकत्वे स्वर्लोकोऽपूर्ण-

द्वारा भवति ॥ तत्रापूर्वमेव व्यापार इति सव्यापारस्फलमिति सिद्धमाहुः ॥ ॥ सम्पूर्ण इत्यादि ॥प्रमाणमिति॥ स्वोक्तार्थस्य भगवद्रूपत्वप्रमाजनक इत्यर्थः ॥३२॥

व्रजभाषाटीका ।

वेदान्तनिर्णय अल्पज्ञ नहिंकरसकेंहै तासों सर्वज्ञ वेदव्यासजीनें उत्तरकाण्डको निर्णय कियो तासों समस्तवेदको अर्थ जाननेकेलिये दोनों मीमांसासूत्रनको ज्ञान आवश्यक है ॥ शङ्का—निर्णयकरवेवारे सूत्र विद्यमान हैं फिर जीवनकूँ वेदार्थज्ञान तथा भगवान्के भजनमें प्रवृत्ति क्यों नहिं होय है. उत्तर—"निर्णयो बहुभिर्नष्टः" इति श्रुतिसूत्रको तात्पर्य विनाविचारे स्वेच्छासों व्याख्यान करवेवालेननें निर्णय बिगाडदियोहै तब अभीके मनुष्यनको कैसें निस्तार होय तहाँ निस्तारहोयवेके प्रकार आगे "वर्णाश्रमवतान्धर्मः" इत्यादिश्लोकनमें कहेंगे ॥ ३१ ॥ अङ्गनकूँ स्पष्ट कहेहैं । दर्शपूर्णमास दोनों हस्त हैं, पशुयज्ञ चातुर्मास्य दोनों चरण हैं, सोमयज्ञ मध्यभाग (धड) है, ब्रह्मरूप हरि मस्तक है, ये सम्पूर्ण पुरुष अनन्तमूर्तिवालो है तासों अनन्तशाखा हैं याहीसों सब वेद प्रमाण है ॥ इति वेदनिर्णयः ॥ ३२ ॥

अथ स्मृतिप्रकरणम् ॥

स्मृतिर्बहुविधा प्रोक्ता वेदाचारविभेदतः ॥
ऋषीणां पूर्वचरितस्मरणं स्मृतिरुच्यते ॥३३॥
तदाचाराल्लोकतश्च न्यायान्नित्यानुमेयतः ॥
प्रवृत्तिर्जीविका लोके व्यवहारो विशुद्धता॥३४॥

तत्त्वदीपप्रकाशः ।

एवं वेदन्निर्णीय स्मृतिनिर्णयमाह ॥स्मृतिर्बहुविधेति॥ वेदवन्न स्मृतिनिर्णयः॥ वेदे हि पञ्चात्मको द्विरूपः षडङ्गसहितो निरूपितः॥ न तथा

स्मृतिः ॥ किन्तु बहुविधा ॥ अत्र वेदोपि मूलं व्यवहारोपीति तदाह ॥ **वेदाचारविभेदत इति** ॥ स्मृतेर्लक्षणमाह ॥ **ऋषीणामिति** ॥ स्मरणं स्मृतिः ॥३ ३॥ तस्य स्मरणस्यानुभव एव मूलम् ॥ स त्वनुभवो बहुधा-जायत इत्याह ॥ **तदाचारादिति** ॥ पूर्वकल्पे यथाचारः स्थितः । ऋषीणां यथा वा लोकव्यवहारस्तत्रापि देशभेदेन यो देशाचारो येन ऋषिणा स्मृतस्तेन तथोपनिबद्ध इति चकारार्थः ॥ न्यायोऽपि मूलं सोऽपि पूर्वकल्पास्थितः ॥ एते त्रयोऽपि व्यवहारोपयोगिनः ॥ धर्मोपयोगिनीं स्मृतिमाह ॥ **नित्यानुमेयत इति** ॥ योगबलेन नित्यानुमेयवेदं स्मृत्वा यद-वादिषुस्तदवश्यकृत्यम् ॥ चतुर्णाम्फलमाह ॥ **प्रवृत्तिरिति** ॥ आचारा-ल्लोके प्रवृत्तिः प्रकर्षेण स्थितिर्भवति लोकानुसारेण जीविका भवति ॥ न्यायेन व्यवहारः ॥ नित्यानुमेयवेदोक्तेन विशुद्धता भवति ॥ अनेनैव वेदार्थे तस्या उपयोगः ॥ ननु प्रत्यक्ष एव वेदो मूलमस्तु किन्नित्यानु-मेयवेदेन अनुपलब्धेरिति चेदुच्छन्नशाखाप्रच्छन्नशाखा वा मूलम्भवि-ष्यतीति मैवम् ॥ व्यासादिभिरपि सर्ववेदद्रष्टृभिरप्यनुमानत्वेन निरूप-णात् ॥ “ अपि वा कर्तृसामान्यात्प्रमाणमनुमानं स्यात् ” इति प्रत्य-क्षवेदमूलत्वेनानुमानम्भवेत् ॥ अतः स्मृत्यानुमेय एव वेदो भवतीति नित्यानुमेय एव वेदो मूलम् ॥ अन्यथा वेदव्यासः “ स्मृतिश्च ” इति न वदेत् ॥ विद्यमाने प्रत्यक्षे वेदे किमिति ध्वनारेनामुदाहरेत् ॥ ३ ४ ॥

आवरणभंगः ।

एवम्बलनिश्चायनार्थं वेदा इति प्रमाणमध्ये प्रथमोद्दिष्टस्य वेदस्य पूर्वकाण्ड-प्रमेयभूतो विषयो निर्णीतः । अतःपरं श्रीकृष्णवाक्यानि निर्णेतव्यानि ॥ तेषाञ्च पूर्वं स्मृतित्वेनोक्तत्वाद्वेदनिर्णायकत्वार्थं स्मृत्यन्तरापेक्षयोत्कृष्टत्वञ्च वक्तव्यम् ॥ अविरुद्धन्तु यत्त्वस्येति ।“द्वापरादौ तु धर्मस्य” इति पूर्वोक्तमपि विशदीकरिष्य-न्तः स्मार्त्तप्रमेयबलनिश्चायनाय स्मृतिन्निर्णिनीषन्ति ॥ एवमित्यादि । ननु स्मृ-तिनिर्णयो न पार्थक्येन कर्त्तव्यस्तासां वेदमूलकत्वात्तन्निर्णयादिशा स्मृतिनिर्ण-

यस्यापि सिद्धेरित्यत आहुः ॥ ॥ वेदवन्नेत्यादि ॥ ॥ कथम्बहुधेत्याकांक्षायां हेतुमाहुः ॥ ॥ अत्रेत्यादि ॥ ॥ आचारमूलकत्वं वैसर्जनाधिकरणाज्ज्ञेयम् । तथाच न वेदार्थनिर्णयेनैतान्निर्णयसिद्धिरिति पृथङ्निर्णय आवश्यक इत्यर्थः ॥ ॥ स्मृतेरित्यादि ॥ ॥ स्मृतीनामुभयमूलकत्वं बोधयितुन्तल्लक्षणमाहेत्यर्थः ॥ ॥ ऋषीणामिति ॥ ॥ कर्तृषष्ठी तेन ऋषिकर्तृकम्पूर्वाचारस्मरणप्रयुक्तं वाक्यं स्मृतिरित्यर्थः ॥ इति प्रमाणस्वरूपमुक्तम् ॥ एतेन "स्वयम्भूरेषभगवान्वेदो गीतस्त्वया पुरा। शिवाद्या ऋषिपर्यन्ताः स्मर्त्तारोऽस्य न कारकाः" इति "न केचिद्वेदकर्तारो वेदं स्मृत्वा चतुर्मुखः" इति देवीपुराणपराशरस्मृत्योर्वाक्याद्वेदस्यापि स्मृतिगोचरत्वेन स्मृतित्वप्रसक्तिर्निरस्ता तत्र शब्दस्यैव स्मृतिगोचरत्वात् स्मृतौ त्वर्थस्य तथात्वादिति ॥ ३३ ॥ तत्रापीत्यादि ॥ एतेन स्मृत्यंशविशेषाणामितरेतरविरोधः परिहृतः ॥ तत्तद्देशविशेषाचारे तस्य तस्य सावकाशत्वेन व्यवस्थितत्वादविरोधात् ॥ यथावर्णव्यवस्थितदशद्वादशपञ्चदशाहमासाशौचसर्वसाधरणदशाहाशौचपक्षयोः ॥ न्याय इति ॥ ब्राह्मवाहदन्तकपौरन्दरबार्हस्पत्यौशनसप्राचेतसादिरूपन्नीतिशास्त्रम् ॥ एते त्रय इति ॥ आचारलोकन्यायाः व्यवहारोपयोगिनो व्यवहाराध्यायमूलभूतत्वात्तथेत्यर्थः ॥ धर्मोपयोगिनीमिति । गृह्यसूत्राचारप्रायश्चित्ताध्यायरूपां यागाद्युपयोगिनोमित्यर्थः ॥ तस्याः कुत एवम्भाव इत्याकांक्षायामाहुः ॥ योगेत्यादि ॥ प्रकर्षेण स्थितिरिति ॥ तद्विषयत्वेन वक्ष्यमाणानां व्रततीर्थगत्यादिकर्मणाम्प्रवाह इत्यर्थः ॥ ॥ अनेनैवेति ॥ विशुद्धिजनकत्वेनैव ॥ ॥ उपयोग इति ॥ ॥ साक्षादुपकारकत्वम् ॥ उत्सन्नप्रच्छन्नविप्रकीर्णशाखामूलकत्ववादिनिरासाय किञ्चिदाशङ्कन्ते ॥ ॥ नन्वित्यादि ॥ अयमर्थः । धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यादिति स्मृत्यधिकरणपूर्वपक्षसूत्र अचोदनामूलस्य स्मृतिवाक्यस्यानादरणीयत्वमुक्तम् ॥ तत्र कथमचोदनामूलत्वमित्याकांक्षायाङ्किन्तेषां प्रत्यक्षचोदनामूलत्वमुतोत्सन्नचोदनामूलत्वमथवा प्रच्छन्नचोदनामूलत्वमाहोस्विन्नित्यानुमेयतन्मूलत्वङ्किंवा विप्रकीर्णतन्मूलत्वमिति विमर्शे भाट्टाः ॥ नाद्यस्तदनुपलम्भात् ॥ उपलभ्यमानत्वे स्मृतिप्रणयनवैयर्थ्यापातात् ॥ न द्वितीयः ॥ स्मार्त्तमूलश्रुतिसङ्घातात्मकशाखोत्सादाङ्गीकारे सहस्रसामशाखा एकशतमध्वर्युशाखा एकविंशतिशाखम्बह्वृचमित्यादिशाखापरिमाणस्य महाभाष्यादिप्रसिद्धत्वेन तदतिरिक्तभावनिश्चयात्तासाञ्च सदा प्रसिद्धतया उत्सादस्याशक्यवचनत्वात् ॥ अध्येतृणामत्यन्तावहितत्वेन सर्वशाखागततावन्मात्रश्रुत्युत्सादाङ्गीकारस्याप्यशक्यवचनत्वाच्च ॥ न तृतीयः ।

गणनाप्रसिद्ध्यैव प्रच्छन्नत्वनिरासात् ॥ न तुरीयः अन्धपरम्परापत्तेः ॥ नच लिङ्गादिभिः श्रुत्यनुमानवत्स्मृत्या श्रुत्यनुमाने कोऽपि न दोष इति वाच्यम् ॥ लिङ्गादीनां श्रौतत्वेन स्मृतीनाञ्च पौरुषेयत्वेन पुरुषदोषशङ्काकलङ्किततया तद्वैषम्यात् ॥ किञ्च ॥ स्मरणस्यानुभवसमानाकारविषयत्वनियमेन अष्टका कर्त्तव्येति स्मृत्या अष्टकाकर्त्तव्यताज्ञानं स्मृतिकारस्यानुमेयन्तेन तादृशश्रुतिस्वरूपं तेन श्रुतिज्ञानञ्च कल्पयित्वा स्मृतिप्रामाण्यं साधनीयमिति गौरवप्रयासबाहुल्यम् ॥ गुरुमते ज्ञानमात्रस्य स्वतःप्रामाण्यादनुमानस्यार्थमात्रे पर्यवसानान्न श्रुतिकल्पनपर्यन्तस्य प्रसर इत्यपि । तस्माद्विप्रकीर्णशाखामूलत्वं स्मृतीनां युक्तम् ॥ विप्रकीर्णत्वञ्च भिन्नदेशपठितत्वम् । तच्च परप्रकरणपठितत्वम् । आरभ्याधीतमिति यावत् ॥ तथाच नित्यानुमेयपक्षेन्धपरम्परया रूपनिर्णयवत्स्मृतिप्रमेयमूलनिर्णयो न कथमपि शक्यवचन इति विप्रकीर्णपक्ष एव साधीयानित्याहुः ॥ तदेतदुक्तम् ॥ अनुपलब्धेरिति ॥ सिद्धान्तमाहुः ॥ नैवमित्यादि ॥ ॥ अनुमानत्वेनेति ॥ अत्र कर्मव्युत्पत्तिः ॥ अनुमेयत्वेन वेदस्येत्यर्थः ॥ स्मृतीनामनुमानत्वेनेति वा । तदर्थन्द्वादशलक्षणीस्मृतिपादस्थद्वितीयसूत्रं प्रमाणत्वेनाहुः ॥ ॥ अपि वेत्यादि ॥ ॥ नानुमानम्भवेदिति ॥ जैमिनेरितिशेषः ॥ तथा च तथासतिप्रमाणं विप्रकीर्णं स्यादित्येव वदेत् ॥ अन्धपरम्परात्वं योगबलेनेत्यादिना प्रागेव निरस्तम् । एतेन सूत्रोपन्यासेन स्मृतिपादोक्तरीत्या स्मृतीनाम्प्रामाण्यमपि स्मारितं ज्ञेयम् ॥ ननु स सामग इति तस्य वेदान्तराज्ञानं सम्भाव्यत इत्याशङ्कायामाहुः ॥ ॥ अन्यथेत्यादि ॥ ॥ अन्यथा दाशकितवादिश्रुतिवदनुभवे ॥ ॥ द्व्यन्तरितामिति ॥ ॥ धर्मादिविषया स्मृतिस्तदनुभवजन्या स्मृतित्वात् स्मृत्यन्तरवदित्यादिनानुभवानुमाने तेन च तादृशार्थानुमानमिति स्मृतिः ॥ श्रुतिमपेक्ष्य द्वाभ्यामनुभवार्थाभ्यामन्तरिता भवतीति तथेत्यर्थः ॥ नच वेदमेव स्मृत्वा तदर्थस्योपनिबद्धुं शक्यत्वादेकान्तरितत्वमेव न द्व्यन्तरितत्वमिति शंक्यं योगबलेन वेदमनुभूय तत्कथनस्यापि शक्यवचनत्वेन तस्य भागस्य स्मृति त्वोच्छेदप्रसङ्गात् ॥ अतो नित्यानुमेयवेदमूलत्वमेव साधीय इति निश्चयः ॥ अत एव पितामहस्मृतिर्विष्णुस्मृतिश्च युज्यते ॥ ३४ ॥

व्रजभाषाटीका ।

॥ श्रीकृष्णाय नमः ॥ अथ वेदार्थको निर्णय करके स्मृतिनको निर्णय करें हैं । वेदके निर्णयमें स्मृतिको गतार्थ नहिंहोयमकेंहै

वेदमें तो अग्निहोत्र पूर्णमास पशु चातुर्मास्य सोमयाग इन भेद-
नकरके पञ्चात्मक तथा प्रकृतिविकृतिभेदकरके दोरूपवाले षडङ्ग-
साधनसहित भगवान्को वर्णन है ऐसें स्मृतिको निर्णय नहिं है
किन्तु स्मृति बहुतप्रकारकी हैं। स्मृतिनमें वेदभी मूल है और व्य-
वहारभी मूल है, वेदके तथा सदाचारके भेदकरकें स्मृति बहुतप्र-
कारकी है. स्मृतिके लक्षण कहतहैं॥ ऋषीणामिति॥ऋषिलोगन-
नें पहिलीके आचारनको स्मरण करकें जो वाक्य हैं उनको नाम
स्मृति है तहाँ यह नियम है जाको अनुभव होयहै ताकोही स्मरण
होय ॥ ३३ ॥ अनुभव अनेकप्रकारको है ॥ पूर्वकल्पमें ऋषिन-
को जैसो आचार हतो जैसो लोकको व्यवहार हतो न्यारे २ देश-
नके न्यारे २ जैसे आचार हते जा ऋषिनें जैसो अनुभव कियो
हतो वाकूँ वैसोही स्मरण आयो वा ऋषिनें वैसोही अपनी स्मृ-
तिमें वर्णन कियो यासों जिनआचारनमें परस्परविरोध दीखेहै उ-
नकी देशभेदकरके व्यवस्था समुझलेनी॥ जैसें कितनेक स्मृतिवा-
क्यनमें तो ब्राह्मणकूँ दशदिनको क्षत्रियकूँ बारहदिनको वैश्यकूँ
पञ्चदशदिनको शूद्रकूँ महिनाभरको सूतक लिखेहैं, कितनेक वा-
क्यनमें सबही वर्णके मनुष्यकेलिये दशदिनको सूतक लिखेहैं
ऐसे स्थलमें देशभेदकरकें व्यवस्था करलेनी, अर्थात् जादेशमें
पूर्वकालमें जैसो अशौचको प्रचार हतो वा देशवासीनके
लिये ऋषिननें वैसोही अशौच वर्णनकियो ॥ तात्पर्य यह है कि
दोनोंपक्ष स्मृतिमें लिखेहैं तासों दोनोंही पक्ष प्रमाण हैं। जा देशमें
सर्ववर्णमें दशदिनके अशौचको प्रचार होय वाहीदेशकेलिये
वा वाक्यको समुझनो, जा देशमें चारोंवर्णनमें न्यारो २ अशौच
प्रचलित है वादेशमें दशदिन द्वादशदिन पञ्चदशदिन मास-

मात्रके अशौच निरूपणकरवेवारे वाक्यनकरके व्यवस्था समुझनी॥ ऐसेही न्यायशास्त्रभी स्मृतिनको मूल है अर्थात् चन्द्र बृहस्पति शुक्र आदि देवतानको कियोभयो नीतिशास्त्रभी स्मृतिको मूल है। आचार लोकव्यवहार न्याय ये तीनों व्यवहाराध्यायके मूलभूत हैं तासों व्यवहारके उपयोगी हैं। धर्ममें उपयोगवारी स्मृतिको वर्णन करें हैं, योगके द्वारा नित्यानुमेयवेदको स्मरण करके ऋषिननें जो बात कहीहै वाकूं अवश्यकरवेयोग्य समुझनी। जैसें गृह्यसूत्र आचारप्रायश्चित्ताध्यायादिरूप जो स्मृति है वाकूं यज्ञादिकनके उपयोगी होयवेसों धर्मोपयोगिनी समुझनी. इनचारोंके फलको वर्णन करें हैं॥ आचारसों लोकमें प्रवृत्ति होवेहै प्रकर्षकरके स्थिति होवे है अर्थात् व्रत तीर्थगमनादिकर्मनको प्रवाह होवेहै॥ लोक व्यवहार मूलक स्मृतिके अनुसार बर्तावकरवेसों जीविका होवे है॥ नीतिशास्त्रमूलकस्मृतिके अनुसार बर्ताव करवेसों व्यवहार चले है॥नित्यानुमेयवेदोक्तस्मृतिके अनुसार आचरणकरवेसों चित्त शुद्ध होयहै॥चित्त शुद्धकरवेवारी है ताहीसों यह स्मृति वेदार्थमें साक्षात् उपकार करवेवारी है ॥शङ्का—जिन स्मृतिनमें आचारप्रायश्चित्तादिक लिखेहैं उनस्मृतिनको ऋषिननें प्रत्यक्ष विद्यमान जो वेद है वाहीके अनुसार वर्णन कियो है ऐसो माननो ॥ उत्तर—ऐसें होय तो स्मृतिनमें जैसे आचारप्रायश्चित्तादिक लिखेहैं वैसेही प्रत्यक्ष वेदमें लिखेदीखनें चाहिये सो नहिं दीखेहै तासों नित्यानुमेयवेदको स्मरण करकेंही स्मृतिको वर्णन कियोहै ऐसें माननो ॥शङ्का—उच्छिन्न प्रच्छन्न अर्थात् लुप्त होगई जो वेदकी शाखा उनको स्मरणकरकें स्मृति बनाईहै ऐसे माननो॥ उत्तर॥ व्यासजीकूं आदिलेके सम्पूर्णवेदकूं जानवेवारे जे जैमिनि आदि ऋषि हैं उननेंभी

आचारनिरूपक स्मृतिनकूँ अनुमानरूप मानीहै। स्मृतिनके द्वारा वेदकूँ अनुमेय मान्योहै ॥ जो कदाचित् प्रत्यक्ष वेदही स्मृतिनको मूल होय तो स्मृतिनकूँ अनुमान रूप क्यों मानते याविषयमें जैमिनिकृतपूर्वमीमांसाके स्मृतिपादको दूसरो सूत्र (अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात्) यह प्रमाण है तासों आचारप्रायश्चित्ताध्यायादिरूप स्मृतिनसों अनुमेय वेद एक जुदोही है वहही नित्यानुमेय वेद है वह वेदही स्मृतिनको मूल है. यदि ऐसें नहीं होय तो वेदव्यासजी " स्मृतेश्च " यह सूत्र नहिं बनावते क्योंकी वेदको मनुआदिऋषिननें योगबलसों अनुभव करकें वाही अनुभवको अपने बनाये मनुस्मृतिआदि ग्रन्थनमें वर्णनकियोहोय तो उनग्रन्थनकों स्मृतिपणो नहिंबनसकेगो. अनुभवरूपता होजायगी तथा प्रत्यक्षविद्यमान वेदकेही अनुसार स्मृतिनमें वर्णन होय तो प्रत्यक्षवेद विद्यमानही है " द्व्यन्तरिताम्" दोय जामें व्यवधान ऐसी स्मृतिको व्यासजी क्यों नाम लेते अर्थात् स्मृति वेदकी अपेक्षा अनुभव और अर्थ इन दोनोंकरकें व्यवधानवाली होवेहै याको विस्तार याश्लोकके आवरणभङ्गमें लिख्योहै ॥ तात्पर्य यह है जो आचारप्रायश्चित्तादि वर्णनकरवेवारी स्मृति है उनको वेदमूलक नहिं मानेंहैं तबतो अप्रामाणिक होजायगी क्योंकि जैमिनिऋषिनें " धर्मस्य शब्दमूलत्वादशब्दमनपेक्षं स्यात् " या स्मृत्यधिकरणके सूत्रमें वेदविधिमूलक जे स्मृतिवाक्य नहिं हैं उनकूँ आदरणीय नहिं राखें हैं और जो प्रत्यक्ष वेद विधिमूलक मानेंहै तो प्रत्यक्षविद्यमान वेदसोंही कार्य होजायगो स्मृतिनको बनावनों वृथा होयहै तासों अनुभवविना स्मरण नहिंहोयहै यह नियम है यासों जा अनुभ-

वको स्मरण करके मनुस्मृति आदि बनीहैं वह अनुभव नित्यानुमेय वेदरूपही है ॥ ३४ ॥

संवादे चान्यशेषत्वान्न स्मृत्यर्थं स्पृशेच्छ्रुतिः ॥ गृहादिरिव देहस्य धर्मस्योपकृतिः स्मृतिः ॥ उभयोः समवाये तु धर्मः पुष्टो न चान्यथा ॥ ३५ ॥ गर्भाधानादिसंस्काराः सन्ध्योपास्त्यादिकन्तथा ॥ नित्यश्राद्धादिकर्माणि पाकयज्ञादिकन्तथा ॥ ३६ ॥ प्रायश्चित्तमिति ह्येष पञ्चधा धर्मसंग्रहः ॥ नित्यानुमेयवेदस्तु मूलम्पञ्चविधस्य हि ॥ ३७ ॥

तत्त्वदीपप्रकाशः ।

ननु दृश्यते स्मृतिसम्वादी वेदभागः । यथा " धन्वन्निव प्रपा असि " " नाप्सु मूत्रपुरीषङ्कुर्यात् " " न विवसनः स्नायात् " इत्यादि तत्राह ॥ **संवादे चान्यशेषत्वादिति** ॥ वेदेहि प्रकरणं सर्वत्र नियामकम् ॥ " तस्मादाहिताग्निर्नानृतं वदेत् " इति॥नहि आहिताग्नेरनृतनिषेधकं सर्वेषां भवति ॥ नाप्यबीष्टकोपधानकर्त्तुः ॥ जले निष्ठीवनादिनिषेधः सर्वेषाम्भवति ॥ नापि प्रपाया लोकसिद्धाया दृष्टान्तार्थङ्कीर्त्तितायास्तदेव वाक्यं विधायकम्भवति ॥ वाक्यभेदप्रसङ्गात् ॥ यथा वेदेषु क्वचित्संवादो भिन्नशिष्याणान्नाभागोपाख्यानादीनान्तथा नित्यानुमेयवेदार्थेनापीति न स्मृत्यर्थं श्रुतिः प्रत्यक्षा स्पृशतीत्यर्थः ॥ ननु किं स्मृत्येत्याशंक्याह ॥ **गृहादिरिवेति**॥देहस्थानीयो वैदिको धर्मः ॥ गृहस्थानीयः स्मार्त्तः ॥ उभाभ्यां जीवः सुखी नान्यथा ॥ ३५ ॥ नित्यानुमेयवेदमूलिकायाः स्मृतेरर्थमाह ॥ **गर्भाधानादिति** ॥ षोडश

संस्काराः सन्ध्योपासनङ्कालादिसहितम् ॥ नहि तादृशानुपूर्वीवि-
शिष्टं "रक्षांसि हवा पुरोनुवाकः" इत्यत्र वर्तते ॥ नित्यश्राद्धादिवि-
धानं मासिकश्राद्धविधिः ॥ पाकयज्ञाः स्थालीपाकादयः ॥ आदि-
शब्देन वैश्वदेवादिकमपि गृह्योक्तमखिलमिति यावत् ॥ ३६ ॥ प्राय-
श्चित्तं पातकादीनाम् ॥ ३७ ॥

आवरणभंगः ।

कस्मिँश्चिद्देशे पुनरव्याप्तिं हृदि कृत्वा विप्रकीर्णशाखामूलत्वमाशङ्कन्ते ॥ ननु दृश्यत इत्यादि ॥ ॥ समाधिमाहुः ॥ ॥ वेदे हीत्यादि ॥ ॥ मूले संवादे चेति चकारोऽप्यर्थे ॥ ॥ तदेवेत्यादि ॥ ॥ कुमारशिखाधारणवत्तेन विध्युन्नयने तस्यानुमेयत्वेन नित्यानुमेयानतिरिक्तत्वात्तन्मूलकत्वादेतस्य विधायकतायाः शक्यत्वात् ॥ ॥ वाक्येत्यादि ॥ ॥ श्रौतानाम्प्रकरणावरुद्धत्वेन सङ्कुचितत्वात्तदनादृत्य साधारणत्वेऽधिकार्यन्तरप्रवेशेन वाक्यम्भियेतेत्यर्थः ॥ तस्मान्न विप्रकीर्णपक्षो युक्त इति भावः ॥ एवं सिद्धायां लक्षणशुद्धौ योंशो वेदमूलकः सोप्याचारान्तरितत्वान्मूलभूतवेदस्यैतद्वैलक्षण्याच्च न वेदनिर्णयेन निर्णीतो भवतीति पृथक्तया स्मृतिनिर्णय आवश्यक इति साधितम् ॥ एवं स्मृतीनाम्प्रामाण्यन्तन्निर्णयावश्यकत्वञ्च साधयित्वा प्रयोजनविमर्शायाहुः ॥ ॥ नन्वित्यादि ॥ ॥ मूले उपकृतिपदेनोपकरणभूतोर्थ उच्यते । देहस्थानीयेत्यादिना च विव्रीयते । तथाच स्वाध्यायाध्ययनयागतपोब्रह्मविचाराणान्धर्माणां यथाययमाश्रमैकसाध्यत्वात्तन्निरूपिकाणान्तद्धर्मनिरूपिकाणाञ्च स्मृतीनां वैदिकधर्मपोषणमेव प्रयोजनमित्यर्थः ॥ ३५ ॥ ॥ नित्येत्यादि ॥ ॥ या धर्म उपकरोति द्वाभ्यां विषयनिर्देशेन तां ज्ञापयितुन्तस्याः प्रमेयमाहेत्यर्थः ॥ षोडशेति ॥ "गर्भाधानमृतौ पुंसः सवनं स्पंदनात्पुरा" इत्यादिना निरूपितः ॥ गर्भाधानादिसंस्काराभावे शुद्ध्यभावेनाधिकारार्थन्तत्कथनमावश्यकम् ॥ उत्तरसंस्काराभावे फलप्रतिबन्ध इति तदपि तथा ॥ एवं सन्ध्योपास्त्यादिकमपि शुद्धिजनकत्वेन कर्माधिकारसम्पादकम् ॥ "सन्ध्याहीनोऽशुचिर्नित्यम्" इति "शौचाचार विहीनानां समस्ता निष्फलाः क्रियाः" इत्यादिवाक्यात् ॥ "अकाले विहिता सन्ध्या या सा वन्ध्यावधूरिव" इति "दिवोदितानि कर्माणि प्रमादादकृतानि चेत् ॥ यामिन्याः प्रहरं यावत्तावत्सर्वाणि कारयेत्" इतिचाप्रत्यक्षवेदमूलकत्वाभावायाहुः ॥ ॥ नहीत्यादि ॥ ॥ एवमेव नित्यश्राद्धादिषु शुद्धिहेतुत्वं प्रत्यक्षवेदमू-

लकत्वाभावश्च ज्ञातव्यः ॥ एवं वैश्वदेवमपि पञ्चसूनापनुत्तयेऽन्नशुद्ध्यै चावश्यकम् ॥ प्रायश्चित्तमपि तथा ॥ तेन शुद्धौ कर्मयोग्यत्वसम्भवादिति ॥ स्थालीपाकादय इति ॥ सप्त पाकयज्ञाः । औपासनहोमो वैश्वदेवम्पार्वणमष्टकामासिकश्राद्धं सर्पबलिरीशानबलिरिति ॥ एतदेव विवृण्वन्ति ॥ ॥ आदिशब्देनेत्यादि यावदित्यन्तमु ॥ ॥ प्रायश्चित्तादीनामित्यादिपदङ्कर्मविपाकसङ्ग्रहार्थम् ॥ ३६॥३७॥

व्रजभाषाटीका ।

शङ्का–स्मृतिनमें जैसे धर्म दीखेंहैं तैसे प्रत्यक्ष वेदमेंभी दीखें हैं जैसे " धन्वनः प्रपा असि " " नाप्सु मूत्रपुरीषं कुर्यात् "। " न विवसनः स्नायात् " अर्थ–हे अग्नि तुम निर्जलदेशकी प्याऊ हो अर्थात् निर्जलदेशमें प्याऊ जैसें मनुष्यकूँ प्यारीहै तैसे तुम हमकूँ प्यारे हो। जलमें मूत्रपुरीष नहिंकरनों। नग्न होकर नहिं स्नानकरनो इत्यादि अनेक धर्म वेदमें लिखेहैं तासों प्रत्यक्ष वेदमूलकही स्मृतिनकों माननों॥ उत्तर–सम्वादे चान्यशेषत्वादिति ॥ वेदमेंभी प्रकरण सबठिकाने नियामक हैं. जैसें " आहिताग्निर्नानृतं वदेत् " अर्थ–अग्निहोत्री मिथ्या नहिंबोले यह वाक्य है सो अग्निहोत्रादिकरवेवारेनकेलियें मिथ्या बोलवेकी नाई करेहैं सबनकेलिये मिथ्याको निषेध या वाक्यसों नहिंहोयसकेहै ऐसे यज्ञमें इष्टिका ईट स्थापनकरनेवालेकेलिये जलमें थूँकवेको निषेध है वह निषेध सबकेलिये नहिंहोयसकेहै ऐसेही लोकप्रसिद्ध प्याऊको दृष्टान्तकेलिये वेदमें नाम लिख्योहै तासों वेदमें सब मनुष्यनकूँ प्याऊ बनायवेकी आज्ञा दीनीहै यह नहिंकहसकेहै ॥ यदि वेदमें यज्ञके प्रकरणमें कहे जे वाक्य उनकूँ सब मनुष्यनके ऊपर मानलोगे तो पशुको आलभन ईटनको स्थापन इषेत्वाआदि मन्त्रसों वृक्षकी शाखाको छेदन सबनकूँ यज्ञ नहिं होय तबभी सर्वदाही करनो पडेगो तासों जायज्ञके प्रकरणमें जो वाक्य

होय वह वाक्य वा यज्ञके करवेवारेकेलियेंही समुझनों. जो सब-नकेलिये मानें तो (वाक्यभेद) अर्थात् एकवाक्यता नहिं-रहसकेगी क्योंकी वाप्रकरणकूँ छोडकर साधारण जब मानेंगे तब वा वाक्यके और अधिकारी होयसकेंगे । ये वाक्यभेद बडो दूषण है जैसें वेदमें कहीं कहीं नाभागराजा आदिकनके उपा-ख्यानको सम्वाद है तैसें नित्यानुमेय वेदके अर्थके साथमें। कचि-त्सम्वाद है तासों स्मृतिके अर्थकूँ प्रत्यक्ष श्रुति स्पर्श नहिंकरमकेहै किन्तु स्मृति नित्यानुमेयवेदमूलकही है ॥ स्मृतियें क्यों बनाई या शङ्काकूँ दूरकरतेभये स्मृतिको प्रयोजन कहेहैं (गृहादिरिति)॥जैसें देह या जीवकूँ सुख देवेवारो है तैसेंही वेदोक्त यज्ञ तप ब्रह्मज्ञान आदि धर्म याआत्माको सुखदेवेवाले हैं. जैसे देहको पोपणकरवे वारो गृह है तैसें वेदोक्तयज्ञादिकनको पोपणकरवेवारे स्मृतिके लिखेभये आश्रमादि धर्म हैं जैसें देह गृह ये दोनों होय तब जीव सुखी होय ऐसेंही वेदोक्तधर्म तथा स्मृतिलिखित धर्म इन दोनोंकरकें धर्म पुष्ट होवेहै एकसों नाहिं ॥ ३५ ॥ नित्यानुमेय वेदमूलक जो स्मृति है वाको अर्थ कहेंहैं (गर्भाधानेति) गर्भा-धानकूँ आदिलेकें सोलहसंस्कार तथा समयके समय सन्ध्याकी उपासना करनों तासों शुद्धि होय क्योंकि (सन्ध्याहीनो ऽशुचिर्नित्यम्) या वाक्यमें सन्ध्या नहिंकरवेवारेकूं अपवित्र बतायो है ॥ "शौचाचारविहीनानां समस्ता निष्फलाः क्रियाः"। या वाक्यमें आचारहीन अपवित्र पुरुषके किये कर्मकूँ निष्फल बताये हैं ॥ तथा "अकालविहिता सन्ध्या या सा वन्ध्यावधूरिव" या वाक्यमें कालचूककें करी भई सन्ध्याकूं वांझस्त्रीके समान निष्फल बताई है, जैसें अनुक्रमसों स्मृतिनमें सन्ध्योपासनादिक

कर्म लिखेहैं वैसे क्रमसों "रक्षांसि ह वा पुरोनुवाकः" इत्यादि वेद मार्गमें नाहिंलिखे हैं॥ नित्यश्राद्धादिकनकी विधि मासिकश्राद्धकी विधि गृह्यसूत्रोक्त औपासन होम १ वैश्वदेव २ पार्वणश्राद्ध ३ अष्टका ४ मासिकश्राद्ध ५ सर्पबलि ६ ईशानबलि ७ ये सात पाकयज्ञ हैं, पाक सिद्धकरवेमें जो चक्की चूल्ही आदिमें पाँचप्रकारकी हिंसा होवेहै वाकूं दूर करवेकेलियें वैश्वदेव अवश्य करनों चाहिये. इन कर्मनकूं अपने गृह्यसूत्रके अनुसार करनों॥ तात्पर्य यह है १ संस्कार १ सन्ध्योपासनादिक २ नित्यश्राद्धादिक ३ तथा पाकयज्ञ ४ तथा पापनके प्रायश्चित्त ५ इन पांचधर्मनको संग्रह नित्यानुमेय वेदमूलकस्मृतिनमें है ॥ ३६ ॥ ३७ ॥

व्रततीर्थादिकं काम्यन्नित्यवद्बोध्यते क्वचित ॥
पूर्वाचारेण सम्प्राप्तम्पुराणं मूलमस्य हि ॥३८॥
कृष्यादिजीविकाशास्त्रं पूर्वेष्याचारतः प्रमा ॥
करदण्डादिशास्त्रस्य मूलं युक्तिःपुराविदाम३९

तत्त्वदीपप्रकाशः ।

व्रततीर्थादीनामपि नित्यानुमेयो वेदो मूलं भविष्यतीत्याशंक्याह ॥ व्रततीर्थादिकमिति ॥ श्रुतिमूलत्वे ब्राह्मणानामपि नित्यं कर्त्तव्यानि स्युरिति काम्यमित्युक्तम् ॥ किन्तु वेदानाविकृतानां तन्नित्यम्भवतीति नित्यवद्बोध्यते ॥ तस्य च मूलम्पुराणम् ॥ तथा सति स्मृतित्वङ्कथमिति चेत्तत्राह ॥ **पूर्वाचारेण सम्प्राप्तमिति** ॥ न हि पुराणं दृष्ट्वा तस्य निर्माणं किन्तु आचारादेव ॥ ३८ ॥ इदानीमाचारः कुत्र मूलमित्याकांक्षायामाह ॥ कृष्यादीति ॥ षड्गवादिभागदानादिविधानं पूर्वेष्याचारतः प्राप्तं तथैव कर्तव्यम्प्रमाणमित्यर्थः ॥ करदण्डादेर्युक्तिमूलम् ॥ करोत्र कृषिव्यतिरिक्तः ॥ ३९ ॥

आवरणभंगः ।

एवं वेदमूलिका विशुद्धिफलिका स्मृतिर्विचारिता पौराणाचारमूलिकाम्प्रवृत्तिफलिकां विचारयन्ति ॥ ॥ व्रतेत्यादि ॥ ॥ भविष्यतीति ॥ ॥ तेषामपि शुद्धिजनकत्वाविशेषाद्भविष्यतीत्यर्थः ॥ काम्यत्वे गमकमाहुः ॥ ॥ श्रुतीत्यादि ॥ ॥ तीर्थानित्यत्वं साग्निकस्याग्निं विहाय तीर्थगमननिषेधस्य वाक्य दर्शनात्। व्रतानित्यत्वं च "अनड्वान् ब्रह्मचारी च दीक्षितश्चेति ते त्रयः॥ अश्नन्त एव सिद्धयन्ति नैषां सिद्धिरनश्नताम्" इतिवाक्याच्च ज्ञेयम् ॥ तेन वेदे यथा नित्यकर्मप्रसिद्धयर्थं चित्रोद्भिदादिबोधनन्तथा स्मृतावित्यर्थः ॥ तर्हि नित्यवत्कुतो बोध्यत इत्याशङ्कायामाहुः ॥ किन्त्वित्यादि ॥ ॥ कथमिति ॥ ॥ वेदमूलकत्वाभावात्कथमित्यर्थः ॥ आचारादेवेति ॥ सदाचारादेव ॥ तथाच सदाचारमूलकत्वन्तस्या इत्यर्थः ॥ एतेन व्रततीर्थादिप्रवाहरक्षा पूर्वेर्ष्याचारादेवेति सिद्धयन्तीति प्रवृत्तिर्जीविकेत्युक्तस्य फलस्यापि न विरोधः ॥ ३८ ॥ एवम्पौराणाचारमूलिकाया विचारेण तस्याः प्रमेयमुक्तम् ॥ लोकमूलिकाम्विचारयन्ति ॥ ॥ इदानीमित्यादि ॥ ॥ आचार इति ॥ ॥ लोकाचारः ॥ कृष्यादीत्यादिपदसंग्राह्यं तत्प्रमेयं दिङ्मात्रेणाहुः ॥ ॥षडित्यादि॥ "स्नानं सन्ध्या जपश्चैव देवानां पूजनं तथा ॥ तर्पणं वैश्वदेवश्च षट्कर्मा द्विज उच्यते ॥ षट्कर्माभिरतो नित्यङ्कृषिकर्म समाचरेत्॥ हलमष्टगवं श्रेष्ठं षड्गवं मध्यमं स्मृतम् ॥ चतुर्गवं नृशंसानां द्विगवं वृषघातिनाम्"इति। "विप्रस्यैवम्त्रिधा वृत्तिस्तृणकाष्ठं च विक्रयेत्"इति पाराशरोक्तजातीयं पिता चेत्पुत्रान्विभजेत्तस्य स्वेच्छा स्वयमुपात्तेर्थे पैतामहे त्वर्थे पितापुत्रयोस्तुल्यं स्वामित्वम्पितृविभक्तानिविभागानन्तरोत्पन्नस्य सम्विभागन्दद्युरित्यादि विष्णूक्तजातीयम्॥ आदिपदेन प्रतिग्रहादिरूपश्च विधानं कार्यम्॥ आपद्यपि धर्मरक्षणाय तदुक्तरीत्यैव कर्त्तव्यं। यतः पूर्वेर्ष्याचारतः प्राप्तमतस्तच्छास्त्रम्प्रमाणमिति मूलाभिप्राय इत्यर्थः॥ नीतिशास्त्रमूलिकाम्विचारयन्ति ॥ ॥ करेत्यादि ॥ ॥ सपरिकरायाः कृषेरुक्तौ तदन्तर्गतो राजभागोप्युक्तप्रायएवेति पुनः कथनमयुक्तमित्यत आहुः ॥ ॥ कृषिव्यतिरिक्त इति ॥ ॥ उत्कोचादिरूप इत्यर्थः ॥ दण्डस्तु योब्राह्मणायावगुरेत्तं शतेन पातयेदित्यादि "अदुष्टाश्च त्यजन् दड्यो दूषयँस्तु मृषा शतम्" इत्यादि "धिग्दण्डम्प्रथमन्दद्यात्" इत्यादि विष्णुयाज्ञवल्क्यमनूक्तजातीयो ज्ञेयः ॥ ३९ ॥

व्रजभाषाटीका ।

व्रत करनो तथा तीर्थादिकनमें गमन करनो इत्यादि जो स्मृ-

तिनमें धर्म कहेहैं इन धर्मनको मूल पुराण है, ये धर्म अग्निहोत्री-के लियें नित्य नहीं है क्योंकि वाकूँ अग्नि छोडकें विदेश जायवेको निषेध है, तथा "नैषां सिद्धिरनश्नताम्" इत्यादिवाक्य-नमें उपवासादिककोभी निषेध है ताहीसों ये धर्म काम्य कहावें हैं परन्तु वैदिक अग्निहोत्रादिकर्म नहीं करें हैं उनके लिये तो ये नित्य हैं तासों नित्यकर्मके समान व्रततीर्थादिकनको नित्य करनो बोधनकियो है ॥ तहाँ व्रततीर्थादिक पुराणमूलक हैं तब इनकों स्मृतिपणो कैसें सम्भवसकें है यह शङ्का नहींकरनी, क्योंकी पुराण देखकें ये स्मृति नहीं बनाई है किन्तु पूर्वकल्पके सदाचारको स्मरणकरकें बनाई है तासों व्रततीर्थादिप्रतिपादक स्मृति आचारमूलकहै ॥ ३८ ॥ लोकमूलिकास्मृतिको विचारकरें हैं ॥इदानीमित्यादि॥ अभी आचार कहाँ प्रमाण है ऐसी आकांक्षा भई तहाँ कहें हैं ॥ कृष्यादीति ॥ स्मृतिनमें जहाँ ब्राह्मणादिकनकूं आपत्कालमें खेतीकरनो लिख्यो है, जैसे " हलमष्टगवं श्रेष्ठं षड्गवम्मध्यमं स्मृतम् ॥ चतुर्गवं नृशंसानां द्विगवम्वृषघातिनाम् "। अर्थ—एकहलके आठ बैल जोडकें खेतीकरनो उत्तम पक्ष है, छः बैलसों खेतीकरनो मध्यम पक्ष है, चार बैलसों खेती करनों निर्दयपणो है, दोबैलसों खेतीकरनों बैलको मारडारनोहै इत्यादि ॥ ऐसेंही जिनस्थलनमें पितामहादिकनके द्रव्यको विभाग करनो लिख्योहै तथा दानलेनों लिख्यो है उनस्मृतिभागनकूँ लोकव्यवहारको स्मरणकरके बनाये हैं तासों लोकमूलकस्मृतिभाग कहावें हैं, परन्तु पूर्वऋषिनके आचारसों प्राप्त है तासों प्रमाण है यहमूलको अभिप्राय है॥ जा स्मृतिभागमें खेतीवाले विना औरनसों कर लेनों तथा दण्ड देनों लिख्याहोये

वा स्मृतिभागकूँ युक्तिमूलक जाननों, नीतिमूलक स्मृतिभी याही सों कहें हैं ॥ ३९ ॥

शुद्धिङ्केचित् पृथक् प्राहुः संस्कारः कस्याचिन्मतः॥ देशकालद्रव्यकर्तृमन्त्रकर्मविभेदतः ॥ षोढा शुद्धिः स्मृता सापि द्विधा ह्यन्योन्यतः स्वतः ॥४० ॥ सर्वशेषेयमाख्याता श्रुत्यर्थेऽपि विशेषतः॥ धर्मः सम्पद्यते षड्भिरधर्मो ह्यन्यथा भवेत् ॥ ४१ ॥

तत्त्वदीपप्रकाशः ।

द्रव्यादिशुद्धौ विकल्पमाह ॥ शुद्धिमिति ॥ संस्कारपक्षे वेदो मूलं पृथक्पक्षे आचार इति ॥ प्रसङ्गाच्छुद्धेः स्वरूपमाह ॥ देशकालेति ॥ षड्भिः शुद्धिः षण्णाञ्च शुद्धिरिति द्विधा॥ ४ ०॥सर्वशेषत्वाच्च वेदो मूलमित्यभिप्रायेणाह ॥सर्वशेषेयमिति॥ बाधकमाह ॥ धर्म इति ॥ ४ १ ॥

आवरणभंगः ।

एवङ्कर्तृशोधकः स्मृतिभागो विचारितः । नीतिमूलिकायाः प्रमेयञ्चोक्तम् । इदानीन्देशादिशोधकशुद्धिस्वरूपविचारमाहुः॥ ॥ द्रव्यादीति ॥ ॥ शुद्धाविति ॥ ॥ शुद्धिस्वरूपा । शुद्धिस्वरूपे विकल्पे बीजमाहुः ॥ ॥संस्कारेत्यादि ॥ ॥ पृथगिति ॥ ॥ पदार्थान्तरम् ॥ ॥ प्रसङ्गादित्यादि ॥ ॥ संस्कारपक्षे कर्मयोग्यतात्मकातिशयरूपं स्वरूपं सिद्धमिति पृथक्पक्षेपि स्वरूपस्योपेक्षानर्हत्वात्पृथक्त्वम्विवेक्तुन्तत्स्वरूपमाहेत्यर्थः ॥ ॥ षड्भिरित्यादि ॥ ॥ तथाचान्योन्यतः शुद्धौ संस्काररूपत्वस्य शक्यवचनत्वेपि स्वतःशुद्धौ संस्कारत्वस्याशक्यवचनत्वात्तत्स्वरूपं संस्कारात्पृथगेवेत्यर्थः ॥ उदाहरणन्तु "नवं वा निर्मलं वापि शुचीति द्रव्यमुच्यते" इति शुचिसंज्ञामभिधाय "अथ सर्वाणि धान्यानि वस्त्राण्याभरणानि च ॥ अवर्ज्यावर्ज्यज्ञातानि शुचीन्येतानि केवलम्" इति "स्वयमेवाहि यद्द्रव्यङ्केवलम्मेध्यताङ्गतम् । स्थावरं जंगमं वापि स्वयं शुद्धमिति स्मृतम्" इति स्वयं शुद्धसंज्ञामभिधाय "वसतिश्च-मसो यानम्वाहनं साधनानि च ॥ क्षुरो नौरासनञ्चेति स्वयं शुद्धमिति स्मृतम्"

इतिदेवलस्मृतौ ॥ अत्र धान्यादीनां शुचित्वेऽपि व्रीहीन् प्रोक्षतीत्यादिना तत्तत्संस्कारविधानाचत्पूर्वकालीनं धान्यादिशुचित्वात्मकं शुद्धिस्वरूपम्विविक्तम्भवति। हेमाद्रिस्तु अशुद्धिर्नाम द्रव्यादेः स्पर्शनानर्हतापादको दोषविशेषः। संस्कारविशेषोत्पादिता तन्निवृत्तिः शुद्धिरित्याह। तद्देवलवचनविरोधाच्चिन्त्यम् ॥ अत्र च षड्भिः शुद्धिर्यथा व्रीह्यादेः सत्पात्रस्थत्वं नवत्वं श्रृतत्वन्तद्दातृविशुद्धत्वं मन्त्रपूतत्वङ्कृताग्रयणत्वमित्येवम्बोध्याः ॥ ४० ॥ ॥ सर्वेत्यादि ॥ ॥ पृथग्रूपायाः शुद्धेर्जीविकादिशेषत्वेनापि कथनात्तथेत्यर्थः ॥ ॥ बाधकमिति ॥ ॥ शुद्ध्यभावे बाधकम्। तथाच पृथक्पक्षे श्रौतोपयोगिनीत्यर्थः ॥ मूलन्त्वेवं योज्यं॥ इयं शुद्धिः सर्वशेषा आख्याता श्रुत्यर्थे विशेषत आख्याता हि यतो हेतोः धर्मः षड्भिःकालादिभिः सम्पद्यत अतस्तस्या विशेषतः श्रुत्यर्थशेषत्वं युक्तम् ॥ अन्यथा कालाद्यशुद्धौ अधर्मो भवेदिति ॥ एतेन साधन मुक्तं ज्ञेयम् ॥ ४१ ॥

व्रजभाषाटीका।

स्मृतिनमें जास्थालमें पदार्थकी शुद्धि लिखी है वा स्मृतिभागको नित्यानुमेय वेदमूलक जाननों, क्योंकी शुद्धिके संस्कारमें अन्तर्भाव है, संस्कारसों (पृथक्) न्यारी पदार्थकी शुद्धि मानोगे तो वा स्मृतिभागकों आचारमूलक मानेंगे. परस्परशुद्धि तथा स्वतः शुद्धि इनभेदनकरकें शुद्धि दोप्रकारकीहै. द्रव्य देश काल मन्त्र कर्म कर्ता इनकी परस्पर शुद्धि जैसें व्रीहीकी मन्त्रादिकनकेद्वारा शुद्धि होवेहै, स्वतः शुद्धि जैसें " क्षुरो नौ रासनञ्चेति स्वयं शुद्धमिति स्मृतम्" अर्थ छुरा नाव आसन आदि पदार्थ स्वयं शुद्ध हैं इत्यादि जाबालस्मृतिके वाक्यमें लिखीहै, यह जो पदार्थनकी शुद्धि है सो जिविका व्यवहार लोकस्थिति इनसबनकी अङ्ग है तथापि वेदार्थकी विशेषकरके अङ्गभूत हैं, क्योंकी देश काल द्रव्य कर्ता मन्त्र कर्म ये छः पदार्थ जब शुद्ध होंय तब धर्म सिद्धहोय ॥ यदि ये कालादिक छः पदार्थ अशुद्ध होंय तो अधर्म होय ॥४०॥४१॥

कल्पसूत्रेषु वेदत्वं स्मृतित्वञ्च प्रतीयते ॥ अर्थतः कर्तृतश्चापि तुल्यत्वात्पाठतः स्मृतिः॥४२॥

सौकर्यार्थङ्कृतिस्तस्य सङ्कलीकृत्य वर्णनात् ॥ तेनापि क्रियमाणस्तु धर्मः श्रौतो भवेद् ध्रुवम् ॥ ४३ ॥

तत्त्वदीपप्रकाशः ।

कल्पसूत्राणामृषिप्रणीतत्वात्स्मृतित्वमाशंक्य परिहरति ॥ कल्पसूत्रेष्विति ॥ व्यवस्थामाह ॥ अर्थत इति । अर्थो वैदिकः ॥ स्वराद्यभावात्कर्त्तुः स्मरणाच्च स्मृतित्वम् ॥ ४२ ॥ तर्हि अर्थस्य वैदिकत्वे को हेतुस्तत्राह ॥ सौकर्यार्थमिति ॥ कर्म्मज्ञानार्थमेव कल्पसूत्रन्द्रष्टव्यं नतु तदुक्तत्वेन कर्त्तव्यमिति मुख्यः पक्षः ॥ गौणमाह ॥ तेनापीति ॥ आधुनिकानां सङ्ग्रहार्थमुक्तम् ॥ ४३ ॥

आवरणभंगः ।

व्यवस्थामाहेति ॥ उभयरूपत्वं युक्तमेवेति वक्तुन्तामाहेत्यर्थः ॥ ॥ वैदिक-इति ॥ ॥ नित्यानुमेयातिरिक्तश्रुतिप्रसिद्धः ॥ पाठत इत्यस्य विवरणं ॥ स्वराद्यभावादिति ॥ ॥ तथाच अर्थतो वेदत्वं कर्तृतः पाठतश्च कल्पसूत्रं स्मृतिरपि भवतीति मूलयोजना ॥ ४२ ॥ ॥ तर्हीति ॥ ॥ हेतुद्वयेन चेत्स्मृतित्वं द्दढन्तर्हीत्यर्थः ॥ ॥ सौकर्यार्थमिति ॥ प्रत्यक्षवेदमवलोक्य साङ्गप्रधानप्रयोगैक्यप्रकारपरिचर्यार्थम् ॥ अर्थस्य वैदिकत्वाय बीजभूतं ज्ञानप्रकारमाहुः ॥ ॥ कर्मेत्यादि ॥ ॥ मुख्य इति ॥ ॥ मुख्यो मरीच्यादिभिः क्रियमाणः ॥ ॥ तेनापीति ॥ ॥ वेदाङ्गभूतकल्पसूत्रोक्तत्वेनापि मूले ध्रुवमित्यनेन सङ्कलीकृत्य वर्णनापूर्वं तस्य वाक्यस्य श्रुतिरूपत्वादिति हेतुरभिप्रेयते ॥ ४३ ॥

व्रजभाषाटीका ।

कल्पसूत्र ऋषिप्रणीतहै, वेद जैसे स्वर उनमें नहिंहैं तासों उनको पाठ स्मृतिनमें गिणोजावेहै तथा अर्थ उनको वैदिकहै, अर्थात् वेद विहित यज्ञादिकनकी विधि बतायवेवारे हैं तासों अर्थसों उनकी वेदमें गणना है ॥ ४२ ॥ अर्थसों कल्पसूत्रनके वैदिक होयवेमें कहा हेतु है तहां कहें हैं ॥ सौकार्यार्थमिति ॥ यज्ञादिककर्मनको

सुकरतासों ज्ञान होयवेकेलियें कल्पसूत्रनकूं देखनेंचाहिये परन्तु यज्ञादिकनके उत्तमाधिकारी मरीचिकूं आदिलेकें जे ऋषि हते उनके किये यज्ञनमें कल्पसूत्रनकी अपेक्षा नहिंहती- उनके शुद्ध अन्तःकरण हते तासों बिनाकल्पसूत्रही कर्मको स्वरूप भासमान होयजातोहतो यह मुख्यपक्ष है॥ अभीके मनुष्यनकूं यज्ञादिक कर्मनको प्रकार जानवेकेलिये कल्पसूत्र देखवेकी आवश्यकता है, कल्पसूत्रनकेद्वारा करेभये यज्ञादिकही वैदिकधर्म समुझेजावें हैं४२

इष्ट्योपासनकर्म्माणि न श्रौतानि कथञ्चन ॥ भेदद्वैजात्यतश्चापि काल एकस्तयोः परम ॥ ४४ ॥ कालबाधान्न कर्त्तव्यं स्मार्तं श्रौतो बली यतः॥ पश्चाद्वा गौणकालेऽपि कर्त्तव्यमिति केचन ॥ ४५ ॥

तत्त्वदीपप्रकाशः ।

गृह्याणां श्रौतत्वमाशंक्य परिहरति ॥ **इष्टीति** ॥ इष्टिः स्थालीपाकः तत्र हेतुः ॥ **भेदादिति** ॥ अग्न्यादि सर्वं श्रौतस्मार्त्तयोर्भिन्नम्विजातीयञ्च ॥ तर्हि कथमेककालविधानन्तत्राह ॥ **काल एक इति** ॥ तथापि श्रौतस्य बलवत्वाय निर्णयमाह ॥ **कालबाधादिति** ॥ मुख्ये काले बलिष्ठत्वाच्छ्रौतमेव कर्त्तव्यमतः कालस्य निमित्तस्याभावात्स्मार्त्तं न कर्त्तव्यम् ॥ अतएव सर्वाधानविधिः ॥ पक्षान्तरमाह ॥ **पश्चादिति** ॥ ४४ ॥ ४५ ॥

आवरणभंगः ।

॥ गृह्याणामित्यादि ॥ ॥ उक्तयैव दिशा गृह्योक्तधर्माणां श्रौतत्वमाशंक्य वक्ष्यमाणहेतुभ्यान्तत्परिहरतीत्यर्थः ॥ ॥ भिन्नं विजातीयमिति ॥ नाम्ना भिन्नं धर्मेण विजातीयमित्यर्थः ॥ ॥ तर्हीति ॥ ॥ स्मार्त्तस्य कल्पोक्तधर्मतुल्यत्वाभावे ॥ ॥अतएवेत्यादि ॥ ॥ सर्वाधानविधिः सर्व-

मादधातीति विधिः । एवञ्चास्मिन्पक्षे इष्ट्यौपासनयोरनावश्यकतया अकरणा सदतिरिक्तस्यैव गृहस्थानीयत्वम्बोध्यम् ॥ ॥ पक्षान्तरमाहेति ॥ ॥ नन्वर्द्ध-मादधातीत्यपि विध्यन्तरं दृश्यते तथा नित्यानुमेयवेदमूलकत्वेन तयोरपि साधकत्वमिति कथमेकान्ततस्तद्बाध इत्यतः पक्षान्तरमाहेत्यर्थः ॥ तथाच मुख्य-काले स्मार्तस्य शिष्टैरकरणात्तन्निर्बलमिति ज्ञायते तेन विधिसत्वेपि कृताकृतं तत् । अतो मतान्तरमेवेति भावः ॥ ४४ ॥ ॥ ४५ ॥

व्रजभाषाटीका ।

गृह्यसूत्र श्रौत नहिं है इष्टि औपासन ये दोनों स्मार्तकर्म हैं, श्रौत तथा स्मार्त अग्न्याधानादि न्यारे २ और विजातीय हैं अर्थात् नामसोंभी भेद है. शङ्का—जब श्रौत स्मार्त अग्निहोत्र अ-लग अलग हैं तब दोनोंही अग्निहोत्र करवेको एककालको विधा-न कैसें बनसकें ॥ उत्तर ॥ एककालको विधानहै तथापि वेदोक्तक-र्म स्मार्तकर्मकी अपेक्षा प्रबल है तासों मुख्यकालमें वैदिककर्मही करनों योग्यहै ॥ श्रौत करे पीछें स्मार्त अग्निहोत्र करवेको निमित्त काल रह्योनाहिं तासों स्मार्त इष्टि औपासन नहिंकरनों ॥ पक्षान्तर कहें हैं ॥ श्रौतकर्म करें पीछें गौणकालमें स्मार्तकर्म करनों ऐसें कितनेक कहें है ॥ ४४ ॥ ४५ ॥

स्मार्तमात्रस्य करणादाभासो ब्रह्मणो भवेत् ॥
स्वर्गाभासाद्यपि फलं श्रौतमात्रेपि चाखिलं ॥
॥ ४६ ॥ ब्रह्मप्रकरणं स्मार्त्तकल्पसूत्रवदेव हि ॥
पुराणमूलकश्चापि ह्याश्रमाचारतोदितम् ॥ ४७ ॥

तत्त्वदीपप्रकाशः ।

एवं श्रौतस्य बलिष्ठत्वायासहायशूरता निरूपिता क्वचि-त्तथा स्मार्तस्यापि भविष्यतीत्याशंक्याह ॥ स्मार्त्तमात्रस्येति ॥ ब्रह्म वेदः तद्वेत्तीति ब्राह्मणः ॥ स्मृतिरपि वेदमूलिकेति द्व्यन्तरितत्वात्प्र-

तिबिम्बवेदाभासो भवति ॥ अतो ब्राह्मणोपि तादृस्याभासः फलञ्च तथेत्याह ॥ **स्वर्गाभासेति** ॥ चित्तशुद्धौ वासनाक्षयाभावो दैत्योपहतलोके च स्थितिरिति श्रुतौ ॥ तद्विपरीतमाह ॥ **श्रौतमात्र इति** ॥ अखिलं मुख्यम् ॥ ४६ ॥ स्मृतौ ब्रह्मनिरूपणम्प्रत्यक्षोपनिषन्मूलकम्भविष्यतीति प्रकारान्तरमाह ॥ **ब्रह्मप्रकरणमिति** ॥ तावान् भागः कल्पसूत्रवदिति तेनापि ब्रह्मज्ञानम्फलायेति गौणः पक्षः ॥ मुख्यमाह ॥ **पुराणमूलकमिति**॥ ननु स्मृतिर्मुख्या पुराणापेक्षया बलिष्ठा वेदसमानाधिकरणात्कथं पुराणमुपजीवेदित्याशङ्क्याह ॥ **आश्रमाचारेति** ॥ सर्वा आश्रमाः स्मार्त्तास्तेषामाचारनिरूपणप्रस्तावे चतुर्थाश्रमे ब्रह्मध्यानं मुख्यम् ॥ पुराणे च तदुक्तमिति ततो गृहीतमुपनिषदर्थग्रहणे उपनिषत्त्वभङ्गाद्दोषःस्यात्, शाखाव्यवस्था च भज्येतातः स्मार्तं ब्रह्मज्ञानञ्च वैदिकवत्फलसाधकम् ॥ ४७ ॥ **इति स्मृतिप्रकरणम्** ॥

आवरणभंगः।

॥ एवमिति ॥ ॥ सर्वाधानविधिना मुख्यकालकरणेन चेत्यर्थः ॥ ॥ भविष्यतीति ॥ ॥ अर्द्धाधानविधिनानुमेया भविष्यतीत्यर्थः ॥ ॥ तद्वेत्तीति ॥ ॥ "ब्रह्मज्ञो ब्राह्मणः स्मृतः" इत्यर्थज्ञानपूर्वकानुष्ठानस्य विवक्षितत्वात्तत्करण एव मुख्यं ब्राह्मणत्वं "यो दुर्ब्राह्मणः" इत्यादिश्रुतेश्च। तदकरणे यत्तदाहुः॥ स्मृतिरित्यादि ॥ आभास इति॥ स्मार्तो धर्म इति शेषः। अतः स्वरूपतः फलतश्च जघन्यत्वान्न क्वाप्यसहायशूरत्वमिति श्रौतपोषकत्वमेव स्मृतिप्रयोजनमिति निश्चयः ॥ ॥ ४६ ॥ एवन्धर्मोपयोगिनी स्मृतिर्विचारिता ॥ ज्ञानोपयोगिनीं विचारयन्ति॥ ॥ ॥ स्मृतावित्यादि ॥ ॥ प्रत्यक्षोपनिषन्मूलिकामिति ॥ ॥ योगियाज्ञवल्क्यस्मृतौ माण्डुक्यमैत्रायणीयोपनिषत्सम्वादस्य दृश्यमानत्वात्सर्वत्र प्रत्यक्षोपनिषन्मूलकमित्यर्थः ॥ ॥ कल्पसूत्रवदिति ॥ ॥ बोधसौकर्यार्थं सङ्कलीकृत्योपनिषद्भ्यो गृहीत इति श्रौत इत्यर्थः ॥ अस्य पक्षस्य गौणत्व उपपत्तिरनुपदमेव वाच्या ॥ मुख्ये किञ्चिदाशंकन्ते ॥ ॥ नन्वित्यादि ॥ ॥ बलिष्ठेति ॥ ॥ श्रुतिस्मृतिपुराणानां विरोधो यत्र दृश्यते तत्र श्रौतं बलिष्ठं स्यात्तयोर्द्वैधे स्मृतिर्व

रेति व्यासस्मृतिवाक्यात्तथेत्यर्थः ॥ वेदसामानाधिकरण्यन्तूपपादितमेव ॥ समाधिमुपपादयन्ति ॥ ॥ सर्वे इत्यादि ॥ ॥ ननु पुराणेभ्य एव गृहीतमित्यस्य किं विनिगमकमित्यत आहुः ॥ ॥ उपेत्यादि ॥ ॥ दोष इति ॥ ॥ ॥ प्रतिपाद्ये दोष इत्यर्थः ॥ दूरषणान्तरमाहुः ॥ शाखेत्यादि ॥ अयमर्थः ॥ स्मार्त्तं ब्रह्मप्रकरणमेकतरोपनिषदर्थसंग्रहरूपं सर्वोपनिषदर्थसंग्रहरूपं वा । आद्ये उपनिषन्नाम्नस्तत्रानुपनिबन्धनात्किंशाखीयस्य तदावश्यकमिति ज्ञातुमशक्तियथाकथञ्चिज्ज्ञाने च तस्य भागस्य सर्वसाधारणत्वभङ्गप्रसङ्गः । द्वितीये च सर्वेषाम्फलसाधकत्वाविशेषात्तत्तदुपनिषदान्तत्तच्छाखायामुपनिबन्धनवैयर्थ्यप्रङ्ग इति तथेत्यर्थः ॥ सिद्धमाहुः ॥ ॥ अत इत्यादि ॥ ॥ तेनायमेव पक्षो मुख्य इति पूर्वोक्तस्य गौणत्व उपपत्तिरुक्ता ॥ एवं सर्वस्य स्मार्तप्रमेयस्य निरूपणेन प्रमाणप्रमेयसाधनफलैस्तद्बलं निश्चितन्तत्रेदं सिद्धम् ॥ स्मृतिरूपप्रमाणस्य स्वरूपं जन्यं नतु वेदवन्नित्यं तत्र यत् व्रतादिकं कृष्यादिप्रकारः करादिप्रकारो गर्भाधानादिकश्च प्रमेयं साधनात्मकन्तद्यथार्हं लोकसंग्रहादिकं साधयदपि श्रौते धर्मे शुद्धताजननेनोपकरोति स्वतंत्रन्तु स्वर्गाभासादि साधयति नतु श्रौतवदिति ॥ ब्रह्मप्रकरणन्तु श्रौतसंग्रहात्मकत्वे श्रौतत्वेन तत्रोपकरोति । पौराणत्वे तत्रोपकरोतीति न स्वतन्त्रफलसाधकम् । तेनोभयापेक्षया निर्बलमिति स्मृतेर्बलवत्वन्तु वर्णधर्म एवेति तेन पूर्वप्रकरणोक्ते अविरुद्धन्तु यत्त्वस्येत्यादिरूपे रसे भावनाविपरीतभावने निवारिते ॥ ४७ ॥ इति स्मृतिप्रकरणम् ॥

व्रजभाषाटीका ।

श्रौतकर्म बलवत् है तासों असहायशूर है अर्थात् स्मार्तकर्मकी याकूं अपेक्षा नहिं है, ऐसें स्मार्तकर्मभी असहायशूर होयगो या शङ्काकूं दूरकरें हैं ॥ स्मार्तमात्रस्येति ॥ ब्रह्म जो वेद है ताकूं जाने अर्थात् अर्थ जानके जो वेदको अनुष्ठान करें है वो ब्राह्मण है, स्मृति है सोभी नित्यानुमेयवेदमूलक है तथापि अर्थ और अनुभव इन दोकरिकै व्यवधानवालीहै, तासों जैसें कांचको व्यवधान होयवेसों दर्पणको मुखको प्रतिबिम्ब कहावेहै ऐसेंही स्मार्तधर्म वैदिकधर्मको आभास कहावेहै ॥ ऐसेंही जो ब्राह्मण श्रौतकर्म छोडकें केवल स्मृतिके कर्ममात्र करें है वोभी ब्राह्मणाभास

कहावेहै और वाकर्मसों फलभी वैसोही होवेहै ये आगेके श्लोक में कहें हैं ॥ स्वर्गाभासेति ॥ चित्तशुद्धि होयजावे और वासनाको क्षय नहोय दैत्यनको जामें उपद्रव होय ऐसे लोकमें स्थित होयकें सुखभोग करेहै यह स्वर्गाभास केवल स्मार्तकर्मको फल है ॥ याको तात्पर्य आवरणभङ्गमें लिख्योहै कि श्रौतधर्मको पोषण करनों स्मार्तधर्मको प्रयोजन है। स्वतन्त्र होयकें मुख्यफल नहिं दे सकेहै, केवल श्रौतकर्ममात्रके करवेसों तो अखिल मुख्यस्वर्गादि-फल होवेहै येही वेदकी स्मृतिकी अपेक्षा अधिकता है ॥ ४६ ॥ स्मृतिनमें ब्रह्मप्रकरण प्रत्यक्ष उपनिषन्मूल होयगो ऐसी शङ्का दूरकरतेभये प्रकारान्तर दिखावें हैं ॥ ब्रह्मप्रकरणमिति ॥ स्मृतिनमें जो ब्रह्मज्ञानको वर्णन है सो कल्पसूत्रनमें जैसो वेदोक्तकर्मनको आनुपूर्वी सङ्कलन कियो है तैसें उपनिषदके ज्ञानके सुगमताकेलिये संग्रह करके स्मृतिनमें वर्णनकियोहै तासों स्मृतिनकेद्वारा प्रकट-भयोभी ब्रह्मज्ञान फलार्थ है। यह गौणपक्ष है मुख्यपक्ष तो यहही है जो स्मृतिनमें लिख्यो ब्रह्मज्ञान सो पुराणमूलक है तहाँ शङ्का होवे है. स्मृति तो मुख्य है पुराणनकी अपेक्षा प्रबल है स्मृति क्यों पुराणनको आश्रयकरती होयगी तहाँ उत्तर आज्ञाकरेंहैं॥आश्रमा-चारतोदितमिति ॥ सब आश्रम स्मृतिमें लिखे हैंतथा उन आश्र-मनके आचार निरूपणकरे हैं तहां चौथे आश्रममें ब्रह्मध्यानको मुख्यतासों वर्णन करें हैं वा ब्रह्मध्यानको वर्णन पुराणमें कह्योहै तासों पुराणसोंही संग्रहकरके स्मृतिमें ब्रह्मध्यानको वर्णनकियोहै॥ उपनिषदनके अर्थको स्मृतिनमें संग्रह कियोहै ऐसें मानोगे तो उपनिषदत्वभङ्गदोष आवेगो अर्थात स्मृतिनकरकेही कार्यसिद्धि होजायगी फिर न्यारी न्यारी शाखामें न्यारे न्यारे उप[illegible]को

पाठ व्यर्थ होयगो, तथा स्मृतिनको लिख्यो ब्रह्मज्ञान सबशाखावालेनकेलियेही हितकारी मानेंगे तो अपनी अपनी शाखाके उपनिषदको लिख्योही ब्रह्मज्ञान फलार्थ है या प्रकारकी जो मर्यादा है ताको भङ्ग होयगो तासों स्मृतिनको लिख्यो ब्रह्मज्ञान स्वतन्त्र होयके वैदिकज्ञान जैसो फलसाधक नहिं है किन्तु उपनिषदनके ज्ञानको उपकारक है ॥ वर्णधर्ममेंही स्मृति बलवती है ॥ ४७ ॥

इति स्मृतिप्रकरणम् ।

पुराणं वेदवत्पूर्वसिद्धं सर्वोपयोगि तत् ॥ सर्वोपकरणानीव धर्मस्य नरगेहयोः ॥ ४८ ॥ तदज्ञाने सर्वमौढ्यं तेन तद्धृदयं स्मृतम् ॥ भावयुक्तस्य धर्मस्य प्रमितौ तत्प्रयुज्यते ॥ ४९ ॥

तत्त्वदीपप्रकाशः ।

एवं स्मृतिमुपपाद्य पुराणनिर्णयमाह ॥ **पुराणमिति** ॥ तस्य वेदधर्मातिदेशः ॥ तेन धर्मार्थकाममोक्षा भक्तिश्चेति पञ्च नित्याः काम्याश्च विकृतास्तत्रापि देशादीनामङ्गत्वं पञ्चानामपि देशादिषट्कमङ्गम्पृथक् ॥ व्यासस्य कर्तृत्वमाशंक्य निराकरोति ॥ **पूर्वसिद्धमिति** ॥ नित्यमित्यर्थः ॥ तस्य प्रजोजनमाह ॥ **सर्वोपयोगीति** ॥ द्विविधा हि चत्वारोपि पुरुषार्थां ईश्वरविचारिता जीवविचारिताश्च ॥ तत्रेश्वरविचारिता वैदिका जीवविचारिताः पौराणिका इति । अतः सर्वोपयोगित्वम् । वैदिकेऽप्युपयोगमाह ॥ **सर्वोपकरणानीवेति** ॥ श्रौतो धर्मो देहस्थानीयः स्मार्तो गृहस्थानीयः ॥ उपकरणस्थानीयः पौराणिक इति ॥ ४८ ॥ उपकारणाभावे सर्वथा स्थितिर्न भवतीति तस्यावश्यकत्वमाह ॥ **तदज्ञान इति** ॥ पुराणार्थाज्ञाने सर्वमौढ्यं बहिः पदार्थज्ञानाभावात् ॥ अतएव "श्रुतिस्मृती उभे नेत्रे पुराणं हृदयं स्मृतम्" इति हृदयत्वम् ॥

उपयोगस्थानमाह ॥ भावयुक्तस्येति ॥ वेदे यज्ञादय उक्तास्तेषामभिप्रायज्ञानम्पुराणादेव कदाचित्कर्तव्यं कदाचिन्न कर्त्तव्यम् ॥ "कर्मणोह्यपि बोद्धव्यम्" इतिवत् ॥ भावस्य ज्ञानम्पुराणात् ॥ ४९ ॥

आवरणभंगः ।

अतःपरम्पौराणप्रमेयस्य बलविचारणाय तन्निर्णयार्थमुपक्रमन्ते ॥ ॥ एवमित्यादि ॥ ॥ वेदोपबृंहणत्वे स्मृतित्वेनैव सूत्रेषु तेषां ग्रहणेन तत्तुल्यत्वात् । तत्र पुराणलक्षणस्य प्रसिद्धत्वान्नाममात्रेणैव निर्दिशन्ति ॥ ॥ पुराणमिति॥ ॥ स्मृतिनिर्णयादेतन्निर्णयस्य वैलक्षण्यं ज्ञापयितुम्पुराणे कश्चिद्विशेषमाहुः ॥ तस्येत्यादि ॥ ॥ अतो वेदवदेवास्य निर्णयः कर्त्तव्य इति भावः । एतेन प्रमाणस्वरूपमुक्तम् ॥ एवञ्च बृहदारण्यके "इतिहासः पुराणम्" इति छांदोग्ये च सनत्कुमारनारदसम्वादे "इतिहासःपुराणम्वेदानाम्पञ्चमोवेदः" इति श्रुतिरपि युज्यते॥केचित्तु श्रौतान्येवेतिहासादीन्यादाय तेषां पञ्चमत्वमस्यां श्रुतौ व्याचचक्षिरे तत्तुच्छं तस्य वेदचतुष्टयान्तर्गतत्वेन पृथक्पाठसंख्ययोर्विरोधात्तावतो वेदभागस्य प्रक्षिप्तत्वापादकत्वाच्च ॥ पुराणादीनाम्वेदरूपत्वाभावे तैर्वेदोपबृंहणाभावप्रसक्तेश्च ॥ तथानङ्गीकारे तु "इतिहासपुराणाभ्याम्वेदं समुपबृंहयेत् ॥ बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति" इति ब्रह्माण्डीयप्रथमाध्यायवाक्यस्य "वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः" इति विष्णुपुराणवाक्यस्य "इतिहासपुराणैस्तु कृतोयं निश्चलः पुरा" इति स्कान्दप्रभासखण्डीयस्य "नान्यथा ज्ञायते धर्मो ब्रह्मविद्या च वैदिकी॥ तस्माद्धर्मःपुराणंच श्रद्धातव्यं मनीषिभिः" "इति कौर्मपञ्चदशाध्यायवाक्यस्य च विरोधापत्तेः॥ न चायमर्थवाद इति वाच्यम् । "पुराणेष्वर्थवादत्वं ये वदन्ति नराधमाः । तैरर्जितानि पुण्यानि तद्वदेव भवन्ति हि" इति बृहन्नारदीये दोषस्मरणात् । अत इतिहासपुराणे प्रसिद्धे एव ग्राह्ये तेनात्र वेदातिदेशो युक्त एवेति दिक् ॥ तेन यत्सिद्ध्यति तदाहुः॥ ॥ तेनेत्यादि ॥ ॥ पृथगिति ॥ ॥ तेन यत्सिध्यति तदाहुः । तेन प्रतिपद्यत इति ज्ञातव्यमिति शेषः ॥ तथाच यथा वेदेऽग्निहोत्रादयः पञ्चार्था अनेकरूपाः सभेदाःसाङ्गा उक्तास्तथा पुराणे धर्मादयोर्था उक्ता इत्यर्थः ॥ तथोक्तं मात्स्ये "धर्मश्चार्थश्च कामश्च मोक्षश्च परिकीर्त्यते ॥ सर्वेष्वेव पुराणेषु तद्विरोधेषु यत्फलम्" इति । भक्तिरपि तथा । यथाचारमाधवे पुराणसारवचने । शैवश्च वैष्णवं शाक्तं सौरं वैनायकन्तथा । स्कांदं च भक्तिमार्गस्य दर्शनानि षडेवहि" इति॥ अत्र व्युत्पत्त्यर्थं किञ्चिदुदाह्रीयते तत्र नित्यो धर्मो यथाऽतिथिपूजनादिः । "अतिथिर्विमुखो यातः पुण्यमादाय

गच्छति" इति ॥ काम्यो यथा पुत्रार्थन्दितिपयोव्रतम् । नित्यार्थो यथा ब्राह्मणस्य यात्रार्थं कुसूलकुम्भीधान्यादि ॥ वानप्रस्थस्य "स्वयं सञ्चिनुयात्सर्वमात्मनो वृत्तिकारणम्"इति । "यावद्भ्रियेत जठरं तावत्स्वत्वं हि देहिनाम्॥अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति"॥इत्यादिवाक्यैस्तस्य नित्यत्वम्॥काम्यो यथा इलायाः पुंस्त्वादिः ॥नित्यकाम्यो यथा ऋतौ स्वदारागमनम् ॥ "ऋतुस्नातान्तु यो भार्यां शक्तःसन्नोपगच्छति॥ घोरायाम्भ्रूणहत्यायां युज्यते नात्र संशयः" इत्यादिभिः । काम्यो यथा आग्नीध्रस्य पूर्वचित्तिसङ्गः । नित्यो मोक्षः सायुज्यम् ॥ काम्यः सालोक्यादिः । यथा सूतसंहितायां मुक्तिखण्डे ।"एवं बहुविधाः प्रोक्ता मुक्तयः पुरुषोत्तमे ॥एतास्वशुद्धचित्तानामिच्छा नित्यम्प्रजायते । सायुज्यरूपा परमा मुक्तिर्भुवि परात्मनि ॥ पारमार्थिकतादात्म्यरूपाप्यज्ञाननाशतः" इति ॥ द्विविधा भक्तिर्यथा श्रीभागवते "अकामः सर्वकामो वा मोक्षकाम उदारधीः । तीव्रेण भक्तियोगेन यजेत पुरुषम्परम् ॥ सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत । दीयमानं न गृह्णन्ति विना मत्सेवनञ्जनाः ॥ स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः"इति मोक्षस्य भक्तेश्च नित्यत्वन्तदभावे संसारदुःखानिवृत्त्या ज्ञेयम्॥ एवमेतदङ्गान्यपि ॥तत्र धर्मस्याङ्गानि यथैकादशस्कन्धे "अकृष्णसारो देशानामब्रह्मण्योऽशुचिर्भवेत्"इत्यत्र निषेधमुखेन तदितरो देशो धर्मसाधकत्वेन बोधितः॥ एवङ्कालः । यथा "कर्मण्यो गुणवान् कालो द्रव्यतः स्वत एव वा"इति॥तत्र स्वतो यथा"प्रौष्ठपद्यष्टकाभूयः पितृलोके भविष्यति"इति मात्स्ये ॥ द्रव्यतो तथा । नवेऽन्नादौ जाते आग्रयणस्य । एतेनैव द्रव्यं ज्ञेयम् । यथाच पयोव्रते "सिनीवाल्यां मृदा लिप्य स्नायात्क्रोडविदीर्णया"इत्यादि । कर्त्ता यथा "एतन्मे भगवान्पृष्टः प्रजाकामस्य पद्मज"इत्यत्र प्रजाकामः । एवं नित्येपि ज्ञेयः । मन्त्रो यथा "त्वन्देव्यादिवराहेण"इत्यादि मृत्तिकास्नानमन्त्रः ॥ कर्माप्युक्तप्रायमेव । यथात्रत्यं पयोव्रताङ्गभूतं मृत्तिकास्नानं । अर्थस्याङ्गानि । तत्र देशो यथा मात्स्ये राजधर्मेषु । राजा सहायसम्पन्नः प्रभूतयवसेन्धनम् ॥ रम्यमानतसामन्तमगम्यं देशमाविशेत्" इति । कालो यथा "वणिङ्मुनिनृपाः स्नाता निर्गम्यार्थान्प्रपेदिरे " इत्यादौ दशमस्कन्धे शरत्कालोऽर्थसाधनत्वेनोक्तः ॥ यथाच मात्स्ये "पुष्टा योधा भृता भृत्याः प्रभूतञ्च बलं मम ॥ मूलरक्षासमर्थोस्मि तदा यात्राम्प्रयोजयेत्"इत्यादिभिः । द्रव्यं यथा विष्णुधर्मोत्तरादिषु । "सङ्ग्रहश्चात्र सर्वेषामायुधानाम्प्रशस्यते"इत्यादिराजधर्मकथने ॥ कर्त्ता यथा मात्स्ये । "यस्मिन्कर्मणि यस्य स्याद्विशेषेण च कौशलम् । तस्मिन्कर्मणि तं राजा परीक्ष्य

विनियोजयेत्" इति । मंत्रो यथा नारायणकवचादयः । कर्म यथा मात्स्ये "संग्रामेष्वनिवर्त्तित्वम्प्रजानाम्परिपालनं ॥ शुश्रूषा ब्राह्मणानाञ्च राज्ञां निःश्रेयसम्परम्" इति । कामस्याङ्गानि तत्र देशः। यथा "प्रायशः प्राकृता लोकास्त्रियं रहसि बिभ्रति" इत्यादौ । कालो यथर्तुरात्र्यादिः॥ द्रव्यं यथा गारुडे "मनःशिला पत्रकञ्च सगोरोचनकुंकुमं ॥ एभिः कृते च तिलके नरः स्त्रीवशतामियात्" इति । कर्त्ता यथा पुराणान्तरे वरलक्षणे "यस्याशु प्लवते बीजं ह्लादि मूत्रञ्च फेनिलम् । पुमान्स्याल्लक्षणैरेतैर्विपरीतैस्तु षण्ढकः" इति । मन्त्रो यथा गारुडे ॥ गणपतिमन्त्रमुक्त्वा "अयुतञ्जुहुयाद्यस्तु शुचिः प्रयतमानसः । दृष्टमात्रे सदा तस्य वशमायान्ति योषितः" इति । कर्म यथा गारुडे "रतिकाले महादेव पार्वतीप्रिय शङ्कर ॥ निजं शुक्रं गृहीत्वा तु वामहस्तेन यः पुमान् । कामिनीचरणं वामं लिम्पेत्स स्यात्स्त्रियाः प्रियः" इति मोक्षस्याङ्गानि । तत्र देशो यथा "सप्त पुर्यस्त्रयो ग्रामा नवारण्या नवोषराः" इति पुराणान्तरे मोक्षदत्वेन गणिताः। यथा वाराहे "काश्यादिपुर्यो यदि सन्ति लोके तासान्तु मध्ये मथुरैव धन्या ॥ या जन्ममौञ्जीव्रतमृत्युदाहैर्नृणाञ्चतुर्धा विदधाति मुक्तिम्" इति ॥ कालो यथा "अग्निर्ज्योतिरहः शुक्लः" इत्यादिजातीयकवाक्यबोधितः ॥ द्रव्यं यथा "वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत् ॥ संसिद्ध्यत्याश्वसंमोहः शुद्धसत्त्वः शिलान्धसा" इति ॥ कर्ता यथा । न कामकर्मवीजानां यस्य चेतसि सम्भवः ॥ वासुदेवैकनिलयः स वै भागवतोत्तमः" इत्येकादशस्कन्धे ॥ मन्त्रो यथा ब्रह्माण्डपुराणे धरिणीशेषसम्वादः । "निर्विश्य भोगानन्ते च कृष्णसायुज्यमाप्नुयात्" इत्युपसंहारात्। कर्म यथा एकादशस्कन्धे जायन्तेयवाक्ये पूजाम्प्रकृत्य "एवमग्न्यर्कतोयादावतिथौ हृदये च यः। यजतीश्वरमात्मान माचिरान्मुच्यते हि सः" इति । भक्त्यङ्गानि यथा जनकजायन्तेयसंवादे "देशः क्वचिन्महाराज द्रविडेषु च भूरिशः" इति । कालो यथा तत्रैव "कृतादिषु प्रजा राजन्कलाविच्छन्ति सम्भवं । कलौ खलु भविष्यन्ति नारायणपरायणाः" इति ॥ द्रव्यं यथा तत्रैव "कावेरी च महापुण्या प्रतीची च महानदी ॥ ये पिबन्ति जलन्तासां मनुजा मनुजेश्वर ॥ प्रायो भक्ता भगवति वासुदेवेऽमलाशयाः" इति॥ कर्त्ता यथा । "देवोऽसुरो मनुष्यो वा यक्षो गन्धर्व एव वा ॥ भजन्मुकुन्दचरणं स्वस्तिमान् स्याद्यथा वयम्" इति सप्तमस्कन्धे ॥ मन्त्रो यथा षष्ठस्कन्धे गद्यरूपो मन्त्रो येन शेषसाक्षात्कारः ॥ कर्म यथैकादशे "भक्तियोगं स लभते एवं यः पूजयेत माम्" इति । एवमिदन्दिङ्मात्रम्प्रदर्शितम् ॥ एवमन्यदपि यथायोग्यमूह्यम् ॥ एतदेवोक्तम्पृथक्क पृथगिति । एवं वेदस्य यज्ञार्थत्ववत्पुराणस्यैवं पुमर्थार्थता सूचिता

॥ व्यासस्य कर्तृत्वमाशङ्क्येति ॥ " अष्टादशपुराणानि कृत्वा सत्यवतीसुतः " इति वाक्यादशंक्येत्यर्थः ॥ ॥ नित्यमिति ॥ ॥ " पुराणं सर्वशास्त्राणाम्प्रथमम्ब्रह्मणा स्मृतं ॥ नित्यं शब्दमयं ब्रह्म शतकोटिप्रविस्तरम् ॥ अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः । पुराणमेकमेवासीत्तस्मिन् कल्पान्तरेऽनघ" इति मात्स्यवाक्यात्तथेत्यर्थः ॥ एवम्पुराणस्वरूपविषयकः सन्देहो निराकृतः॥ एवञ्च व्यासकर्तृत्वं श्लोकसंग्रहवत्पुराणसमासकरणाद्बोध्यम् ॥ ॥ तस्येत्यादि ॥ ॥ वेदवत्पूर्वसिद्धत्वे वेदादेवार्थसिद्धेः किम्पुराणेनेत्याशङ्कानिरासाय तदाहेत्यर्थः॥ ॥ सर्वोपयोगीति ॥ ॥ चतुर्वर्णोपयोगी ॥ तथाच वेदस्तु त्रैवर्णिकोपयोगी इदन्तु सर्वोपयोगीतीदमेव सर्वोपकाररूपम्प्रयोजनमित्यर्थः ॥ ननु नेदम्प्रयोजनन्त्रैवर्णिकानां वेदादेवार्थसिद्धेः । अतः शूद्रोपयोगित्वमात्रं वक्तव्यमित्याशङ्कायान्तदुपपादयंति ॥ ॥ द्विविधेत्यादि ॥ ॥ वैदिका इति ॥ ॥ प्रकृतियज्ञसाध्यो धर्मः । यज्ञोविकृतिसाध्योर्थः । पश्वाग्निविद्यादिसिद्धः कामः । परविद्यासिद्धो मोक्षः॥ ॥पौराणिका इति॥ ॥व्रतदानादिधर्मो नीतिसाधितोर्थः। वात्स्यायनाद्यनूदितः कामः । सांख्ययोगशैववैष्णवतन्त्रोक्तरीतिका मोक्षाः॥ पुराणानां सर्वोपयोगित्वञ्च " श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः"इत्यादिवाक्येभ्योवगम्यते । अन्यथा शूद्राणामेव श्रावणं विधीयेतातस्तथेत्यर्थः ॥ ॥ वैदिकेपीत्यादि ॥ ॥ जीवविचारितानाम्वेदानधिकृतार्थत्वात्पुराणानान्तादृशतदर्थत्वमायातीति तन्निरासाय वैदिके यज्ञादिरूपे धर्मेऽपि तदुपयोगमाहेत्यर्थः ॥ ४८ ॥ ॥ स्थितिर्न भवतीति ॥ ॥ तथाच वैदिकार्थत्वान्महानेवोपयोग इत्यर्थः ॥ ॥ तस्यावश्यकत्वमाहेति ॥ ॥ उपकरणाभावेपि देहादिस्थितेर्लोके दर्शनान्न पुराणस्य तदर्थत्वमिति शङ्कायान्तदाहेत्यर्थः ॥ ॥ हृदयत्वमिति ॥ ॥ धर्महृदयत्वम् । भावयुक्तस्येत्यत्र भावपदेनाभिप्राय उच्यते । तदुपपादयन्ति ॥ वेदे इत्यादिना ॥ ॥ कदाचिदित्यादि ॥ ॥ यथा ब्रह्माण्डपुराणे कलिवर्ज्यकथनेऽग्निहोत्रादिनिषेधः ॥ यथाच "यावद्वर्णविभागोस्ति यावद्वेदः प्रवर्त्तते। संन्यासञ्चाग्निहोत्रञ्च तावत्कुर्यात्कलौ युगे" इति प्रतिप्रसवः। यथाच " आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्च" इतिश्रुत्या सर्वस्य साग्निकस्य श्रौताग्निभिर्दाहे प्राप्ते "वैतानम्प्रक्षिपेदप्सु आवसथ्यञ्चतुष्पथे॥ पात्राणि तु दहेदग्नौ यजमाने वृथा मृते" इत्येवञ्जातीयकेन श्रुतेः पतितातिरिक्तविषयत्वरूपो भावो बोध्यते॥ यथाच श्रीभागवते "तावत्कर्माणि कुर्वीत न निर्विद्येत यावता ॥ मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते" इति बोध्यते तथेत्यर्थः ॥ एवम्वेदार्थसन्देहवारकत्वेन मीमांसावदुपयोगो बोधितः ॥ ४९ ॥

व्रजभाषाटीका ।

अब पुराणनको निर्णय करें हैं ॥ पुराण है सो वेदवत् है वेदके धर्मनको पुराणमें अतिदेश है, छान्दोग्यउपनिषद्में सनत्कुमारनारदसंवादमें पुराण पञ्चमवेद है ऐसी लिखीहै॥विष्णुपुराणमें लिखे हैं "वेदाः प्रतिष्ठिताः सर्वे पुराणेषु न संशयः" वेद पुराणमें स्थित हैं यामें सन्देह नहिं है॥ "इतिहासपुराणैस्तु कृतोऽयं निश्चलः पुरा" इतिहासपुराणनकरकें वेदकूँ निश्चल अर्थात् दृढ कियोहै यह स्कन्दपुराणमें लिखीहै, इत्यादि अनेकपुराणकरिकें वेदतुल्यता पुराणकूं सिद्ध होयहै ॥ जैसे अग्निहोत्रादिक पञ्चपदार्थ वेदमें अनेकरूपवाले लिखे हैं तैसेही पुराणमें धर्म अर्थ काम मोक्ष भक्ति ये पांचपदार्थ नित्य तथा काम्यभेदसों अनेकप्रकारकरके वर्णनकिये हैं॥ नित्यधर्म जैसे अतिथिको पूजनकरनो॥ "अतिथिर्विमुखो यातः पुण्यमादाय गच्छति" जाघरसों अतिथि विमुख होयकें जायहै वाघरवालेको पुण्य लेकें जावे है, काम्यधर्म जैसे पुत्रकी कामनाकेलिये दितिने पयोव्रत कियो ॥ नित्य अर्थ जैसे ब्राह्मणकूं शरीरनिर्वाहकेलिये (कुसूल) कोठीभर अथवा घडाभर धान्य जरूर रखनोचाहिये इत्यादि॥ काम्य अर्थ जैसे इलास्त्रीने भोगकरवेकेलिये तपश्चर्या करिकें शिवसों पुरुषदेह माँगी ॥ नित्यकाम जैसे "ऋतुस्नातान्तु यो भार्यां शक्तः सन्नोपगच्छति॥ घोरायां भ्रूणहत्यायां लिप्यते नात्र संशयः" ॥ अर्थ ॥ ऋतुधर्म होयवेके अनन्तर स्नानकरीभई अपनी स्त्रीकेसाथ जो पुरुष सामर्थ्यवालो होयकेंभी गमन नहिंकरें है वहपुरुष घोर भ्रूणहत्याके पापमें लिपजावे है यामें सन्देह नहिं इत्यादि॥ काम्यकाम जैसें आग्नीध्रराजानें पूर्वचित्तीकेसाथ सम्भोग कियो ॥ नित्यमोक्ष जैसें सायु-

ज्यमुक्ति "सायुज्यरूपा परमा मुक्तिर्भुवि परात्मनि" ॥ काम्यमोक्ष जैसें सालोक्यमुक्तिप्रभृति, ऐसेंही निष्काम होकें भक्ति करीजाय वह नित्यभक्ति कहावें है ॥ सर्वकाम अथवा मोक्षकामनाकेलिये भक्ति करीजाय वो काम्यभक्ति कहीजावें है ॥ जैसें अग्निहोत्रादिकनमें देशकालादि छः पदार्थ अङ्ग हैं तैसें धर्मादिपदार्थनकेभी न्यारे२देशकालादिक अङ्ग हैं॥शङ्का–"अष्टादशपुराणानां कर्ता सत्यवतीसुतः" अर्थ–अठारहपुराणके कर्ता व्यासजी हैं इत्यादिवचनसों व्यासजी पुराणके बनायवेवारे हैं यह निश्चय होताहै उनकूँ वेदतुल्यता कैसें सम्भवसके॥ उत्तर–पुराण सब नित्य हैं, पहिलीसोंही सिद्ध हैं॥ "पुराणं सर्वशास्त्राणाम्प्रथमम्ब्रह्मणा स्मृतम् ॥ नित्यं शब्दमयं ब्रह्म शतकोटि प्रविस्तरम् ॥ अनन्तरञ्च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ पुराणमेव तत्रासीत्तस्मिन्कल्पे पुर[illegible] "अर्थ–सबशास्त्रनके पहिली ब्रह्मानें पुराणको स्मरणकियो तापीछें ब्रह्माके मुखसों वेद निकसे वा कल्पमें पहिली पुराण ही हते इत्यादिमात्स्यपुराणके वचन या विषयमें प्रमाण हैं। जैसें धर्मसिन्धुनिर्णयसिन्धुआदिग्रन्थनके श्लोकसंग्रहकरवेमात्रसों कमलाकरभट्टआदि ग्रन्थकर्ता कहावेंहैं तैसें सोक्रोडपुराणको संक्षेपसों चारलाखश्लोकमात्रके संग्रहकर्ता व्यासजी पुराणकर्ता कहावें हैं॥ शङ्का–पुराण वेदके समानहै तबतो वेद विद्यमानही है वाहीसोंही प्र[illegible] सिद्ध होयजायगो पुराणको कहा प्रयोजन है॥ उत्तर–वेद है सो ब्राह्मण क्षत्रिय वैश्य तीन वर्णकोही उपयोगी है पुराण सबको उपयोगी है तासों सबनको उपकार होनोही पुराण प्रकटहोयवेको फल है ॥ शङ्का–तीनवर्णनको तो वेदहीसों उपकार होयजायेगो केवल शूद्रको उपकार होनोंही पुराणको प्रयोज[illegible] कहनो योग्यहै ॥ उत्तर–चारोंपुरुषार्थ दोप्रकारके हैं

ईश्वरके विचारेभये धर्म अर्थ काम मोक्ष वेदमें लिखे हैं, याजीवके विचारेभये धर्म अर्थ काम मोक्ष पुराणमें लिखे हैं ॥ यदि शूद्रकेही लियें पुराण होय तो " श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रतः " इत्यादि महाभारतादिकनके वाक्यनमें चारोंवर्णकों पुराणको सुनावनो क्यों विधानकरते ॥ वेदके लिखेभये धर्ममेंभी पुराणनको उपयोग है, वेदोक्त यज्ञादिकधर्म देहस्थानापन्न हैं, स्मृतिनके लिखे संस्कार प्रायश्चितादिक धर्म घरके स्थानापन्न हैं, पुराणके लिखे व्रतदानादिक धर्म गृहकी अन्नवस्त्रादिक सामग्रीके ठिकाने हैं, जैसें घरमें कछु साहित्य नहिं होय तो देहकी स्थिति नहीं होयसकें ऐसें पुराणविना वेदोक्त धर्मकी स्थिति नहिं होसकें तासों पुराणकी अत्यावश्यकता है ॥ ४८ ॥ पुराणके अर्थको ज्ञान नहिं होय तहांतांई सबप्रकारसों मनुष्य मूढ रहें है क्योंकि पुराणके जानेविना जगतके बाहरके पदार्थको ज्ञान नहिंहोतहै याहीसों श्रुतिस्मृति ये दोनों धर्मके नेत्र हैं, पुराण धर्मको हृदय है, इत्यादि अनेकवचन हैं ॥ वेदमें यज्ञादिक कहे हैं उनके अभिप्रायको ज्ञान पुराणकेद्वाराही होतहै ॥ वैदिककर्म कब करनों कब नहिंकरनो, कर्म अकर्म विकर्म आदिको स्वरूपज्ञान तथा कर्म कहांतांई करनों इत्यादि बोध पुराणविना नहिंहोय, जैसें ब्रह्माण्डपुराणमें अग्निहोत्रादिकनको निषेध कलियुगमें है ताकी व्यवस्था लिखीहै ॥ " यावद्वर्णविभागोस्ति यावद्वेदःप्रवर्त्तते ॥ सन्यासञ्चाग्निहोत्रञ्च तावत्कुर्यात्कलौ युगे " ॥ अर्थ—जहाँतांई ब्राह्मण क्षत्रिय वैश्य शूद्र ये चारों वर्ण न्यारे रहें, जहाँतांई चारों वेद विद्यमान हैं कलियुगमें सन्यास अग्निहोत्र तहाँतांई करनों ॥ जैसें वेदमें लिखीहै अग्निहोत्रीकूँ यज्ञपात्रकरकें सहित अग्निमें जलायदेनों इत्यादिवचनसों सामान्यकरके सबहि अग्नि-

होत्रीको श्रौताग्निकरकें दाह प्राप्तभयो तहाँ " वैतानम्प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे ॥ पात्राणि तु दहेदग्नौ यजमाने वृथा मृते "॥ या पुराणवचनकरकें जो अग्निहोत्री पतित न होय वाहीको अग्निहोत्रकी अग्निसों दाह करनों ॥ जो अग्निहोत्री पतित होय तो वाके वैतानकूँ जलमें डारनों आवसथ्य अग्निकूँ चाररस्ताकेमध्यमें धरनों पात्रनकूँ अग्निमें डारने इत्यादि व्यवस्था होतहै, ऐसेंही कर्म्म कहाँतक करनों यह सन्देह भयो तहाँ " तावत्कर्माणि कुर्वीत न निर्विद्येत यावता "॥ अर्थ–तहाँ तांई कर्म करतेरहनो जहाँतांई पूरो वैराग्य मनमें दृढ नहिंहोय इत्यादि श्रीभागवतपुराणके वचनसों व्यवस्था होतहै तासों मीमांसा जैसें वेदके सन्देहकों दूरकरवेवारी है तैसें पुराणभी वेदके सन्देहकों दूरकरवेवारो है ॥ ४९ ॥

सर्वसृष्टिपदार्थानां यथार्थज्ञापनन्ततः ॥ शाखाविभागवत्तस्य विभागः सोप्यनेकधा ॥५०
शतं कल्पास्ततोप्यन्ये सन्ति कृष्णेन निर्मिताः॥सत्वेन रजसा वापि तमसा वाप्यनेकधा५१

तत्त्वदीपप्रकाशः ।

किञ्च ॥ सृष्टौ यावन्तः पदार्थास्तेषां याथार्थ्यं पुराणादेवावगन्तव्यम् ॥ यथा "प्रल्हादो ह वै कायाधवः" इति कयाधूप्रभृतीनां स्वरूपम् ॥ अष्टादशपुराणादिसमाख्यायामुपायमाह ॥ शाखाविभागवदिति ॥५०॥ तत्र यज्ञस्य भगवत्वं सिद्धमिति न सन्देहः॥ प्रकृते कथमित्याशंक्य प्रकारमाह ॥ शतङ्कल्पा इति ॥ ब्रह्मण एकस्मिन्वर्षे एको मुख्यः कल्पो ब्रह्मजन्मादिवसादिः ॥ ततोऽप्यन्ये दैनंदिनाः ॥ दिनमध्येपि कल्पसमष्टिं केचिदाहुः ॥ तथा युगान्ते ॥ तत्र सर्वत्र भुवनात्मको वृक्षो

भगवान् नानारूपो भवति ॥ अतस्तत्प्रकारप्रतिपादकानि पुराणानीति शाखाविभागवद्विभागः ॥ अवान्तरभेदान्वक्तुमाह ॥ सत्वेनेति ॥५१॥

आवरणभंगः ।

एवं क्वचिदुपयोगमुक्त्वा धर्ममात्रेषु पुराणोपयोगमाहुः॥ किञ्चेत्यादिना ॥ मूले युज्यत इति उपयुज्यत इत्यर्थः ॥ एतेनावान्तरप्रयोजनमुक्तम् ॥ अष्टादशेत्यादि॥ सार्द्धद्वयेन प्रमेयं विशदीकर्तुं वेदतुल्यतां दृढीकर्त्तुमत्रोपायमाहेत्यर्थः ॥ अष्टादशपुराणादीत्यादिपदेनोपपुराणसंहितानाञ्च संग्रहः॥ स च विभागो मात्स्ये सलक्षणक उक्तः ॥" कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो द्विजाः । व्यासरूपमहं कृत्वा संहारामि युगे युगे ॥ चतुर्लक्षप्रमाणेन द्वापरे द्वापरे सदा । तदष्टादशधा कृत्वा भूर्लोकेऽस्मिन्प्रभाष्यते । अद्याप्यमर्त्यलोके तच्छतकोटिप्रविस्तरम् ॥ एतदर्थो चतुर्लक्षे संक्षेपेण निवेशितः । पुराणानि दशाष्टौ च साम्प्रतन्तदिहोच्यते ॥ नामतस्तानि वक्ष्यामि शृणुध्वमृषिसत्तमाः । ब्रह्मणाभिहितम्पूर्वं यावन्मात्रं मरीचये ॥ ब्राह्मं तु दशसाहस्रम्पुराणम्परिकीर्तितम् । एतदेव यदा पद्ममभूद्धिरण्मयं जगत् ॥ तद्वृत्तान्ताश्रयन्तद्वै पाद्ममित्युच्यते बुधैः । पाद्मन्तु पञ्चपञ्चाशत्सहस्राणीह पठ्यते । वाराहकल्पवृतान्तमधिकृत्य पराशरः । यत्राह धर्मानखिलांस्तदुक्तं वैष्णवं विदुः । त्रयोविंशतिसाहस्रन्तत्प्रमाणं विदुर्बुधाः । श्वेतकल्पप्रसङ्गेन धर्मान्वायुरिहाब्रवीत् । यत्र तद्वायवीयं स्याद्रुद्रमाहात्म्यसंयुतम् । चतुर्विंशत्सहस्राणि पुराणन्तदिहोच्यते । यत्राधिकृत्य गायत्रीं वर्ण्यते धर्मविस्तरः ॥ वृत्रासुरवधोपेतन्तद्भागवतमुच्यते । सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः । तद्वृत्तान्तोद्भवन्तच्च पुराणम्परिकीर्तितम् ॥ अष्टादशसहस्राणि पुराणन्तत्प्रकीर्तितम् । यत्राह नारदो धर्मान्बृहत्कल्पाश्रयांस्त्विह । पञ्चविंशत्सहसहस्राणि नारदीयन्तदुच्यते। यत्राधिकृत्य शकुनीन् धर्माधर्मविचारणम् ॥ व्याख्यातजैमिनिप्रश्ने पक्षिभिर्धर्मचारिभिः ॥ मार्कण्डेयेन कथितन्तत्सर्वं विस्तरेण तु । पुराणं नवसाहस्रं वर्ह्यन्तदिहोच्यते । यत्तदीशानकल्पस्य वृत्तान्तमधिकृत्य च । वसिष्ठायाग्निना प्रोक्तमाग्नेयन्तत्प्रकीर्तितम् ॥ तच्च षोडशसाहस्रं सर्वक्रतुफलप्रदम् । यत्राधिकृत्य माहात्म्यमादित्यस्य चतुर्मुखः । अघोरकल्पवृत्तान्तप्रसङ्गेन गतिं स्थितिम् ॥ मनवे कथयामास भूतग्रामस्य लक्षणम् । चतुर्दशसहस्राणि तथा पञ्चशतानि च ॥ भविष्यच्चरितप्रायम्भविष्यन्तदिहोच्यते । रथन्तरस्य कल्पस्य वृत्तान्तमधिकृत्य च । सेतिहासकथापूर्वं जन्मसम्बन्धवर्णिना" इति॥ ब्रह्मचारिणा नारायणरूपिणेत्यर्थः ॥" सावर्णिना नारदाय कृष्णमाहात्म्यसंयुतं ॥ यत्र ब्रह्मवराहस्य

चरितम्वर्ण्यते मुहुः । तदष्टादशसाहस्रं ब्रह्मवैवर्त्तमुच्यते । यत्राग्निर्लिंगमध्यस्थः प्राह देवो महेश्वरः । धर्मार्थकाममोक्षार्थमाग्नेयमधिकृत्य च । कल्पान्ते लिङ्गमित्युक्तम्पुराणं ब्रह्मणा स्वयम् ॥ तदेकादशसाहस्रं फाल्गुन्यां यः प्रयच्छति ॥महावराहं तु पुनर्माहात्म्यमधिकृत्यं च ॥ विष्णुनाभिहितं क्षोण्यै तद्वाराहमिहोच्यते ।मानवस्य प्रसङ्गेन कल्पन्तु मुनिसत्तमाः॥ चतुर्विंशत्सहस्राणि तत्पुराणमिहोच्यते । यत्र माहेश्वरान्धर्मानधिकृत्य च षण्मुखः॥ कल्पे तत्पुरुषे वृत्ते चरितैरुपबृंहितम् ॥ स्कांदंनाम पुराणं तदेकाशीति निगद्यते ॥ सहस्राणि शतं चैकमिति मर्त्येषु पठ्यते । त्रिविक्रमस्य माहात्म्यमधिकृत्य चतुर्मुखः ॥ त्रिवर्गमभ्यधात्तच्च वामनम्परिकीर्तितम् । पुराणन्दशसाहस्रं कूर्मकल्पानुगं शिवम् । यत्र धर्मार्थकामानां मोक्षस्य च रसातले । माहात्म्यङ्कथयामास कूर्मरूपी जनार्दनः । इन्द्रद्युम्नप्रसङ्गेन ऋषीणां शक्रसन्निधौ ॥ सप्तदशसहस्राणि लक्ष्मीकल्पानुषङ्गिकं ॥ श्रुतीनां यत्र कल्पादौ प्रवृत्त्यर्थं जनार्दनः । मत्स्यरूपी च मनवे नरसिंहोपवर्णनं ॥ अधिकृत्याब्रवीत्स प्तकल्पवृत्तं मुनिव्रतम् ॥ तन्मात्स्यमिति जानीध्वं सहस्राणि चतुर्दश ॥ यदा च गारुडे कल्पे विश्वाण्डङ्गरुडोद्भवं ॥ अधिकृत्याब्रवीत्कृष्णो गारुडन्तदिहोच्यते । तदष्टादश चैकन्तु सहस्राणीह पठ्यते । ब्रह्माब्रह्माण्डमाहात्म्यमधिकृत्याब्रवीत्पुनः । तच्च द्वादशसाहस्रम्पुराणं द्विशताधिकम् । भविष्याणाञ्च कल्पानां श्रूयते यत्र विस्तरः ॥ तद्ब्रह्माण्डपुराणन्तु ब्रह्मणा समुदाहृतम्" इति । एतेषान्त्रिशेषलक्षणान्यपि तत्र २ सन्ति ॥ यथा पाद्मे पाद्मस्य । "स्थिताय भवभीताय ब्रह्मणे नाभिपङ्कजे ॥ प्रोक्तम्भगवता मुख्यं पाद्मं पञ्चोनषष्टि च । भूपातालोत्तराः खण्डाः पुराणेऽस्मिन् त्रयः स्मृताः" यथाच श्रीभागवतलक्षणं स्कान्दे "ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसंयुतः । हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा ॥ गायत्र्या च समारम्भस्तद्वै भागवतं विदुः " इति । पाद्मे चोत्तरखण्डे "इदम्भगवता प्रोक्तश्चतुःश्लोक्यां स्वयम्भुवे। नारदाय स वै मह्यमवोन्मुनये ह्यहं । शुकाय ब्रह्मराताय स तु राज्ञेऽभिमन्यवे ॥ शुकोक्तं विष्णुराताय सदसि ब्रह्मवादिनां ॥ श्रीमद्भागवतं नाम शुनघान्तमसः परम्" इति ॥ एतदेव लक्षणं वाराहेऽपि परीक्षितः शापकथनप्रसङ्गे श्लोकान्तरेणास्ति । यथाच कूर्मलक्षणं कौर्मे "इदन्तु पंचदशमम्पुराणं कौर्ममुत्तमम् ॥ चतुर्धा संस्थितम्पुण्यं संहितानाम्प्रभेदतः । ब्राह्मी भागवती सौरी वैष्णवी च प्रकीर्त्तिताः॥ चतस्रः संहिताः पुण्या" इति ॥ यथाच पाद्मे ब्रह्माण्डपुराणलक्षणम् ॥ " ब्रह्माण्डं मोक्षधर्माख्यम् " इति ॥ यथाच कौर्मे। " वायवीयमनन्तरम् ॥ अष्टादशममुद्दिष्टम्ब्रह्माण्डमिति संज्ञितम्" इति। यथाच ब्रह्मवैवर्त्ते ब्रह्मप्रकृतिगणपतिश्रीकृष्णजन्माख्यखण्डचतुष्कविशिष्टत्वमुक्तं स्वस्य । एवम-

न्यत्रापि ज्ञेयम् ॥ आदित्यपुराणे तु । " ब्राह्मम्पुराणन्तत्राद्यं संहिताभ्यां विभूषितम् । काश्मीरसंहिता यस्याः पुरुषोत्तमसंहिता । श्लोकानान्दशसाहस्रं नानापुण्यकथायुतम् " इति लक्षणम्ब्राह्मस्योक्तम् । एवं "ततो भागवतम्प्रोक्तम्भागद्वयविभूषितम्" इति ॥ एवं "चतुर्भिः पर्वभिःप्रोक्तम्भविष्यन्तदनन्तरम्" इति॥ एवम्भागद्वयेन लैङ्गञ्चेति ॥ "संयुक्तमष्टभिः खण्डैः स्कान्दं चैव सविस्तरम्" इति । कौर्मम्भागद्वयविराजितमिति । "भागद्वयेन कथितम्ब्रह्माण्डमितिसंज्ञितम्" इति । गणनाक्रमस्तु सर्वत्रैक एव । उपपुराणानि च सलक्षणानि मात्स्य एव कानिचिद्वर्णितानि । तथाहि । पाद्मे पुराणे यत्प्रोक्तं नरसिंहोपवर्णनं ॥ तच्चाष्टादशसाहस्रं नारसिंहमिहोच्यते । नन्दाया यत्र माहात्म्यं कार्तिकेयेन वर्ण्यते ॥ नन्दा पुराणन्तत्प्रोक्तं संख्यानामिति कथ्यते । यत्र सांबं पुरस्कृत्य भविष्येपि कथानकम् । प्रोच्यते तत्पुनर्लोके सांबमेतन्मुनिव्रताः । एवमादित्यसंज्ञञ्च तत्रैव परिपठ्यते ॥ अष्टादशभ्यस्तु पृथक् पुराणं यत्र दृश्यते ॥ विजानीध्वं मुनिश्रेष्ठास्तदेतेभ्यो विनिर्गतम् " इति ॥ एवमेव स्कान्दप्रभासखण्डेपि । आदित्यपुराणे त्वादित्यस्य लक्षणमप्युक्तम् ॥ "यदुक्तम्भानुना पूर्वम्पुत्राय मनवे द्विजाः । तदहं सम्प्रवक्ष्यामि शृणुध्वङ्गदतो मम ॥ इदम्ब्रह्मपुराणस्य खिलं सौरमनुत्तमम् । संहिताद्वयसंयुक्तम्पुण्यं शिवकथायुतम् । आद्या सनत्कुमारोक्ता द्वितीया सूर्यभाषिता" इति॥ सर्वेषामुपपुराणानाङ्गणना तु कौर्मे प्रथमाध्याये' आद्यं सनत्कुमारोक्तं नारसिंहं ततःपरं ॥ तृतीयं नांदमुद्दिष्टं कुमारेण तु भाषितम् ॥ चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्॥ दुर्वाससोक्तमाश्चर्यं नारदीयमतःपरम् ॥ कापिलम्मानवञ्चैव तथैवोशनसेरितम् । ब्रह्माण्डं वारुणञ्चाथ कालिकाह्वयमेवच । माहेश्वरन्तथा सांबं सौरं सर्वार्थसञ्चयम् । पराशरोक्तमपरं मारीचं भार्गवाह्वयम् " इति ॥ सूतसंहितायान्तु नान्दस्थाने स्कान्दमुक्त्वाग्रे तल्लक्षणमुक्तम् "लक्षन्तु ग्रन्थसंख्याभिःसर्वविज्ञानसागरम् । स्कान्दमद्याभिवक्ष्यामि पुराणं श्रुतिसम्मितम् । षड्विधैः संहिताभेदैः पञ्चाशत्खण्डमण्डितं॥ आद्या सनत्कुमारोक्ता द्वितीया सूतसंहिता । तृतीया शाङ्करी विप्राश्चतुर्थी वैष्णवी मता । तत्परा संहिता ब्राह्मी सौरान्या संहिता मता" इति । एवं "ततः कालीपुराणाख्यं वासिष्ठं मुनिपुङ्गवाः । ततो वासिष्ठलिङ्गाख्यम्" इति लक्षणमिवोक्तम् ॥ क्रमस्तु कौर्मोक्तरीतिक एव । कालिका पुराणे तु क्रमो नामानि च भिन्नान्येव । तथाहि । शैवं यद्वायुना प्रोक्तं वैरंचं वैष्णवन्तथा । यदिदङ्कालिकाख्यञ्च मूलं भागवतं स्मृतं ॥ सौरञ्च नारदीयञ्च मार्कण्डेयं च वन्हिजम् ॥ भविष्यं ब्रह्मवैवर्तं लैंगञ्चैव त्रयोदशम् ॥ वामनं कौर्मं मात्स्यञ्च सप्तदशं च गारुडम् । स्कान्दमष्टादशम्प्रोक्तम्पुराणञ्च न संशयः" इति ।

भविष्यं च सौरपुराणे चतुःपर्वमुक्तं। "चतुर्भिः पर्वभिः प्रोक्तं भविष्यं तदनंतरम्" इति॥भविष्ये तु"पर्वाणि चात्रयंचैव कीर्तितानि स्वयम्भुवा"इत्युक्त्वा ब्राह्मं वैष्णवं शैवन्त्वाष्टम्प्रतिसर्गाख्यञ्चेति तेषां नामान्युक्तानि । यद्यपि तत्रोपपुराणत्वमेषां कंठतो नोक्तं तथापि पुराणान्तरे उपपुराणत्वेन गतिणयोः कालिकासौरयोर्निवेशात्क्रमभेदाच्च ज्ञेयम् । अन्यथा सर्वत्र प्रसिद्धं क्रमं न जह्यात् । नचान्यत्रोपपुराणेषु गणितानां शैवादीनां दर्शनादेतयोः पुराणत्वं शंक्यम् । अप्रयोजकत्वात् । स्कान्दनारदीयब्रह्माण्डेषु नाममात्रसाम्यस्य पुराणान्तरसंमतत्वादन्येषां पुष्कराशिवरहस्यविष्णुरहस्यविष्णुधर्मादीनान्दर्शनादेतेष्वप्युपपुराणत्वस्य शक्यवचनत्वात्। अतएव भविष्यपुराणीयप्रथमाध्यायान्ते"सर्वाण्येव पुराणानि संख्यया भरतर्षभ॥ द्वादशैव सहस्राणि प्रोक्तानीह महर्षिभिः ॥ पुनर्वृद्धिङ्गतानीह चाख्यानैर्बहुभिर्नृप ॥ यथा स्कान्दन्तथा चैव भविष्यं कुरुनन्दन ॥ स्कांदं शतसहस्रन्तु श्लोकानां ज्ञातमेव हि ॥ भविष्यमेतदृषिणा लक्षार्द्धं संख्यया स्मृतम्" इति॥ सन्दर्भे महर्षिप्रोक्तत्वसंख्याविशेषाभ्यामुपपुराणत्वमेव स्कान्दभविष्ययोरुद्घाटितं । एवं सति "सर्गोस्याथ विसर्गश्च वृत्तीरक्षान्तराणि च ॥ वंशो वंश्यानुचरितं संस्थाहेतुरपाश्रयः। दशभिर्लक्षणैर्युक्तम्पुराणन्तद्विदो विदुः । केचित्पञ्चविधं प्राहुर्महदल्प व्यवस्थया" इत्युक्त्वाग्रे सर्गादीनान्दशानां लक्षणानि चोक्त्वा "एवं लक्षणलक्ष्याणि पुराणानि पुराविदः। मुनयोऽष्टादश प्राहुःक्षुल्लकानि महान्ति च" इति । द्वादशस्कन्धीयसप्तमाध्यायवाक्याद्यत्र पंचलक्षणत्वन्तत्र महापुराणनामसाम्येपि न महापुराणत्वं किन्तु पुराणत्वमेव । अतएवादित्यपुराणे उक्तमेतच्चतुर्लक्षणम् । एतच्चोपपुराणे"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च। वंशानुचरितं चैव पुराणम्पंचलक्षणं ॥ ब्रह्मादीनाम्पुराणानामुक्तमेतत्तु लक्षणम् । एतच्चोपपुराणानां खिलत्वाल्लक्षणं स्मृतम्" इति पंचलक्षणत्वमेवोक्तम् । "अष्टादशपुराणानि श्रुत्वा सत्यवतीसुतात् । अन्यान्युपपुराणानि मुनिभिः कीर्त्तितानितु" इति सूतसंहितावाक्याच्च। अत्र मात्स्यादौ लक्षितेषु पुराणेषु ब्राह्मणस्य लक्षणम्प्रसिद्धं ब्राह्मे न दृश्यते। तेन तदुपपुराणम्। वैष्णवे संख्या न मिलति । एवमन्यत्रापि काशीमाहात्म्यादियुक्तं ब्रह्मवैवर्तमन्यदेव उक्तलक्षणाभावात् । महापुराणलक्षणन्तु श्रीभागवत एव दृश्यते नेतरत्र तेन तेषु पुराणत्वमेव बोध्यमिति प्रसङ्गादुक्तम् ॥ प्रकृतमनुसरामः॥तथाच व्यासेन समसनाव्यासकर्तृत्वम्पुराणेषूच्यते विभागाच्चाष्टादशत्वादिकन्तेन यथा वेदशाखानां काठकादिसमाख्या तथात्र ब्राह्मादिसमाख्या यथा तत्र शाखानां सहस्रत्वमेवमत्राष्टादशत्वम् । तथाच पूर्णो वेदातिदेशोत्र सिद्ध इति पञ्चार्थकथनमिह युक्तमिति भावः ॥ ५० ॥ तत्रेत्यादि ॥ ॥ तत्र वेदे

यज्ञस्य भगवत्त्वं "यज्ञो वै विष्णुः" इति श्रुत्या सिद्धमिति शास्त्रानां तद्रूपप्रतिपादकत्वे सन्देहो न प्रकृते कथमित्याशंक्य पुराणे धर्मादिपञ्चार्थप्रतिपादकत्वेन भगवद्रूपप्रतिपादकत्वाभावात्कथं शास्त्रविभागवत्पुराणविभाग इत्याशंक्य पुराणविभागप्रकारमर्द्धेनाहेत्यर्थः ॥ ब्रह्मण एकस्मिन्नित्यादि॥ ॥ तदुक्तं मात्स्ये कल्पानुकीर्त्तने उपांत्याध्याये। "प्रथमःश्वेतकल्पस्तु द्वितीयो नीललोहितः। वामदेव स्तृतीयस्तु ततो रथ्यन्तरोऽपरः। रौरवः पञ्चमः प्रोक्तः षष्ठः प्राण इति स्मृतः। सप्तमोथ बृहत्कल्पःकन्दर्पोष्टम उच्यते। सद्योथ नवमः प्रोक्त ईशानो दशमःस्मृतः॥ व्यान एकादशः प्रोक्तस्तथा सारस्वतोपरः॥त्रयोदश उदानस्तु गारुडोथ चतुर्दशः। कौर्मः पञ्चदशः प्रोक्तः पौर्णमासी प्रजापतेः॥षोडशो नारसिंहस्तु समानस्तु ततोपरः॥आग्नेयोष्टादशः प्रोक्तः सोमकल्पस्तथा परः॥मानवो विंशमः प्रोक्त उदान इति चापरः। वैकुंठश्चापरस्तद्वल्लक्ष्मीकल्पस्तथा परः॥ चतुर्विंशतिमः प्रोक्तः सावित्रीकल्पसंज्ञकः। पञ्चविंशतिमो घोरो वाराहस्तु ततः परः॥ सप्तविंशोथ वैराजो गौरीकल्पस्तथा परः॥माहेश्वरस्ततः प्रोक्तस्त्रिपुरं यत्र घातितम्। पितृकल्पस्तस्यैवान्यो या कुहूर्ब्रह्मणः स्मृता। इत्येवं ब्रह्मणो मासः सर्वपातकनाशनः॥आदावेवान्हिमाहात्म्यं यस्मिन्यस्य विधीयते। तस्य कल्पशतं नाम विहितं ब्रह्मणा पुरा" इति॥ तथाच यदा ब्राह्मकल्पोक्तरीतिकैव सृष्टिः किंचित्किंचिद्वैलक्षण्येन भवति। अवान्तरेषु कल्पेषु ब्रह्मणः सत्यलोके शयने भूरादीनाञ्च त्रयाणामेव नाशस्मरणात्। एवं वर्षदिनपर्यन्तम्भवने ब्रह्माण्डस्य कालेन शीर्णतायां ब्रह्माण्डं सर्वमात्मसात्कृत्य जले आवरणात्मके स्वपिति ततः प्रबुद्धःस्वजन्मदिवसत्वान्नवं ब्रह्माण्डं प्रकारान्तरेणोत्पादयति तदा तत्रत्या सृष्टिः पूर्वस्माद्विलक्षणा भवति। सापि पूर्ववद्वर्षदिनपर्यन्तम्भवति। यथा पाद्मः कल्पः तत्रैवैकस्मिन्वर्षे पूर्वोक्ताः श्वेतादयस्तिथिरूपत्वाद्वादशवारम्परिवर्तन्ते॥ अतएव पुराणेषु पृथिव्याः क्वचिज्जघनरूपत्वं क्वचिदन्नरूपत्वं क्वचित्पृथग्रूपत्वम्। एवं लोकेष्वपि वैलक्षण्यमतः कल्पभेदेन तत्सर्वं संगतम्भवति। इदं तृतीयस्कन्धसुबोधिन्यामुपपादितं तन्निबन्धे च श्रीमदाचार्यैः॥ दैनन्दिनास्तूक्ता एव ॥ दिनमध्येपीति ॥ ॥ यथा पुराणान्तरे क्वापि मयूरकल्पः। यथाच वाराहपुराणे मेघवाहनकल्प उक्तः प्रागितिहासे रुद्रगीतासु। यत्राह भगवान् "त्वंच रुद्र महाबाहो मोहशास्त्राणि कारय॥ अतथ्यानि वितथ्यानि दर्शयस्व महाभुज" इति रुद्रमाज्ञप्तवान्। रुद्रश्च तन्निर्वाहाय मां वहेति प्रार्थितवान् तदा भगवान्मेघो भूत्वा कल्पमेकं रुद्रमवहत्स मेघवाहनकल्पः। तस्य तिथिरूपेष्वगणनात्तस्मिन् ब्रह्माण्डकरणानुक्तेश्च न जन्मदिवसरूपत्वम्। वराहपुराणलक्षणे महावाराहकल्पाश्रितत्वकथनात्। एवं सति तस्य दिनमाध्य

मिकत्वमायाति । एवमन्यत्रापि बोध्यम् । दिनमध्य इति मन्वन्तरसमाप्तौ युगान्त इति चतुर्युगान्ते ॥ ॥ तत्र सर्वत्रेत्यादि ॥ ॥ जन्मदिनं दैनन्दिनदिनमध्यगत-युगान्तभेदभिन्नेषु कल्पेषु भुवनात्मको वृक्ष ऊर्ध्वमूलमित्यादिनोक्तो भगवान् "येन यत्र यतो यस्य यस्मै यद्यथा यदा । स्यादिदं भगवान् साक्षात्प्रधानपुरुषेश्वरः" इत्यादिवाक्यैर्ब्रह्मवादे भगवद्रूपो नाना क्वचित्सर्वथा वैलक्षण्येन क्वचिदीषद्वैलक्षण्ये-न नाना भवति ॥ ॥ अतस्तत्प्रकारेत्यादीति ॥ ॥ न पुराणविभागानुपपत्तिरित्य-र्थः ॥ ॥ अवान्तरेत्यादि ॥ ॥ प्रकारभेदबोधनायेतिशेषः । तथाच "सात्विकेषु तु कल्पेषु माहात्म्यमधिकं हरेः ॥ राजसेषु तु माहात्म्यमधिकं ब्रह्मणो विदुः । तद्वदग्नेश्च माहात्म्यन्तामसेषु शिवस्य च ॥ सङ्कीर्णेषु सरस्वत्याः पितृणाञ्च नि-गद्यते" इति मात्स्ये संख्यानुक्रमणिकाध्याये ॥ तथा तत्रैव कल्पानुकीर्तनाध्याये श्वेतादींस्त्रिंशत्कल्पानुक्त्वा "संकीर्णास्तामसाश्चैव राजसाः सात्विकास्तथा ॥ रज-स्तमोमयास्तद्वत्त्रयस्त्रय उदाहृताः । सङ्कीर्णेषु सरस्वत्याः पितॄणां व्युष्टिरुच्यते । अग्नेः शिवस्य माहात्म्यन्तामसेषूपवर्ण्यते । सात्विकेष्वधिकन्तद्वद्विष्णोर्माहात्म्यमु-च्यते। तत्रैव योगसंसिद्धा गमिष्यंति पराङ्गतिम्" इति चोक्तवानितरभेदान्वक्तुमि-त्यर्थः ॥ ५१ ॥

व्रजभाषाटीका ।

किञ्च सृष्टिमें जितने पदार्थ हैं उनको यथार्थ स्वरूप पुराणसों-ही जाननों ऐसें वेदमें लिखी है। "प्रह्लादो ह वै कायाधवः" ॥ प्रल्हाद हैं सो कयाधुको पुत्र है इतनोंमात्र वेदमें लिख्योहै तहां कयाधुनामवाली हिरण्यकशिपुकी स्त्री है वाकें प्रल्हादजी पुत्र हैं इत्यादि यथार्थस्वरूप पुराणसोंही जानोजावेंहै ॥ जैसें सम्पूर्ण वेद-को अध्ययन नहिं होतो देख्यो तब व्यासजीनें वेदके विभाग कर-कें ऋषिनकूं वेद पढायो. जिन जिन ऋषिननें जितनों वेद प-ढ्यो वो वेदभाग शाखानामसों प्रसिद्ध भयो। ऐसेंही एकपुराणके विभाग करकें अष्टादशपुराण उपपुराण रचें हैं॥ मत्स्यपुराणमें म-त्स्यभगवान् आज्ञाकरें हैं "कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो द्वि-जाः॥ व्यासरूपमहं कृत्वा संहरामि युगे। युगेचतुर्लक्षप्रमाणेन द्वापरे

द्वापरे सदा ॥ तदष्टादशधा कृत्वा भूर्लोकेऽस्मिन्प्रभाष्यते " मत्स्यावतार कहें है जब मनुष्यकी (शतकोटि) सौक्रोडपुराण पढवेकी सामर्थ्य नहिंरही तब मैं व्यासजीको रूप धारणकरकें पुराणको संहार करूंहूँ। जब द्वापर आवें तब चारलाखग्रंथमें अष्टादशपुराण बनाऊँहूँ॥ आगें मत्स्यपुराणमें लिखीहै अभीभीदेवलोकमें सोक्रोड पुराण है वा पुराणको संक्षेपकरके अर्थ इन अष्टादशपुराणनमें है। ब्रह्माजीनें मरीचिऋषिके प्रति जो पुराण दशहजार श्लोकसंख्यावालो कह्योहै वह ब्राह्मपुराण है १॥ जब भगवान्की नाभीमेंसों कमल प्रकटभयो वाके वृतान्त जामें लिखेहैं वह पाद्मपुराण है २ वाके पचपनहजार श्लोक हैं॥ वाराहकल्पके जामें वृतान्त हैं,जामें सबधर्मनको वर्णन है वह वैष्णवपुराण ३ है २३००० श्लोकसंख्यावालो है॥ श्वेतकल्पको प्रसङ्गकरकें वायुभगवान्नें जामें धर्म कहे हैं रुद्रको माहात्म्य लिख्यो है वो वायुपुराण ४ है २४००० श्लोकसंख्यावालो है॥ जहां गायत्रीको अधिकारकरकें धर्मको विस्तार लिख्योहै वृत्रासुरको वध जामें है वह १८००० अठारह हजारकी संख्यावालो श्रीभागवतपुराण ५ है॥ वापुराणमें सारस्वतकल्पमें जे मनुष्य देवता हते उनको वृत्तान्त है ॥ जापुराणमें नारदजीनें बृहत्कल्पको आश्रय लेकें धर्मको वर्णन कियो है वह पचीसहजार २५०००श्लोककी संख्यावालो नारदीयपुरराण ६ है॥ जापुराणमें शकुनीनको अधिकार करकें धर्म अधर्म विचार कियोहै जैमिनिऋषिके प्रश्नके ऊपर धर्मचारीपक्षिननें जो वर्णन कियो है वाको विस्तार मार्कंडेयऋषिनें कियोहै वाको नाम मार्कण्डेयपुराण है ७॥ वामें ईशानकल्पको वृत्तान्त है९०००नोहजारश्लोकको पूरहै॥ जामें ईशानकल्पको वृत्तान्त वसिष्ठजीकेप्रति अग्निनें वर्णन कियो वह अग्निपुराण है ८ वह १६ सोलहहजारश्लोककी संख्यावालोहै जामें

अघोरकल्पको वृत्तान्त है ब्रह्माजीनें मनुकेप्रति सूर्यके माहात्म्यको वर्णन कियोहै तथा भूतग्रामको लक्षण वर्णन कियो है ॥ जामें रथन्तरकल्पको वृत्तान्त है तथा जामें आगे होयवेवारे वृत्तान्तको वर्णन है१४५०० जामें चौदह हजार पांचसोश्लोकनको पूरहै वह भविष्य पुराण ९ है ॥ जामें ब्रह्मवराहके चरित्रनको वर्णन है, जामें कृष्ण का माहात्म्य सावर्णिमनुनें नारदजीके अर्थ वर्णनकियो है वह ब्रह्मवैवर्तपुराण १० है वह १८००० अठारहहजार है ॥ ब्रह्मानें पृथ्वीके प्रति वर्णनकियोहै २४००० श्लोकको पूरहै जामें प्रसङ्ग करकें मानवकल्पको वर्णन कियो वह वाराहपुराण १२ है ॥ और जामें ब्रह्माजीने माहेश्वरधर्मको वर्णन कियो वो स्कान्दपुराण १३ है ८०००० अश्शीहजारश्लोकसंख्यावालो है ॥ जापुराणमें अग्निलिङ्गमें स्थितभये शिवजीनें धर्मार्थकाममोक्षको वर्णनकियोहै वह अग्निपुराण है ॥ जामें वामनजीकी महिमाको वर्णन है जामें १०००० दशहजारश्लोक हैं वह वामनपुराण है १४ ॥ जामें कूर्मभगवाननें लक्ष्मीकल्पके अनुसार इन्द्र तथा ऋषिनके समक्ष शिवके प्रति वर्णनकियोहै याको १७०००सप्तदशसहस्रश्लोकको पूर है यह कौर्मपुराण है १५॥ जामें मत्स्यरूपी भगवान्नें मनुकेअर्थ धर्मवर्णन तथा नरसिंहजीको वर्णन कियोहै जाकी चौदहहजार १४००० श्लोककी संख्या है वाको नाम मत्स्यपुराण १६ है ॥ जामें गरुडजीसों ब्रह्माण्डकी उत्पत्ति लिखीहै गरुडकल्पको जामें वर्णन है वह १८००० श्लोककी संख्यावालो गरुडपुराण १७ है ॥ जामें ब्रह्माण्डको माहात्म्य तथा आगें होयवेवारे कल्पनको विस्तारसों ब्रह्माजीने वर्णनकियोहै वह १२०००बारहहजारश्लोकसंख्यावालो ब्रह्माण्डपुराण है १८ ॥ विस्तारसों पुराणनके लक्षण औरपुराणनमें भी लिखे हैं॥ निबन्धस्थ आदिशब्दकरके उपपुराणसंहितानकोभी

ग्रहणहै ॥ कूर्मपुराणमें उपपुराणनकी गणना करी है, सनत्कुमारसंहिता नान्दीपुराण शिवधर्मपुराण कपिलपुराण वारुणपुराण सांबपुराण कालिकापुराण आदित्यपुराण पाराशरपुराण मारीचपुराण इत्यादि सर्ग विसर्ग स्थान पोषण ऊती मन्वन्तरवर्णन ईशानुकथा निरोध मुक्ति आश्रय ये दशलक्षणवालो होय तासों पुराण कहनों ॥ सर्ग प्रतिसर्ग वंश मन्वन्तर वंशानुचरित ये जामें पांचलक्षण होय ताकों उपपुराण कहनों "अष्टादशपुराणानि श्रुत्वा सत्यवतीसुतात् ॥ अन्यान्युपपुराणानि मुनिभिः कीर्तितानि तु" अर्थ—सूतसंहितामें लिखीहै व्यासजीके मुखसों अष्टादशपुराण सुनके मुनिननें और उपपुराणनकूं प्रकटकिये हैं ॥ तथा मत्स्यपुराणमें लिखी है अष्टादशपुराणनसों न्यारो पुराण दीखे तो वाकूं इनपुराणसोंही निकस्यो समुझनों ॥ ५० ॥ जैसें वहाँ वेद यज्ञरूपी भागवान्को वर्णनकरें हैं तैसें पुराण है सो भुवनात्मक भगवान्को वर्णन करें हैं, वहाँ जैसें अग्निहोत्र दर्शपूर्णमासादिभेदकरकें यज्ञभगवान् अनेकरूप हैं और काठककौथुमी आदि शाखाभेदनकरकें वर्णनकियेजावें है ऐसेंही भुवनरूप भगवान् ब्राह्मपाद्मवाराहादिकल्पभेदनकरकें अनेक रूप हैं और ब्राह्मपुराणमत्स्यपुराणादि अष्टादशपुराणकरकें वर्णनकियेजाँयहैं, तहाँ विश्वात्मक भगवान्की अनेकरूपताको वर्णनकरतहैं ॥ ब्रह्माजीके एकवर्षमें एक मुख्यकल्प पूरो होय उनकल्पनको ब्रह्मकल्प पद्मकल्प आदि नाम हैं ॥ एकवर्षके तीनसोसाठदिनके तीनसोसाठ दैनंदिन कल्प होयहैं, ब्रह्माजीके महीनाके ३० कल्प होयहैं उनके नाम मत्स्यपुराणमें लिखे हैं ॥ श्वेतकल्प १ नीललोहितकल्प २ वामदेवकल्प ३ रथन्तर ४ रौरव ५ प्राण ६ बृहत्कल्प ७ कन्दर्प ८ सद्य ९ ईशान १० व्यान ११ सारस्वत १२ उदान १३ गारुड

१४ पौर्णमासीके स्थानमें कौर्मकल्प १५ नारसिंह १६ समान १७ आग्नेय १८ सोनकल्प १९ मानवकल्प २० उदानकल्प २१ वैकुंठ २२ लक्ष्मीकल्प २३ सावित्रीकल्प २४ घोरकल्प २५ वाराहकल्प २६ वैराजकल्प २७ गौरीकल्प २८ माहेश्वरकल्प २९ पितृकल्प ३० यह पितृकल्प अमावास्याके स्थानमें है.इन तीस कल्पनको ब्रह्माजीको एकमहीना होतहै ।। जैसें वेही तिथी दूसरेमहिनेमें आवे है ऐसें यही तीसकल्प बारहमहीनानमें बारहवार फिर फिर आतेरहें हैं ।। ब्रह्माजीके प्रतिदिनके कल्पके अन्तरमें सबलोकनको नाश नहिंहोयहै किन्तु भूलोक भुवर्लोक स्वर्लोक इन तीनलोकनकोही नाश होयहै तासों प्रतिदिनके कल्पनके साथ तो तीनलोकनकी रचना बदलती रहे है, क्योंकी ब्रह्माजी सत्यलोकमें शयनकरें हैं तब ये तीनोंलोक बिगडजावें हैं, जब जागें हैं तब फिर इनतीनलोकनकूँ कछु विलक्षणरीतिसों बनायदेतहैं परन्तु प्रतिदिन ब्रह्माण्डभी शीर्णहोतोजावेहै ।। जहाँतक ब्रह्माजीकें वर्षभरको अन्त आवेहै तहाँताँई ब्रह्माण्डभी विखरजावेहै तब वर्षके अन्तकी रात्रिमें ब्रह्माजी सोवें हैं तब ब्रह्माण्डको अपनें स्वरूपमें लय करकें आवरणात्मक जलमें सोवें हैं। जब दूसरोदिन जागें हैं वादिन ब्रह्माजीको जन्मदिन आजावें है वादिन ब्रह्माजी नयो ब्रह्माण्ड पूर्वसों विलक्षण प्रकटकरें हैं,वाहीदिन वर्षदिन रहवेवारे मुख्यकल्पको प्रारम्भ होयहै ।। ब्रह्माजीके वर्षपर्यंत वोही सृष्टि रहे है या प्रकारसों वर्षकी ब्रह्माकी आयुष्य होयहै तामेंसो मुख्यकल्प व्यतीत होजातहै याहीसों पृथिवीको कोई कल्पमें कमलरूप, कोईकल्पमें जवनरूपकर ेे वर्णन पुराणमें कियोहै ।। मयूरकल्प मेघवाहनकल्प प्रभृति कितनेककल्प दैनन्दिनकल्पसोंभी छोटे हैं वे मध्यान्ह

अपराण्हकालके समान ब्रह्माजीके दिनके मध्यमें मन्वन्तरसमाप्ति तथा चारों युगनकी समाप्तिके साथ समाप्त होते चलेजावें हैं ॥ इन सबप्रकारके कल्पनमें नानारूपवाले ब्रह्माण्डात्मक भगवान्‌को वर्णन है, क्योंकि "यत्र येन यतो यस्य यस्मै यद्यद्यथा यदा ॥ स्यादिदं भगवान् साक्षात्प्रधानपुरुषेश्वरः" ॥ इत्यादिवाक्यसों ब्रह्मवादमें भगवान्‌ही अनेकरूप होयजावें हैं यह सिद्धान्त है ॥ ५१ ॥

नानासृष्टिप्रकारा हि नानाधर्मा ह्यनेकधा ॥ सर्वस्वरूपी कृष्णस्तु कर्ता तेषु तथोदितः ॥५२॥ सात्विकेषु तु कल्पेषु तत्प्रकारपुराणतः ॥ आचारान्मुक्तिमाप्नोति भवस्त्वन्येषु केवलः धर्महीनस्तत्सहितो राजसेषु सुखन्ततः ॥५३॥

तत्त्वदीपप्रकाशः ।

तामसकल्पेषु शिवात्सृष्टिः ॥ राजसेषु च ब्रह्मणः ॥ सात्विकेषु विष्णोः ॥ तत्रोच्चनीचत्वमव्यवस्थितमतः समाधानमाह ॥ **सर्वस्वरूपी कृष्ण** इति ॥ ५२ ॥ सर्वत्र मुक्तिरिति पक्षे न कोपि सन्देहः ॥ सात्विकेष्वेव मोक्ष इति पक्षे विशेषमाह ॥ **सात्विकेष्विति** । तत्कल्पानुसारिपुराणोक्तधर्माचरणान्मुक्तिमाप्नोति तादृशोधिकारी न तु पाषण्डादिधर्मैरित्यर्थः ॥ अन्येषु तामसेषु जन्मदुःखञ्च भवति न सुखन्नापि मोक्षः । राजसेषु तु सुखं न दुखन्नापि मोक्षो यथोक्तधर्मकर्तॄणां ॥ ५३ ॥

आवरणभंगः ।

तद्विशदीकुर्वंति ॥ ॥ तामसकल्पेत्यादि ॥ ॥ तत्र तावच्छिवात्सृष्टिः । यथाहि कौर्मे पूर्वभागे चतुर्थाध्याये । "कुतः सर्वमिदञ्जातङ्कस्मिंश्च लयमेष्यति । नियन्ता कश्च सर्वेषां वदस्व पुरषोत्तम ॥ श्रुत्वा नारायणो वाक्यमृषीणां कूर्मरूपधृक् ।

प्राह गम्भीरया वाचा भूतानाम्प्रभवाप्ययौ । कूर्म उवाच । महेश्वरः परोऽव्यक्त-श्चतुर्व्यूहः सनातनः । अनन्तश्चाप्रमेयश्च नियन्ता विश्वतोमुखः"इत्यारभ्य "नि-शान्ते प्रतिबुद्धोसौ जगदादिरनादिमान्॥ सर्वभूतमयोऽव्यक्तादन्तर्यामीश्वरः परः। प्रकृतिम्पुरुषञ्चैव प्रविश्याशु महेश्वरः । क्षोभयामास योगेन परेण परमेश्वरः" इ-त्यादि चोक्त्वा । " प्रधानात् क्षोभ्यमानाच्च तथा पुंसः पुरातनात् । प्रादुरासी-न्महद्बीजम्प्रधानपुरुषात्मकम्"इत्यादिना सृष्टिरुक्ता । ततःपश्चदशाध्यायोत्तरमु-परिभागे दशभिरध्यायैरीश्वरगीतोक्ता शिवमाहात्म्यं परब्रह्मरूपता चोक्ता ॥ एवमन्यत्रापि तामसकल्पेषु ज्ञेयम् । भविष्ये तु ब्रह्मणः सकाशात्सृष्टिः । यथा त-त्रैव "कीर्तितानि स्वयम्भुवा"इत्युपक्रम्य"जगदासीत्पुरा तात तमोभूतमलक्षणं ॥ अविज्ञेयमतर्क्यञ्च प्रसुप्तमिव सर्वतः ॥ ततः स भगवानीशो ह्यव्यक्तो व्यञ्जय-न्निदं ॥ महाभूतादिवृत्तौजाः प्रोत्थितस्तमनाशनः ॥ सर्वभूतमयोऽचिन्त्यः स एव स्वयमुत्थितः । योसौ षड्विंशको लोके तथा यः पुरुषोत्तमः । भास्करश्च म-हाबाहो परं ब्रह्म च कथ्यते" इत्यादि ब्रह्मणः सकाशात्सृष्टिरुक्ता ॥ मार्कण्डेयपु-राणेपि "प्रणिपत्य जगद्योनिमजमाश्रयमव्ययं ॥ चराचरस्य जगतो धातारम्परम-म्पदं॥ ब्रह्माणमादिपुरुषमुत्पत्तिस्थिति संक्षये॥यत्कारणमनौपम्यं यत्र सर्वम्प्रतिष्ठि-तम्"इत्यादिनोपक्रम्य पुरुषाधिष्ठितात्प्रधानान्महदादिसृष्टिरुक्ता ॥ एवमन्येष्वपि ज्ञेयम्। सात्विकेषु तु विष्णुवाराहश्रीभागवतादिषु विष्णोः सकाशात्स्पष्टैव सृष्टिः॥ एवञ्च मात्स्योक्तरीत्या कल्पेषु सात्विकराजसतामससङ्कीर्णत्वकथनादष्टादशपुरा-णेषु द्वयं द्वयं सात्विकसात्विकराजसेत्यादिभेदेनैकैकविधं सन्नवधा भवति तेनैषत्ता-रतम्येप्यदोषः। अतएव हरिवल्लभसुधोदयाख्ये पुराणसमुच्चये पाद्मोत्तरखण्डीयद्वि-चत्वारिंशाध्याये रुद्रोमासम्वादे " मात्स्यं कौर्मं तथा लैङ्गं शैवं स्कान्दन्तथैव च ॥ आग्नेयञ्च षडेतानि तामसानि निबोध मे ॥ वैष्णवं नारदीयञ्च तथा भागवतं शुभम् । गारुडं च तथा पाद्मं वाराहं शुभदर्शनम् । सात्विकानि पुराणानि विज्ञेयानि शुभानि वै ॥ ब्रह्माण्डं ब्रह्मवैवर्तं मार्कण्डेयन्तथैव च॥ भविष्यं वामनं ब्राह्मं राज-सानि निबोध मे ॥ इत्येकैकषट्कस्य सात्विकादिरूपत्वमुक्तन्तदपि न विरुद्ध्यते ॥ प्रकृतमनुसरामः॥ तत्रेत्यादि॥ नानासृष्टिप्रकारेषु नानाधर्मेषु पुराणेषु तत्तत्पुराणे तस्य तस्येश्वररूपताया माहात्म्यस्य च कथनात् । कूर्मपुराणे विष्णुब्रह्मशिवा नुपक्रम्य "अन्योन्यमनुरक्तास्ते ह्यन्योन्यमुपजीविनः ॥ अन्योन्यम्प्रणताश्चैव लील या परमेश्वराः " इति वाक्याच्चोच्चनीचत्वमव्यवस्थितमतोऽनेकेश्वरापातात्तन्नि-वृत्त्यर्थं समाधानमाहेत्यर्थः ॥ ॥ सर्वस्वरूपीत्यादि ॥ ॥ शास्त्रार्थप्रकरणे

ब्रह्मणः सर्वाकारता सर्वकर्तृता चोपपादिता श्रुतिस्मृतिसूत्रानुसारेण ॥ अतस्तद्-रिक्तस्य कर्तुरभावात्सर्वाकारो भगवानेव कर्ता । तेषु पुराणेषु तथा तेन तेन शिवादिरूपेणोदित इत्यर्थः ॥ कृष्णशब्दोऽत्र परब्रह्मवाचकः "कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ॥ तयोरैक्यं परब्रह्म कृष्ण इत्यभिधीयते" इतिश्रुतेः ॥ अत-एव गारुडे "एको नारायणो देवो देवानामीश्वरेश्वरः ॥ परमात्मा परं ब्रह्म जन्माद्यस्य यतोऽभवत् । तत्रैव द्वितीयाध्याये । " सर्वज्ञानान्यहं शंभो ब्रह्मा-त्माहमहं शिवः ॥ अहं ब्रह्मा सर्वलोकाः सर्वदेवमयो ह्यहं" इति ॥ श्रीभागवते च द्वादशे शिववाक्यं " न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते " । तत्रैव दशमेऽक्रूरस्तुतौ " त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणं । बह्वाचार्यविभेदेन भगवन्समुपासते" । कौर्मेपि पूर्वभागे द्वितीयाध्याये " अहं नारायणो देवो पूर्वमासं न मे परं" इत्युक्त्वाग्रे "यस्य प्रसादजो ब्रह्मा रुद्रः क्रोधसमुद्भवः" इत्युक्तम् । " अहश्चैव महादेवो न भिन्नो परमार्थतः" इतिच । भविष्ये ब्रह्माण-मुपक्रम्य "योऽसौ षड्विंशको लोके तथा यः पुरुषोत्तमः।भास्करश्च महाबाहो परं ब्रह्म च कथ्यते" इति । अतस्तत्तन्नाम्ना तत्तद्रूपो भगवानेवोच्यत इति व्यवस्था-भावेऽपि न दोष इतिभावः ॥ एतेनापि पूर्वोक्तं दृढीकृतं ज्ञेयम् । यथा यज्ञस्वरूप-स्य भगवत एकत्वेन शाखाभेदेषु भिन्नरूपतायामपि नवीकृतित्वं तथात्र शिवादिरूपेण भेदेऽपि नाब्रह्मरूपत्वं । यथा च तत्तच्छाखोक्तेषु कौंडपायनश्येनादिषु काम्येषु विकृतित्वन्तथात्र सृष्टिकर्तृशिवादितिरिक्तेष्वेकैकगुणाधिष्ठातृषु तदंशत्वेन विकृतित्वमिति ॥ एवं पुराणप्रतिपाद्यविषयनिश्चायनेन तद्भक्तिस्वरूपमपि नि-श्चायितप्रायं । विकृतितुल्ये गुणमूर्तौ भक्तिःसगुणा तदाकारे कृष्णे तु गुणातीतेति प्रमेयमप्येतेनैवोक्तप्रायम् ॥ अतःपरं द्विविधवाक्यदर्शनात्तदुक्ताचरणफलभूतायां मुक्तौ सन्देहः । वाक्यानि तु पाद्मोत्तरखण्डीयद्विचत्वारिंशे त्रिविधानि शास्त्राणि प्रस्थानानि पुराणानि चोक्त्वा पुराणोक्त्युत्तरमेव " सात्विका मोक्षदाः प्रोक्ता राजसाःस्वर्गदाः शुभाः ॥ तथैव तामसा देवि निरयप्राप्तिहेतवे" इति । सूतसंहितायान्तु तदुक्ताचारान्मुक्तिरुक्ता मुक्तिखण्डे । एवमन्यत्रापि ॥ ५२ ॥ तत्र कथं व्यव-स्थेत्याकांक्षायान्तमपि सन्देहं निराकर्त्तुमाहुः ॥ ॥ सर्वत्रेत्यादि ॥ ॥ सर्वत्र पुराणेषु मुक्तिबोधकवाक्यैर्मुक्तिरिति पक्षे वाक्यान्तरादृष्टेर्विप्रतिपत्त्यनुदयान्न सन्देहः दृष्टे तु पाद्मवाक्ये विप्रतिपत्त्या सन्देहोदयात्तन्निवृत्त्यर्थं विशेषमाह । सा-त्विककल्पस्थजीवादिप्रकर्षमाहेत्यर्थः ॥ तथाज्ञानादेव सा शङ्का वक्ष्यमाणरी-त्या निरस्यत इति भावः ॥ उत्कर्षस्य प्रतियोगिसापेक्षत्वात्तान्विशदीकुर्वन्ति ॥ अन्येष्वित्यादि ॥ ॥ तामसेषु जन्म दुःखश्चेत्यत्र हेतुमूले उक्तो धर्महीनपदेन ।

तथाच तेषु धर्माभावात्तथेत्यर्थः ॥ एवं राजसेषु सुखमित्यत्रापि धर्मसाहित्यं हेतुर्मूले उक्तस्तत्सहितपदेन । अतो नात्रापि सन्देह इति भावः ॥ ५३ ॥

व्रजभाषाटीका ।

और अनेक रूप होयवेकेलिये अनेककल्प श्रीकृष्णचन्द्रनें प्रकटकिये हैं । तहां तामसकल्पमें शिवसों सृष्टि है, राजसकल्पमें ब्रह्मासों, सात्विकल्पमें विष्णुसों सृष्टिहोवे है ॥ गुणनकरके मिश्रितकल्पनमें सरस्वती पितृगण आदि सृष्टि करें हैं, याहीमों पद्मपुराणके उत्तरखण्डमें मात्स्य १ कौर्म २ लैङ्ग ३ शैव ४ स्कान्द ५ आग्नेय ६ इन पुराणनकूँ तामस कहे हैं ॥ वैष्णव १ नारद २ भागवत ३ गरुड ४ पाद्म ५ वाराह ५ इन छः पुराणनकूं सात्विक गिने हैं ॥ ब्रह्माण्ड १ ब्रह्मवैवर्त २ मार्कण्डेय ३ भविष्य ४ वामन ५ ब्रह्म ६ ये छः पुराण राजस हैं ॥ जिन जिन पुराणनमें जिन जिन देवतानसों सृष्टिकी उत्पत्ति लिखीहै उन पुराणनमें उनउन देवतानकोंही अधिक माहात्म्य तथा ईश्वरता लिखी है, उनउन देवताको रूप श्रीकृष्णही धारणकरें हैं ॥ कूर्मपुराणमें लिखीहै "अन्योन्यमनुरक्तास्ते ह्यन्योन्यमुपजीविनः । अन्योन्यं प्रणताश्चैव लीलया परमेश्वराः ॥" अर्थ—ब्रह्मा विष्णु शिवादिक देवता परस्पर अनुरागवाले हैं, परस्पर एककूं एक बडो समझके प्रणाम करतेरहते हैं, लीलाकरके परस्पर एकदेवता एकको आश्रयकरलेत हैं, ये परमेश्वर हैं इत्यादि अनेक शास्त्र देखवेसों अमुकदेवता बडो है अमुकदेवता छोटो है यह निश्चय नहिंहोय है । जो सबहिनकूं ईश्वर मानलें तो अनेक ईश्वर होंयगे तहां समाधान करें हैं ॥ सर्वस्वरूपीति ॥ शास्त्रार्थप्रकरणमें यह निश्चय करआयेहैं ब्रह्मही अनेक आकारवालो तथा सबको कर्त्ता है और कोई कर्त्ता नहिं

होयसकेंहैं तासों ब्रह्महीं पुराणनमें शिवब्रह्मादिरूपसों वर्णन कियो है, वह परब्रह्म सदानन्दरूप है तासों कृष्णशब्दवाच्य है तामें "परं ब्रह्म कृष्ण इत्यभिधीयते" इत्यादि श्रुति प्रमाण हैं ॥ श्रीभागवतमेंभी कृष्णके प्रति अक्रूरकी स्तुति है ॥ "त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम् ॥ बह्वाचार्यविभेदेन भगवन्समुपासते" ॥ हे कृष्ण शिवादिरूपकरकें अनेकमार्गद्वारा आपकीही सबउपासना करें हैं तासों सर्वरूप श्रीकृष्णही उनपुराणनमें सृष्टिकर्त्ता शिव ब्रह्मादि रूपनसों वर्णनकिये हैं ॥ ५२ ॥ सबजीवनकी सबपुराणनके बतायेभये मोक्षके साधनसों मोक्ष होजावेंहै ऐसे पक्षमें तो सन्देह प्राप्तही नहींहोय परन्तु पद्मपुराणादिकके वचन देखवेसों तो सात्विकजीवनकीही सात्विककल्पानुसारिपुराणोक्तधर्मके आचरण करवेसों मुक्ति होय है वैसे अधिकारीकी पाषंडादिधर्मसों मुक्ति नहिंहोयहै, अधर्मकर्ता जीवनको तामसकल्पनमें जन्म होय और दुःख प्राप्त होय सुख तथा मोक्ष नहिंहोय। धर्मसहित जीवनको राजसकल्पमें जन्म होय न दुःख होवे न मोक्ष होवे किन्तु सुखकी प्राप्ति होय ऐसें सात्विकजीवनकी सात्विकपुराणोक्तधर्माचरणसों निर्गुणावस्था होयकरकें मोक्ष होवें है ॥५३॥

अपेक्षितन्तु सर्वत्र सर्वोक्तं गृह्यते क्वचित ॥
इदानीं त्रिविधा जीवास्तेन त्रितयमीर्यते॥५४॥
प्रवृत्त्यर्थन्तु सर्वत्र मुक्तिः फलमुदीर्यते ॥ तदवस्थापरित्यागाद्वचनं सत्यमेव हि ॥ ५५ ॥

तत्त्वदीपप्रकाशः ।

सर्वेषु कल्पेषु कल्पान्तरोक्ता धर्माः पुरुषार्था वा परिग्राह्याः ॥ यदि तत्कल्पानुसारिणो जीवा भविष्यन्ति यथा तीर्थे नाना-

देशवासिनाम् ॥ तदाह ॥ अपेक्षितमिति ॥ प्रकृते त्रिविधान्यपि पुराणानि सन्तीत्याह ॥ इदानीमिति ॥ राजसादीनाम्प्रकारान्तरेण पुराणं न हृदयारूढम्भवति ॥ अतस्तेषां केवललौकिकत्वे कल्पान्तरे तेषान्तामसत्वाद्राजसोच्छेदः स्यात् ॥ राजसधर्मानुष्ठाने चोत्तरत्र सात्विकत्वं सम्पद्यते ॥ तथा तामसेष्वपि ज्ञातव्यम् । अतितामसत्वनिवृत्त्यर्थमुत्कर्षार्थञ्च तामसानि पुराणानीत्यर्थः ॥ ५४ ॥ ननु तत्तत्पुराणेषु तत्तदाचारान्मुक्तिरेव निरूप्यते किमुत्कर्षेण सात्विका एव मुच्यन्त इति तु सात्विककल्पव्यवस्था यथा राज्ञान्तत्तदवसरे तेषामनुग्रहनिग्रहौ । अत इदानीं त्रिविधानां मुक्त्यर्थमेव कथनं त्रिविधानि पुराणानीत्याशंक्याह ॥ प्रवृत्त्यर्थमिति ॥ मुक्तिः सर्वेषामभिलषिता ॥ अतस्तदर्थमेव सर्वोऽपि प्रवर्तते न संसारार्थमिति सर्वेषां प्रवृत्तिसिद्ध्यर्थं बालानुशासनन्यायेन मुक्तिः फलमुदीर्यते नतु राजसकर्मणा मुक्तिर्भवति ॥ "मध्ये तिष्ठन्ति राजसाः" इति भगवद्वाक्यात् ॥ परमानन्दलक्षणस्य मोक्षस्य वैजात्याभावात् ॥ सात्विकानां नैर्गुण्यं तेन च मोक्षः ॥ तत्र साधनता सर्वथा भगवत्सम्बन्धेनैवावच्छिद्यते नतु ज्ञानित्वेन भक्तत्वेन वा ॥ " मामेव ये प्रपद्यन्ते " इतिवाक्यात् ॥ " तमेव विदित्वातिमृत्युमेति " इत्यादिपरम्परयेति ज्ञातव्यम् ॥ सर्वथा सम्बन्धे पुनर्बहूनि कारणानि तत्रावान्तरजातिभेदेऽपि न काचित् क्षति दण्डवत् ॥ अतः स एव परमपुरुषार्थः ॥ तत्साधनेष्वपि मोक्षपदप्रयोगो यथा लोके ॥ नहि तादृशीमवस्थामापन्नो मुच्यते ॥ अतस्तदवस्था परित्यागो वक्तव्य एव ॥ अतो मुक्तिप्रतिपादकं वाक्यं सत्यमेवेत्याह ॥ तदवस्थेति ॥ ५५ ॥

आवरणभंगः ।

॥ सर्वेष्वित्यादि ॥ ॥ सर्वेषु केवलेषु सङ्कीर्णेषु च कल्पेषु कल्पान्तरोक्तास्तदितर कल्पोक्ताःसाधनपुरुषार्थादयःपरिग्राह्याः।यथा तीर्थे नानादेशनिवासिनान्तत्तद्देश-

निवासिनो हि तीर्थ आगता अपि तीर्थस्नानादिकं कुर्वन्तोऽपि स्वस्वदेशकुलवर्णाश्रम सम्प्रदायमनुसृत्यैव कुर्वन्ति नतु तदतिक्रमेण तथा सङ्कीर्णासङ्कीर्णेषु कल्पेष्वपि तादृशा जीवास्तथैव प्रवर्तन्त इति तत्सत्वे ते ग्राह्या इत्यर्थः ॥ मूले अपेक्षितं अधिकारिविशेषणीभूतं श्रद्धादिकं सर्वपुराणेषु सर्वपुराणोक्तं क्वचित् अङ्गादौ गृह्यत इत्यर्थः॥ प्रकृतइत्यादि ॥ ॥ योयं श्वेतवाराहाख्यः कल्पस्तमधिकृत्य शिवादिभ्यः सृष्टयकथनादयं सङ्कीर्ण इति भाति तत्र त्रिविधा अपि जीवाः सन्तीति तद्बीजकथनपूर्वकन्त्रिविधपुराणसत्तामाहेत्यर्थः ॥ तदुपपादयन्ति ॥ राजसादीनामित्यादि ॥ ॥ केवललौकिकत्वे इति ॥ ॥ राजसपुराणाभावेन स्वेच्छाचारित्व इत्यर्थः ॥ तथेत्यादि ॥ ॥ तामसपुराणासत्वे तामसानां स्वेच्छाचारित्वेऽतितामसत्वन्ततो नरकः स्यात् । सत्वे तु तदुक्तधर्माचरणेऽग्रे राजसत्वं ततस्तद्धर्मकरणे क्रमात्सात्विकत्वं ततो मोक्ष इत्यर्थः ॥ इदम्प्रमेयम्प्रथमस्कन्धाज्ज्ञातव्यम् । "पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः। तमसस्तु रजस्तस्मात्सत्वं यद्ब्रह्मदर्शनम्" इति वाक्येऽस्यार्थस्य स्फुटत्वात् ॥ १४ ॥ एवं सति पुराणान्तरविरोधमाशङ्कन्ते । ननु तत्तदिति ॥ उत्कर्षेणेति ॥ ॥ तत्तद्गुणत्याजनरूपेणेत्यर्थः ॥ नन्वेवं व्यवस्थानङ्गीकारे पार्थिवेत्यादिवाक्यम्विरुद्ध्येतेति चेन्नेत्याह॥सात्विका इत्यादि॥ अस्मिन्नर्थे दृष्टान्तमाहुः ॥ यथेत्यादि ॥ ॥ अत्र समाधिमाहुः ॥ प्रवृत्तीत्यादि ॥ बालानुशासनन्यायेनेति त्वं दुग्धं पिब तव केशा दीर्घाः भविष्यंतीति बालोऽनुशास्यते तत्र नहि तस्य केशदैर्घ्ये तात्पर्यमपि तु पयःपाने प्रवृत्तौ तथात्र तत्तत्साधने प्रवृत्तावेव तात्पर्यं न मुक्ताविति तथेत्यर्थः ॥ नन्वत्र बालानुशासनन्याय एवेति कथमवगन्तुं शक्य इत्याकांक्षायामर्थापत्तिम्प्रदर्शयन्ति ॥ नन्वित्यादि ॥ ॥ राजसेनैव तामसा अपि व्याख्याताः ॥ नच यत्तु कामेप्सुनाकर्मेत्यादिना यादृगुच्यते तादृशत्वाभावे कर्मणः कथं राजसत्वादिकमिति शंक्यम् । ईदृशत्वाभावेऽपि तादृक्पुराणोक्तत्वमात्रेणापि राजसत्वादिसिद्धेः ॥ जैनसिद्धान्तसिद्धसर्वभूताहिंसा वत्तथात्वोपपत्तौ बाधकाभावात् ॥ नन्वेवं द्विविधवचनानुरोधात्कारणवैजात्ये फलवैजात्यदर्शनाच्च मोक्ष एवं वैजात्यमङ्गीकार्यमित्यत आहुः ॥ परमेत्यादि ॥ ॥ नन्वेवं सति सात्विकादपि कर्मणः कथं मुक्तिर्गुणजन्यत्वस्य तत्रापि तौल्यादित्यत आहुः ॥ सात्विकेत्यादि ॥ तथाच नहि तस्मादपि साक्षान्मुक्तिरस्माभिरुच्यते येनेदं दूषणमापद्येत किंतु तस्य कर्मणो नान्तरीयाधिकारसम्पादकत्वं ऊर्ध्वं गच्छन्तीतिवाक्यादङ्गीक्रियते ॥ अधिकारश्च सत्वेनैव सत्वञ्च ब्रह्मदर्शनमिति नैर्गुण्यसम्पादकत्वादतो न दोष इत्यर्थः॥ननु गीतावाक्यस्य कर्तृविशेषफलविशेषबोधक-

त्वेन कर्मविशेषफलविशेषनियमबोधकत्वाभावादविरुद्धत्वेन पुराणेषुच सर्वेष्वेव निष्कामकर्मविशेषान्मोक्षस्य कंठोक्तत्वेन श्रौतकर्मवद्भ्योऽपि ज्ञानेन भक्तौ वा जातायां व्यापारे संपन्ने सर्वेभ्य एव मोक्षो भविष्यति । यद्वा तानि ज्ञानं भक्तिं वा जनयित्वोपक्षीयंतां तदुक्तज्ञानभक्तिभ्यामेव मुक्तिर्भविष्यतीत्यङ्गीकार्यम्॥ अन्यथा मुक्तिवाक्यस्य बाधितार्थत्वेनाप्रामाण्यं स्यादित्याकांक्षायां वचनस्य सत्यत्वमुपपादयितुमाहुः॥ तत्रेत्यादि ॥ ॥ तत्रेति ॥ ॥ नैर्गुण्ये तथा च निर्गुणत्वेन सम्बन्धत्वेन कार्यकारणभावस्य सावधारणेन गीतावाक्येन निश्चयाद्राजसतामसपुराणीयज्ञानभक्त्यो रूपान्तरविषयकत्वेन सर्वथा भगवत्सम्बन्धाजनकत्वनिश्चयाज्जातेऽपि अकिंचित्करे इत्यर्थः॥ नन्विदमप्रयोजकं श्वेताश्वतरश्रुतौ शिवरूपम्प्रकृत्य तमेव विदित्वेति श्रावणाद्रूपान्तरविषयकज्ञानस्यापि मोक्षसाधनत्वादित्यत आहुः ॥ तमेवेत्यादि ॥ ॥ इत्यादीति ॥ ॥ इत्यादिवाक्यम्परम्परया नैर्गुण्यजनकव्यापारान्तरद्वारा मोक्षसाधनताबोधकं ज्ञातव्यम् ॥ तथाच श्रौतस्यैव कारस्य कर्मवाचकपदसमभिव्याहृतत्वाव्यापारेण व्यापारिणोऽन्यथासिद्ध्यभावाच्च न श्रुतिविरोधः॥परम्परानङ्गीकारेतु गीतावाक्यविरोध इति तथेत्यर्थः ॥ नन्वस्तु रूपान्तरज्ञानस्य परम्पराकारणत्वन्तथापि सर्वथा भगवत्सम्बन्धे तु तस्य साक्षात्कारणता वाच्या तथैव भक्तेरपि।एवंसति रूपाणामनंतत्वात्तद्विषयकज्ञानभक्त्योः सम्बन्धकारणतायामननुगतादवस्थ्यमित्यत आहुः॥ सर्वथेत्यादि ॥ ॥ "कामं क्रोधम्भयं स्नेहमैक्यं सौहृदमेव वा ॥ नित्यं हरौ विदधते यान्ति तन्मयतां हि ते । सम्बन्धात्कृष्णयो भक्त्या सत्सङ्गान्मामुपागताः। केवले न हि भावेन गोप्यो गावः खगा मृगाः"॥ इत्यादिवाक्यैस्तस्य नानासाधनकतायाः शास्त्रसिद्धत्वात्तत्र सम्बन्धेऽवान्तरजातिभेदे शैवत्वादिजातिभेदेऽपि न काचित्क्षतिः "वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः" इति तत्तद्रूपभक्तानुपक्रम्य "बहवो मत्पदम्प्राप्तास्त्वाष्ट्रकायाधवादयः" इत्युपसंहारे स्वपदप्राप्तिकथनान्न फलवैजात्यं यथा नानाजातीयदण्डैर्घटरूपं फलं तद्वत्सिद्धमाहुः॥ अत इत्यादि॥ स इति॥ ॥ उक्तरूपसम्बन्धः। अयश्च तन्मयत्वरूपः सर्वात्मभावाख्यः । यान्ति तन्मयतामितिवाक्यात्। प्रपत्तिशब्दवाच्योऽप्ययमेव। नच ज्ञानविशेष एव प्रपत्तिरिति वाच्यं धात्वर्थविरोधात्। न चोपसर्गेण तदवगमः प्रार्थनार्थस्यापि शक्यवचनत्वात्॥ ननुभवत्वेवं तथापि कर्मणा मुक्तिबोधकानां वाक्यानां कथं सङ्गतिरित्यत आहुः॥ तत्साधनेत्यादि॥ ॥ कर्मफलानां तत्तद्रूपविषयकज्ञानादीनां मुक्तिसाधनत्वाल्लाक्षणिकत्वात्तेषु मोक्षपदप्रयोगः। यथा लोके आरोग्यं प्रथमं सुखं स्वानुकूल्येनेंद्रियप्रवृ-

त्तिकाम इत्यादाविव्यर्थः ॥ एवं प्रयोगमुपपाद्य पूर्वोक्तयुक्तिं स्मारयन्तः सङ्गतिं वदन्ति ॥ नहीत्यादि ॥ ॥ तादृशीमिति ॥ ॥ राजसतामसकर्मरुच्यानुमितां राजसीं तामसीञ्च ॥ अत्रेदं सिध्यति ॥ मुक्त्यर्थं पाषण्डादिरहितेनाधिकारिणा क्रियमाणैस्तामसधर्मैस्तामसावस्थात्यागेन राजसत्वन्ततस्तेन तथा क्रियमाणे राजसधर्मैः सात्विकत्वन्ततस्तादृशेन क्रियमाणैस्तैः सर्वथा भगवत्सम्बन्धे नैर्गुण्यम् । ज्ञानार्थं क्रियमाणैस्तु राजसतामसैर्बहुजन्मविपाकैस्तत्तद्रूपविषयकज्ञानपरिपाके एकं भक्त्यर्थं क्रियमाणैस्तादृशभक्तिपरिपाकस्ततः सर्वथा तद्रूपभगवत्सम्बन्धे नैर्गुण्यन्तेन मोक्ष इति तामसानाम्विलंबबाहुल्यं राजसानान्ततो न्यूनं सात्विकानान्तदभाव इति पौराणिकमुक्तिव्यवस्थेति ॥ एवमत्र क्रममुक्तिरूपम्फलन्निरूपितम्॥ अयमेवार्थो ब्रह्मपुराणे समाप्तिदशायां विष्णुमायानुकीर्तनाध्यायेऽपि प्रतिपादितो व्यासवाक्येषु “ शृणुध्वं मुनिशार्दूलाः प्रवक्ष्याम्यनुपूर्वशः ॥ यथा कृष्णे भवेद्भक्तिः पुरुषस्य महाफला॥ संसारेऽस्मिन्महाघोरे सर्वभूतभयावहे । महाभयङ्करे नृणान्नानादुःखसमाकुले॥ नियोनिसहस्रेषु जायमानः पुनः पुनः ॥ कथञ्चिल्लभते जन्म देही मानुष्यकं द्विजाः ॥ मनुष्यत्वेऽपि विप्रत्वं विप्रत्वेऽपि विवेकिता ॥ विवेकाद्धर्मबुद्धिस्तु बुद्ध्या तु श्रेयसां ग्रहः । यावत्पक्षद्वयम्पुंसां न भवेज्जन्मसञ्चितम् । तावन्न जायते बुद्धिर्वासुदेवे जगन्मये ॥ तस्माद्वक्ष्यामि भो विप्राः कृष्णे भक्तिर्यथा भवेत् । अन्यदेवेषु या भक्तिः पुरुषस्येह जायते॥ कर्मणा मनसा वाचा तद्गतेनान्तरात्मना । तेन तस्य भवेद्भक्तिर्यजने मुनिसत्तमाः॥ स करोति ततो भक्तिं यजने मुनिसत्तमाः । स करोति ततो विप्रा भक्तिं चाग्नेः समाहितः ॥ तुष्टे हुताशने तस्य भक्तिर्भवति भास्करे । पूजाङ्करोति सततमादित्यस्य ततो द्विजाः ॥ प्रसन्ने भास्करे तस्य भक्तिर्भवति तत्वतः ॥ सेवाङ्करोति विधिवत्स तु शम्भोः प्रयत्नतः ॥ तुष्टे त्रिलोचने तस्य भक्तिर्भवति केशवे । संपूज्य तं जगन्नाथं वासुदेवाख्यमव्ययम् ।ततो भुक्तिञ्च मुक्तिञ्च स प्राप्नोति द्विजोत्तमाः”इति । गीतायांच“येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ अन्तवत्तु फलन्तेषान्तद्भवत्यल्पमेधसाम् ॥ देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपि”इति ॥अतो राजसादिपुराणस्थानां मुक्तिवचनानान्तदवस्थापरित्याग एव मुक्तिपदार्थ इति निष्कर्षः ॥ अत्रेदं सिद्ध्यति ॥ पुराणं वेदवदेव भगवन्निश्वासरूपन्तत्तत्कल्पीयभुवनद्रुमात्मकस्य भगवतो लीलाम्प्रतिपादयच्छिवादिरूपस्य माहात्म्यम्परब्रह्मण एव वदति श्रौतधर्मकालादिव्यवस्थां सर्वपदार्थस्वरूपञ्च निर्द्धारयति । तदुक्तरीत्या तद्धर्माचरणे

तु तत्तदवस्थानिवृत्तिरूपैव मुक्तिः क्रमेण परमापि मुक्तिर्भवति । तथैव तदुक्तभक्त्यापि तेन तत्तत्कल्पात्मककालाधीनमेव तद्धलं नतु तन्निरपेक्षमिति ॥ ५५ ॥

व्रजभाषाटीका ।

परन्तु सबकल्पनमें सबकल्पके जीव उत्पन्नहोतेहैं वे जीव अपने अपने कल्पानुसारी धर्मकूँही करें हैं, जैसें नानादेशके निवासी एकतीर्थमें आवें। सबकल्पनमें सबकल्पको धर्म ग्रहणकियोजावेहै या श्वेतवाराहकल्पमें तीनोंप्रकारके ही पुराण हैं, क्योंकी याकल्पमेंभी तीनोंप्रकारके जीव हैं राजसजीवकें तामससात्विकपुराणोक्त धर्म हृदयमें नहिं आवें हैं उनजीवनकूँ राजसधर्म नहिं बनाये जाँयगे तो वे जीव केवल लौकिक रहे आवेंगे तो कल्पान्तरमें फिर तामस होजाँयगें तो राजसोच्छेद होयगो तासों उनजीवनकेलियेही राजसपुराण हैं। उनमें लिखेभये धर्मको अनुष्ठान करवेमों आगेंके जीव सात्विकहोजांयगे । ऐसेंही तामसजीवनको अत्यन्त तामसपणों दूरहोयकें उत्कर्ष होयवेके लियें आगे राजसता होयवेकेलियें तामसपुराण हैं॥ शङ्का—उन उन पुराणनमें उन २ धर्मके आचरण करवेंसों मुक्तिप्राप्ति लिखीहै। सात्विकजीवनकीही मुक्ति होय औरनकी नहींहोय ये व्यवस्था तो सात्विककल्पकीही होनीचाहिये। जैसें राजा प्रजाके ऊपर उनउन अवसरनपर अनुग्रह तथा दण्ड दोनों कार्यकूँ करें है केवल दण्ड अथवा केवल अनुग्रहमात्रही नहिंकरें है ऐसें सबही कल्पनमें तत्तत्पुराणोक्त धर्मसों मोक्ष और अधर्मसों बन्ध होनोंचाहिये तासों या कल्पमेंभी तीनोंप्रकारके जीवनकी मुक्तिके लियें तीनोंप्रकारके पुराण हैं॥ उत्तर—मुक्तिकी अभिलाषा सबही जीवनकों है तासों सबजीवनकी धर्ममें प्रवृत्ति होयवेकेलियें सबपुराणनमें मुक्तिफल बतायो है। जैसें केश

लोभ देकें बालककूँ दूध पिवायोजाय है कछु दूध पीतेही
इंबढजायहैं ऐसेंही क्रमकरकें निर्गुणावस्था भये सों मुक्ति
अभिप्रायसों राजसतामसपुराणोक्त राजसतामसधर्म-
होनों लिख्योहै तासों राजसतामसधर्मकूँ मुक्ति करवेवारे
झलेने, क्योंकी " मध्ये तिष्ठन्ति राजसाः " इत्यादिभग-
नके अनुसार राजसजीवकी मध्यलोकमें तामसजीवकी
ोकमेंही स्थिति रहेहै तहां तामसराजसादिजीवनके लिये
ारी मोक्ष है यहभी कल्पना नहिंकरसकें हैं, क्योंकी पर-
पमोक्षमें वैजात्य नहिं है अर्थात् मोक्षपदार्थ एकही है
ामसजीव तामसपुराणोक्तसाधनसों आगे राजस होय,
सजीव राजसपुराणोक्तसाधनसों आगे सात्विक होय, सा-
त्र सात्विकपुराणोक्तसाधन करवेसों निर्गुण होय तब मोक्ष
में "राजसस्तु तमः पश्चात्सत्वं यद्ब्रह्मदर्शनम्" इत्यादिभाग-
प्रमाणहै॥५४॥निर्गुणता भयेसों भगवत्सम्बन्ध होय तब
था राजसतामसादिपुराणोक्तरूपान्तरकी भक्ति वा रूपान्तर
भयेसों मुक्त नहिं होयहै। "मामेव ये प्रपद्यन्ते" यावाक्यमें
में भगवत्सम्बन्ध भयेसोंही मायाको तरणो लिख्योहै, श्वेता-
'तमेव विदित्वा अतिमृत्युमेति" यावाक्यके पूर्व शिवकूँ
नकरकें उनके ज्ञानसों मोक्ष लिखीहै सो परंपराकरकें पूर्वो-
सार निर्गुणता होयकें सर्वथा भगवत्सम्बन्ध होय तब मोक्ष
र्वथा भगवत्सम्बन्ध होयवेमें बहुत कारण है जैसें कंसराजा
द्वारा सर्वथा भगवत्सम्बन्ध भयो। द्वेषके द्वारा शिशुपाल
त्सम्बन्ध होयकें तन्मयता भई। भगवत्सम्बन्धमें अवान्तर
अर्थात् पशु पक्षी मनुष्य शैव वैष्णव आदि भेद विघ्न-

कर्ता नहिंहैं जैसें चाहे जा काष्ठको दण्ड होय वाके सम्बन्धसों घट बनजावेंहै ऐसेंही कोईप्रकारसोंभी भगवत्सम्बन्ध होनोंचाहिये मुक्त होयजावेंहै । अतएव बिभीषणप्रल्हादादिक असुरभी भगवत्पदकूँ प्राप्तभये तासों भगवत्सम्बन्ध होनोंही परमपुरुषार्थ है ॥ और पुराणनमें जो राजसतामसदेवतानके स्वरूपज्ञानकूँ मोक्षरूप लिखोहै सो वह ज्ञान मोक्षको साधन पूर्वोक्तपरम्पराकरकें है तासों ऐसेस्थलमें पहिलीकी अवस्थाको छूटजानोंही मुक्तिहै ॥ मुक्तिनाम छूटवेको है जैसें राजसदेवताकी उपासनासों जहाँ मुक्ति लिखीहै तहाँ पहिलीकी तामसावस्थासों छूटजानोंही मुक्ति है याहीमों ब्रह्मपुराणमें सूर्यकेद्वारा शिवभक्ति वाके द्वारा वासुदेवमें भक्ति वासों कृतार्थता लिखीहै तासों मुक्तिप्रतिपादक वाक्यभी साँचे हैं ॥ ५५ ॥

चतुर्युगे तु व्यासानां नानात्वात्स्वस्वकालजम् ॥ वृत्तान्तमाहुर्नान्यस्य कल्पान्तास्तेन कीर्तिताः ॥ ५६ ॥ सर्वनिर्धारणार्थाय व्यासो भागवतमुक्तवान् ॥ एकं कल्पमुपाश्रित्य स्त्रीशूद्राणां हिते रतः ॥ ५७ ॥

तत्त्वदीपप्रकाशः ।

नन्वेककल्पप्रतिपादकत्वम्पुराणानामसङ्गतं यतश्चतुर्युगवार्तामेव पुराणानि कथयन्ति कलौ सर्वेषाम्पर्यवसानात् ॥ अतोऽष्टादशयुगवार्तैव पुराणानामर्थः कुतो न भवेदित्याशंक्याह ॥ चतुर्युगेति ॥ एकस्मिन् कल्पे सहस्रं व्यासा भवन्ति तेषां द्वापरान्तेऽधिकारः ॥ ततः पुनः कृतौ सर्वविद्यानाम्पूर्णता ॥ पुनरन्यस्य व्यासार्थं द्वापरान्ते निवेशनमिति ॥ अतस्ते स्वचतुर्युगवार्तामेव कथयन्तीति न दोषः ॥ ५६ ॥

भारते भिन्नप्रकार इति तत्रापि कल्पभेदमाह ॥ सर्वनिर्धारणार्थायेति॥ एकं यं कञ्चन ॥ यत्र कल्पे तथा पदार्थाः ॥ ततः स्त्रीशूद्राणाम्महत्त्वं सिध्यति ॥ यतस्तत्र सर्वेषामाचारो निरूपितः ॥ "न शूद्राय मतिन्दद्यात्" इत्यादिनिषेधस्तत्र न भवति ॥ कृतयुगे मानवा धर्माः पराशरवाक्यात् ॥ ५७ ॥

आवरणभंगः।

अत्र कल्पात्मककालाधीनत्वन्न युज्यत इत्याशयेन शङ्कते ॥ ॥ नान्वित्यादि ॥ ॥ समाधिग्रन्थस्तु प्रकटार्थः। एकैककल्पप्रतिपादकत्वं द्वापरान्ते व्यासनिवेशश्चास्माभिः पूर्वं मात्स्यवचनोपन्यासेन प्रदर्शितमेव। न दोष इति चतुर्युगवार्त्ताप्रतिपादकत्वं कल्पप्रतिपादकताबाधकम्भवतीत्यर्थः ॥ मूले कल्पान्ता इति पुराणार्था इत्यर्थः ॥५६॥ एवम्पुराणप्रमेयन्निश्चित्येतिहासस्यापि पुराणतुल्यत्वात्तत्प्रमेयं निश्चेतुमाहुः ॥ ॥भारत इत्यादि ॥ ॥भिन्न इति ॥ ॥ पुराणोक्तप्रकाराद्भिन्नः ॥ ॥ सर्वनिर्धारणार्थायेति ॥ ॥ इदानीं त्रिविधपुराणसत्वेन सङ्कीर्णजीवानां किम्पुराणोक्तङ्कार्यमिति पुराणार्थविषयकम्पुराणानामुपबृंहणत्वेन वेदार्थविषयकश्च सन्देहं दृष्ट्वा "धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ॥ यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्" इति वाक्यात्पुराणोक्तार्थस्वरूपबोधकत्वेन भारतव्यपदेशेन "आम्नायार्थश्च दर्शितः" इति वाक्याद्विशेषार्थज्ञापकत्वेन च सर्वेषां श्रुत्युक्तेर्थे सन्देहनिरासायेत्यर्थः ॥ एवम्प्रयोजनकथनमुखेन सनिर्द्धारकन्तस्य प्रमाणस्य स्वरूपमित्युक्तम् ॥ निर्द्धारणे प्रकारमाहुः ॥एकमित्यादि ॥ तथा पदार्था एवञ्च "स्त्रीशूद्रद्विजबन्धूनान्त्रयी न श्रुतिगोचरा ॥ कर्मश्रेयसि मूढानां श्रेय एवम्भवेदिह ॥ इति भारतमाख्यानं कृपया मुनिना कृतम्" इति प्रथमस्कन्धे स्त्रियो धन्याः शूद्रो धन्य इत्युपाख्याने विष्णुपुराणे च प्रसिद्धम्। सर्वनिर्धारणेन किं हितं कृतवानित्यपेक्षायां धर्मनिर्धारणमिति मूलं विवृण्वन्तस्तदाहुः ॥ तत्रेत्यादि ॥ यतस्तत्रेति ॥ यतो हेतोर्भारत इत्यर्थः ॥ एतेन साधनमप्युक्तम् ॥ इत्यादीति ॥ मन्वाद्युक्तः॥ "भारतव्यपदेशेन आम्नायार्थश्च दर्शितः ॥ दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत" इति वाक्यादित्यर्थः ॥ ननु यद्वै किञ्चेति श्रुतेर्नैवमुचितमित्यतः पक्षान्तरमाहुः ॥ कृतयुगेत्यादि ॥ "कृते तु मानवा धर्मास्त्रेतायां दक्षगौतमाः ॥ द्वापरे शाङ्खलिखिताः कलौ पाराशराः स्मृताः" इति पाराशरस्मृतेस्तथेत्यर्थः ॥ ५७ ॥

व्रजभाषाटीका ।

शङ्का—एक एक पुराण एक एक कल्पनको प्रतिपादन करेहै ये बात कैसें सम्भवसकें। पुराणमें तो चतुर्युगकी वार्त्ता लिखीहै तासों अष्टादशचतुर्युगकी वार्त्ताही अष्टादशपुराणनको अर्थ क्यों नहिंहो यसकें॥उत्तर—एककल्पमें हजार व्यास होवेंहैं और उनको द्वापरान्तमेंअधिकार होवे है तापीछें सत्ययुगमें फेर विद्याकी पूर्णता होवेहै फिर दूसरे जीवकों व्यासकरवेकेलियें द्वापरके अन्तमें निवेशकियोजावेहै तासों वे व्यास अपने २ चारोंयुगनकी वार्त्ता कहेंहैं यासों न्यारे २ कल्पके प्रतिपादक न्यारे २ पुराण हैं यानिर्णयमें कछु दोष नहिंआवे है, क्योंकी जाकल्पको प्रतिपादक जो पुराण होवे है वा कल्पके सहस्रव्यास वा कल्पकेही सहस्रचतुर्युगनके वृत्तान्त वा पुराणमें कहेंहैं ॥ ५६ ॥ महाभारतको तो प्रकार भिन्न है. अभी तीनोंही गुणनके पुराण विद्यमान हैं. सङ्कीर्णजीवनकूँ कोनपुराणके अनुसार वर्ताव करनोंचाहिये तथा वेदार्थविषयक सर्व निर्धार करवेकेलियें महाभारत व्यासजीने बनायो ॥ जाकल्प में वैसे उत्तम धर्मोपयोगी पदार्थ हते ऐसे कोई एककल्पको आश्रयकरकें भारत बनायो है तहां भारतोक्त धर्म करवेसों स्त्रीशूद्रादिकनकूंभी महत्त्व सिद्ध होय है याहीसों भारतमें सबनको धर्म वर्णन कियो है॥ " नशूद्राय मतिं दद्यात् " या मनुस्मृतिके वाक्यमें जो शूद्रनकों ज्ञान देवेको निषेध है सो भारतके ज्ञानदेवेको नहींहै क्योंकि भारत तो सर्वहितार्थही बनायो है। दूसरो याप्रश्नको ये उत्तर है कि मनुस्मृतिके धर्मनकूं पराशरजीनें सत्ययुगमें मानवेयोग्य कहेहैं,कलियुगमें तो पाराशरस्मृतिके धर्मकोंही मानवेयोग्य कहे हैं ऐसे पाराशरस्मृतिके वाक्य याश्लोकके आवरणभंगमें हैं॥ ५७ ॥

धर्मनिर्धारणन्तत्र सर्वेषां समुदाहृतं ॥ प्रत्यब्दं वृक्षवत्कल्पा भुवनद्रुमरूपिणः ॥ ५८ ॥ अन्यकल्पोक्तरीत्यापि कथितो भगवान् स्वयम् ॥ कल्पेस्मिन्सर्वमुक्त्यर्थमवतीर्णस्तु सर्वतः ॥ सर्वतत्त्वं सर्वगूढं प्रसङ्गादाह पाण्डवे ॥ ५९ ॥

तत्त्वदीपप्रकाशः ।

कल्पस्वरूपमाह ॥ प्रत्यब्दमिति ॥ ५८ ॥ ननु कृष्णः सर्वमुक्त्यर्थमवतीर्णस्तस्य स्वरूपकथनार्थम्भागवतम्प्रवृत्तन्तच्च सारस्वतकल्पानुसारि मत्स्यपुराणे तथा प्रदर्शनात् ॥ अयञ्च श्वेतवाराहकल्पः अतोऽत्रत्यानाङ्कथं मुक्तिरित्याशंक्याह ॥ अन्यकल्पेति ॥ अन्यकल्पस्य रीतिरेव गृहीता सर्वत्र पुराणे तथैव निर्णयात् ॥ नतु राजसानामेव मोक्षदः ॥ ननु स्वरूपेणैव सर्वमुक्तिङ्करिष्यति किम्भागवतेनैवेत्याशंक्य भगवतोऽभिप्रायकथनार्थमाह ॥ सर्वतत्वं सर्वगूढमिति ॥ अर्जुनार्थम्प्रसङ्गाद्गीतामाह ॥ अतो ज्ञायते शास्त्रद्वारैव मोचक इति प्रवृत्तिं वा सम्पादयिष्यतीति ॥ ५९ ॥

आवरणभंगः ।

॥ कल्पेत्यादि ॥ कल्पो नाम पूर्वोक्तरीतिकं ब्रह्मणो दिनादिकन्तदुपाश्रयणेन धर्मादीनां वैलक्षण्यं कथम्भवति येन स्त्र्यादिहितसिद्धिरित्याकांक्षायाङ्कल्पस्वरूपमाहेत्यर्थः ॥ ॥ प्रत्यब्दमिति ॥ तथात्र तेषां स्वरूपवैलक्षण्येन यथा लोकसंस्थानां नानात्वं तथा लौकिकधर्मादीनामपि नानात्वमिति सुखेन स्त्र्यादिहितसिद्धिरित्यर्थः ॥ तेन काम्यम्फलमप्युक्तम् ॥ ५८ ॥ अतः परं मुख्यप्रमेयादिकं वक्तव्यं । तच्च गीतायां स्फुटमिति तां विचारयितुं तस्याः श्रीभागवतेन सहैककोटित्वाय तत्प्रयोजनकथनपूर्वकं मुख्यफलम्विचारयन्त आशंकन्ते ॥ ननु कृष्ण इत्यादिना ॥ अत्रायमर्थः । स्त्रीशूद्रादीनां महत्वसाफल्यं श्रेयःप्राप्त्या भवति श्रेयस्तु " मोक्षमिच्छेज्जनार्दनात् " इतिवाक्याद्भगवदधीनमिति निर्णीत

म्भगवांस्त्वस्मिन्कल्पेऽवतीर्णः कामादिना सर्वथा स्वसम्बन्धात् स्वरूपेण मोचितवान् ॥ तदुक्तं श्रीभागवते गोप्यःकामादिति ॥ "बलभीमपार्थव्याजाह्वयेन हरिणानिलयन्तदीयम्" इति गारुडे॥च "अज्ञानिनःसुरवरेशमधिक्षिपन्तो यं पापिनोऽपि शिशुपालसुयोधनाद्याः ॥ मुक्तिङ्गताःस्मरणमात्रविधूतपापाः कः संशयः परमभक्तिमताञ्जनानाम्" इति । तेन तदानीं तु न भारतोपयोगः साम्प्रतन्तु नावतार इतीदानीं स्वरूपज्ञाने सति भक्त्यादिसाधने भारतमुपयुज्येत । ज्ञानन्तु श्रीभागवताधीनन्तच्चोक्तरीत्या नैतत्कल्पानुसारीत्येतत्कल्पीयानान्तदुक्तज्ञानानुपयोगात्तदभावे च भक्त्याद्यभावादिदानींमपि तेन मुक्त्यभाव इतीदानीमपि नोपयोग इत्याशंक्य भारतोक्तप्रकारेण मुक्तिनिरूपणार्थं सार्धेन समाधिमाहेति॥ ॥ अन्येत्यादि ॥ ॥ सारस्वतकल्पे उक्ता या रीतिः सैव भारते गीतायां गृहीता तत्र गमकम् ॥ ॥ सर्वत्रेत्यादि ॥ ॥ श्रीभागवते "अयन्तु ब्रह्मणः कल्पःसविकल्प उदाहृतः ॥ पाद्मङ्कल्पमथो शृणु" "अयन्तु कथितः कल्पो द्वितीयस्यापि भारत । वराह इति विख्यातो यत्रासीच्छूकरो हरिः" ॥ इतिकल्पान्तराणामपि कथनान्मात्स्ये सप्तकल्पकथनादन्येष्वपि तथा दर्शनात्सर्वेषु पुराणेषु नरामराणां वृत्तान्तस्य रीतिरेव गृह्यत इति निर्णयात्तद्रीत्यात्र भगवानुच्यते नतु तत्कल्पीया एव जीवास्तेषां मुक्तत्वादतो न राजसानामेव मोक्षदः किन्तु सर्वेषामतोऽस्मिन्नपि सर्वतः कामक्रोधादितो मोचयिष्यतीत्यर्थः ॥ भारतश्रीभागवतयोरैकाधिकरण्यञ्च । "मुनिर्विवक्षुर्भगवद्गुणानां सखापि ते भारतमाह कृष्णः ॥ यस्मिन्नृणां ग्राम्यसुखानुवादैर्मतिर्गृहीतानु हरेः कथायाम्" इति तृतीयस्कन्धीये विदुरवाक्ये स्फुटम् ॥ ॥ ननु स्वरूपेणैवेत्यादि ॥ ॥ यदि तत्कल्परीतिरेवात्र गृहीता तदा तत्र नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप" इति वाक्यात्स्वरूपेणैव मोक्षन्दास्यति । श्रीभागवतन्तु तत्कल्पानुसारीत्यस्मिन् कल्पे किन्तेन तदीयस्यसाधनांशस्यात्र गृहीतुमशक्यत्वाद्ग्रहणे व्यवस्थाभङ्गप्रसङ्गादित्याशंक्यतेन साधेननास्मिन्नपि कल्पे भगवतो मुक्तिर्दित्सितेति भगवदभिप्रायकथनार्थन्तद्गमकमाहेत्यर्थः ॥ ॥ मूले सर्वतत्त्वमित्यादि ॥ शोकमोहनिवारणाय सांख्ययोगनिरूपणप्रस्तावे स्वभक्तोपरि कृपया स्मृतस्य बुद्धिस्थस्योपेक्षानर्हत्वाद्राजसविद्यादि कथने मया ततमिदं सर्वमित्यादिना सर्वतत्त्वं वेदादीनां निष्कृष्टम्प्रमेयं मन्मना भव ।स सर्वधर्मानित्यादिना सर्वगूढं इतराज्ञातं साधनफलञ्चार्जुनार्थम्भगवानाहेत्यर्थः ॥ ॥ प्रवृत्तिमिति ॥ ॥ अत्रापि शास्त्रद्वारेति सम्बध्यते । तथाचास्मिन्नपि कल्पे शास्त्रद्वारा मोचयिष्यति भक्तौ शरणे च प्रवृत्तिं वा सम्पादयिष्यती-

ति गीतोपदेशाज्ज्ञायतेऽतो मुख्ये साधने फले च न सन्देह इति भावः ॥ एतेन वेदपुराणार्थनिर्द्धारकमेतस्य स्वरूपं वेदादिप्रमेयमेव निष्कृष्टरूपेण प्रमेयन्तथैव साधनम्फलञ्चेति विचारितन्तेनैतस्य प्रमेयस्य बलं सर्वाधिकमिति निर्णीतम्॥५९॥

व्रजभाषाटीका।

प्रतिवर्ष जैसें वृक्षके पत्र पुष्पादिक नानाभांतिके नये नये आतेजावें हैं ऐसें भुवनरूपवृक्षकें कल्पानुसार लोकनकी रचना तथा लौकिक धर्म नाना होतेरहें हैं॥ शङ्का—श्रीकृष्णचंद्र तो सबनकी मुक्तिकेलिये प्रकटभये हैं उनको स्वरूपवर्णन करवेकों भागवत प्रवृत्तभयो है वा भागवतकूं मत्स्यपुराणमें सारस्वतकल्पके अनुसारी बतायो है। अभी श्वेतवाराहकल्प है, अभीके जीवनकी भागवतके॥ सेवनसों कैसें मुक्ति होवेगी॥ उत्तर—अन्यकल्पोक्तेति औरकल्पकी रीतिकोही ग्रहण कियो है। सब पुराणमें ऐसोही निर्णय है मत्स्यपुराणमेंही सातकल्पनको वर्णन है भागवतमेंभी। "अयन्तु ब्रह्मणः कल्पः पाद्मकल्पमथो शृणु" इत्यादिस्थलमें ब्रह्मपद्मवाराहादिकल्पनकोभी वृत्तान्त है। तासों याकल्पमें सबनकी स्वरूपकरकेंही मुक्ति करवेकेलिये प्रकटभये श्रीकृष्णचन्द्रभगवानको भागवतमें सारस्वतकल्पकी रीतिके अनुसारभी वर्णनकियो है॥५८॥ शङ्का—स्वरूपकरकेंही श्रीकृष्णचंद्र सबनकी मुक्ति करदेंगे भागवत बनायवेको कहा प्रयोजन है॥ उत्तर—उनही श्रीकृष्णचंद्रभगवानने प्रसंगसों अर्जुनके अर्थ गूढ सर्वतत्वको जामें वर्णन ऐसें गीताशास्त्रको वर्णनकियो तासों मालूमपडै है अभीके जीवनकूं शास्त्रद्वाराही मुक्ति देंहै, अवतारसमयमें तो भारतादिकशास्त्रविनाही स्वरूपकरकेंही गोपी पशु पक्षी आदिकनकी मुक्ति होवें है तासों अभीतो भागवतशास्त्रकी अवश्य अपेक्षा है॥ ५९ ॥

शुकवत्तद्व्यासगीतं सत्वेनास्यावतारतः॥ईश-
वाक्यन्तु तस्यापि दुर्बोधम्भजनादृते ॥ ६०॥
जीवा एव हि सर्वत्र व्यासाः साम्प्रतमेव हि ॥
स्वयम्भूत्वा हरिः कृष्णः स्वांशं व्यासञ्चका-
रह ॥ स्वज्ञापनाय भक्तानाम्पदप्राप्त्यै ततः
परम् ॥ ६१ ॥

तत्त्वदीपप्रकाशः ।

नन्वेवं सति कथं व्यासस्यानिर्वृतिस्तत्राह ॥ शुकवदिति ॥ अभिप्रायाज्ञाने हेतुः ॥ सत्वेनास्येति ॥ सत्वांशव्यवधानेनावतारो यतः ॥ ननु वाक्यस्य विद्यमानत्वाद्वाक्यार्थविचारकस्य कथम्भ्रमस्तत्राह ॥ ईशवाक्यमिति ॥ अनेन भजनव्यतिरेकेण भागवतार्थो नावगम्यत इति सूचितम् ॥ ६० ॥ नन्वेतादृशोऽग्रे कथन्तत्वं वक्ष्यतीत्याशंक्याह ॥ जीवा एव हीति ॥ भगवदिच्छया तदर्थमंशावतारणात्प्रयोजनमाह ॥ स्वज्ञापनायेति ॥ ततःपरं रूपलीलातिरोभावनानन्तरं नामलीलया क्रीडाङ्कर्तुं व्यासावतार इत्यर्थः ॥ ६१ ॥

आवरणभंगः ।

तदेतत्सर्वमेव सप्रपंचं सार्द्धैःपंचभिः परिहरंति ॥ नन्वित्यादिना ॥ ॥ एवं सतीति ॥ व्यासेन भारते गीतोपनिबन्धनादिना सर्वनिर्द्धारे कृते सति । शुकवत्तद्व्यासगीतमिति ॥ ॥ तत् गीतोपनिबन्धनरूपं व्यासवाक्यं शुकवत् । शुकस्य पक्षिण इव अर्थानवबोधेन युद्धारम्भे गीताया उक्तत्वेन युद्धप्रतिबन्धनिवर्त्तकतया युद्धशेषत्वेनैवोच्चारितं । एवमानुशासनिकेऽपि कालादिशेषत्वेन धर्मत्वेन चोच्चारितन्तेनानिर्वृतिरित्यर्थः ॥ अभिप्रायाज्ञान इति ॥ ॥ अनिर्वृतिहेतुभूते तस्मिन्नित्यर्थः ॥ भागवतार्थ इति ॥ ॥ भगवत्प्रोक्तवाक्यार्थः ॥ ६० ॥ अग्रे इति ॥ सूत्रेषु श्रीभागवते चेत्यर्थः ॥ तदर्थमिति ॥ ॥ तत्वकथनार्थन्तथा चांशावतार-

१अहं युगानां च कृतं धीराणां देवलोऽसितः ॥ द्वैपायनोऽस्मि व्यासानां कवीनां कव्य आत्मवान् ॥ १ ॥ इत्येकादशीयवाक्यात् ॥

कत्वाद्वक्ष्यतीत्यर्थः ॥ प्रयोजनमिति ॥ ॥ तत्वकथनप्रयोजनम् । पदमाद्या इत्यत्र हेतुर्नामलीलया क्रीडाङ्कर्तुमिति ॥ ॥ इत्याशंक्याहेति ॥ ॥ एवञ्जीवशक्यत्वन्तत्वकथनस्याशंक्य तदशक्यत्वमाहेत्यर्थः ॥ ६१ ॥

व्रजभाषाटीका ।

शंका–सर्वतत्व गीताजीमें वर्णनकियोहोतो तो भारत बनायें-पीछे व्यासजीको आत्मा क्यों नहिं प्रसन्नभयो, भागवत बनाये पीछेही क्यों भयो क्योंकि भारतमें तो गीताभी आगई है॥ उत्तर–व्यासजीनें भारतमें गीताजीको वर्णनकियो है सो सुवाकेंतुल्य अभिप्राय जानेंविना भगवान्के वाक्यनको वैसोको वैसो पुण्यपाठ करदियो हतो,क्योंकि सत्वगुणके व्यवधानकरकें व्यासजीको अवतार भयो तासों गीतावाक्य विद्यमान हते तथापि भगवान्के भजन विना उनकूं अर्थको यथार्थज्ञान नहिंभयो तहां ऐसे व्यासजी जिनकूं गीतार्थज्ञान नहिं है भागवतरूप तत्वको कैसें वर्णनकरेंगे यह शंका नहिं करनी, क्योंकि भगवान्की भक्तिसों सत्वको व्यवधान दूरभयो तब भागवत वर्णन कियो है ॥ ६० ॥ और द्वापरयुगमें जीवही व्यास होजावें हैं या द्वापरयुगमें तो स्वयं पूर्णरूप कृष्णचंद्र प्रकटहोयकें रूपलीलाकरके क्रीडा करतेभये रूपलीलाके तिरोभाव करेंपीछें नामलीला शब्दात्मक भागवतको स्वरूप धारणकरकें क्रीडाकरवेकेलिये पहिलीसोंही अपने अंशकरके व्यासजीकूं प्रकटकिये ॥ वेद पुराण विद्यमानही हैं जीवभी धर्मनिर्णय करसक्तेहते ये शंका नहिंकरनी जाविषयमें व्यासजीकूं अज्ञान है तहां जीवनकी कहा चलाई, यह बात व्यासजीनें भागवतमें कही है कि मैनें भारतके मिषसों वेदको अर्थ दिखायो, जाभारतमें स्त्रीशूद्रादिकनकोभी वर्णनलिख्यो है ऐसो भारतभी मैने बनायो परन्तु मेरो आत्मा संतुष्ट नहिंभयो तापीछें भगवद्भजनद्वारा –जब

भगवान् प्रसन्नभये तब भगवदिच्छासों व्यवधानकरवेवालो सत्व-गुण दूर भयो तब श्रीभागवत प्रकटकियो सो भागवत भगवान्-को स्वरूप जतायवेकेलिये तथा भगवत्पदकी प्राप्ति करवेकेलिये प्रकटभयो है ॥ ६१ ॥

सत्वस्य व्यवधानत्वादात्माज्ञानाच्च योगतः॥
व्यासकार्यं समस्तश्च कृतवानधिकन्तथा ॥अ-
निर्वृतिस्ततो जाता तेन भागवतं कृतम् ॥६२॥
सर्वगोप्यो हि धर्मस्तु वेदे मुख्यतयोदितः ॥
ब्रह्ममात्रप्रकाशस्तु कृपया सनकादिगः ॥६३॥

तत्त्वदीपप्रकाशः ।

नन्वस्यार्थस्य बुद्धिपरिकल्पितत्वे काव्यवदसत्यता स्यात् ॥ वेद-पुराणयोर्विद्यमानत्वे जीवैरपि कर्त्तुं शक्यत इति किं व्यासावतारेणे-त्याशंक्याह ॥ सत्वस्येति सार्द्धैस्त्रिभिः ॥ यत्र व्यासस्याप्यज्ञानं तत्र जीवानाङ्का वार्तेति निरूपयितुमनिर्वृतिर्भारतनिर्माणं चोक्तन्ततो भगवदिच्छया व्यवधायके अपगते भागवतं कृतमित्यर्थः ॥ ६२ ॥ ननूक्तम्पूर्वसिद्धोऽर्थो न वेति तत्राह ॥ सर्वगोप्यो हीति ॥ भवति वे-दार्थ एव परं गुप्तः भगवदिच्छया यदा पुनः सर्वोद्धारार्थं प्रयत्नं कृत-वान् तदा परम्पराया अभावान्नान्यैर्व्यासैर्वक्तुं शक्यत इति व्यासा-वतारः ॥ ६३ ॥

आवरणभंगः ।

सत्वस्येति ॥ ॥ मूले तुः पूर्वपक्षनिरासे । 'ततः सप्तदशे जातः' इति वाक्येन पुरुषावतारतया सत्वस्य व्यवधानेन स्वस्वरूपाज्ञानात्केवलयोगतो व्यासकार्यं वे-दानां व्यासं समस्तं पुराणसमसनञ्च कृतवान् । तथा तेनैव प्रकारेण स्वरूपाज्ञान-सहभूतेन योगेन अधिकम्भारतञ्च कृतवान् । मत्स्यपुराणादिषु पुराणसमसनमेव व्यासकार्यत्वेनोक्त्वाग्रे पुराणसंख्यादानफलतल्लक्षणान्युक्त्वा सत्यवतीसुतो भार-ताख्यानञ्चक्र इत्यनेन सत्यवतीसुतस्यैव भारतकर्तृत्वमुच्यते तेन व्यासान्तरापेक्ष-

या कार्याधिक्यमुच्यते ॥ तथा सति यत्सिद्ध्यति तदाहुर्विवृतौ ॥ यत्रेत्यादि ॥ व्यासस्येति ॥ ॥ उक्तस्वरूपात्मकस्येत्यर्थः ॥ उक्तमिति ॥ ॥ श्रीभागवते व्यासेनैवोक्तमित्यर्थः ॥ तेन सिद्धमाहुः ॥ तत इत्यादि ॥ ॥ अतो जीवानां सर्वथैवेदमशक्यमिति भावः ॥ एवमनिर्वृतिहेतुकथनमुखेनतस्याः सर्वतत्वकथने अबाधकत्वमुक्तम् ॥ ६२ ॥ उक्तार्थं दृढीकर्त्तुम्पुनः किञ्चिदाशंक्य परिहरंति ॥ नन्वित्यादि ॥ सर्वगोप्यइत्यादि ॥ ॥ अत्र सार्द्धेन श्रीभागवतस्य प्रमेयमुक्तं गीतासामानाधिकरण्यञ्च बोधितम् ॥ सर्वगोप्यत्वञ्च ॥ "सर्ववेदेतिहासानां सारं सारं समुद्धृतम्" इति वाक्यात् "धर्मः प्रोज्झितकैतवोऽत्र" इति वाक्याच्च ज्ञायते । वेदे मुख्यतया कथितत्वञ्च "भगवान् ब्रह्म कार्त्स्न्येन" इति "धर्मः स्वनुष्ठितः पुंसाम्" इत्यादिवाक्यैः "तमु स्तोतारःपूर्वम्" इत्यादिश्रुतिभिश्च ज्ञायते ॥ ब्रह्ममात्रप्रकाशत्वञ्च द्वितीयस्कन्धीयपुरुषसूक्ताध्यायात् । कृपया सनकादिगत्वञ्च हंसगीतायां ज्ञेयम् ॥ नन्वेवमन्यत्राप्युच्यत इति नास्य विनिगमनेत्यत आहुः ॥ यदा पुनरित्यादि ॥ ॥ 'यदा यदा हि धर्मस्य' इतिवाक्यात् "यत एतद्विमुच्यते" इति वाक्याच्च सर्वोद्धारार्थमेव भगवदवतारः । तथा यदा पुनरिच्छा तदेत्यर्थः ॥ ६३ ॥

व्रजभाषाटीका ।

इन व्यासजीनें और व्यासको कार्य वहभी कियो तथा वासों अधिकभी कियो अर्थात् महाभारत सत्यवतीसुतव्यासजीनें वर्णनकियो है ऐसें मत्स्यपुराणमें लिखो है यह भारत बनानो और व्यासनकी अपेक्षा इननें अधिक कार्य कियो ॥ ६२ ॥ शङ्का—भागवत पहलीसोंही चलोआवें है अथवा नवीनही प्रकटकियोहै ? तथा भागवतको सिद्धान्त पहिलीसोंही सिद्ध है अथवा नवीन है ? उत्तर—वेदमें मुख्यधर्म अत्यन्तही गुप्त है ब्रह्मही जानें ऐसो है कृपाकरकें हंसरूप धारणकरकें सनकादिकनके अर्थभी भगवाननें वेदोक्त गुह्यधर्मको वर्णनकियो, फिर जब भगवाननें इच्छाकरकें सर्वोद्धारार्थ प्रयत्नकियो तब परम्परा न रहवेके कारणसों और व्यास गुप्तवेदार्थको वर्णन नहिंकरसके तब भगवाननेंही अंशकरकें व्यासावतार धारणकियो ॥ ६३ ॥

स इदानीं तु गीतायां प्रकटो भगवत्कृतः ॥ तद्व्यासत्वाद्भागवतं पूर्वं भगवतोदितम् ॥ ६४ ॥ विश्वासार्थम्पुराणेषु पठितं भक्तिहेतुकम् ॥ प्रतिपाद्येशलीलायाः पुराणार्थन्ततःपुनः ॥६५॥

तत्त्वदीपप्रकाशः ।

अभिप्रायज्ञापनार्थं गीतायां स एव प्रकटीकृतः ॥ तर्हि तावन्मात्र एव वक्तव्यः स्यादित्यत आह॥ तद्व्यासत्वादिति ॥ यथा भागवतं गीताविस्तारस्तथा नामलीलारूपभगवद्विस्तारो व्यासः परम्परान्तरमप्याह ॥ पूर्वं भगवतोदितमिति ॥ ६४ ॥ तर्हि पञ्चरात्रवत्स्वतन्त्रता भवत्वित्याशंक्याह ॥ विश्वासार्थमिति ॥ आगमापेक्षयापि लोकाना पुराणे विश्वासः ॥ हेत्वन्तरमाह ॥ भक्तिहेतुकमिति ॥ तद्व्युपासनाविधायकम् ॥ अन्यमपि हेतुमाह ॥ प्रतिपाद्येति ॥ ईशलीला सर्गादिरूपा ॥ अन्यथा श्रोतुस्तद्भावापत्त्यभावे तत्तत्कर्म्मक्षयाभावान्न मोक्षः स्यात् ॥ अतो दश लीलाः पुराणलक्षणरूपा इति पुराणेषु प्रवेशः॥ ६५॥

आवरणभंगः ।

अभिप्रायज्ञानार्थमित्यादि ॥ ॥ स्वस्य भगवदभिप्रायज्ञातृत्वमस्तीति स्वाभिप्रायज्ञापनाय प्रकटीकृत इत्यर्थः ॥ तर्हीति ॥ ॥ यदि व्यवधायकेऽपगते गीतार्थ एव श्रीभागवते उक्तस्तर्हीत्यर्थः ॥ तव्यासत्वादिति ॥ ॥ तद्गीतापेक्षया आधिक्येन कथनं व्यासत्वात्स्वस्य नामलीलात्मकभगवद्विस्ताररूपत्वात् । एतदे॒व विवृण्वंति ॥यथेत्यादि॥ तथाच व्यासत्वाद्यथा वेदस्य व्यासः कृतस्तथा गीताया अपीत्यतस्तावन्मात्रन्नोक्तमित्यर्थः ॥ परम्परान्तरमप्याहेति ॥ ॥ आश्वमेधिके गातार्थो यथा प्रकारान्तरेणानूदितस्तथैवात्र कुतो नोक्तमित्याकांक्षायामेतदाहेत्यर्थः ॥ तथा च यथा चतुःश्लोक्यां यद्भगवतोक्तन्तदेव ब्रह्मणा नारदाय त्रिभिरध्यायैरुक्तन्तत्रैव त्वमेतद्विपुलीकुर्वित्याज्ञप्तश्च विपुलीकरणञ्चैकस्यैवार्थस्य तत्तदधिकारिणां हृदि प्रवेशाय नानाप्रकारेण कथनम् । यथाच नृसिंहोत्तरतापनीय ॐकारव्याख्यानस्य । अतो नारदवदेव व्यासेनापि विपुलीकरणात्परम्परान्तरेपीद-

म्भागवतङ्गीताविस्तार इत्यर्थः॥यद्वा "पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्"इति मोक्षधर्मे निरूपणाद्भगवद्वक्तृकत्वेऽपि "तृतीयमृषिसर्गत्वे देवर्षित्वमुपेत्य सः। तन्त्रं सात्वतमाचष्टे नैष्कर्म्यङ्कर्मणां यतः" इति वाक्यान्नारदवक्तृकत्वात्परम्परान्तरेऽपि स एवार्थ एवमत्रापीत्यर्थः ॥६४॥ एवमस्य प्रमाणस्य स्वरूपमुक्तम् ॥ तर्हीति ॥ ॥ यदि परम्परान्तरेण कथनन्तर्हीत्यर्थः ॥ विश्वासार्थमिति ॥ अतः स्वतन्त्रत्वन्नोक्तमित्यर्थः ॥ भक्तिहेतुकमिति ॥ ॥ भक्तिहेतुङ्गायतीति भक्तिहेतुकम्भक्तिसाधनाभिधायकमित्यर्थः ॥ दशलीलाकथनप्रयोजनमाहुः ॥ अन्यथेत्यादि ॥ ॥ एतेन प्रमेयं विशेषत उक्तम् ॥ ६५ ॥

व्रजभाषाटीका ।

व्यासजीकूँ अभिप्राय जतायवेकेलियें वेदके गूढार्थकूँ गीतामें प्रकटकियो तहाँ जितनों गीतामें हतो वितनोंही वर्णनकरते व्यासजीनें अधिक क्यों वर्णनकियो ऐसी शङ्का नहिंकरनी जैसें भागवत गीताको विस्तार है तैसें नामलीलारूप भगवानको विस्तार व्यासजी हैं तासों इननें गीताको विस्तारकियो, तथा भागवतकी औरभी परम्पार है॥ भगवाननें चार श्लोकनकरकें ब्रह्माजीसों कह्यो ब्रह्माजीनें तीनअध्यायकरकें नारदजीसों कह्यो और नारदजीकूँ विस्तारकरवेकी आज्ञा दीनी नारदजीनें वेदव्यासजीसों कह्यो वेदव्यासजीनेंभी विस्तारकियो, न्यारे न्यारे अधिकारीनके हृदयमें स्थिरकरवेकेलिये एकही सिद्धांतको अनेकरीतिसों वर्णनकरवेको नाम विस्तार कहेंहैं ॥ ६४ ॥ शंका– "पञ्चरात्रस्य सर्वस्य वक्ता नारायणः स्वयम्" इत्यादिवाक्यनकरकें नारदपंचरात्रके कर्ता नारायण हैं नारद प्रसिद्धकर्त्ता हैं तासों नारदपञ्चरात्र स्वतंत्र ग्रंथ है तैसें भागवतके कर्ताभी नारायण हैं तासों भागवतकोंभी स्वतंत्रताही होनीयोग्यहै॥ उत्तर–स्वतन्त्रता होयवेंसों नारदपंचरात्रके तुल्य भागवतभी तंत्रमें गिन्योजायगो लोकको (आगम) तंत्रग्रंथकी अपेक्षा पुराणोंमें अधिक विश्वास

है तासों पुराणनमेंही श्रीभागवतकी गणनाहै, दूसरो कारण येभी है नारदपंचरात्र उपासनाविधायक है श्रीभागवत भक्तिविधायक है। पुराणनमें गणनाको तृतीय हेतु यह है कि श्रीभागवतमें सर्गविसर्गादि दशप्रकारकी लीलाको प्रतिपादन है यदि दशप्रकारकी सर्गादिलीलाको वर्णन नहिं होय तो सुनवेवालेको कर्मक्षय नहीं होय कर्मनाशविना मोक्षभी नहींहोय तासों दशविधा लीला पुराणको लक्षण है सो श्रीभागवतमें मिलेहै तासों याको पुराणमें प्रवेशहै ॥ ६५ ॥

सर्वमुक्तिनिवृत्त्यर्थं वेदत्वन्तस्य नोक्तवान्॥ वेदकर्तृवचस्त्वाद्धि सतां सर्वम्भविष्यति ॥६६ ॥
स्वस्यान्यस्य च निर्वाहं वेदः कर्तुन्न हि क्षमः ।
अत्यन्तमलिना लोकास्ततो भागवतं कृतम्॥
एतदभ्यसनाल्लोको मुच्यतेऽनुपजीवनात ॥६७॥

तत्त्वदीपप्रकाशः ।

ननु पूर्वसिद्धं वेदत्वमेव कुतो नोक्तवाँस्तत्राह ॥ **सर्वमुक्तिनिवृत्त्यर्थमिति॥** व्यासस्यैतावान्सङ्कोचोऽग्रिमावतारकार्यसिद्ध्यर्थं विश्वासाभावाय वेदत्वाकथनं पाक्षिकप्रयोजनसिद्ध्यर्थं वा बुद्धावतारे वेदानान्निराकरणात् ॥ अतः पुराणार्थत्वेन वा तिष्ठत्विति युक्तमुत्पश्यामः ॥ विश्वासस्तु भविष्यतीत्याह ॥ **वेदेति** ॥ सतां दैत्यावेशरहितानाम् ॥ ६६ ॥ मर्यादाशास्त्रापेक्षया भागवतस्योत्कर्षं वक्तुमाह ॥ **स्वस्येति** ॥ वेदार्थानुष्ठाने सिद्धे वेदः सफलो भवति नतु स्वार्थानुष्ठानं सम्पादयितुं शक्तः ॥ अतः स्वनिर्वाहे कुण्ठतः ॥ तत्र हेतुः ॥ **अत्यन्तमलिना इति॥** तर्हि भागवते कथन्न दोषस्तत्राह ॥ **एतदभ्यसनादिति ॥** अभ्यासमात्रेणैव तदर्थानुष्ठानाभावेऽपि लोको मुच्यते ॥ परमत्रै-

को दोषस्तदुपजीवनमिति ॥ अतस्तदभावमाह ॥ अनुपजीवनादिति ॥ वृत्त्यर्थमुपायो न कर्तव्यः ॥ ६७ ॥

आवरणभंगः।

पूर्वसिद्धमिति ॥ ॥ वेदसारोद्धाररूपत्वात्पूर्वसिद्धम् ॥ सङ्कोचस्वरूपं सप्रयोजनमाहुः ॥ अग्रिमेत्यादि ॥ अभिप्रायान्तरमाहुः ॥ पाक्षिकेत्यादि ॥ ॥ तच्च प्रयोजनम्पुराणोक्तरीत्या सर्वमुक्तिः। तथा सति मूलस्थं सर्वमुक्तिनिवृत्त्यर्थपदं वेदत्वमित्यस्य विशेषणम्। सर्वमुक्तिनिवृत्तिरर्थः प्रयोजनं यस्य तादृशं वेदत्वमिति। एतदेव स्पष्टयन्ति॥ बुद्धेत्यादिना ॥ ॥ दैत्यावेशरहितानामिति ॥ यथा बुद्धावतारेण कृतेऽपि वेदनिंदने सर्वेषान्न बाह्यत्वमपि तु दैत्यादीनामेव तथात्रापीति भावः ॥६६॥ आहेति ॥ ॥ श्रीभागवतकरणमित्याहेत्यर्थः ॥ अभ्यासमात्रेणेत्यादि ॥ ॥ "किं वा परैरीश्वरः सद्यो हृद्यवरुद्ध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्" इत्यादिवाक्यात् ॥ "अस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे। भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा" इति वाक्यात् तस्माद्भारत सर्वात्मेत्यत्र श्रवणादिसाधनत्रयविधानमुखेनावृत्तिबोधनाच्च तथेत्यर्थः ॥ एतेन साधनम्फलञ्चोक्तम् ॥ तर्हि सर्वमुक्तिरेव स्यादिति तद्वारणाय कालादिकृतम्प्रतिबन्धकमुद्घाटयन्ति ॥ परमत्रापीत्यादि ॥ ६७ ॥

व्रजभाषाटीका।

वेदको साररूप श्रीभागवत है तासों वेदरूपही है परंतु व्यासजी याविषयमें संकोच करगयेहैं, आसुरजीवनको विश्वास नहीं करायवेकेलियें वेदत्व भागवतकूं नहिं कह्यो क्योंकि आसुरनकूं सन्मार्गसों निवृत्तकरनों बुद्धावतारको काम है सो व्यासजीनें पहिलीसोंही कियोहै। दूसरो प्रयोजन यह है जो भागवतकूं वेदरूप मानते तो बुद्धभगवाननें वेदनको खंडन कियो तामें श्रीभागवतकोभी खंडन होयजातो तथा श्रीभागवतकी वेदमें गणना होती तो वेदसों जैसें सबकी मुक्ति नहिं होवेहै ब्राह्मण क्षत्रिय वे-

श्य इन तीनोंवर्णनकीही मुक्ति होवेहै ऐसें भागवतसोंभी सबकी मुक्ति नहिं होती । तहाँ भागवतकूँ वेदरूप नहिंमानोगे तो दैवजीवनकोभी भागवतमें विश्वास नहिं रहेगो ये शंका नहिं करनी क्योंकि वेदके कर्ता जो भगवान् हैं उनहींको वचन श्रीभागवत है तासों सज्जननको तो श्रीभावगतसोंही सब सिद्ध होयजायगो ॥ ६६ ॥ मर्यादाशास्त्रकी अपेक्षा भागवतमें यह अधिकाई है कि वेदके अर्थको अनुष्ठान करें सो वेद फल देसकें हैं परन्तु वेदकी ये सामर्थ्य नहिं है कि आचारहीन मनुष्यनसों अपनो अनुष्ठान करवायकें फल देंसकें तासों " आचारहीनं न पुनंति वेदाः " इत्यादिवाक्यसों आचारहीन होयवेसों अत्यंतमलिन जो मनुष्य हैं वे वेदके अधिकारी नहिं हैं उनकूँ मुक्तकरवेमें वेद कुंठित अर्थात् समर्थ नहिं हैं ये दोष भागवतमें नहिंहै क्यों कि ये तो सबके उद्धारकरवेके लिये प्रकटहैं । अर्थको अनुष्ठान नहिं होयसकें तो श्रीभागवत पढवेसुनवेके अभ्यासमात्रसोंभी लोक मुक्त होजावें हैं, क्योंकि " यस्यां वै श्रूयमाणायां " " शुश्रूषुभिस्तत्क्षणात्" इत्यादि भागवतकेही वचननमें श्रवणकरकें भगवान्की तथा भक्तिकी प्राप्ति लिखें हैं ॥ परंतु यामेंभी एक दोष है याकरकें जिविका करनों, तासों जो पुरुष श्रीभागवत करकें मुक्त होनोंचाहे वाकूँ श्रीभागवतको जीविकाके लिये उपयोग नहिं करनोचाहिये ॥ ६७ ॥

कालादिधर्महेतूनामभावात्सांप्रतङ्कलौ ॥ वेदस्मृतिपुराणानामर्थाः सर्वे हि बाधिताः॥६८॥
कालादिसाधनापेक्षारहितः सर्वतोऽधिकः॥६९॥

तत्त्वदीपप्रकाशः।

नयोर्वैलक्षण्ये युक्तिमाह ॥ कालादीति ॥ कालादयः षट् शुद्धाः
ाधयन्ति ते कलौ कथमपि न शुद्धा भवन्ति॥ वेदाद्यर्थाश्च का-
ाधनापेक्षाः॥ ६८॥भागवतार्थस्तु न तानपेक्षते नित्यत्वात्सर्वाधि-
त्सुलभत्वाच्चेत्याह ॥ कालादिसाधनापेक्षारहित इति ॥६९॥

आवरणभंगः।

ोरित्यादि ॥ ॥ वेदार्थापेक्षया श्रीभागवतार्थस्य बलवत्त्वम्बोधयितुमु-
क्तश्रीभागवतोक्तसाधनयोर्वैलक्षण्ये युक्तिमाहेत्यर्थः ॥ ६८ ॥ नित्यत्वा-
॥ ॥ नित्यत्वन्तु "तस्मात्सर्वात्मना राजन्हरिः सर्वत्र सर्व-
श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यो भगवान्नृणाम्" इत्यादि शुकवाक्येन
सर्वकाले च कर्तव्यत्वेनोक्तत्वाज्ज्ञेयम् ॥ सर्वाधिकारत्वञ्च 'देवो-
नुष्यो वा' इति सप्तमस्कन्धाज्ज्ञेयम् ॥ सुलभत्वञ्च 'त्वन्तु सर्वम्परित्यज्य'
मान्मद्भक्तियुक्तस्य' इत्यादिवाक्येभ्यो ज्ञेयम्॥ एतेन ब्राह्मपाद्मवैष्णवादि-
जगत्कर्तृत्वादिलक्षणकब्रह्मत्वेन भगवतः प्रतिपादनेऽपि स्वातन्त्र्येण
ाःप्रतिपादने शतकोटिविस्तीर्णपुराणसात्विकभागसमसनरूपत्वमेव तस्य
ानुभवपूर्वकत्वं समाध्यभावादतएव वैष्णवादीनामेतच्छेषत्वम्। अतएवचै-
म्यम्पुराणान्तरे दृश्यते गीतामाहात्म्यवत् । नत्वन्येषां नाप्यस्मिन्नन्ये-
अतएव चैतस्य परिपक्ववेदफलरूपत्वं निगमकल्पतरोरितिवाक्यात्। न-
तथावाक्याभावादित्यपि श्रैष्ठ्यं सूचितं ज्ञेयम्। एवं श्रीभागवतस्य स-
उत्कृष्टत्वम्प्रमाणप्रमेयसाधनफलैरुपपादितम्। तेन वेदादिसन्देहवारक-
ातम् ॥ ६९ ॥

व्रजभाषाटीका।

भागवतमें परस्पर विलक्षणता दिखावें हैं, काल देश द्रव्य
न्त्र कर्म ये छः पदार्थ शुद्ध होंय तब फल सिद्धकरें हैं
द स्मृति पुराणार्थ इन छःपदार्थनके आधीन हैं। कलियुगमें
दार्थ कोई रीतिसोंभी शुद्ध नहिं होयसकें, कलियुग जैसो
ो हेतु काल है देश है वे म्लेच्छनकरके आक्रांत द्रव्य जे
कके सोमलता आदि पदार्थ हैं वेभी नहिं मिलें हैं। जे

मिले हैं वेभी शुद्ध नाहिं मिलें हैं । कर्ता आचारहीन मलिन हैं, मंत्रभी बहुतकरकें स्वरअर्थकरकें हीन हैं, कर्मकरवेकीभी रीति परम्पराप्राप्त नहिंहै तासों वेदार्थानुष्ठान अभी दुर्लभ है॥ ६८ ॥ भागवतार्थ तो इनकी अपेक्षा नाहिं करें है क्योंकि "हरिः सर्वत्र सर्वदा श्रोतव्यः" इत्यादिवाक्यनसों भागवतको तो सब कालमें सबदेशमें सुननों कीर्तनकरनो लिखें हैं तासों नित्यहै। तथा दैव आसुर मनुष्य कोई होय सबही याके अधिकारी हैं और सुलभ है सो१००कोड पुराणमें३३ कोड राजसभाग है३३ कोड तामसभाग है ३३ कोड सात्विकभाग है तिनमें जो३३ तेतीसक्कोडके अंदाज सात्विकभाग है वाको संक्षेपकरके भागवतमेंही निरूपण है स्वतंत्रतासों भगवान्‌के यशको याहीमें वर्णन है और सात्विक पुराण याके अंग हैं याहीसों भागवतको माहात्म्य और पुराणमें है भागवतमें और पुराणको माहात्म्य नाहिं है॥ वेदको पक्यो भयो रसमय फल श्रीभागवत है ॥ वेदादिकनके सन्देह दूरकरवेवारो है॥६९॥

फलतः सुगमश्चैव सर्वथा फलसाधकः ॥ योगसांख्ये तु ये मुख्ये तयोः सत्वे प्रयोजनम् ॥ ज्ञानदुर्बलवादानान्न मनोरथवार्तया ॥ सिद्धिं यान्ति नरा दुष्टाव्यामोहस्तु ततः फलम्॥ ॥ ७० ॥ ग्रन्थान् पुराणवाक्यानि वेदरूपेण वै क्वचित ॥ कृत्वा वृथा वेषधराः कृष्णन्नोपासते परे ॥ ७१ ॥ इति पुराणप्रकरणम् ॥

तत्त्वदीपप्रकाशः ।

नत्वन्योऽपि मार्गो योगः सांख्यश्च कालाद्यपेक्षारहितः । योगेनैव

सर्वानर्थनिवृत्तिर्ज्ञानेन चेत्याशङ्क्यैतद्द्वयन्दूषयन्ति॥ **योगसांख्ये इति**॥ किं मुख्ये योगसाख्ये तथाभूते आहोस्विद्याद्दशे तादृशे ॥ तत्राद्ये नास्मिन्युगे भवतस्तत्साधनानाङ्कालाद्यपेक्षणात् ॥ साधनरहितयोस्त्वप्रयोजकत्वं सत्वे सत्यरूपत्वे ससाधने उत्कृष्टरूपे योगसांख्ये सफले इत्यर्थः॥ अन्ये पुनर्ज्ञानदुर्बलवादसिद्धे॥अतस्तेषाम्मनोरथकल्पितत्वान्न ताभ्याम्फलङ्किन्तु व्यामोह एव ताभ्याञ्जन्यते ॥ ७० ॥ कथमेवमवगम्यत इत्याकांक्षायामाह ॥ **ग्रन्थानिति** ॥ स्थूलान्मिथ्यार्थप्रतिपादकान् यथा बुद्धिस्तत्रैव लग्ना भवति पुराणवाक्यानि च कल्पयन्ति क्वचिद्वेदरूपेणापि ॥ यथा परमहंसोपनिषत् ॥ एवं कृते 'यज्जातन्तदाह ॥ **वृथा वेषधरा इति** ॥ मुण्डादिपारलौकिकवेषान्धृत्वा मोहः सिद्ध इति स्वयमपि कृष्णं नोपासते तथा सति भजनम्प्रवर्तेतेति ॥ एवम्भागवतेनैव सर्वनिस्तार इति पुराणप्रकरणे निरूपितम् ॥ ७१ ॥

आवरणभंगः ।

अतः परं गीतायां श्रीभागवते च योगसांख्ययोरप्युक्तत्वात्तयोरेतत्साम्यमाशंक्य परिहरन्ति ॥ नन्वित्यादि ॥ ॥ मुख्ययोगसांख्ये इति । पौराणिके पतञ्जलिप्रणीते चेत्यर्थः ॥ मूले प्रयोजनमिति ॥ ॥ सिद्ध्यतीति शेषः । एतदेव विवृण्वन्ति ॥ ससाधनेत्यादि ॥ ॥ अन्य इति ॥ ॥ पतञ्जलिकपिलप्रणीतेषु वामाद्यागमेषूच्यमाने चेत्यर्थः ॥ ७० ॥ कल्पयंतीति ॥ ॥ यथा आत्मपुराणङ्केनचिन्मायावादिना कल्पितन्तथेत्यर्थः ॥ परमहंसोपनिषदिति ॥ ॥ उपलक्षणमेतत् ॥ वैतथ्याद्वैतालातशांत्याख्यम्प्रकरणत्रयं मांडूक्यस्थाः श्लोकाश्च गौडपादीयान्येतानीदानींतनैरुपनिषत्सु पठ्यन्ते । एवमन्यान्यपि सर्वोपनिषदादीनि प्राचीनमायावादिग्रन्थेष्वपि तत्सम्मत्यदर्शनादाकरालाभाच्च ज्ञेयानि । तथासतीति ॥ ॥ उपासने कृते सतीत्यर्थः ॥ यद्यपि तत्र भजनन्तथापि द्वारन्तद्भवतीति तदपि निरुन्धन्तीति भावः ॥ प्रस्तुतप्रासङ्गिकसर्वनिरूपणेन सिद्धमाहुः । एवम्भागवतेत्यादि ॥ ॥ निरूपितमिति ॥ ॥ बलवत्वाय निरूपितम् ॥ ७१ ॥

इति पुराणप्रकरणम् ॥

व्रजभाषाटीका ।

शङ्का–योगसांख्यभी गीता तथा भागवतमें लिखेहैं तथा कालदेशादिकनकीभी अपेक्षा इनकूँ नहिं है तथा ज्ञानभी सर्वकर्मनकूँ भस्म करवेवारो है तासों इन तीन साधनकरकेभी अनर्थ निवृत्ति होजायगी ॥ उत्तर–पौराणिक तथा पातञ्जलिप्रणीत जे योगसांख्य हैं वेही अनर्थकी निवृत्ति करवेवाले हैं अथवा जहां तहां लिखे सबप्रकारकेही सांख्य योग अनर्थकी निवृत्ति करवेवारे हैं यह विचार करनो योग्यहै. तहां पौराणिक पातंजल सांख्य योग तो कालदेशादिसाधनकी अपेक्षावाले हैं तासों यायुगमें नहिं सिद्धहोयसकें। जे देशकालादिसाधनरहित योग सांख्य हैं वे प्रयोजन सिद्धकरवेवारे नहिं हैं किन्तु साधनसहितही योगसांख्य उत्तम हैं तथा वाममार्गीनके शास्त्रनमें कहे योगसांख्य तो ज्ञानदुर्बल हैं तासों सिद्ध नहिं हैं अर्थात् असंगत हैं मनकी कल्पनाके बनेभये हैं तासों उनकरके फल सिद्ध नहिं होवे है किन्तु केवल मोहके करवेवारे हैं ॥ ७० ॥ ये बात कैसें जानी जावें है तहाँ आज्ञा करें हैं ॥ ग्रन्थानिति ॥ वृथा मुंडादि पारलौकिक वेषकूँ धारण करकें मिथ्या अर्थके कहवेवारे बडे बडे ग्रन्थनकूँ बनायदेहैं जिसमें मनुष्यकी बुद्धि शीघ्र लगजाय ऐसेंही कितनेक पुराणनके वाक्यभी मनसोंही बनालिये हैं। जैसें आत्मपुराण कोई मायावादीनें बनायलियो है वेदमेंभी कितनेक उपनिषत् बनायलिये हैं जैसें हंसोपनिषद् मांडूक्यके गौडपादके बनायेभये श्लोक उपनिषदनमें पढादिये हैं। जैसें सर्वोपनिषद् प्राचीनमायावादके ग्रन्थमेंभी जाकी संमति नहीं दीखपडे है इत्यादि अनेक शास्त्र बनायकें बनायवेवारे स्वयंभी कृष्णकी उपासना नहिंकरें हैं वे करें होंय तो उनकूँ देखकें औरभी भजनमें प्रवृत्त होंय तासों भागवतसोंही सब

ार होयसकेहै येही बात पुराणप्रकरणमें निरूपण करीहै॥७१॥

इति पुराणप्रकरणं संपूर्णम् ॥

ङ्गानि यथा वेदे वेदरक्षाफलानि हि॥ स्व-
तोऽर्थतश्चैव ह्यनुष्ठानात्रिधा हि तत्॥७२॥
क्षा छन्दः स्वरूपे तु निरुक्तं व्याकृतिस्त-
॥ अर्थे ज्योतिस्तथा कल्पो ह्यनुष्ठाने प्र-
जकः॥ विशेषतो हीदमुक्तं सर्वं सर्वत्र चैव-
॥ ७३ ॥

तत्त्वदीपप्रकाशः ।

त्र श्रुतिस्मृतिपुराणानि निरूप्य षडङ्गानि निरूपयन्ति ॥ षडङ्गा- ॥ "शिक्षा कल्पो व्याकरणं निरुक्तञ्छन्दो ज्योतिषम्" इति ॥ सामान्यफलं वेदरक्षा सा च त्रिविधा ॥ वैदिकशब्दा विसदृशा मद्रङ्कर्णेभिः" इत्यादौ पण्डितैरन्यः थाकरणं सम्भवति तन्निराकृत्य तो रक्षणीयाः ॥ अर्थतोऽपि रक्षणीयाः ॥ अन्यथा यागमेव न जा- ॥ अतएव साम्प्रतन्दानमेव याग म्मन्यन्ते॥ अनुष्ठानादपि रक्षा॥ ाऽन्यथानुष्ठानं स्यात्कल्पाद्यभावे ॥ ७२ ॥ तत्र द्वयोर्द्वयोरुप- ह ॥ शिक्षेति ॥ स्वरादिविधौ शब्देऽपि व्याकरणोपयोग इति ारमाशंक्याह ॥ विशेषत इति ॥ ७३ ॥

आवरणभङ्गः ।

ङ्गानीति ॥ ॥ तथाच वेदाङ्गत्वेन रूपेणैषाम्प्रामाण्यमित्यर्थः । फ- ॥ एतेषामित्यादि ॥ ॥ त्रिविधेति ॥ ॥ स्वरूपरक्षार्थं रक्षानुष्ठा- त्यर्थः । तद्विशदीकुर्वन्ति ॥ वैदिकेत्यादि ॥ अतएवेति ॥ ॥ याग- ाज्ञानादेवेत्यर्थः ॥ सामान्यफलमुक्त्वा विशेषफलं वक्तुं यत्र यस्य योग- त ॥ ७२ ॥ तत्रेत्यादि ॥ ॥ शिक्षा छन्द इति । तत्र शिक्षा " अ- म्प्रवक्ष्यामि " इत्यादि ॥ पञ्चखण्डात्मिका पाणिनिप्रकाशिता सर्ववेद-

साधारणा । तस्याः प्रयोजनं चोदात्तानुदात्तस्वरितह्रस्वदीर्घप्लुतविशिष्टस्वरव्यञ्जनात्मकवर्णविशेषज्ञानं उच्चारणप्रकारविशेषज्ञानं चेति स्वरूप उपयोगः ॥ तदभावे मन्त्राणामनर्थजनकत्वं स्यात् । "मन्त्रो हीनः स्वरतो वर्णतो वा" इतिवाक्यात् । छन्दस्तु "मयरसतजभनलगसम्मितम्" इत्याद्यष्टाध्यायात्मकम्पिङ्गलेन प्रकाशितम् ॥ तत्र अथालौकिकमित्यादिनाऽध्यायत्रयेण गायत्र्युष्णिगनुष्टुप् जगतीति सप्तछन्दांसि सावान्तरभेदानि निरूपितानि । अथ लौकिकमित्याद्यध्यायपञ्चके तु पुराणेतिहासादिषूपयुक्तानि काव्याद्युपयुक्तानि च प्रसंगतो निरूपितानि ॥ व्याकरणे लौकिकपदवच्छदांसि च मन्त्रेषूपयुक्तानि अन्यथा गायत्र्यादौ वरेणियमिति व्यूहायेन पाठो न स्यात्तदभावे च मन्त्रो वर्णतो हीयेत । अतच्छन्दसोऽपि स्वरूपोपयोगः ॥ निरुक्तव्याकरणयोर्ज्योतिःकल्पयोश्च यथायथमर्थेऽनुष्ठाने चोपयोगः स्पष्ट एव ॥ किञ्चिदाशंक्य परिहरन्ति ॥ स्वरादीत्यादि ॥ ॥ विशेषत इति ॥ ॥ तथाच व्याकरणस्य यः स्वराद्युपयोगः सोर्थद्वारकः । यथेन्द्रशत्रुपदे स्वरभेदेन बहुव्रीहिणाऽर्थस्य वैपरीत्यमभूत्तथाभूतदिति । अतः परम्परया त्रिष्वपि षण्णामुपयोगोऽतो न दोष इत्यर्थः ॥७३॥

व्रजभाषाटीका ।

वेदके छः अंगनको निरूपण करें हैं ॥ शिक्षा कल्पसूत्र व्याकरण निरुक्त छन्दोग्रन्थ ज्योतिष ये छः शास्त्र वेदके अङ्ग हैं । वेदकी रक्षा करनों इनको सामान्य फल है ॥ वेदकी रक्षा तीनप्रकारकी है स्वरूपरक्षा अर्थात् वेदके शब्द लोकके शब्दसों विलक्षण हैं स्वरवर्णनकूँ जैसेंके तैसें बनेंराखने जो याप्रकारकी रक्षा नहिं कीनीजाय तो पंडितलोगभी "भद्रंकर्णेभिः" याठिकाने "भद्रं कर्णैः" ऐसो पाठ करदेंगे तासों अन्यथा पाठ न होय यालियें वेदकी स्वरूपसों रक्षा करी॥ ऐसेही वेदके अर्थकीभी रक्षा करनी अर्थकी रक्षा न होयगी तो यज्ञपदार्थकूँभी लोग नहिंजानेंगे जैसे अभी यज्ञकूँनां हें जानेंहैं वे लोग यजधातुको दान अर्थमात्र ग्रहण करके दानकूँही यज्ञ मानेंहैं ऐसेंही वेदके अनुष्ठानकीभी रक्षा करनीयोग्य है अन्यथा कल्पसूत्रकरकें कर्म-

की रक्षा न करी जायगी तो यज्ञादिकनको अनुष्ठान नहिं होयसकेंगो तासों दो दो अंगनको एक एकके रक्षामें उपयोग है॥७२॥ शिक्षा छन्दोग्रंथ वेदके स्वरूपकी रक्षा करवेवारे हैं अर्थात् स्वर अक्षरनकूँ यथार्थ राखवेवारे हैं। व्याकरण निरुक्त दोनों शास्त्र वेदके अर्थकी रक्षा करवेवारेहैं। ज्योतिष कल्पसूत्र वेदके अनुष्ठानकी रक्षा करवेवारेहैं ॥ ७३ ॥

ये धातुशब्दा यत्रार्थे उपदेशे प्रकीर्तिताः ॥ तथैवार्थो वेदराशेः कर्त्तव्यो नान्यथा क्वचित् ॥ ७४ ॥ साक्षाद्धर्मप्रतीतिस्तु कल्पः स्मृतिषु चिन्तितः ॥ दर्शादिकालनिर्धारो ज्योतिःशास्त्रफलं स्मृतम् ॥ ७५ ॥

तत्त्वदीपप्रकाशः ।

कथं व्याकरणस्यार्थोपयोग इत्याशंक्याह ॥ ये धातुशब्दा इति ॥ धातुपारायणे नामपारायणे च यत्रार्थे "यज—देवपूजासङ्गतिकरणदानेषु" गौः ग्मा ज्मा क्ष्मेत्यादिप्रकरणेन पृथिव्या इति प्रकीर्तितास्तथैव वेदार्थो निर्णेतव्यः॥यथा कैश्चिदुक्तं"विष्णोःपदे परमे मध्व उत्सः"उत्सशब्देन कूपवाचकेन उत्सुको व्याख्यातः ॥ तथा व्याख्याने स्वार्थात्प्रच्यवेतातस्तन्निषेधार्थमाह ॥ कर्तव्यो नान्यथा क्वचिदिति ॥७४॥ ननु कल्पसूत्रे साङ्कर्यमङ्गत्वं स्मृतित्वञ्चेत्याशंक्याह ॥ साक्षादिति ॥ तत्र धर्मः प्रतीयत इति वेदत्वं स्मृतित्वञ्चोक्तं वस्तुतस्त्वङ्गत्वमेव ॥ ज्योतिष उपयोगमाह ॥ दर्शादीति ॥ ७५ ॥

आवरणभंगः ।

॥ कथमित्यादि ॥ ॥ व्याकरणस्य पदसाधुताज्ञापनरूपमेव प्रयोजनं स्फुटम्प्रतीयते इति कथमित्यर्थः ॥ ॥ नामपारायणे इति ॥ ॥ निघण्टुरूपे

कोश इत्यर्थः॥ एवञ्चाष्टाध्याय्यामर्थोपयोगस्यास्पष्टत्वेऽपि धातुपाठादौ तदुपयोगः स्फुट इति न दोष इति भावः प्रकटीकृतः ॥ ७४ ॥ स्मृतित्वं चेति चकारो वेदत्वस्यापि समुच्चायकः ॥ ज्योतिस्तु पञ्चसंवत्सरमयमित्यारम्भकं साधारणं स्पष्टमेव ॥ ७५ ॥

व्रजभाषाटीका ।

विशेषकरके याही प्रकारसों रक्षा है। सामान्यरीतिसों तो सबही अंग सबप्रकारकी रक्षा करें हैं॥ जैसें व्याकरणकरकें स्वरवर्णनकी भी रक्षा होयहै, व्याकरणको वेदार्थमें उपयोग दिखावें हैं "ये धात्वित्यादि" उपदेशसमयमें वेदनिघण्टुमें जे धातुशब्द जाअर्थमें वर्णनकिये उनके अनुसारही वेदको अर्थ करनों॥ अर्थमें व्याकरणको उपयोग जैसें यजधातु देवपूजासंगतिकरणदान इन अर्थनमें है जैसें गौःग्माज्माक्ष्मा आदि नाम पृथ्वीकेप्रकरणकरके कहे हैं वैसेही वेदार्थको निर्णय करनो। जैसें "विष्णोः पदे परमे मध्व उत्सः" यामंत्रमें कूपवाचक उत्सशब्दको उत्सुक अर्थ कितनेक पंडितजननें कियोहै ऐसें करवेमें वेदार्थकी हानी होयहै तासों वेदको अन्यथा अर्थ कभी नहिंकरनो ॥ ७४ ॥ कल्पसूत्रमें साक्षाद्धर्म यज्ञादिक प्रतीत होयहैं तासों वेदत्व स्मृतित्व दोनों कहेहैं वस्तुतः अंगनमेंही कल्पसूत्रकी गणनाहै ॥ वेदमें दर्शादिकालमें यज्ञकरनों लिखें हैं तहाँ दर्श कैसे समयको नाम है इत्यादि कालनिर्धार करनों ज्योतिषको फल है ॥७५॥

पदनिर्वचनाद्वेदे निघण्टुविवृतावपि ॥ निरुक्तस्याङ्गता प्रोक्ता तथाल्पस्तस्य सञ्चरः ॥ ॥ ७६ ॥ व्याकृतिः पाणिनीयं हि प्रातिशाख्यन्तु शब्दगम् ॥ आदिमत्वाल्लक्षणानां नाङ्गत्वम्पूर्वचोदितम् ॥ ७७ ॥

तत्त्वदीपप्रकाशः।

निरुक्तस्य विवरणरूपस्य कथमङ्गत्वमित्याशंक्याह ॥ पदनिर्वचनादिति॥ निघण्टौ यद्यपि कोशवच्छब्दा उक्तास्तथापि निर्वचनाभावान्नाङ्गत्वम्॥ विवृतित्वेऽपि निर्वचनादेव निरुक्तस्याङ्गत्वं व्याकरणापेक्षया तस्याल्पो विषयः ॥७६॥ यद्यपि बहूनि व्याकरणानि सन्ति तथापि पाणिनीयमेवाङ्गम् ॥ प्रातिशाख्यन्तु प्रतिशाखं भिन्नमिति न साधारणमङ्गं यद्यपि कल्पेप्ययमदोषः सम्भवति तथापि कल्पत्वेनाङ्गता ॥ प्रातिशाख्ये तु क्वापि नार्थज्ञानम्भवति ॥ अतः शब्दोपयोगित्वात्पाणिनीयान्तर्भावेनैवाङ्गता ॥ ७७ ॥

आवरणभंगः।

इत्याहेति ॥ इति हेतोरङ्गत्वप्रयोजकान्निरुक्तस्वरूपमाहेत्यर्थः । निरुक्तश्च यास्ककृतं "समाम्नायः समाम्नातः" इत्यादित्रयोदशाध्यायात्मकम् । तत्रच नामाख्यातनिपातोपसर्गरूपश्चतुर्विधम्पदजातान्निरूप्य मंत्राणामर्थो दर्शितः । अन्यथा "सृण्येव जर्भरी तुर्भरी पर्फरी" इत्यादिदुरूहपदानामर्थो न ज्ञायेतेति तदावश्यकत्वान्निघण्टुस्तु निरुक्तशेषत्वेनोपयुक्त इत्याशयेनाहुः ॥ निघण्टावित्यादि ॥ ७६॥ व्याकरणानामनेकत्वात्किञ्चिदाहुः ॥ ॥ यद्यपिबहूनीति ॥ ब्राह्मरौद्रचान्द्रादीनि कौमारकालापसारस्वतादीनि च ॥ ॥ तथापीति ॥ ब्रह्मादीनां च लोकमात्रोपयोगित्वादित्यर्थः ॥ ७७ ॥

व्रजभाषाटीका।

तहाँ निरुक्तमें मन्त्रकी व्याख्या लिखीहै वाकूँ अङ्गपणो कैसें सम्भवसकें यह शङ्का नाहिंकरनी निघण्टुमें कोशके समान शब्द कहेहैं परन्तु उनकी व्युत्पत्ति नाहिं करी तासों निघंटु वेदको अंग-नहिंहै निरुक्तकोही अंगहै ॥ निरुक्तमें तो शब्दनको निर्वचन (व्युत्पत्ति) कीनी है तासों वेदव्याख्यारूपत्व है तथापि अंगत्व है निरुक्त नहिंहोय तो " सृण्येव जर्भरी तुर्भरी पर्फरी " इत्यादि-पदनके अर्थ नहिंजानेंजावें तथापि व्याकरणकी अपेक्षा निरुक्त-को संचार वेदमें अल्पहै ॥ ७६ ॥ ऐसेही व्याकरण बहुत हैं-ति-

नमें पाणिनीयव्याकरणही वेदको अंग है प्रातिशाख्य वेदभाष्य तो शाखा २ प्रति न्यारो २ है तासों साधारणरीतिसों सर्ववेदको अङ्ग नहिं है शब्दको उपयोगी है तासों व्याकरणमें याको अन्तर्भाव है॥ लक्षणग्रंथनको प्रातिशाख्यमें अन्तर्भाव है प्रातिशाख्यको व्याकरणमें अन्तर्भाव है ॥ ७७ ॥

अनिङ्ग्यादिप्रातिशाख्ये विशेद्व्याकरणे तु तत ॥ छन्दसः पाठहेतुत्वं शब्दज्ञानोपयोगतः ॥ ७८ ॥ आरोग्ये धर्मसिद्धिः स्यात् रक्षा च धनुषो भवेत ॥ उद्वेगहानिर्गान्धर्वे स्थापत्यं च स्रुगादिषु ॥ ७९ ॥

तत्त्वदीपप्रकाशः ।

तथा लक्षणानान्तेषान्मङ्गे प्रवेशप्रकारमाह ॥ अनिङ्ग्यादीति ॥ सर्वाणि लक्षणानि प्रातिशाख्ये प्रविशन्ति ॥ प्रातिशाख्यं व्याकरणे ॥ छन्दसोऽनुष्ठानेप्युपयोगो दृश्यत इति कथम्पाठहेतुत्वन्तत्राह ॥ शब्दज्ञानोपयोगत इति ॥ अनुष्ठानेऽपि शब्दधर्मत्वेनैव तज्ज्ञानमुपयुज्यते नान्यथेत्यर्थः॥७८॥ उपवेदानाम्प्रयोजनमाह ॥ आरोग्य इति॥ ऋग्वेदस्यायुर्वेद उपवेदः। तस्यारोग्यम्फलन्तेन धर्मः सिद्ध्यतीत्यारोग्य द्वारा धर्मोपयोगः। एवं रक्षाद्वारा धनुर्वेदस्य। उद्वेगहानिद्वारा गान्धर्वस्य ॥ स्थापत्यस्य तु स्रुगादिषूपयोगः ॥ एवमष्टादशविद्यानान्धर्मोपयोग उक्तः॥ अर्थशास्त्रस्यार्थद्वारैव तदुपयोगः॥ तच्च न्याये प्रविशति॥ तथा वात्स्यायनादीनाङ्कामोपयोगः स च दृष्टान्तो मोक्षसुखे ॥ अतो नाष्टादशविद्यासु निरूपितः ॥ तच्छेषत्वमेव काव्यालङ्कारनाटकादीनाम् ॥ यथाग्निमथनं योगे दृष्टान्तस्तथा मोक्षे काम इति सर्वमनवद्यम् ॥ ७९ ॥

आवरणभंगः ।

लक्षणानामिति ॥ ग्रन्थविशेषाणाम् ॥ ॥ अनिङ्ग्यादीति इङ्ग्यं मावग्रहपदम् । न इङ्ग्यमनिङ्ग्यन्निरवग्रहमित्यादीनीत्यर्थः ॥ अवग्रहश्च मात्राकालविशेषः संहिताविच्छेदरूपः ॥ यथा "रत्नधातमम्" इत्यादौ उपयोग इति । कृतस्यापि कर्मणः छन्दोज्ञानाभावे वैफल्यस्मारणात्साम्नां शरलेशप्रसङ्ग-वारणाच्च तथेत्यर्थः । शरलेशप्रसङ्गश्च नवमस्य द्वितीये विचारितः । तत्र हि साम त्र्यर्चे गेयमिति वाक्याद्व्यृत्तिसृषु ऋक्षु गेयन्तर्त्किं विषमच्छन्दस्कासु वा समच्छन्दस्कासु वा यथेच्छङ्गेयमुत समास्वेवेति सन्देहे । यथेच्छङ्गेयान्नियामकस्या-भावादिति पूर्वपक्षे समास्वेवेति सिद्धान्तितम् । यदि अधिकच्छन्दस्कायामभ्युत्प-न्नं सामान्यूनच्छन्दस्कयोरुत्तरयोर्गेयन्तदा सामभागेनकपूर्तेरवशिष्टः सामभागः आश्रयाभावाद्धिंसितः स्यात् । यदि सामयोनेरधिकच्छन्दस्कयोर्गायेत्तदा साम्नो-ल्पत्वादवशिष्ट ऋक्भागः सामहीनःस्यादसमानास्वेवङ्गेयमिति । अतोऽत्र छन्दस्त-द्वारण उपयोगात्पाठोपयोगोऽनुष्ठाने शब्दधर्मत्वेनैव च स इति ॥ ७८ ॥ ॥ आयु-र्वेद इति ॥ ब्रह्मप्राजापत्याश्विधन्वन्तरीन्द्रभरद्वाजात्रेयाग्निवेश्यभोजभेडादिप्रणी-तं वैद्यकशास्त्रमित्यर्थः ॥ ॥ धनुर्वेदस्येति ॥ धनुर्वेदश्च महादेवप्रणीतस्ततो विश्वामित्रप्रणीतः पादचतुष्टयात्मकः । तत्र प्रथमो दीक्षापादः । तस्मिन्धनुर्लक्षण-मधिकारिलक्षणञ्च कृतम् । धनुः शब्दश्चापे रूढोपि चतुर्विधायुधेषु वर्तते । चतु-र्विधत्वञ्च । मुक्तममुक्तम्मुक्तामुक्तं यन्त्रमुक्तञ्चेति भेदात् । मुक्तञ्चक्रादि । अमुक्त-ङ्खड्गादि । मुक्तामुक्तं शल्यावान्तरभेदादि । यन्त्रमुक्तं शरादि । तत्र मुक्तं अस्त्रमि-त्युच्यते । अमुक्तं शस्त्रमित्युच्यते । अस्त्रञ्च ब्राह्मवैष्णवादिभेदेनानेकविधम् । साधिदैवतेषु समन्त्रकेषु चतुर्विधायुधेषु येषामधिकारो हस्त्यश्वरथारूढपदाती-नान्ते सर्वे दीक्षाभिषेकशकुनमङ्गलकरणसहिता निरूपिताः ॥ द्वितीये संग्रह-पादे गुरुसम्प्रदायसिद्धानामस्त्रविशेषाणामभ्यासो निरूपितः ॥ तृतीये पादे सिद्धिनामके मन्त्रदेवतासिद्धिकरणं निरूपितश्चतुर्थे प्रयोगपादे देवतार्चनाभ्या-सादिभिः सिद्धानामस्त्रविशेषाणाम्प्रयोगो निरूपितः ॥ सचोपवेदो रक्षोपयोगीति॥ तथा गान्धर्वस्येति ॥ स च भरतेन प्रणीतः । स्थापत्यञ्च विश्वकर्मप्रणीतम् । अतःस्थापत्यस्योपवेदत्वं श्रीभागवतानुसारेणोक्तम् ॥ ॥ अष्टादशविद्यानामिति ॥ "पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानान्धर्मस्य च चतुर्दश" इति याज्ञवल्क्योक्तानामुपवेदसाहित्येऽष्टादशत्वम् ॥ अत्र फलकथ-नेनाङ्गोपवेदप्रमेयबलमुक्तप्रायम् । ननु गान्धर्वं चार्थशास्त्रकमिति भविष्यवाक्ये अर्थशास्त्रस्योपवेदत्वमुक्तन्तस्य का गतिरित्यत आहुः ॥ ॥ अर्थशास्त्रस्येत्यादि ॥

तथा च स्थापत्यं साक्षादुपयुक्तमिदन्तु सद्वारकमतस्तदेव साध्विति भावः ॥ अर्थशास्त्रञ्च गजतुरगमण्यादिपरीक्षणशास्त्रं पालकाप्ययशालिहोत्रागस्त्यादिज्ञेयम् । तस्य कुत्र निवेश इत्यत आहुः ॥ तच्च न्याये इति न्यायस्वरूपमग्रे वाच्यम् ॥ अन्यान्यपि कामशास्त्रादीनि सन्तीति कथमष्टादशैव विद्या इत्यत आहुः ॥ ॥ तथा वात्स्यायनादीनामिति ॥ ॥ आदिपदेन पाकादिशास्त्राणि कामसूत्राङ्गविद्यारूपाणि ज्ञेयानि ॥ ॥ निरूपित इति ॥ कामशास्त्रादिरिति शेषः ॥ तथाच धर्मानुपयोगादष्टादशविद्यासु तानि न निरूपितानीति दृष्टान्तशेषत्वेन कया चित्प्रनाड्या मुख्यफले आगमवदुपयोग इतिभावः ॥ ७९ ॥

ब्रजभाषाटीका ।

छन्दोग्रंथको अ॰ष्ठानमेंभी उपयोग है क्योंकि जा॰॰॰॰ छन्द नाहिंजानों वार्के अनुष्ठानकोभी फल नाहिंहोय तथापि शब्दद्वाराही अनुष्ठानमें उपयोग है तासों शब्दरक्षाही छन्दोग्रंथको प्रयोजनहै ॥ ७८ ॥ उपवेदनको प्रयोजन दिखावें हैं; (आरोग्य इत्यादि) ऋग्वेदको उपवेद जो (आयुर्वेद) वैद्यशास्त्र है वाको आरोग्य फल है । नैरोग्यसों धर्म सिद्ध होयहै तासों रोगनिवृत्तिद्वारा धर्ममें वैद्यशास्त्रको उपयोग है धर्ममें धनुर्वेदको रक्षाद्वारा उपयोग है ॥ ७९ ॥

काव्यादीनामसत्यत्वान्नोपयोगःकथञ्चन॥धर्मे
कर्त्तुः क्वचित्कीर्तिर्नैपुण्यं पाठतः क्वचित् ॥८०॥
रामायणमनन्तं हि पुराणमिव सम्मतम्॥
व्यासःपूर्वमनेकोक्तो वाल्मीकिःसाम्प्रतङ्किल॥
समाधिभाषया प्राह प्रमाणं सर्वथैव तत् ॥८१॥

तत्त्वदीपप्रकाशः ।

काव्यादीनान्धर्मे नोपयोग इत्याह ॥ काव्यादीनामिति ॥ सत्यत्वमुत्प्रेक्षाजन्यत्वात् ॥ कीर्तिर्धर्मवत्फलसाधिकेति फलांशे काव्यादीनामुपयोगमाह ॥ कर्त्तुः क्वचित्कीर्तिरिति ॥ नैपुण्यञ्चीतिशास्त्रे

युज्यते तच्च पाठात् ॥ रामायणञ्च काव्यमिति सर्गबन्धनात् ॥८०॥ न तस्य धर्मोपयोगो भविष्यतीत्याशंक्याह॥र मायणमिति॥ "चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ॥ एकैकमक्षरं पुंसां महापातकनाशनम् " इति वाक्याद्धर्मजनकमेव अनन्तमपरिमितम् ॥ प्रतिकल्पम्प्रतियुगं रामावतारा भवन्ति तत्रान्यपदार्थेष्विव रामचरित्रस्य स्वरूपञ्च भवति उत्तरेण पूर्वोपचरितार्थरूपमतः पूर्वपूर्वरामकथाया उत्तरया सह कथनादनन्तत्वम् ॥ क्वचित्पुनरुक्तेपि धर्मो भवतीति हिशब्देनाह । आख्यायिकायाः प्रामाण्यार्थम्पुराणमिव सताम्मतम् ॥ अस्य व्यासो विस्तारः पूर्वमनेकैरुक्तः साम्प्रतं वाल्मीकिः समासावुपलभ्य सर्वमुक्तवानतः सुतरामिदानीन्तनम्प्रमाणम् ॥८१ ॥

आवरणभंगः ।

किञ्चिदाशंक्य परिहरन्ति ॥ ॥ काव्येत्यादि ॥ तर्हि [illegible] आहुः ॥ ॥ कीर्त्तीत्यादि ॥ तथाच जघन्यफलेस्वर्गादिके तदुपयोग इतिभावः ॥८०॥ किञ्चिदाशंक्य परिहरन्ति ॥ ॥ रामायणमित्यादि ॥ प्रतियुगमिति ॥ वैवस्वतमन्वन्तरीयाष्टाविंशतिमत्रेतायामित्यर्थः ॥ एवम्प्रमेयम्प्रमाणस्वरूपञ्चोक्तम् ॥ साधनम्फलञ्च चरितंरघुनाथस्येति श्लोक एव स्फुटम् ॥ ॥ अनेकैरिति आपस्तम्बप्रभृतिभिः । आपस्तंबोक्तस्य रामायणस्य दक्षिणे प्रसिद्धत्वात् ॥ ८१ ॥

ब्रजभाषाटीका ।

गान्धर्ववेदको धर्ममें उपयोग है [illegible] अर्थात् खातीके कामको स्रुग स्रुवा स्तम्भ [illegible] वेमें उपयोग है तासों परम्पराधर्मको उपयोगी है या प्रकार पुराणे न्याये मीमांसा धर्मशास्त्र अङ्ग ६ वेद ४ उपवेद ४ इन अष्टादशविद्याको उपयोग है जा शास्त्रमें हाथी घोडा मणिआदिके लक्षण हैं वा अर्थशास्त्रको अर्थसिद्धिद्वारा धर्ममें उपयोग है वा अर्थशास्त्रको न्यायशास्त्रमें अन्तर्भाव है वात्स्यायनादि[illegible] कामभोगमें उपयोग है कामसुख है सो मोक्ष[illegible]खका दृष्टान्त है । जैसें स्वर्ग[illegible]खको दृष्टा-

न्त राज्यसुख है। यद्यपि राज्यसुखसों क्रोडगुण अधिक स्वर्गसुख है तथापि अदृष्ट अर्थात् बिनादेखें स्वर्गसुखमें प्रवृत्ति होयवेकेलिये राज्यसुखको दृष्टान्त दियोजायहै तैसें ही बिनादेखें अनन्त अचल मोक्षसुखमें प्रवृत्तिकरायवेकेलिये अल्पनाशवाले कामसुखको दृष्टान्त है जाकरके तुच्छकामसुखकों छोडके अनन्तमोक्षसुखकी प्राप्तिकेलियें प्रवृत्त होय तासों अष्टादशविद्यामें कामशास्त्रकी गणना नहिं है काव्यनाटकादिक कामशास्त्रकेही अङ्ग हैं ॥ काव्य नाटक अलङ्कारादिकनको धर्ममें उपयोग नहिं है क्योंकि मनकी उत्प्रेक्षाकरकें बनायेजावे हैं ॥ ८० ॥ परन्तु काव्यादिकनसों काव्य बनावेवारेकी कीर्ति होवे है और जैसे धर्मसों स्वर्गप्राप्तहोवेहै तैसे मनुष्यकों कीर्तिभी स्वर्गादिफलकी देवेवारी है तासों स्वर्गादिफलप्राप्तिमें काव्यादिकोभी उपयोग है मोक्षमें उपयोग नहिंहै ॥ ये अच्छे काव्यादि बनायवेको फल है काव्यादिकनके पाठ करवेसों तो निपुणता होयहै निपुणताको नीतिशास्त्रमें उपयोग है तहाँ काव्यादिकमेंही रामायण है तासों रामायणकोभी धर्ममें उपयोग नहिं होयगो ऐसी शङ्का नहिंकरनी क्योंकी रामायण अनन्त हैं आपस्तम्बादिऋषिननेंभी बनाई है दाक्षिणमें प्रसिद्ध है. श्रीमान् राजाधिराज चक्रवर्तिचूडामणि श्रीरघुनाथजीके चरित्रको सौक्रोडश्लोकमें विस्तार है याको एक एक अक्षर महापातकको नाश करैहै तासों धर्मको उत्पन्न करवेवारो है. प्रतिकल्पमें प्रतियुगमें रामावतार होवेहै और पदार्थके समान श्रीरामचरित्रको स्वरूप नहिं है तासों पहिलीको चरित्र आगेके कल्पके चरित्रमें गतार्थ नहिं होयसकेंहै तासों आगेके कल्पकी रामचरित्रकी कथाके साथ पीछेके कल्पकी कथाभी वर्णन कीनीहै तासों अनन्त है वर्णन करेभयेकोभी फिर वर्णन कहीं

कहीं धर्म सिद्धिके लिये कियोहै तासों याकूं पुराणके समान प्रमाण माननो ॥ रामचरित्रको विस्तार पहिली बहुत ऋषिननें कियोहै परन्तु अभी वाल्मीकि ऋषिनें समाधिमें देखकें रामायण कहीहै तासों ये रामायण प्रमाण है और ऋषिननें तो सुनकरके रामचरित्रको वर्णन कियोहै तासों वाल्मीकि रामायणमें मिलती-भई और रामायणकी कथा प्रमाण है ॥ ८१ ॥

वासिष्ठादेस्तु संवादात्प्रामाण्यं नान्यथा क्वचित् ॥ न्यायस्तु नीतिशास्त्रं हि तर्को मीमांसया युतः ॥ ८२ ॥ मोहार्थान्यन्यशास्त्राणि बुद्धे कृष्णे तदिच्छया ॥ देवांशैः कल्पितान्येव तदुक्तं सर्वथा मृषा ॥ ८३ ॥ इति प्रमाणप्रकरणम् ॥

तत्त्वदीपप्रकाशः ।

वासिष्ठरामायणादेर्न तथात्वमित्याह ॥ वासिष्ठादेरिति ॥ संवादः प्रमाणेन ॥ पुराणन्याय इत्यत्र साम्प्रतमक्षपादविरचितन्धर्मोपयोगि भविष्यतीत्याशंक्य समानशब्दत्वमेव तत्रेत्याह ॥ न्यायास्त्विति ॥ पुराणन्यायेत्यत्र नीतिशास्त्रमेव न्यायशब्देनोच्यते न तु लोके प्रसिद्धम् ॥ 'यस्तर्केणानुसन्धत्त' इत्यत्र तर्कशब्दो वेदानुकूलतर्कवाचकमीमांसापरः ॥ ८२ ॥ अन्यानि काणादादिशास्त्राणि मोहार्थान्येव अतस्तन्नादरणीयमित्यर्थः ॥ ८३ ॥ इतिप्रमाणप्रकरणम् ॥

आवरणभंगः ।

संवादः ॥ प्रमाणेनेति । वाल्मीकिना स्वयं समाधावनुभूयोक्तत्वादन्यैस्तु श्रुत्वोक्तत्वेन मध्ये परंपरापाते दोषस्यापि सम्भवात् ॥ ॥ प्रमाणेन ॥ वाल्मीकीयेन संवाद एव वासिष्ठादेः प्रामाण्यप्रयोजक इत्यर्थः ॥ अर्थशास्त्रस्य न्याये प्रवेश उक्तः । न्यायश्चतुर्दशविद्यासु निरूपित इति तन्निश्चेतुमाहुः ॥ पुराणेत्यादि ॥ नीतिशास्त्रमिति आश्रमबार्हस्पत्यादिरूपम्भारते राजधर्मे प्रसिद्धमिति ॥ आग्नेये न्यायसार-

म्प्रवक्ष्यामीति प्रतिज्ञाय नीतिशास्त्रसारस्यैव कथनात्। मात्स्यतृतीयाध्याये "मीमांसा न्यायविद्या च प्रमाणाष्टकसंयुता" इतिवाक्येप्यष्टप्रमाणयोगलिङ्गाच्च नाक्षपादप्रणीतम्पुराणंन्यायेत्यत्र विवक्षितमित्यर्थः ॥ एवमेव पुराणानुक्रमणाध्यायेपि 'पुराणंन्यायविस्तर' इत्यत्रापि ज्ञेयम्। प्रमाणाष्टकन्तु प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिसम्भवैतिह्यभेदेन ज्ञेयम् ॥ ॥ मीमांसापर इति ॥ निबन्धेषु सर्वत्रमीमांसयैव धर्मनिर्णयदर्शनात् ॥ तर्कविद्यावाचकस्यान्वीक्षिकीपदस्य "विद्यामान्वीक्षिकीं हित्वा" इत्यादौ तथा दर्शनाच्चेत्यर्थः ॥ केचित्तु। "आअन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान्" इति प्रथमस्कन्धवाक्याद्दत्तात्रेयोक्तयोगपरमान्वीक्षिकीपदं मार्कण्डेयेऽलर्कस्य योगोपदेशदर्शनादित्याहुः ॥ किञ्च। मनौ आन्वीक्षिकीञ्चात्मविद्यञ्च इति वाक्यान्मिताक्षरायां स्वरन्ध्रगोप्तान्वीक्षिक्यामित्यत्रात्मविद्यापरत्वेन व्याख्यानाच्चोत्तरमीमांसापि तद्वाच्या ॥ कश्चित्तु। प्रतिपदमनुपदंछन्दो भाषाधर्मो मीमांसान्यायस्तर्क इत्युपाङ्गानीतिचरणव्यूहे वेदोपाङ्गनिरूपणे यौ न्यायतर्कावुक्तौ तावक्षपादकणादप्रणीतशास्त्रपरौ। तयोरप्यास्तिकशास्त्रत्वात्। नैषा तर्केणेत्यादौ निन्दा तु अधर्मस्येव निकृष्टत्वादिति वदति। तदपि श्रुतिविरुद्धांशत्यागस्य तत्रावश्यकत्वायस्तर्केणानुसन्धत्त इत्यत्र तर्कपदम्मीमांसापरमेव सेत्स्यति। किञ्च निन्दाप्रयोजको निष्कर्षोऽपि क इति विचार्यम्। स यदि पुराणोक्तमोहकत्वरूपस्तदा तु धर्मस्थानत्वाभावान्न विद्यासु निवेष्टुमर्हति। यदि लोकतत्त्वविचारणरूपस्तदापि तथा धर्मस्य चोदनालक्षणस्यालौकिकत्वादिति। वस्तुतस्तूपाङ्गोक्तौ संख्याया अभावान्मीमांसान्यायाधिकरणात्मकस्तर्क इत्येवार्थः। एवञ्चोपाङ्गानामपि षट्त्वादङ्गैः समानैव संख्या भवतीत्येतदभिसन्धायोक्तं मीमांसापर इति ॥ ८२ ॥ नन्वक्षपादीयं न्यायत्वेन कुतो न गृह्यत इत्यत आहुः ॥ ॥ अन्यानीत्यादि ॥ तदुक्तम्पाद्मोत्तरखण्डीयगुणत्रयविवरणाध्याये पार्वतीं प्रति शङ्करेण। तथाहि। "शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम्। येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि। प्रथमं हि मयैवोक्तं शैवपाशुपतादिकम्। मच्छक्त्यावेशितैर्विप्रैः सम्प्रोक्तानि ततःपरम्। कणादेन तु सम्प्रोक्तं शास्त्रं वैशेषिकम्महत्। गौतमेन तथा न्यायं सांख्यन्तु कपिलेन वै। धिषणेन तु सम्प्रोक्तञ्चार्वाकमतिगर्हितम्। दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा। बौद्धशास्त्रमसत्प्रोक्तं नग्ननीलपटादिकम्। मायावादमसच्छास्त्रं प्रच्छन्नम्बौद्धमुच्यते। मयैव कथितन्देवि कलौ ब्राह्मणरूपिणा ॥" इत्याद्युक्त्वा "मयैव वक्ष्यते देवि जगतान्नाशकारणात्। द्विजन्मना जैमिनिना पूर्वं वेदमपार्थतः ॥ निरीश्वरेण वादेन कृतं शास्त्रं महत्तरम् ॥" इति ॥

॥ पराशरोपपुराणे च ॥ ॥ अक्षपादप्रणीते च काणादे सांख्ययोगयोः ॥ त्याज्यः श्रुतिविरुद्धः सः श्रुत्यैकशरणैर्नृभिः ॥ जैमिनीये च वैयासे न विरोधोऽस्ति कश्चनेति ॥ जैमिनीयपदम्पूर्वार्द्धेऽन्वेति ॥ ॥ पाद्मस्वारस्यात् ॥ ॥ हयशीर्षपञ्चरात्रे च । "कपिलश्चाक्षपादश्च नास्तिको नग्न एव च॥ ऋषयस्तामसा ह्येते शास्त्रमेषांविमोहनम्" इति ॥ एतेन एतद्विरुद्धं यत्सर्वं न तन्मानङ्कृष्णवचनेति पूर्वप्रकरणोक्तं निर्णीतं ज्ञेयम् ॥ ८३ ॥ इति प्रमाणप्रकरणम् ॥

ब्रजभाषाटीका ।

अठारह विद्यामें अक्षपादको बनायो न्यायशास्त्र नहिं है किन्तु बृहस्पति आदिको बनायो नीतिशास्त्रही न्याय शास्त्रके नामसों ग्रहण करनों वाहीकी अष्टादश विद्यामें गणना है "यस्तर्केणानुसन्धत्ते" इत्यादि स्थलमें तर्कशास्त्र करकें विचार करनो लिख्यो है तहाँ तर्कशास्त्रकरके मीमांसाशास्त्र लेनों ॥ ८२ ॥ और काणाद आदिकनके बनायेभये सब शास्त्र जीवकी बुद्धिकूँ मोह करायवेकेलिये हैं क्योंकि कृष्णकी इच्छा करके देवांश प्रकट होयके उनने शास्त्र बनाये हैं वे सब शास्त्र मिथ्या हैं पद्मपुराणमें गुणविवरणाध्यायमें शिवनें आज्ञा करी है। "शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम् ॥ येषां श्रवणमात्रेण पतनं ज्ञानिनामपि ॥ काणादेन तु यत्प्रोक्तं शास्त्रं वैशेषिकं बृहत् ॥ गौत्तमेन तथा न्यायं सांख्यन्तु कपिलेन वै ॥ धिषणेन तु सम्प्रोक्तश्चार्वाकमतमर्हितम् ॥" इत्यादि प्रमाण आवरणभङ्गमें लिखे हैं ॥ ८३ ॥ इति प्रमाणप्रकरणम् ॥

प्रमेयं हरिरेवैकः सगुणो निर्गुणश्च सः ॥ गुणाः कार्यन्तथा धर्मः क्रियोत्पत्त्यादयश्च सः॥८४॥ बुद्धिसौकर्यसिद्ध्यर्थं त्रिरूपेणोपवर्ण्यते॥ कारणेन च कार्येण स्वरूपेण विशेषतः ॥ ८५ ॥

तत्त्वदीपप्रकाशः ।

एवम्प्रमाणन्निरूप्य तत्सन्देहान्निराकृत्य प्रमेयन्निरूपयति ॥ प्रमेयमिति ॥ यथा शब्द एव प्रमाणन्तत्रापि वेदादिभावापन्नं तथा हरिरेव प्रमेयं सर्वभावापन्नमिति॥ सर्वमेव गणयति॥सगुणइत्यादिना॥ क्रिया उत्पत्त्यादयश्च ॥ स हरिरेव ॥ ८४ ॥ एवमुक्ते सम्यक्ज्ञानं न भवतीति विशेषं वक्तुमाह ॥ बुद्धीति ॥ यथा बुद्धिः सर्वं प्रमेयजातं क्रोडीकरोति तदर्थं त्रिरूपेणोपवर्ण्यते ॥ तदैव तरतमभावो भवति॥८५॥

आवरणभंगः ।

एवम्प्रमाणप्रकरणे प्रासङ्गिकसहितम्प्रमाणानुरोधि प्रमेयं निर्णीतं तेन पूर्वप्रकरणे यज्ञरूपो हरिरिति विचारितः । अतःपरं ब्रह्मतनुःपर इत्यादि पादोनश्लोकद्वयोक्तं विचारयितुम्प्रमेयप्रकरणमारभन्ते ॥ तत्र पुराणस्योपबृंहणत्वात्तदुक्तप्रमेयपूर्वकमेव विचारयन्ति ॥ एवमित्यादि ॥ उक्तप्रकारेण प्रमेयबलनिरूपणार्थं द्विविधप्रमेयमध्ये प्रमाणानुरोधि प्रमेयन्निरूपयितुं मंगलकारिकाव्यतिरिक्ताभिर्नवतिभिः कारिकाभिर्वेदादिरूपम्प्रमाणन्तत्तत्स्वरूपं तत्प्रमेयं तदुक्तसाधनतत्फलैर्निर्णीय तेन तत्स्वरूपादिविषयान्सन्देहान्निराकृत्य स्वतन्त्रप्रमेयस्यापि बलनिरूपणार्थन्तत्प्राधान्येन प्रमेयन्निरूपयतीत्यर्थः ॥ ननु कथं हरिरेव प्रमेयञ्जगतोऽपि विद्यमानत्वादित्यत आहुः ॥ ॥ यथेत्यादि ॥ ॥ वेदादिभावापन्नमिति सामान्येन पुंसकम् ॥ ॥ उत्पत्त्यादय इति । उत्पत्तिस्थितिवृद्धिविपरिणामापक्षयनाशाख्याः षड्भावविकाराः । अत्र मूले सगुणनिर्गुणपदाभ्यामपरम्परश्च ब्रह्म गुणपदेन सत्त्वरजस्तमांसि मायाप्रकृत्यादयः कार्यपदेन महदादिपरमा एवन्तद्द्रव्यन्धर्मपदेन जातिगुणविशेषसमवायाद्याः क्रियापदेन लौकिकवैदिककर्मणी उत्पत्त्यादय इत्यादिपदेनाभावाश्च संगृहीतास्तेन शास्त्रान्तरोक्तानपि पदार्थान् सर्वान्भगवत्येवान्तर्भाव्य शुद्धाद्वैतम्बोधितम् । तथा च यद्यपि जगद्वर्तते तथापि तन्न जगत्त्वेन रूपेण प्रमेयङ्किन्तु हरित्वेन रूपेण । जगत्त्वेन तु लौकिकज्ञानविषयत्वान्मेयमेवेत्यर्थः ॥ ८४ ॥ मूले विशेषत इति व्यावर्तकधर्मादित्यर्थः । अनेनैव प्रकारेण क्रोडीकरणस्यावश्यकत्वायाहुः ॥ ॥ तदैवेत्यादि॥ यदैवन्त्रिरूपेण ज्ञायते तदैव पुराणोपबृंहितः प्रजायेयेतीच्छया कृतस्तरतमभावः भवति स्फुटो बुद्धौ भवतीत्यर्थः ॥ एतेन ब्रह्मवादे सर्वस्य भगवद्रूपत्वेपि भजनं फलमूलरूप एव कर्तव्यमिति सेत्स्यतीति सूचितम् ॥ ८५ ॥

ब्रजभाषाटीका।

जैसे शब्द प्रमाण हैं तामें भी वेदादिभावकूँ आप्तभये शब्दही प्रमाण हैं ऐसेही सर्व जगद्भावकूँ प्राप्त होयरहे ऐसे हरि भगवान् ही एक प्रमेय है सगुण अपररूप, निर्गुण पर-रूप, तथा सत्वगुण रजोगुण तमोगुणरूप, तथा महत्तत्वसों लेकें परमाणुपर्यन्त कार्यरूप, तथा जातिगुणविशेषसम-वायादि धर्म रूप लौकिक वैदिक क्रियारूप तथा उत्पन्न होनो बढनो परिणामकों प्राप्तहोनों क्षीणहोनों नाशकूँ प्राप्त होनों इत्यादि ६ भावरूप, एक भगवानही है यासों और शास्त्रमें कहे जे पदार्थ हैं उन सबनकोभी भगवान्मैंही अन्तर्भाव है तासों शुद्धाद्वैत मत सिद्धभयो ॥ ८४ ॥ भगवानही सर्वरूप है ऐसे कहवेसों अच्छे प्रकार ज्ञान नहिं होय है तासों बुद्धिमें जमाय-वेकेलिये तीनरूपकरकें भगवान्को वर्णन करें है ॥ एक तो मूल स्वरूप, द्वितीय कारणरूप, तृतीय कार्यरूप इन तीनरूपन करकें भगवान्कूँ जानवेसोंही पुराणमें जाको विस्तार कियो ऐसो जो वेदोक्त बहुतरूप करकें प्रगट होयवेकी इच्छाको कियोभयो उच्च-नीचभाव है वह हृदयमें जमजावें है यासों ब्रह्मवादमें सब भग-वद्रूप है तथापि भजन मूलस्वरूपकोही करनों यह बात सिद्ध-भई ॥ ८५ ॥

अष्टाविंशतिभेदास्तु कारणे तत्वभेदतः ॥
भगवत्त्वं यतस्तेषान्तस्मात्तत्वानि तानि तु ॥
॥ ८६ ॥ अण्डसृष्टेः पूर्वभावात् कारणत्वन्न चान्यथा ॥ कारणत्वन्न चैवास्ति चिदानन्दां-शयोः स्वतः ॥ ८७ ॥

तत्त्वदीपप्रकाशः ।

प्रथमेऽष्टाविंशतिभेदाः ॥ तेषां च कारणत्वात्तत्त्वंपदवाच्यत्वञ्च समर्थयति ॥ भगवत्त्वमिति ॥ ८६ ॥ सच्चिदानन्दभेदेषु सद्भेदा एवैते ॥ चिदानन्दयोः ॥ कारणत्वाभावात् ॥ एकस्य फलत्व मपरस्य स्वरूपत्व-मित्याह ॥ कारणत्वं न चैवास्तीति ॥ ८७ ॥

आवरणभंगः ।

प्रथम इत्यादि ॥ प्रथमे कारणे अष्टाविंशतिभेदाः । नवैकादशपञ्चत्रीण्यात्थत्व-मिति शुश्रुम इत्येकादशवाक्येनाष्टाविंशतितत्वपक्षस्य भगवत्संमतत्वात् ॥ षड्विं-शत्यादिपक्षानामत्रैवान्तर्भावादतस्तेषान्तथात्वं समर्थयंति । सांख्योक्ताद्भिन्नरीत्या एकेन श्लोकेनोपपादयंतीत्यर्थः ॥ भगवत्त्वमित्यादि ॥ भगवतो भावो भगवत्त्वम्भ-गवतः सर्वान्प्रति या सामान्यकारणता सेति यावत् । तृतीयस्कन्धे तथाङ्गीकारात्॥ यतस्तेषान्तथात्वन्तस्मात्तानि तत्वानि न तु सांख्यान्तरवत्पृथक्पदार्थत्वेन तत्वानि। एकादशस्य चतुर्विंशेऽध्याये कपिलादिविनिश्चितं सांख्यं वदता भगवता "आसी-ज्ज्ञानमथो ह्यर्थ एकमेवाविकल्पितम्" इत्युपक्रम्य "तन्मायाफलरूपेण केवल-न्निर्विकल्पितम् ॥ वाङ्मनो गोचरं सत्यं द्विधा समभवद्बृहत्" इति ब्रह्मण एव द्विधा भवनमुक्त्वा "तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका ॥ ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते" इत्यादि "प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः । सतोऽभिव्यञ्जकः कालो ब्रह्म तत्रितयन्त्वहम्" इति च वाक्यात् । तथा सर्गः कार-णसम्भूतिरिति निबन्धलिखितसर्गलक्षणवाक्यादेतेषु कारणत्वव्यवहार इत्यंङ-सृष्टेः पूर्वभावात् पूर्वो[illegible]त्वात्कारणत्वम् ॥ नचाऽन्यथा न ब्रह्मवन्निरंकुश-त्वापि मृदादिवद्घटादिकारणत्वेन "मया सञ्चोदिता भावाः सर्वे संहत्यकारिणः । अण्डमुत्पादयामासुर्ममायतनमुत्तमम्" इति भगवद्वाक्यात् ॥ तथाच भगवता तथा-ङ्गीकारात्कारणेऽष्टाविंशतिभेदा युक्ता एवेत्यर्थः ॥ सच्चिदानन्देत्यादि ॥ प्रपञ्च-मध्यपातिषु सच्चिदानन्देषु सजातीयत्वस्वगतत्वाभ्याञ्चिदानन्दांशत्वेन प्रसिद्ध-योर्जि[illegible]न्तर्यामिणोः समवायित्वस्य श्रुति[illegible]कथनात्सदेव सौम्येदमग्र आसी-दित्युपक्रम्य तत्तेजोसृजतेत्यादिना क्रमसृ[illegible]ऽपि क्रमसृष्टेस्तथैव बोद्ध-व्यमित्यर्थः ॥ ८६ ॥ ॥ एकस्येत्यादि ॥ ॥ ननु केवलानां जडानान्तत्वाना-ञ्चैतन्यं विनान्तर्यामिप्रेरणञ्च विना कार्यजननासामर्थ्यकथनात्तयोरपि निमित्तत्व-मस्तीति कथमकारणत्वमित्याकांक्षायान्तयोर्मध्ये एकस्य चिदंशस्य फलत्वम-

परस्याऽऽनन्दांशस्य स्वरूपत्वमतो न स्वरूपेण निमित्तत्वमिहेति हेतोः कारणतानिषेधमाहेत्यर्थः ॥ ॥ कारणत्वं न चैवास्तीति ॥ ॥ प्रपञ्चांतःपातिनोश्चिदानन्दांशयोः कारणत्वं समवायित्वञ्चाकारान्निमित्तत्वञ्च स्वतस्तत्वासंबलितेन रूपेण नास्ति ॥ "तत्सृष्ट्वा तदेवानुप्राविशत् तदनु प्रविश्य सच्चत्यचाभवत्" "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" "गुहाम्प्रविष्टौ परमे परार्द्धे" इति श्रुतौ कोशानुप्रवेशोत्तरमेव नामव्याकरणादिरूपकार्यस्योक्तत्वादित्यर्थः । अत्र चिदंशस्य फलत्वं मातृवर्णिकसूत्रभाष्ये विज्ञानमयस्य विविधयागादिसाधनफलत्वेन चि तत्वात्स्वरूपावस्थानस्य मुक्तित्वाच्च ॥ आनन्दांशस्य स्वरूपत्वन्त्वन्तर्यामिणि ब्रह्मधर्माणामतिरोहितत्वाज्ज्ञातव्यम् "ज्ञानं त्वन्यतमो भावः" इति वाक्यात्पुरुषस्य चिदंशत्वं शंक्यं "मया सञ्चोदिता भावाः सर्वे संहत्यकारिणः" इत्यग्रिमवाक्ये सर्वपदेन पुरुषमन्तर्भाव्य संहत्यकारित्वोक्तेरत्रापि सन्देहस्यैव तस्य विवक्षितत्वात् ॥ अतएव तृतीये "कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः । पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् ॥" इति मैत्रेयेण वीर्याधाने करणत्वमेवोक्तं नतु कर्तृत्वं केवलात्मभूतस्य स्वतो निर्वीर्यत्वादिति ॥ ८७ ॥

व्रजभाषाटीका ।

कारणरूप भगवान्को स्वरूपवर्णन करें हैं कारण अष्टाविंशति भेदवालो है प्रकृति १ पुरुष २ महत्तत्व ३ अहंकार ४ रूप ५ रस ६ गन्ध ७ स्पर्श ८ शब्द ९ नेत्र १० जिह्वा ११ नासिका १२ त्वचा १३ कर्ण १४ मन १५ वाणी १६ हस्त १७ चरण १८ उपस्थ १९ गुदा २० पृथ्वी २१ जल २२ तेज २३ वायु २४ आकाश २५ सत्वगुण २६ रजोगुण २७ तमोगुण २८ ये अठाईस कारणके भेद हैं इनसोंही तत्व कहें हैं "तस्य भगवतो भावः सामान्यकारणता तत्वम्" ॥ भगवान्को कारणरूपकरके प्रकटहोनों तत्व कहावेहै ॥ ८६ ॥ ये तत्व ब्रह्मांडके पहिली प्रकट भये तासों कारण कहावें हैं भगवान् सच्चिदानंद हैं तत्व २८ भगवान्के कारणरूपके भेद हैं चित् आनंद ये दोनों कोईकेभी कारण नहिं हैं अर्थात् तत्व- सों

न्यारे होयकें कोई पदार्थकेभी निमित्तकारण अथवा समवायिकारण नहिं हैं ॥ ८७ ॥

आनन्त्यमेव भेदानान्तयोः कार्ये तथैव च॥ अतस्तेषान्तु ये भेदा नोक्तास्ते हि विशेषतः ॥ ८८ ॥ स्वरूपे तु त्रयो भेदाः क्रियाज्ञानविभेदतः॥विशिष्टेन स्वरूपेण क्रियाज्ञानवतो हरेः८९

तत्त्वदीपप्रकाशः ।

तयोर्भेदा अनन्तास्तेन विशेषतो न वक्तव्या इति भावः ॥ कार्येऽपि भेदानामानंत्यं घटादौ तथा दर्शनात् ॥ ननु स्वस्यासामर्थ्यादेतदुच्यते नेत्याह॥अतस्तेषामिति॥अतएव भागवतादौ तेषां संख्या नोक्ता॥८८॥ तत्त्वसहभावाच्चिदानन्दयोः स्वरूपभूतयोरपि प्रथमपक्ष एव निवेशनमुक्त्वा तृतीयभेदानाह ॥ स्वरूपेत्विति ॥ क्रियारूपे धर्म्मे प्रविष्टो धर्म्मी यज्ञ एकः तथा ज्ञानरूपे धर्मे प्रविष्टो धर्म्मी ब्रह्मद्वितीयः ॥ ज्ञानक्रियोभययुतःकृष्णस्तृतीय इति त्रयो भेदाः॥यतःक्रियाज्ञानवान् हरिः॥८९॥

आवरणभंगः ।

॥ तयोरित्यादि ॥ ॥ द्वासुपर्णेत्यादिश्रुत्या प्रतिशरीरञ्जीवान्तर्यामिप्रवेशश्रावणेन नानात्वात्तयेत्यर्थः ॥ ॥ कार्यपीत्यादि ॥ ॥ एतेनाऽनियतपदार्थवादोत्राप्यनुमत इति बोधितं श्रुतिपुराणादिषु तथाङ्गीकारादिति । मूले ॥ नोक्तास्ते हि विशेषत इत्यनेन सामान्यत उक्ता इति ज्ञापितम् । ते एवाग्रे गणभेदेन वक्तव्या इति बोध्यम् । तत्त्वगणनावैयर्थ्यशङ्काप्येतेनैव परिहृता बोध्या ॥ ८८ ॥ ॥ तत्त्वसहभावादिति ॥ ॥ तत्त्वशरीरे प्रवेशेन तथात्वात् । एतेन कार्यकोटचनिवेशो बीजमुक्तम् । मूले ॥ क्रियाज्ञानविभेदत इति ल्यब्लोपे पञ्चमी । तथाच क्रियां ज्ञानं च विभिद्य ताभ्यामेकैकं विशिष्टेन चैकमेवं त्रय इत्यर्थः । ननु क्रियाज्ञानयोर्धर्मत्वात्कथं स्वरूपभेदत्वमित्यत आहुः ॥ ॥ क्रियारूपइत्यादि एवं षड्भिः प्रमेयस्वरूपेण प्रमेयनिर्णय उक्तस्तत्स्वरूपेण कार्यरूपेण स्वरूपेण च भगवान् प्रमातुं शक्य इति ॥ ८९ ॥

व्रजभाषाटीका ।

चित्के अनन्त भेद हैं जितनें अनंतजीव हैं सब चित्के भेद हैं चित् फलरूप हैं ऐसेंही आनंदकेभी अनेक भेद हैं जितने अंतर्यामी हैं वे सब आनंदके भेद हैं आनंद है सो स्वरूपभूत है अंतर्यामीमें ब्रह्म धर्म प्रकट है तासों अन्तर्यामीस्वरूपात्मकही समुझे जावे हैं वृक्षादिघटपटादिरूप कार्यभी अनंत हैं तासों कार्यके भेदभी नाहिं कहे हैं ॥८८॥ चिद् आनंदकोभी तत्वनके साथ सहभाव है यासों इनको शरीरमें प्रवेश है तासों तत्वसहित चित् आनंदकोकारणकोटिमेंही प्रवेश कहकें स्वरूपके भेदनको वर्णन करे हैं स्वरूपके तीन भेदहैं वैदिक क्रियारूप धर्ममें प्रविष्टभयो धर्मी स्वरूप यज्ञशब्दसों प्रसिद्ध है तथा ज्ञानरूपधर्ममें प्रविष्टभयो धर्मी स्वरूप ब्रह्मनाम सों प्रसिद्धहै और ज्ञान क्रिया इन दोनों सहित श्रीकृष्ण तृतीय स्वरूपहै, अर्थात् यज्ञनारायण क्रियावान् परन्तु क्रियामें प्रविष्ट होयके गुप्तरीतिसों विराजे हैं तासों क्रियाशब्दसों ही व्यवहारमें आवेहै ब्रह्म केवल ज्ञानवालो है परन्तु ज्ञानमें गुप्तरीत्या प्रविष्ट है तासों ज्ञानशब्दसोंही व्यवहारमें आवे है श्रीकृष्ण तो पूर्णक्रिया तथा पूर्णज्ञानवाले हैं ॥ ८९ ॥

विशिष्टे वाचकङ्गीता श्रीभागवतमेव च ॥
केवले काण्डद्वितयं वेदो धर्मप्रवेशतः ॥ ९० ॥
तस्यैवोद्भूतरूपत्वात्क्रियाज्ञाने अपि स्वतः ॥
अविकार्ये विकार्ये तु ह्यध्रुवे कार्यवन्मते ॥९१॥

तत्त्वदीपप्रकाशः ।

अस्य प्रमेयत्वसिद्ध्यर्थं प्रमेयबलविचारेण प्रमाणमाह॥वि[illegible]वाचकमिति ॥ ननु काण्डद्वयेऽपि क्रियाज्ञानञ्च प्रतिपाद्यते न[illegible]न्

ज्ञानवान्वा । तत्कथमुच्यते एकैकस्मिन्नंश एकैकङ्काण्डमिति तत्राह ॥ **धर्मप्रवेशात इति** ॥ क्रियावान् क्रियायाम्प्रविष्टः अतः क्रियैव प्रतीयते वस्तुतस्तु क्रियावान् ॥ "यज्ञो वै विष्णुः" इति श्रुतेः । तत्र हेतुः॥९०॥ **तस्यैवोद्भूतरूपत्वादिति** ॥ धर्म एवोद्भूतो नतु धर्मी ॥ ननु जन्यत्वान्न तद्भगवत्स्वरूपमित्याशंक्याह ॥ **क्रियाज्ञाने अपि स्वत इति** ॥ लौकिकक्रियया वृत्त्या च अभिव्यज्येते एव नतु जन्येते इत्यर्थः ॥ तत्र हेतुः ॥ **अविकार्ये इति** ॥ तर्हि लोकेऽपि क्रियाज्ञानयोर्नित्यता स्यादत आह ॥ **विकार्येष्विति** ॥ किञ्च कार्यमप्यस्मन्मते अभिव्यक्तमेव ॥ अतो नेदं दूषणमित्यर्थः ॥ ९१ ॥

आवरणभंगः ।

अस्येत्यादि ॥ ॥ स्वरूपस्य लौकिकप्रभाविषयत्वाभावेऽपि प्रमेयत्वसिद्ध्यर्थम्प्रमेयस्य स्वरूपस्य बलविचारेण प्रमाणमनुरुद्ध्यैव प्रागट्यफलदायकस्वरूपबलविचारेण प्रमाणमनुरुद्ध्यैव प्रागट्यफलदायकस्वरूपबलस्य विचारेण तदाहेत्यर्थः ॥ ॥ विशिष्ट इत्यादि ॥ ॥ अत्र गीतादेर्वाचकत्वं वाक्ये वैयाकरणवत् शक्त्यङ्गीकाराद्बोद्धव्यम् । तदग्रे स्फुटीभविष्यति । गीताश्रीभागवतयोर्विशिष्टवाचकत्वं गुरुत्वेन ज्ञेयत्वेनोपास्यत्वेन भजनीयत्वेन कर्तृत्वेनोपादानत्वेन पुरुषोत्तमत्वेन फलत्वेन विभूतिमत्त्वादिना च क्रियाज्ञानविशिष्टस्य भगवत एव मुख्यतया प्रतिपादनात्सर्वधर्मान्परित्यज्येत्यादौ स्वस्य साधनशेषतानिराकरणाच्च ज्ञेयम् ॥ ॥ ॥ प्रतिपाद्यतइति ॥ ॥ मुख्यतया प्रतिपाद्यते ॥ ॥ यज्ञ इति ॥ ॥ तथाच यजेतेत्यादौ क्रियायाः स्फुटत्वेऽपि तत्र धर्मिणः क्रियावतो वाच्यत्वन्तत्क्रियास्वरूपनिर्णायकाद्वाक्यशेषादेवावगम्यत इत्यर्थः ॥ ९० ॥ नन्वेवं सति क्रियावानेवार्थोऽस्तु धर्मिणोंऽतःप्रविष्टत्वे किम्मानमत आहुः ॥ ॥ तत्रेत्यादि ॥ ॥ तत्रेति धर्मिणोऽतःप्रवेशे ॥ ॥ उद्भूत इति ॥ ॥ यजेत्याद्यर्थत्वेन प्रतीयमानः । तथाच यथा चक्षुरादिभिरालोकादिप्रतीतावप्यालोकादेर्धर्म्यं विना भूतत्वेन तत्र धर्मिसत्ता तथा यजेत्यादौ शक्त्या क्रियाप्रतीतावपि वाक्यशेषेण विष्णुत्वबोधनात्तत्रानुद्भूतरूपधर्मिसत्त्वेति लक्षणां विनैवोभयसामञ्जस्यमिति भावः ॥ उत्तरकाण्डे तु विषयत्वेन ज्ञानशेषत्वेनैव ब्रह्मोच्यते इति ज्ञाने ज्ञानवतः प्रविष्टं त्वस्फुटमिति तदत्र नोक्तम् ॥ ॥ वृत्त्येति ॥ ॥

वृत्तिरूपेण ज्ञानेन । तथाच यथा वृत्त्या आवरणभङ्गे विषयचैतन्याभिव्यक्तिस्तथा क्रियया आवरणभङ्गे क्रियारूपस्याप्यभिव्यक्तिरिति भावः॥ ॥ अत आहेति॥ ॥ उक्ताशङ्कानिवृत्त्यर्थं व्यवहारे तयोरनित्यत्वमाहेत्यर्थः ॥ मूले विकार्ये तु ह्यदूध्रुवे इति। कारणाद्बहिर्भावः कारणेंतर्भावश्च तयोरिति ते विक्रियाम्प्राप्नुमस्तेनोत्पत्तिनाशवतीत्यर्थः । अत्र ज्ञानक्रिययोस्त्रिक्षणावस्थायित्वपक्षे उत्पत्तिस्थितिनाशाख्यविकारत्रयवत्वात् ॥ चिरस्थायित्वपक्षे वृद्ध्यऽपक्षयवत्त्वेन प वविकारवत्त्वाद्विकार्यत्वम्बोध्यम्। एवं प्रमाणेन प्रमेयनिर्णय उक्तः॥९१॥

ब्रजभाषाटीका।

उन क्रियाज्ञानविशिष्ट श्रीकृष्णचन्द्रको वर्णन करवेवाले गीताभागवत हैं और केवल क्रियावान् यज्ञात्मक विष्णुको वर्णन करवेवारो वेदको पूर्वकाण्ड है तहाँ पूर्वकाण्डमें तो क्रियाको वर्णन है क्रियावान्को वर्णन नहिं है ऐसी शङ्का नहिं करनी क्योंकी आप क्रियामें प्रविष्टहोयरहे हैं तासों क्रियाहि प्रतीत होवे है वस्तुतः आप क्रियावान् है याही सों (यज्ञो वै विष्णुः) या श्रुतिमें यज्ञभगवान्कों विष्णुरूपता लिखीहै ऐसेंही उत्तरकाण्डवेदान्तमेंभी ज्ञानवाले ब्रह्मकोही प्रतिपादनहै परन्तु ज्ञानरूपधर्ममें प्रविष्टभयो स्वरूप तो प्रकट नहिंहै ज्ञानही प्रकट रहै तासों वाकूँही ब्रह्मरूप मानकें वर्णनकियो है वस्तुतः उत्तरकाण्डमें ज्ञानवान् ब्रह्मस्वरूपकोही वर्णन है ॥ तहाँ लौकिकक्रियासों यज्ञ उत्पन्न होय है तथा वृत्तिरूप ज्ञानसों ब्रह्मज्ञान होय है उनकों भगवद्रूपता कैसे सम्भवसके ऐसो सन्देह नहिं करनो जैसें वस्त्रकूं दूरकरवेसों ढकीभई वस्तु प्रकट होजावे है ऐसे लौकिकक्रियाकरकें आवरणमात्र दूर होवेहै तब सर्वदा विद्यमान यज्ञ स्वरूप प्रकट होजावें है ऐसेंही वृत्तिरूप ज्ञानकरके आवरण दूरहोवें है तब सर्वदा विद्यमान ब्रह्मस्वरूप प्रकट होवें है अर्थात साधनकरके छिपे भये यज्ञ रूप तथा ब्रह्मरूप को प्रकटहोनों मात्र

है उत्पन्नहोनों नहिं है याहीसों वेदके क्रिया ज्ञान (अविकार्य) अर्थात् नित्य है लौकिकक्रिया ज्ञान (विकार्य) अर्थात् अध्रुव है यदि वेदके क्रियाज्ञानके दृष्टान्तसों इनकों भी नित्य मानें तथापि दूषण नहिं है क्योंकि हमारे सिद्धान्तमें कार्यभी कारण रूपकरकें सर्वदा रहे हैं छिपेभये कार्यके प्रकट होयवेसोंही लोकमें उत्पत्ति कहे है तहाँ लौकिकक्रियाज्ञान तथा वैदिकक्रियाज्ञान दोनोंही नित्य है तब वेदकरकें कहा प्रयोजन है ? ऐसी शङ्का नहिं करनी लौकिक क्रियाज्ञानसों तो लौकिककार्यकी सिद्धि होयहै वेदोक्तक्रियाज्ञानकरकें यज्ञ तथा ब्रह्मको प्रकट होनो फल है तासों वेदकी आवश्यकता है, पूर्वकाण्डमें क्रियाके अनुष्ठानसों क्रियाविशिष्ट यज्ञस्वरूपको प्रादुर्भाव होवै है उत्तरकाण्ड वेदान्तमें परिचर्याकरके प्रसन्नभये गुरुकी अनुग्रहसों ज्ञानविशिष्टब्रह्मस्वरूप को प्रादुर्भाव होयहै ॥ ९१ ॥

वेदवाच्ये तु ये रूपे तदभिव्यक्तितः फलम् ॥
अनुष्ठानाद्गुरोर्वापि लौकिके लौकिकं फलम् ९२
प्रेमसेवात एव स्याद्विशिष्टव्यक्तिरुत्तमा ॥
कार्यभेदविभेदान्हि कल्पयित्वा विभागशः ९३

तत्त्वदीपप्रकाशः ।

तर्हि लोकतुल्यत्वात् क्रियाज्ञानप्रतिपादनार्थं किं महता वेदेनेत्याशंक्याह ॥ **वेदवाच्ये तु ये रूप इति** ॥ तयोरभिव्यक्तिमात्रेणैवोक्तम्फलम्भवति ॥ अतः फलार्थङ्कीर्तनमित्यर्थः ॥ अभिव्यक्तिहेतुमाह ॥ **अनुष्ठानाद्गुरोर्वापीति** ॥ गुरोरुत्तरकाण्डे लौकिकेऽपि क्रियाज्ञानयोः सफलत्वात्को विशेष इत्याशंक्याह ॥ **लौकिकं फलमिति** ॥ अन्यतः फलसिद्धिरित्यर्थः ॥ विशिष्टाभिव्यक्तौ हेतुमाह ॥ ९२ ॥ **प्रेमसेवात इति**॥भक्तिशब्दस्य प्रत्ययार्थःप्रेमधात्वर्थः॥सेवाभक्त्यैव तुष्टिमभ्येतीति-

वाक्यात् ॥ पश्यन्ति ते म इति च॥ विशिष्टस्य कृष्णस्य कृतार्थत्वज्ञापनायाभिव्यक्तिरुत्तमा नतु दैत्यवधार्थमिव ॥ ननु क्वचित्षोडशपदार्थाः क्वचित्सप्त तथा त्वयापि कार्येषु कथन्न भेदाःकल्प्यन्त इत्याशंक्याह ॥ कार्यभेदेति॥ "मुख्यमेकम्पृथक्कृत्यसाधनानान्निरूपणम्॥ युक्तन्नतुल्यसंख्या हि फलकारणयोः क्वचित्॥ अतोत्र हरिम्पृथक्कृत्य तत्वान्येव कारणत्वेन कथितानि नत्वेकीकृत्यशास्त्रान्तरवन्निरूपितानि ॥ ९३ ॥

आवरणभंगः।

तर्हीति ॥ ॥ यदि स्वरूपतः सर्वस्य मित्यत्वन्तर्हीत्यर्थः ॥ ॥ अभिव्यक्तिहेतुमाहेति ॥ ॥साधनतो निर्णेतुमाहेत्यर्थः॥ ॥ गुरोरिति ॥ उपसत्त्यादिना प्रसन्नात्तस्मादित्यर्थः ॥ ॥ अन्यत इति ॥ ॥ तथाऽत्र पराधीनत्वात्तज्जघन्यमिति विशेष इत्यर्थः । एवं वैदिके प्रमेये फलतो विशेष उक्तः । एतेनैव वैदिकशेषभूतस्मार्त्तपौराणभारतरामायणप्रमेयमपि व्याख्यातं ज्ञेयन्तत्रापि धर्मप्रकरणे क्रियाया ब्रह्मप्रकरणे च ज्ञानस्यैव प्रमेयत्वात् । तयोः श्रौतशेषतयैव मुख्ये फले उपयोगः ॥ गौणन्तु श्रौत इव कर्मसचिवदेवतोषात् ॥ गौणतरन्त्वपूर्वद्वारेत्याद्यूह्यम् । सांख्ययोगयोस्तु प्रमेयङ्कारणकोटौ निविशति ॥ तथा फलमपि । तदग्र उद्देशतो वक्तव्यम् । अङ्गोपवेदादेस्तु प्रागेवोक्तेन चरितार्थमिति पृथगत्र न विचारितम् ॥ अतः परङ्गीताश्रीभागवतयोः प्रमेयमेव शिष्यते तत्साधनतो निर्णयन्ति ॥ विशिष्टेत्यादि ॥ ननु भक्त्या त्वनन्ययेतिवाक्याद्भक्तिरेवाभिव्यक्तिहेतुत्वेन वाच्या नतु सेवापीत्यत आहुः ॥ भक्तिशब्दस्येत्यादि ॥ अयमर्थः । प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येनेति नियमादत्र धातुसामान्यार्थे शक्तोप्यक्तिन् प्रत्ययो भजिसमभिव्याहारात्प्राधान्येन भजनक्रियां वक्ति सा च सेवात्मिका । सेवापदञ्च सातत्याभीक्ष्ण्यान्यतरपूर्वककायिकव्यापारविशेषे रूढम् । स्त्रीसेवा औषधसेवेत्यादिप्रयोगदर्शनात् । तादृशव्यापारविशेषपरिचर्यारूप एव स्वतन्त्रसेवाबोधकैर्मत्सेवया प्रतीतञ्चेत्यादिवाक्यैरवगम्यते तेषु सेवायाः पूर्णत्वादिकथनात्प्रेमपूर्वकत्वमपि लभ्यते । अन्यथा तस्याः कायक्लेशजनकत्वेन स्वतः पुरुषार्थत्वोक्तिभङ्गप्रसङ्गात् । एवं सति प्रेम्ण एव प्रयोजकत्वेन तस्य प्राधान्यङ्गम्यते भक्तिलक्षणवाक्यैर्भक्त्यैवेति वाक्याच्च । अतः स एव प्रत्ययार्थः । कायिक्यादिरूपात्त्वप्रधानत्वात्प्रकृत्यर्थः ॥ सापि मत्यादिसेवाभिरतामदीहा इति सेवनमुपक्रम्योक्तेति पश्यंति त इति वाक्येनावगम्यते अतो भक्त्या मामभीत्यादावुभयं संगृह्यत इत्यतः प्रेमसेवा तत्र तथोच्यत इत्य

एतेनैव पुराणान्तरप्रमेयव्यवस्थापि बोधिता ज्ञेया । एवं स्वरूपविचारेण शास्त्रानुरोधिप्रमेयं सार्द्धैश्चतुर्भिः स्वरूपप्रमाणसाधनफलैर्निर्णीतम् । अतःपरं स्वतन्त्रप्रमेयमध्ये कार्यरूपं विचारयन्ति ॥ नन्वित्यादि ॥ कार्यभेदेति ॥ ब्रह्मातिरिक्तस्य सर्वस्य कार्यत्वात्तद्भेदान्द्रव्यादीन् तद्विभेदान् पृथिवीशब्दादीन् हि निश्चयेन एतावंत एव नियताः पदार्था नाधिका इत्याकारकेण विभागशः पृथिवी नित्या कार्या इन्द्रियानिन्द्रियरूपेत्याद्यवान्तरविभागेन कल्पयित्वा तज्ज्ञानेन तत्साधर्म्य वैधर्म्यज्ञानेन मुक्तिम्प्रदर्श्य शास्त्रप्रवृत्तिर्वृथा । न फलसाधिका यस्माद्धेतोः कार्यमतिर्वृथावाचारम्भणश्रुत्याकार्यबुद्धिरेव न फलजनिकेत्युक्तन्तस्मादित्यर्थः ॥ तस्मात्तत्कार्यतया हेया ॥ तथैव क्रीडेयं नतु फलायेतिभावः । ननु यद्येवन्तदा तत्वगणनाप्यपार्था तेषामपि कार्यत्वादित्यत आहुः ॥ मुख्यमेकमित्यादि ॥ तथाच कार्यत्वेऽपि बोधसाधनत्वं पुराणेषूक्तत्वाद्भगवदुक्तम्पक्षमाश्रित्य कारणत्वेनोपगण्यन्ते तेन न पूर्वोक्तदोष इत्यर्थः ॥ ९२ ॥ ९३ ॥

ब्रजभाषाटीका।

पूर्ण क्रिया ज्ञानविशिष्ट श्रीकृष्णचंद्रको प्रादुर्भाव तो प्रेम सहित देहेन्द्रियादिकनकरकें सेवाकरवेसोंही होय है प्रेम सेवासों जो कृष्णको प्रादुर्भाव होय है सो भक्तकूँ कृतार्थ करवेके लिये ही होय है वहाँ प्रादुर्भाव दैत्यवधार्थ नहिं है प्रेमसेवाको ही नाम भक्ति है तथा देह इन्द्रियनकरकें जो भगवान्की परिचर्या करनों वाहीसों सेवा कहें है या विषयको आवरणभंगमें विस्तार लिख्यो है सो अवश्य जाणवे योग्य है । शंका---कहूँ षोडश पदार्थ, कहिं सप्तदश पदार्थ मानें हैं या प्रकार भगवान्सों अतिरिक्त सब पदार्थकों कार्य मानकें कार्यके अनेक भेद बताये हैं आपनें वा रीतिसों क्यों नहिं वर्णन कियो ? उत्तर---कार्यको ब्रह्मसों अतिरिक्त मानके वामें सात पदार्थ की कल्पना करके उन सात पदार्थनमें सो एक एकके अनेक पृथिव्यादिक तथा शब्दादिकके भेद कहकें उनमें नित्यानित्यविचार करकें इतनेंही पदार्थ हैं इनके ज्ञानसों मोक्ष होय है या प्रकारकी जो शास्त्रकी रचना है सो वृथा है क्योंकि वाचारंभणश्रुतिमें कार्यबुद्धि फलजनक नहिं है

यह बात सूचित करी है कार्यकी सत्यताभी कारणरूपता करके ही कही है ॥ ९२ ॥ ९३ ॥

वृथा शास्त्रप्रवृत्तिर्हि यस्मात्कार्यमतिर्वृथा ॥ सत्वं रजस्तमश्चैव पुरुषः प्रकृतिर्महान् ॥ ९४ ॥ अहङ्कारः पञ्चमात्राः शब्दः स्पर्शाकृती रसः ॥ गन्धो भूतानि पञ्चैव खं वायुर्ज्योतिरपक्षितिः ॥ ९५ ॥ क्रियामयानीन्द्रियाणि वाग्दोर्मेढ्रांघ्रिपायवः ॥ श्रोत्रं त्वक् घ्राणदृक् जिह्वामनः षट्चेति भेदतः ॥ ९६ ॥

तत्त्वदीपप्रकाशः ।

तत्वानि गणयति ॥ सत्वमिति । मनः षडित्यन्तेन मनसः क्रियामयत्वे ज्ञानमयत्त्वञ्चाह ॥ भेदत इति । मनसा सह क्रियायां पडिति ॥ ९४ ॥ ९५ ॥ ९६ ॥

आवरणभंगः ।

गणयतीति॥पूर्वसंख्याया उक्तत्वात्तत्पूरणाय गणयतीत्यर्थः॥ अत्र तत्वमित्यादि ॥ सार्द्धद्वयेनाष्टाविंशतीनामुद्देशमात्रं कृतं लक्षणन्तु सत्वादिगुणानाम् ॥ तत्र सत्वान्निर्मलत्वादित्यादिभ्यो गीतावाक्येभ्यो ज्ञेयम् । पुरुषादीनाम्पञ्चविंशतीनान्तु तृतीयस्कन्धस्थकापिलेयवाक्येभ्यः । तत्सर्वं सुबोधिन्यां विवृतम् । तत्र चैकैकस्य लक्षणत्रितयमुक्तन्तेभ्यो व्यवहारोपयोगाय मया प्रस्थानरत्नाकरे उद्धृत्यानूदितानि परीक्षितानि चेति तत्प्रपञ्चस्ततोऽवधेयः ॥ उद्ग्रन्थविस्तराभियात्र न लिख्यते ॥ ९४ ॥ ९५ ॥ ९६ ॥

व्रजभाषाटीका ।

तासों या ग्रन्थमें भगवत्स्वरूपको पृथक् वर्णन करकें तत्वनकूँही जगतके कारण बताये हैं और शास्त्रकी तरह तत्वनमेंही मूलस्वरूप सामिल नहिं राख्यो है । अब भगवान्के सिद्धान्तके अनुसार तत्वनकी गणनाकरें है । सत्वगुण १ रजोगुण २ तमो-

गुण ३ पुरुष ४ प्रकृति ५ महत्तत्व ६ अहंकार ७ शब्द ८ स्पर्श ९ आकृति १० गन्ध ११ रस १२ आकाश १३ वायु १४ तेज १५ जल १६ पृथ्वी १७ वाणी १८ हस्त १९ मेढ्र २० पाद २१ पायु २२ कर्ण २३ त्वचा २४ घ्राण २५ दृष्टि २६ जिह्वा २७ मन २८ ये अठ्ठाईस तत्व हैं ॥ ९४ ॥ ९५ ॥ ९६ ॥

आध्यात्मिकस्तु यः प्रोक्तः सोऽसावेवाधिदैविकः ॥ अतो हि देवतावर्ग इन्द्रियेभ्यो न भिद्यते ॥ ९७ ॥ माया तु गुणरूपा हि कालस्तु भगवान् परः ॥ सूत्रं महाँस्तथा प्राणो बुद्धिश्चाहमभेदतः ॥ ९८ ॥

तत्त्वदीपप्रकाशः ।

देवतावर्गेणाधिकसंख्यामाशंक्य परिहरन्ति ॥ आध्यात्मिकस्त्विति ॥ ९७ ॥ माया भिन्नेत्याशंक्याह ॥ **मायात्विति** ॥ कालस्तु भगवत्यन्तर्भूतः ॥ सूत्रन्तु महत्तत्वमेव ॥ तथा प्राणो बुद्धिश्च अहङ्कार एव तस्मादष्टाविंशतिसंख्याकान्येव ॥ ९८ ॥

आवरणभंगः ।

देवतावर्गेणेति ॥ ॥ तैजसादिंद्रियाणित्विति तैजसशब्दवाच्याद्राजसाहङ्कारादिंद्रियोत्पत्तिः "वैकारिकान्मनो जज्ञे देवा वैकारिका दश । दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेन्द्रमित्रकाः ॥" इति वैकारिकशब्दवाच्यात्सात्विकाहङ्काराद्देवतोत्पत्तिभेदादुक्तरूपेण तेनेत्यर्थः ॥ आध्यात्मिका इति ॥ ॥ द्वितीयस्कन्धस्य दशमे "आध्यात्मिकोयं पुरुषः सोसावेवाधिदैविकः" इत्यत्र जीवान्तर्यामिणोः कार्यभेदेपि पाचकपाठकवदेव प्रतिपादितः। प्रकृतेऽपि तृतीयस्कन्धस्य षष्ठे "त्रयोविंशतितत्वानाङ्गणं युगपदाविशत्" इति प्राधानिकस्य गणस्य संख्यामुक्त्वाऽग्रे "तस्याग्निरास्यं निर्भिन्नं लोकपालोविशत्पदम् । वाचा स्वांशेन वक्तव्यं ययासौ प्रतिपद्यत" इत्यादिष्विन्द्रियाणान्देवांशत्वङ्कण्ठत एवोक्तम् ॥ श्रुतौ चाग्निर्वाग्भूत्वा मुखम्प्राविशदित्युक्तन्तेनेन्द्रियाणान्देवांशत्वादेवाभिन्नत्वम् ॥ आध्यात्मिकादिपदार्थस्तु । आत्मनीत्यध्यात्मं तत्र भव आध्यात्मिकः । एवमाधिदैविकोऽपि ।

एवं सति दैव्येषु भोगादिषु देवतावर्गस्य स्वातन्त्र्येपि देहमधिष्ठाय कार्यकारण इन्द्रियाणामेव प्रधान्यस्य पूर्ववाक्य उक्तत्वात्तदाधिदैविकानामपि तेष्वेव निवेश इत्यत आध्यात्मिकेभ्य इन्द्रियेभ्यः स न भिद्यत इत्यर्थः ॥९७॥ ॥मायाभिन्नेत्याशंक्येति ॥ ॥ "रजःसत्वं तम इति निर्गुणस्य गुणास्त्रयः । सर्गस्थितिनिरोधेषु "गृहीता मायया विभोः " इतिवाक्ये मायागुणयोर्ग्राह्यग्राहकभावोक्तेर्भिन्नेत्यशक्येत्यर्थः ॥ गुणरूपत्वन्तु दैवी ह्येषा गुणमयीतिवाक्यात् । ननु तथा सति कथमनयोर्वाक्ययोरविरोध इतिचेत् ॥ इत्थम् । सामर्थ्यरूपा हि सा । यथा पुरुषस्य कर्मकरणादौ शक्तिः । अतएव कार्यैकोन्नेया "किमावरीवः" इतिश्रुतेश्च । एवं सति सिसृक्षया गुणानुत्पाद्य तेषु तान्निक्षिपतीति तदात्मकैव सोच्यते । कीर्त्तिन्यायाच्च न-भगवच्छक्तित्वहानिरतो नानुपपत्तिः कापि । कालो वैशेषिकादिमते द्रव्यान्तरम् । अनीश्वरकापिले तु 'दिक्कालावाकाशादिभ्य' इति सूत्रादाकाशेन्तर्भावितः॥एकदेशिमते त्वतिरिक्तम्प्राकृतिकन्तत्वम् । अपरैकदेशिमते त्वहङ्कारमूढस्य कर्तुर्भयजनकः पुरुषस्य धर्मः सामर्थ्यविशेषो वा काल इति । तदेकमपि स्वाभिप्रेतन्न भवति । किन्तु श्रुतौ कार्यकोटावगणनादुद्गमस्यापि श्रवणात् "सतोऽभिव्यञ्जकः कालो ब्रह्मतत्रितयन्त्वहम्" इति "प्रकृतेर्गुणसाम्यस्य निर्विशेषस्य मानवि । चेष्टा यतः स भगवान् काल इत्युपलक्ष्यते " इति वाक्याच्च स भगवदात्मक एवेत्याशयेनाहुः ॥ कालस्त्वित्यादि ॥ ॥ ननु तेभ्यः समभवत्सूत्रमिति वाक्यात्सूत्रन्नाम तत्वं भिन्नमेवेत्यत आहुः ॥ सूत्रन्तु महत्तत्वमेवेति ॥ " तेभ्यः समभवत्सूत्रं महान् सूत्रेण संयुतः" । इति वाक्यादेव तथेत्यर्थः । एतद्वाक्यार्थस्तु । सूत्रं सूचनात् । क्रियाशक्तिमान् प्रथमो विकारः । ततो महान् ज्ञानशक्तिमान् सच सूत्रेण संयुतः सम्यङ्मिश्रितस्ततः पृथङ्न । किंत्वेकमेव तत्वम् । ज्ञानक्रियाशक्तिभ्यां द्वेधोच्यत इति । द्वितीयस्कन्धेतु । ततः प्राणोमहानसुरिति प्राणात्मकत्वमप्यस्योक्तम् । वेदे य आस (?)न्यत्वेन प्रसिद्धो भगवद्रूपस्तस्य सूत्रेऽवतारात् । एतद्रूपता च नामसृष्टावुपयोक्ष्यते । प्राणबुद्धिभ्यान्तत्वाधिक्यमाशंक्य परिहरति। तथा प्राणो बुद्धिश्चेति। बुद्धिप्राणस्तु तैजस इति वाक्यात् ॥ तैजसो राजसाहङ्काराभिन्न इत्यर्थः । अस्मिन्पक्षे तैजसाहङ्कार एवासत्यावतारो ज्ञेयः ॥ अतो नानुपपत्तिः । भगवदीयसांख्ये तयोरुत्पत्तिर्नोक्तेत्यत्रापि तत्वान्तरता नोक्ता । अतो न तत्वाधिक्यमित्यर्थः । एतेन तृतीयस्कन्धे तैजसात्तु विकुर्वाणाद्बुद्धितत्वमभूत्सतीति यदुक्तन्तत्कल्पान्तरानुसारिमतान्तरमिति ज्ञापितम् । प्राणस्य वायुरूपत्वं वादायेत्यप्यवधेयम् । अन्यथा तामसीं सृष्टिं वदन् शास्त्र ारस्तैजसानामिन्द्रियाणामात्मत्वङ्कथं वदेत् । ननु क्वचिदाकाशादिपंचकसत्वांशेभ्यो बुद्ध्युत्पत्तिकथनात्सात्विकत्वम्प्रतीयते।ध्वासो-

च्छ्वासाभ्यां वायुत्वेन प्राणस्य तामसत्वमतः कथमुभयो राजसत्वमितिचेन्न । जननक्रियायामुभयोर्व्यापृतत्वाज्जननस्य च रजोधर्मत्वात्तदुपपत्तेरिति । प्राणलक्षणन्तु सर्वेंद्रियबलदातृत्वम् । अतएव ओजःसहोबलानि प्राणधर्माः । ओज इन्द्रियशक्तिः सहो मनःशक्तिर्बलञ्च देहशक्तिरिति । अयञ्चाणुः सामर्थ्येन शरीरे सकले प्राणापानव्यानोदानसमानभेदात्पञ्चधा तिष्ठति । क्वचित्तु नागकूर्मकृकलदेवदत्तधनञ्जयभेदेन दशधाप्युक्तः । एतेषां स्थानकार्यादिकं विस्तरभयान्नोच्यते । सार्वजनीनत्वात्प्रमाणमपि । बुद्धिस्तु बुद्धिश्च बोद्धव्यञ्चेति श्रुतौ करणानुक्रमणे सिद्धा । हृदयस्था विशिष्टज्ञानलक्षणकार्यानुमेया च ॥ तत्साधितमाचार्यैः । यो बुद्धिमान् तस्य पदार्थज्ञानम्भवतीति । सुबुद्धिरयं पदार्थान् जानातीति च ज्ञानकारणत्वेन बुद्धिर्व्यपदिश्यते । कार्यकारणयोरभेदोपचाराच्च बुद्धिज्ञानयोः पर्यायत्वव्यवहारः ॥ अन्यथा बालस्य बुद्ध्यभावेन न पदार्थज्ञानं सम्यग्भवति तत्स्यादिति बुद्धेर्लक्षणानि तु त्रीणि तत्र द्रव्यस्फुरणविज्ञानत्वं स्वरूपलक्षणम् । इन्द्रियानुग्राहकत्वं संशयविपर्यासनिश्चयस्मृतिस्वप्नवृत्तिकत्वञ्चेति द्वयङ्कार्यलक्षणम् ॥ तदुक्तम् "द्रव्यस्फुरणविज्ञानमिन्द्रियाणामनुग्रहः । संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च । स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथक्" इति ॥ प्रथमलक्षणे द्रव्यपदं विषयमात्रोपलक्षकम् । तेन विषयनिर्विकल्पकोत्तरं शब्दादिना यद्विशिष्टज्ञानन्तादृगकारा बुद्धिरित्याध्यात्मिकन्तल्लक्षणं निर्विकल्पकाकारा तु न बुद्धिः । तारतम्याज्ञापनेनेन्द्रियाननुग्राहकत्वाच्च । योगजधर्मजन्यविज्ञानस्यापि विशिष्टज्ञानरूपत्वात्तद्वारणाय समुदितमुपात्तम् । तेनेदम्फलति योगजधर्माजन्या विशिष्टज्ञानसमानाकारो ज्ञानेन्द्रियानुग्राहकः पदार्थो बुद्धिरिति । तृतीयलक्षणोक्तावृत्तयस्तु कार्यज्ञाननिरूपणे संशयादीनां स्वरूपकथने तत्तत्समानाकारत्वेनैव ज्ञाता भविष्यन्तीति प्रस्थानरत्नाकर एव ता विवृता इत्यतो नात्र लक्ष्यन्ते ॥ प्रकृतमनुसरामः ॥ एवन्तत्वाधिक्यम्परिहृत्य निगमयन्ति ॥ तस्मादित्यादि ॥ ९८ ॥

ब्रजभाषाटीका ।

पुरुषादि पच्चीस तत्वके लक्षण तृतीयस्कन्धमें लिखे हैं, तीनों गुणनके लक्षण (तत्र सत्वं निर्मलत्वात्) इत्यादि गीतावाक्यमें लिखे हैं, मन क्रियामयहै तथा ज्ञानमयभी है; दिशा, वायु, सूर्य, प्रचेता, अश्विनीकुमार, अग्नि, इन्द्र, उपेन्द्र, मित्र ये दश इन्द्रियनके देवताहैं (वह्निर्वाग्भूत्वा मुखम्प्राविशत्) इत्यादि श्रुतिमें

देवतोंको ही इन्द्रियरूप होजानों लिखे हैं तासों आध्यात्मिकके साथ आधिदैविकको अभेद मानके इन्द्रियनमें ही इन्द्रियनके देवतानको अन्तर्भाव होवे है ॥ ९७ ॥ (दैवी ह्येषा गुणमयी मम माया दुरत्यया) इत्यादि वाक्यसों मायाको तीनों गुणनमें अन्तर्भाव है (सत्वं रजस्तम इति निर्गुणस्य गुणास्त्रयः । स्थितिसर्गनिरोधेषु गृहीता मायया विभोः ॥) इत्यादिवाक्यानुसार जब भगवान् सृष्टिकी इच्छा करें है तब अपनी सामर्थरूप मायाकों अपने गुणनमें डारदें है तासों वो माया गुणमयी कहावें है (स भगवान् काल इत्युपलक्ष्यते) इत्यादिवाक्यनसों काल भगवद्रूप है तासों कालकी तत्वनमें गणना नहिं है सूत्रात्मक प्राणको महत्तत्त्वमें अन्तर्भाव है प्राण तथा बुद्धि इनको अहङ्कारमें अन्तर्भाव है ॥ ९८ ॥

प्रकृतिः पुरुषश्चोभौ परमात्माभवत्पुरा ॥ यद्रूपं समाधिष्ठाय तदक्षरमुदीर्यते ॥ ९९ ॥ आनन्दांशतिरोभावः सत्वमात्रेण तत्र हि ॥ मुख्यजीवस्ततः प्रोक्तः सृष्टीच्छावशगो हरिः ॥ १०० ॥

तत्त्वदीपप्रकाशः ।

अक्षरकालकर्मस्वभावान्निरूपयन् प्रथममक्षरमाह ॥ **प्रकृतिः पुरुषश्चेति** ॥ भगवान्यदा येन रूपेण कार्यङ्कर्तुमिच्छति तद्रूपमेव व्यापारयति ॥ तत्र ज्ञानेन मोक्षो देय इति यदा विचारयति तदाक्षरमेव ब्रह्मस्वरूपम्पुरुषोत्तमस्याधारभागः चरणस्थानीयः । तमादौ चतुर्मूर्तिङ्करोति । अक्षररूपं ब्रह्मरूपम् । कालरूपं स्वभावरूपञ्च तत्र यस्य रूपस्य द्वैरूप्यम्भवति प्रकृतिपुरुषभेदेन तदक्षरम् ॥ ९९ ॥ ननु पुरुषोत्तमस्वरूपात्तत्र को विशेष इति चेत्तत्राह ॥ **आनन्दांशतिरोभावइति** ॥ अग्रेऽहमेवम्भविष्यामीतीच्छामात्रेणान्तःसमुत्थितसत्वेनानन्दां-

शस्तिरोहित इव भवति । तेन सृष्टीच्छया व्यापृतो भगवान्मुख्यजवि-शब्दावाच्योऽपि भवति ! अत एव औडुलोमिमते जीवानां चिद्रूपाणाश्चिद्रूपे स्वयोग्ये ब्रह्मणि प्रवेशः ॥ १०० ॥

आवरणभंगः ।

ब्रह्मतनुः । पर इत्यत्रोक्तं यत्तद्विचारयन्ति ॥ अक्षरेत्यादि ॥ तदाहुरक्षरं ब्रह्म सर्व कारणकारणमिति तृतीयस्कन्धवाक्यादक्षरस्य "कालङ्कर्म स्वभावश्च मायेशो मायाऽसृजत ।आत्मन्यदृच्छया प्राप्तं विबुभूषुरुपाददे । कालादुगुणव्यतिकरः परिणामस्वभावतः । कर्मणो जन्ममहतः पुरुषाधिष्ठितादभूत् " इतिद्वितीयस्कन्धवाक्यात्कालकर्मस्वभावानामपि ब्रह्माण्डसृष्टिपूर्वभावित्वात्तेभविष्यंतीति कथमष्टाविंशतिरेव तत्वानीत्याशंकायामेतेषान्तत्वतानिराकरणार्थमेतच्चतुष्टयस्वरूपं निरूपयिष्यन् प्रथममक्षरं लक्षयतीत्यर्थः ॥ अत्राक्षरकर्मस्वभावानीत्यत्र मध्ये कालशब्दस्त्रुटित इति प्रतिभाति । तथाग्रे ब्रह्मरूपमित्यत्र कर्मरूपमिति पाठश्च ॥ व्याख्यानग्रन्थस्वारस्यादिति बोध्यम् । नन्वेवमधिष्ठानस्य किम्प्रयोजनमत आहुः ॥ भगवानित्यादि ॥ ॥ तथाचाक्षरज्ञाने श्रुतौ मोक्षस्योक्तत्वात्तस्याव्यक्तत्वेन दुर्ज्ञेयत्वात्तस्य ज्ञानार्थमेव तदधितिष्ठतीत्यर्थः ॥ एवं प्रयोजनमुक्त्वा लक्षणं व्याकुर्वन्ति । तत्र यस्य रूपस्येत्यादि ॥ ॥ इदमेव च श्रीभागवते सर्वकारणकारणपदेनोक्तम् । सर्वकारणयोः प्रकृतिपुरुषयोः कारणमितिव्याख्यानात् । द्विधासमभव द्बृहदिति वाक्याच्च । अत्र मूले समधिष्ठायेति कथनात्सृष्टिकारणे आधाराकांक्षापि पूरिता ॥ तेन शास्त्रे ऊर्णनाभदृष्टान्ते यानुपपत्तिः सापि परिहृता बोध्या ॥ ९९ ॥ भवतीति ॥ ॥ तथा च पुरुषोत्तमस्तु लीलया इच्छां करोति न तु तया व्याप्रियत इत्यतिरोहितानन्दः ॥ अक्षरं तु तया व्यापृतं सन्मलभूतेन सत्वेन तिरोहितानन्दमुख्यजीवपदवाच्यतान्धत्त इत्येष विशेष इत्यर्थः॥ आनन्दांशतिरोभावे गमकमाहुः ॥ अत एवौडुलोमीत्यादि ॥ १०० ॥

व्रजभाषाटीका ।

अक्षर काल कर्म स्वभाव इन चारकीभी तत्वनमें गणना होनीचाहिये क्योंकि तत्वनके समान येभी ब्रह्माण्डके पूर्व प्रकट भये हैं तथा इनके कार्य भी परिणामादिक प्रत्यक्ष हैं इसी शंकाको दूरकरनेके लिये इनके स्वरूपकूँ वर्णन करतेभये प्रथम अक्षरको स्वरूप वर्णन करें है (प्रकृतिरिति) भगवान् जा स्वरूपकरकें

कार्य करनों चाहेहैं वा रूपकूँ ही (व्यापृत) अर्थात् विस्तारयुक्त करें है जब भगवान् ज्ञानकरके मोक्ष देनों चाहे हैं तब पुरुषोत्तम भगवान् अपने चरणस्थानीय आधारभागके चार स्वरूप करें है अक्षरस्वरूप १ कालरूप २ कर्मरूप ३ स्वभावरूप ४ इन चार मूर्तिनमें अक्षर दो रूपवालो है प्रकृति १ पुरुष २ ये दोनों अक्षरके रूप हैं ॥ ९९ ॥ पुरुषोत्तमके स्वरूपसों इनमें इतनी विलक्षणता है आगे मैं जगद्रूप होऊँगो ऐसी इच्छामात्रकरकें बढ्यो भयो जो सत्व ताकरकें आनन्दांश (तिरोहित इव) छिपे भये के समान गुप्त होजावे है तासों सृष्टि उत्पन्न करवेकी इच्छाकरके व्यापारवाले भगवान् मुख्य जीवशब्दवाच्य होवे है याहीसों औडुलोमिमतमें चिद्रूपजीवनको चिद्रूप ब्रह्ममें ही प्रवेशलिख्यो है अर्थात् सृष्टीच्छाकरकें व्यापारवाले ब्रह्मको आनन्द तिरोहितहोए रह्यो है तासों चिद्रूप ब्रह्ममें ही लय लिख्यो है ॥ १०० ॥

इच्छामात्रस्तिरोभावस्तस्यायमुपचर्यते॥ब्रह्मकूटस्थाव्यक्तादिशब्दैर्वाच्यो निरन्तरम् १०१
सर्वावरणयुक्तानि तस्मिन्नण्डानि कोटिशः ॥
मूलाविच्छेदरूपेण तदाधारतया स्थितिः १०२

तत्त्वदीपप्रकाशः।

नन्वानन्दांशतिरोभावे जीवत्वमेव स्यात्। यथा महदादीनामित्याशंक्याह ॥इच्छामात्रादिति॥इच्छायाम्प्रविष्टायाङ्कार्यव्यापृत्या तिरोभाव इवोच्यते ॥ वस्तुतस्त्वानन्दमय एव ॥ अत एव पुरुषोऽवतारो भविष्यति ॥ इच्छारूपायाः प्रकृतेर्भिन्नत्वेवाचकैरपि तस्य न जीवत्वमित्यभिप्रायेणाह ॥ ब्रह्मेति ॥ आदिशब्देनासत्सत्तमःशब्दादयो गृह्यन्ते ॥ तथापि न पुरुषोत्तमात् भिन्नतया व्यवस्थितिः। किन्तु निर-

न्तरमेव तस्यैव कारणत्वं ज्ञापयितुं तत्रैव कार्यस्थितिमाह ॥ १०१ ॥ सर्वावरणयुक्तानीति ॥ तदाहुरक्षरं ब्रह्मेतिवाक्यात् ॥ एतस्याक्षरस्थ पुरुषोत्तमे अभेदेन यथा निवेशस्तथा प्रकारा उच्यन्ते ॥ तदाह ॥ मूलाविच्छेदेति ॥ मूलेन पुरुषोत्तमेन सह अविच्छिन्नतया तिष्ठति नतु कार्यत्वेनेत्याह ॥ तदाधारतयेति ॥ १०२ ॥

आवरणभंगः ।

अक्षरस्यानन्दमयत्वे गमकमाहुः ॥ अतएवेत्यादि ॥ ॥ अत्रेदं हृदयं प्रकृतिर्भर्तुः पुरुषस्य निर्वृतात्मन इत्यनेनानन्दमयत्वमुक्तम् ॥ ब्रह्माण्डदेहप्रविष्टपुरुषस्य च प्रथमस्कन्धे वाराहादयोऽवतारा उक्ताः ॥ त एव च द्वितीयस्कन्धे लीलावतारत्वेनानन्दाकारा उक्ताः ॥ तत्र तत्र तेषान्तथात्वञ्च साधितम् । एवं सति यदवताराणामानन्दमयत्वन्तदवतारिणः पुरुषस्याप्यानन्दमयत्वं सिद्धम् ॥ तथा सति तदवतारिणोऽक्षरस्यानन्दमयत्वे कः सन्देह इति ॥ एषा च ब्राह्माण्डस्य ब्रह्मशरीरत्वं यत्र कल्पे तत्रत्या व्यवस्था ॥ गमकान्तरमप्याहुः ॥ इच्छारूपाया इत्यादि ॥ ॥ भिन्नत्वे इति ॥ या पूर्वं प्रजायेयेतीच्छारूपा तस्या एव पिंडिततया घनीभावेन प्रकृतिरूपतया पृथक्स्थितावित्यर्थः॥अत्र वाचकनिर्देशेन प्रमाणानुरोधित्वमक्षरस्य स्फुटीकृतम् । ब्रह्मशब्दवाच्यत्वन्तु “ तदाहुरक्षरं ब्रह्म”इत्यत्रोक्तम् ॥ एवं श्रुतावपि तथा “ कूटस्थोक्षर उच्यते । अव्यक्तोक्षर इत्युक्तः ” इति ॥ कूटवन्निर्विकारतया स्थितं कूटस्थम् । कूटस्थशब्दस्याक्षरपर्यायत्वकथनेन स्थूलसूक्ष्मदेहद्वयावच्छिन्नचैतन्यं कूटस्थपदवाच्यमित्यङ्गीकुर्वन्तो विद्यारण्याद्या निरस्ताः शक्तिग्राहकस्यालाभादिति ॥ शेषं स्पष्टम् ॥ तदाहुरिति ॥ ॥ “ विकारैः सहितो युक्तैर्विशेषादिभिरावृतः । आण्डकोशो बहिरयं पञ्चाशत्कोटिविस्तृतः ॥ दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् । लक्ष्यन्तेंतर्गताश्चान्ये कोटिशोप्यण्डराशयः ॥ ” तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् इति ” । एवमस्य प्रमाणान्निर्णय उक्तः।प्रमेयाद्वक्तुमाहुः ॥ एतस्येत्यादि ॥ ॥ उच्यन्त इति—श्रीभागवतादावुच्यन्त इत्यर्थः ॥ १०१ ॥ १०२ ॥

व्रजभाषाटीका ।

आनन्दांशको सर्वथा तिरोभाव नहिं होयहै किन्तु तिरोहितके समान होजावेहै वस्तुतः आनन्दमयही है ताहीसों आगे अक्षरसों पुरुषावतार होयहै सर्वथाही जो आनन्दको तिरोभाव होय तो

महत्तत्त्वाहङ्कारके समान अक्षरभी जडही होजाय हुलप होयवेकी इच्छा सघन होयकें पृथक् स्थित होयहै वाकोही नाम प्रकृतिहै अक्षरब्रह्म जीव नहिं कहावेहै ब्रह्म कूटस्थ अव्यक्त आदिशब्दनसों कह्योजावें हैं सृष्टिकी आदिमें (सदेवेदमग्रआसीत् अस‌देवेदमग्र-आसीत् तमएवेदमग्र आसीत्) इत्यादिकनमें असत् सत् तम आदि शब्दनसों भी अक्षरहीकों ग्रहण करनो ॥ १०१ ॥ अक्षर है सो पुरुषोत्तमसों न्यारो होयकरके स्थितरहें है वो अक्षरब्रह्मही जगत्को कारणहै वामें ही कार्य रहेहै अर्थात् पृथ्वी जलादिकनके आवरणसहित कोडन ब्रह्माण्ड वा अक्षर ब्रह्ममें स्थित रहे हैं वे अक्षरब्रह्म मूल पुरुषोत्तममें अभेदसम्बन्धसों रहें है ॥ १०२ ॥

प्रभुत्वेन हरेः स्फूर्तौ लोकत्वेन तदुद्भवः ॥
अन्तर्याम्यवतारादिरूपे पादत्वमस्य हि ॥
॥ १०३ ॥ हंसाकृतित्वकथने पुच्छत्वमप-
रमात्मनः ॥ तदुपासनया ज्ञानात्परमात्मत्व-
मस्य हि ॥ १०४ ॥ ज्ञानमार्गे त्वेतदेव सेव्यं
कृष्णस्ततोऽधिकः ॥ रूपान्तरन्तु तस्यैव सर्व-
सामर्थ्यसंयुतम् ॥ १०५ ॥

तत्त्वदीपप्रकाशः ।

एषा स्थितिः सर्वदा कदाचित्पुनः पुरुषोत्तमश्चेदाविर्भवति तदाक्षर-मपि बहुधा भवतीत्याह ॥ प्रभुत्वेनेति ॥ प्रभुर्वैकुण्ठवासी लोको वैकुण्ठः जीवजडाकारेण प्रादुर्भवतीत्यर्थः ॥ अतएव वैकुण्ठवासिनो मुक्ताः ॥ ततोऽपि पुरुषोत्तमो महान् ॥ अतएवाभेदश्चास्मदादीनामिति वाक्यं संगच्छते । अंतरुपासनायामन्तर्यामिरूपेण प्रकटो भवति तदा सद्यो-

मुक्तौ ज्ञानिनस्त्वच्चरणारविन्दमेव प्रविशन्ति तदक्षरस्य पादत्वम् ॥ तथावतारेपि ॥ चैद्ये च सात्वतपतेश्चरणम्प्रविष्ट इति ॥ आदिशब्देनाधिदैवाधिरूपेष्वपि॥ १ ० ३ ॥आनन्दमयनिरूपणे हंसाकृतित्वकथनम् ॥ तत्र ब्रह्मपुच्छम्प्रतिष्ठेति ब्रह्माक्षरमानन्दमयस्य पुच्छमिति ॥ निंसन्देहाय परमात्मपदम्॥ एवमनेकभावापन्नमपि ज्ञानमार्गेऽक्षरत्वेनैव सेव्यमित्याह ॥ **तदुपासनयेति** ॥ प्रथमतस्तस्यैव निदिध्यासनेन यत् ज्ञानमुत्पद्यते तेनास्याधिकारिणः परमात्मत्वमेव नत्वक्षरमात्रतेति ॥ भगवद्वचनादवगम्यते ॥ ते प्राप्नुवन्ति मामेवेति हिशब्दार्थः ॥ भक्तिमार्गे त्वारम्भत एव परमानन्दः । ज्ञानमार्गे त्वन्तत इति विशेषः । तथापि ज्ञानमार्गे अक्षरमेव सेव्यम् ॥ एवमभेदेपि वैलक्षण्यन्निरूप्य यदर्थमेतन्निरूपितन्तदाह ॥ **कृष्णस्ततोधिक इति** ॥ अक्षरादपि चोत्तम इत्यादिवाक्यं समर्थितम्भवति तस्यैव रूपान्तरङ्काल इत्याह ॥ **रूपान्तरमिति** ॥ तस्य रूपान्तरत्वे हेतुमाह ॥ **सर्वसामर्थ्यसंयुतमिति** ॥ सर्वाकारेण भवनातिरिक्तं यावत्किञ्चित्सामर्थ्यं मायाविशेषः॥ तत्संयुतन्तेनास्य सर्वाधिकारित्वन्निरूपितम् ॥ १ ० ४ ॥ १ ० ५ ॥

आवरणभंगः ।

एषास्थितिरिति ॥ ॥ मूलम्पुरुषोत्तमस्तमाधारं कृत्वा या स्थितिः सेत्यर्थः । नच पुरुषोत्तमस्याप्याधारान्तरमपेक्षणीयम् । मूले मूलाभावादमूलम्मूलमिति न्यायात् ॥ एवंसति तद्धामपरमम्ममेत्यादिभिर्धर्मभेदे स्मृते तद्भिन्नत्वशङ्कोदेति सा चाक्षरमंबरान्तधृतेरित्यत्राक्षरशब्दवाच्यत्वस्य ब्रह्मणि व्यवस्थापनात्परिहृता । स्वस्यैवाधारत्वमाधेयत्वञ्चेति तु विरुद्धधर्माश्रयत्वादेव सिद्धमिति न शंकावकाशः । जीवजडाकारेणाविर्भतीति । इदञ्च द्वितीयस्कन्धनवमाध्याये प्रसिद्धम् ॥ ततोपीति ॥ ॥ प्रभुत्वादपीत्यर्थः ॥ एवं स्वरूपकोटिस्थत्वेपि न्यूनत्वं समर्थितं शेषं स्फुटम् ॥ अत एवेति ॥ ॥ अक्षरात्मत्वादेवेत्यर्थः ॥ एतेन एकात्मवादस्यापि मूलमुक्तम् ॥ अत एवेति ॥ ॥ मुक्तत आधिक्यादेव अभेद इति वाक्यन्तु स्कान्दभारततात्पर्ये मध्वाचार्यैरुपन्यस्तम् । “ अभेदश्चास्मदादीनां युक्तानां हरिणा तथा । इत्यादि सर्वं मोहाय कथ्यते पुत्र नान्यथा ॥ ” इति ॥ एवम्प्रमेयान्निर्णय उ-

क्तः ॥१०३॥ साधनफलाभ्यान्निर्णेतुमाहुः ॥ एवमनेकेत्यादि ॥ ॥ शेषं स्पष्टम्। अथकालस्य तद्रूपत्वेपि स्वतन्त्रत्वाय लक्षणादिकं वक्तुमाहुः ॥ तस्य स्वरूपान्तरमित्यादि ॥ " प्रकृतिर्ह्यस्योपादानमाधारः पुरुषः परः ॥ सतोभिव्यञ्जकः कालो ब्रह्मतत्रितयं त्वहम् ॥ " इतिवाक्ये कालस्य ब्रह्मपदेनाक्षरब्रह्मरूपतोक्ता ॥ द्विधासमभवद्बृहदित्युपक्रमात् नतु तदुत्पत्तिः ॥ तेन रूपान्तरम् ॥ हेतुमिति ॥ ॥ गमकमित्यर्थः॥प्रकृतेरुपादानत्वमुक्त्वा सदभिव्यञ्जकत्वमात्रमुक्तमित्यनेन निमित्तरूपतया कारणत्वमित्यभिप्रेत्याहुः ॥ सर्वाकारेत्यादि ॥ ॥ एवम्प्रमाणतो निर्णय उक्तः ॥ १०४ ॥ १०५॥

ब्रजभाषाटीका ।

वामें प्रकार दिखावें है पुरुषोत्तमको सर्वदा आधारकरकें अक्षर स्थित रहेहै जब पुरुषोत्तम प्रकट होवेहै तब अक्षरब्रह्म भी बहुत प्रकारको होवेहै अर्थात् प्रभु वैकुंठमें निवास करेहै तब अक्षरब्रह्म वैकुंठलोकरूप तथा वैकुंठके जडजीवरूप होयकें प्रकटहोयहै याहीसों वैकुंठवासी जीव मुक्त कहेजावे हैं पुरुषोत्तम तो अक्षरसों भी बडेहैं याहीसों (अभेदश्चास्मदादीनाम्)इत्यादिवाक्य संगत होयहै उपासनाकरवेसों जब अन्तर्यामीरूप करकें प्रकट होयहै तब ज्ञानी आपके चरणारविन्दमें प्रवेश होवेहै अक्षरब्रह्म आपके चरणरूपहै ऐसें ही अवतार धारण करें है तब भी अक्षर ब्रह्म आपके चरणरूपही रहें है आधिदैविकरूपनमें भी अक्षरब्रह्म पादरूप रहेहै ॥ १०३ ॥ वेदभी आनंदमय परब्रह्मको जहाँ हंसरूपकरके वर्णनकरें है तहाँ (ब्रह्मपुच्छं प्रतिष्ठा) या श्रुतिमें आनन्दमय परब्रह्मरूप हंसकी पूँछ अक्षर ब्रह्मरूप बतायोहै ऐसें अक्षरब्रह्म अनेकरूपहै तथापि ज्ञानमार्गमें तो अचिन्त्य अर्थात् जाको विचारकरवेमें नहिं आयसकें जाको वर्णन नहिं करसके ऐसें रूपसों ही अक्षरब्रह्मकी उपासना करेंहै उनकूँ क्लेश अत्यन्त होवेहै जब उपासनासों ज्ञानहोयहै तब परमात्माकूँ प्राप्तहोवेहै भक्तिमार्गमें तो

रूपनसों काल व्यवहारमें भी आवेंहै परन्तु कोई पुरुषके प्रत्यक्ष नहीं होयहै (योन्तर्धावति जन्तुषु) इत्याद्यनुसार जो सबके भीतर रहेहैं (बहिर्मुख) बाहिर जिनकी इन्द्रियनकी वृत्तिहै उनकूँ बाहिर कालका अनुभव होय परन्तु प्रत्यक्ष नहीं होय सच्चिदानन्दरूप भगवान् हि कालरूप होवेंहै तासों ज्ञानिनकूँ तो कालके भीतर सत् चित् आनन्द तीनों प्रकट दीखेहैं यह काल क्यों बनायो ? उत्तर—काल पुरुषोत्तमकी क्रियाशक्तिरूप है ताही सों भागवतमें कालकूँ पुरुषोत्तमकी चेष्टारूप लिख्योहै समस्तजगत्के उत्पन्नहोयवेमें ये काल निमित्तकारणहै याके देखवे सों कछु सिद्ध नहिं है किन्तु अर्जुनके तुल्य कालरूप देखवेसों भय मात्रही होय तासों क्रियाशक्तिमात्र यामें प्रधान राखीहै ताहीसों सबको निमित्तकारणहै और (नित्यगः) चलवेको याको स्वभावहै सदा चलतो ही रहेहै और सबको नियामक है सर्व जगत्कूँ अपने भीतर धरके आप सदा चलतो रहेहैं ताहीसों नित्यप्रलयकी भी सिद्धि है सबको लयकरे है ॥ १०६ ॥ १०७ ॥

विकृतावेव तच्छक्तिं सर्वोत्पत्त्यन्तभावनः ॥
ऐश्वर्यं भगवद्दत्तन्तत्रैव प्रातितिष्ठाति ॥ १०८ ॥
अतएवेश्वरः प्रोक्तः सर्वान्तर उदीरितः ॥
आसुरादिमतेतस्मान्नान्यःसेऽव्यःकथञ्चन १०९

तत्त्वदीपप्रकाशः ।

इदं कृष्णस्य सामर्थ्यम्पुरुषोत्तमोऽक्षरातिरिक्त एवेत्याह ॥ विकृतावेवेति ॥ विकृतौ किङ्करोतीत्याकांक्षायामाह ॥ सर्वोत्पत्त्यन्तभावन इति ॥ केचिदस्यैवेश्वरत्वमाहुः ॥ केचिदन्तर्यामिणः ॥ तत्रास्येश्वरत्वे

हेतुमाह ॥ ऐश्वर्यम्भगवद्दत्तमिति ॥ मुख्योयमधिकारी तेन सर्वापेक्षया भगवत्सेवकेष्वयमन्तरङ्गः ॥ १०८ ॥ अस्य महत्त्वाय सेवकानामुपासनाप्रकारञ्चाह ॥ आसुरादिमते ॥ तस्मादिति ॥ १०९ ॥

आवरणभंगः ।

ईश्वरेण परिच्छिन्नङ्कालेनाव्यक्तमूर्तिनेत्यत्र विश्वपरिच्छेदकत्वमीश्वरत्वञ्चोक्तन्तद्विवेचयितुमाहुः । कृष्णस्येत्यारभ्यान्तरङ्ग इत्यन्तम् ॥ ॥ इदमिति ॥ प्रलायकत्वरूपं सामर्थ्यमिति॥"प्रभावम्पुरुषम्प्राहुः कालमेके यतोभयम्" इति ॥ वाक्ये प्रभावत्वेन कथनात्तथेत्यर्थः ॥ अन्तर्यामिण ईश्वरत्वम् "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" इत्यत्रोक्तम् । अन्तरङ्ग इत्यनेन मूलस्थं सर्वान्तरपदं विवृतम् । सर्वापेक्षयाऽऽन्तर इति समासात् ॥ १०८ ॥ फलतः साधनतो निर्णेतुमाहुः ॥ अस्य महत्वायेत्यादि ॥ १०९ ॥

ब्रजभाषाटीका ।

यह कालमें कृष्णकी सामर्थ है ॥ विकार जितनो है सब काल शक्तिको कियो है सब पदार्थके उत्पत्तिनाशमें निमित्त काल है कितनेक तो कालकूँ ही ईश्वर मानें हैं कितनेक अन्तर्यामीकूँ ईश्वर माने हैं तहाँ काल ईश्वर कैसेंहोय सकें यह शंका नहिं करनी भगवान्ने कालकूँ ईश्वरता दीनीं है सो सर्वदा कालमें ही रहे है ॥ ॥ १०८ ॥ जैसें राजा मुख्य अमात्यकूँ छत्रचमरगजादिकूँ देवे है ऐसें ही भगवान्को मुख्य अधिकारी काल है, जितने अधिकारी देवता हैं उन सबकी अपेक्षा यह अन्तरंगहै, असुरलोग कालकूँ ही ईश्वर माने हैं ईश्वरके तुल्य काल उनकूँ कृष्णेच्छाके अनुसार फलभी देता है ॥ १०९ ॥

मुख्याधिकारी कृष्णस्य प्रभुवत्फलसाधकः ॥ सूर्यगत्या तु तद्भेदाः सूर्यस्तस्याधिभौतिकम् ॥११०॥ आध्यात्मिके तु तद्भेदाः क्वचिदि-

च्छापि भेदिका ॥ विधिषेधप्रकारेण यः क्रिया-
शक्तिरुद्गतः ॥ १११ ॥

तत्त्वदीपप्रकाशः ।

तस्यान्यथाकरणं व्यावर्त्तयति ॥ प्रभुवत्फलसाधक इति ॥ तस्य परिज्ञानार्थन्तद्भेदानाह ॥ सूर्यगत्येति ॥ तस्याप्याध्यात्मिकादिरूपमस्तीत्याह ॥ सूर्य इति ॥ आधिभौतिकरूपन्तस्य सूर्यः । आध्यात्मिकं युगादि ॥ ११० ॥ रात्रौ युगाद्यभावात् भेदसिद्ध्यर्थमाह ॥ क्वचिदिच्छापीति ॥ एवङ्कालन्निरूप्य कर्म निरूपयति ॥ विधिषेधप्रकारेणेति॥ रूपान्तरन्तु तस्यैवेत्यनुवर्त्तते यथा कालो रूपमक्षरस्य तथा कर्म्मापि परमेतावान्विशेषः । कालः स्वतएव प्रकटः । अयन्तु पुरुषैर्विधिनिषेधप्रकारेण प्रकटीक्रियते ॥ अतः कालापेक्षया लोकानां हिताहितप्रदाने विशिष्यते ॥ अयञ्च क्रियारूपो धर्मिणो धर्मे प्रवेशात् ॥ १११ ॥

आवरणभङ्गः ।

॥ अन्यथाकरणमिति ॥ उपासकपक्षपातेन भगवद्विसंमतकरणमित्यर्थः ॥ आध्यात्मिकाधिभौतिकयोः कालयोर्लोकशास्त्रप्रमाणकत्वायाहुः ॥ ॥ तस्य परिज्ञानार्थमित्यादि ॥ ॥ युगादीति ॥ ॥ आदिपदम्परमाण्वादिद्विपरार्द्धान्तकालोपलक्षकम् । परमाण्वादिलक्षणन्तु "चरमः सद्विशेषाणाम्" इत्यादिना तृतीयस्कन्धे निरूपितन्तत्सुबोधिनीतोऽवगन्तव्यम् । मयापि प्रस्थानरत्नाकरे तद्विमृष्टमिति नेह प्रपंच्यते ॥ एवमत्र प्रमाणादिचतुष्टयेन कालस्वरूपन्निर्णीतम् ॥ ॥ ११० ॥ ॥ कर्म निरूपयतीति ॥ ॥ अंशतः प्रमाणानुरोधित्वमंशतस्तदभावश्च बोधयितुन्तन्निरूपयतीत्यर्थः ॥ ॥ अयन्त्विति ॥ ॥ क्रियाशक्तिर्यस्य तादृशो भगवान् ॥ ॥ अत इति ॥ ॥ प्रतिपुरुषं तेन तेन प्रकटीभावात् ॥ ॥ विशिष्यत इति ॥ असाधारणो भवतीत्यर्थः । एवं प्रमाणान्निर्णय उक्तः । पूर्वं प्रमाणप्रकरणत्वात्प्रमाणानुरोधिकर्मण एव स्वरूपं विवृतन्न सर्वस्येति प्रकृते प्रकरणे प्रमाणाननुरोध्यपि निवेश्य तत्स्वरूपमाहुः ॥ अयञ्चेत्यादि ॥ एवम्प्रमेयान्निर्णय उक्तः ॥ १११ ॥

व्रजभाषाटीका ।

कालके ज्ञान होयवेकेलिये कालके भेदनकूँ कहे है (सूर्यगत्येति)

सूर्यकी गतिसों याके भेद मालूम पडें हैं कालको आधिभौतिकरूप सूर्य है ॥ ११० ॥ कालको आध्यात्मिक रूप सत्ययुग त्रेता द्वापर आदि युग परमाणुसों लेकर घडीपहर महिना वर्ष ब्रह्माकी आयुष्यतक है, कहीं कहीं भगवान्‌की इच्छाभी कालको भेद करदें है जैसें रात्रिको विभाग इच्छाकृत है ॥ कर्मको निरूपण करें है (विधिषेधेति) कर्मभी अक्षरकोही एक रूपान्तर है जैसें काल है तैसेंही है परन्तु इतनों फर्क है काल स्वतः प्रकट होवे है कर्मकूँ विधिनिषेधकें प्रकारकरकें पुरुष प्रकट करें है कालकी अपेक्षा लोकनकें हित अहित करवेमें कर्मकी विशेषता हैं करवेवारे पुरुषकूँ खोटो कर्म दुःख देत है अच्छो कर्म सुखदेत है कर्मभी क्रियारूप है ॥ १११ ॥

तत्कर्म्म प्रगटन्तावत् यावत्फलसमापनम् ॥
तदेकम्भगवद्रूपं साधारण्येन सर्वगम् ॥११२॥
अग्रपश्चाद्भावभेदाद्द्विधा प्रकटमुच्यते ॥ सृष्टौ
साधारणन्तद्धि स्वांशेन प्रकटं यथा ॥ ११३॥

तत्त्वदीपप्रकाशः।

कालवत्स न नित्यप्रकटः । किन्तु फलदानपर्यन्तमेवेत्याह ॥ यावत्फलसमापनमिति ॥ तस्य प्रतिपुरुषम्भेदो भविष्यतीत्याशंक्याह ॥ तदेकम्भगवद्रूपमिति ॥ व्यापकन्तद्रूपम् ॥ तथापि येन यावद्रूपविविप्रकारेण निषेधप्रकारेण वा प्रकटीक्रियते तस्य तावत्फलं दत्वा तदंशेन तिरोभवतीति साधारण्येनापि सर्वसम्भवान्नप्रतिसर्म्मव्यवस्थेत्यर्थः ॥ ॥ ११२ ॥ तर्हि एकः कथं युगपत्सुखदुःखे प्रयच्छतीत्याशंक्याह ॥ अग्रपश्चाद्भावभेदादिति ॥ तस्यैकत्वे प्रमाणमाह ॥ सृष्टौ साधारणमिति ॥ कालङ्कर्म्म स्वभावश्चेति वाक्यात्सृष्टिकाले यादृशं रूपन्तेन परिच्छेद्यं सएवांशः प्रकटः ॥ ११३ ॥

आवरणभंगः ।

॥ कालवदित्यादि ॥ ॥ फलभोगान्तरङ्कर्मनाशस्मरणात्तथेत्यर्थः ॥ एतेन फलान्निर्णय उक्तः ॥ कर्मणः सकाशान्नेश्वरमेव फलमिति । नच नित्यकर्मफले व्यभिचारः शंक्यः । नच ग्रस्तमनन्तरमित्यस्य दशामरन्यायेन योज्यत्वात् । अन्यथा तादृशकर्माभ्यासोत्तरं विशेषशुद्ध्यभावेऽग्रे ज्ञानोदयविरहप्रसङ्गादिति ॥ ॥ तस्येति ॥ ॥ उक्तरीत्या असाधारणस्य न प्रतिकर्मव्यवस्थेति ॥ न प्रतिपुरुषमदृष्टरूपकर्मभेद इत्यर्थः ॥ तथा चादृष्टापूर्वादिशब्दैर्नैतदंश एवोच्यते प्रारब्धसाश्चितक्रियमाणत्वमेतस्यैवास्थाभेदेन भवतीति कर्मनानात्वकल्पनमतिगौरवग्रस्तमेवेति भावः॥११२॥ ॥युगपदिति ॥ प्रतिपुरुषभेदोऽप्येककाले ॥ अग्रपञ्चाद्भावभेदादिति ॥ ॥ येन पुंसा यस्मिन्काले विधिप्रकारेण प्रकटितस्तस्मिन्नेव काले तदितरेण पुंसा निषेधप्रकारेण प्रकटीक्रियत इति प्रकारस्याग्रपश्चाद्भावभेदादेकस्मिन्नेव काले द्विप्रकटं सत् तस्य तस्य युगपदेव तत्तत्प्रयच्छतीत्यर्थः ॥ ॥ तस्येति ॥ साधनस्वरूपफलैरेवमुपपाद्यम।नस्य नचैकत्वं ग्रहैकत्ववदविवक्षितमिति वाच्यम् । कालेपि तथात्वापत्तेः ॥ एतेषामुपादेयत्वेनोद्देश्यत्वाद्ग्रहन्यायस्यात्राप्रवृत्तेश्च ॥ अन्यथाप्रायपाठबाधापत्तेश्चेति । ननु सृष्टिप्रारम्भे विधिषेधप्रकारस्याभावात्तदानीन्तत्प्राकट्याभावे महदादिजन्मानुपपत्तिरित्यत आहुः ॥ ॥ सृष्टीत्यादि ॥ तथाच कालो यथा भगवदिच्छया गुणसाम्यमपाकृत्य रज उद्रेचयति तथा कर्मापि भगवदिच्छया महदादिरूपं परिच्छेत्तुं तत्तैवांशेन प्रकटीभवतीत्यर्थः ॥ इयमेवोपपत्तिरुत्तरार्द्धेऽप्यवगन्तव्येत्याहुः ॥ ११३ ॥

व्रजभाषाटीका ।

यामें धर्म भगवान्को प्रवेश होय तब कर्मफल दें है कालके समान कर्म सदा प्रकट नहिं रहे हैं, करवेवालेकूँ फल नाहिं मिले जहाँतक कर्म प्रकट रहे हैं फिर लुप्त होजाय है । कर्म व्यापक है और एक है विधिके द्वारा वा निषेधकरके जा पुरुषसों कर्मको जितनो अंश प्रकट कियोजाय है वितनो अंश प्रकट होयके वाकूँ वितनो ही फल देके लुप्त होजाय है तासों साधारणरीतिकरके एकही कर्मसों सब कार्य होवें है जीवजीवकी साथ न्यारेन्यारे कर्म नाहिं माननें ॥११२॥ कर्म एकहै तो एकसाथ कोई प्राणिनकूँ दुःख और कोईनकूँ सुख कैसे देसकें है ऐसी शंका नाहिं करनी जा कालमें

कोई पुरुषनें सुकर्म प्रकट कियो वाही कालमें दूसरे पुरुषनें विषिद्ध कर्म कियो तासों प्रकारमें अग्रपश्चाद्भावको भेदहै फिर दोनों एकही कालमें प्रकट भयो कर्म पुरुषभेदसों सुखदुःख दे हैं तहाँ सृष्टिप्रारम्भमें तो विधिनिषेधको प्रकार हतोही नहीं तासों कर्मभी वासमय प्रकट नहिं भयो होयगो फिर विनाकर्म महत्तत्त्वादिकनकी उत्पत्ति कैसें भई यह शंका नहिं नरनी क्योंकि वा समय साधारण कर्म विद्यमान हतो अर्थात् जैसें काल है सो भगवान्की इच्छासों तीनों गुणनकी समताकों मेटकरके सृष्टिप्रारंभसमयमें रजोगुणकूँ बढाय देतहै ऐसें साधारण कर्मभी भगवान्की इच्छा करकें महत्तत्त्वादिकनको परिच्छेदकरवेकूँ वितने अंशकरकें प्रकट होय है ॥११३॥

कालवत्सकलं रूपमङ्गन्तद्वशगन्तथा॥ इच्छामात्रप्रकटनं सर्वथा तत्तिरोहितम्॥११४॥ सर्ववस्त्वाश्रितम्पश्चात्स्वभावोऽयं हरेस्तनुः॥ वस्तूद्गमतिरोभावैस्तथा सत्वादिभिः पुनः११५

तत्त्वदीपप्रकाशः।

अस्यापि चिदानन्दादितिरोभावादिः कालवदेवेत्याह ॥ कालवदिति ॥ विशेषमाह ॥ तद्वशगमिति ॥ यत्रयः कालवशे भवति तमेव व्याप्नोति नत्वन्यमित्यर्थः ॥ एवङ्कर्म्मं निरूप्य स्वभावन्निरूपयति ॥ इच्छामात्रेति ॥ भगवदिच्छारूपेण प्रकटो भवति न सच्चिदानन्दरूपेण ॥ ११४ ॥ तस्य स्वरूपं व्यवहारोपयोग्याह ॥ सर्ववस्त्वाश्रितमिति ॥ तद्रूपं जगदाधारं स्वांशभेदेन तत्रतत्र तिष्ठति ॥ तत्रापि न लीनः। नापि वस्तुनः पश्चाद्भागे तिष्ठति। किन्तु पश्चाद्भागे सर्वं स्थापयित्वा स्वयमेव प्रकटो भवति। यथा स्वभावदुष्टानां ज्ञानादिकं तिरस्कृत्य स्वरूपेण प्रकटस्तदाह ॥ पश्चादिति ॥ एतस्य कार्यवत्स्वरूपम्मा-

भवात्वित्याह ॥ हरेस्तनुरिति ॥ अस्याविर्भावतिरोभावयोरुपपत्तिमाह ॥ वस्तूद्गमेति ॥ अस्योद्गमतिरोभावयोर्वस्तुनियामकम् ॥ तथा सत्वादिगुणाः ॥ ज्ञानं कर्म च ॥ अतो बहुधोद्गमः ॥ तस्य द्रव्याविर्भावेणाप्याविर्भावः । विरोधिगुणप्रादुर्भावे पूर्वस्वभावो निवर्तते अन्यश्चोदेति ॥ तथा मन्त्रशास्त्रादिभिरपि ॥ अतो बहुधोद्गमतिरोभावौ ॥ ११५ ॥

आवरणभंगः ।

॥ अस्यापीत्यादि ॥ एवञ्च सर्वकार्माणि मनसेत्यादौ बहुवचनं लौकिकक्रियापरम् । दानहिंसादिषु धर्माधर्मादिप्रयोगोऽभिव्यञ्जकोपाधिनाभाक्त इति ज्ञेयम् । नच कर्मण एकत्वेपि यदंशो येनोद्गमितस्तस्य तत्सम्बन्धित्वेनैव फलदायकत्वादमूर्तस्य च दानायोग्यत्वात् “ पुण्यदःपुण्यमाप्नोति पापदः पापभाग्भवेत् ” इत्यादिवाक्यानुपपत्तिः । दानस्य स्वसत्तापरित्यागपूर्वकं परसत्तापादनात्मकत्वेन पूर्वक्रियया अभिव्यक्तस्य पुण्यादेस्तदंशस्योत्तरकालीनया दानक्रियया परसम्बन्धापादने वचनबलेन पुत्रेष्ट्यादिवद्व्यधिकरणफलोत्पादकत्वस्य सुखेनोपपत्तेः॥ अमूर्तत्वस्यात्मगुणभूतादृष्टात्मककर्मनानात्ववादिमतेपि तुल्यत्वाच्च । अत एव विश्वामित्रादेस्त्रिशंक्वादीनां स्वर्गादिरप्युपपद्यते । एवं सति विहितनिषिद्धप्रकारकक्रियाभिव्यंग्या क्रिया कर्मेति तल्लक्षणं सिद्ध्यति । अत्र क्रियाफलस्य स्वर्गादेर्वारणाय क्रियेति । लौकिकादिक्रियावारणाय विहितेत्यादि ॥ कर्मैकत्वनिरूपण एव स्वभावैक्ये प्रमाणस्योक्तत्वात्प्रमेयेण तन्निरूपयति ॥ ॥ भगवदिच्छेत्यादि ॥ एतेन मूले व्यधिकरणपदो बहुव्रीहिर्बोधितः ॥ इच्छामात्रेण रूपेण प्रकटनम्प्राकट्यं यस्येति ॥ सर्वथा तेषां सच्चिदानन्दानान्तिरोधानं यस्मिन्निति । दुग्धमृत्सूत्रादिकन्दधिघटपटादिरूपेणैव परिणमति नेतरेण रूपेण । तत्र तादृशी भगवदिच्छैव हेतुः । मयूराश्चित्रिता येनेति वाक्यात् ॥ तथा च सैव परिणामहेतुभूता इच्छा स्वभाव इति वक्तुं शक्यं यद्यपि तथापि “ कालङ्कर्म स्वभावञ्च मायेशो मायया स्वया । आत्मन्यदृच्छया प्राप्तं विबुभूषुरुपाददे ” इति वाक्ये उपादानगोचरतया कालादिवद्भिन्नतया च निर्देशान्नेच्छास्वभावः । किन्तु इच्छाकारेण प्रकटो भवति बुद्धिरिव विज्ञानरूपेण । तथा सच्चिदानन्दरूपेणापि न प्रत्यक्षीभवति तेन तथेत्यर्थः ॥ ११४ ॥ ॥ तस्येत्यादि ॥ यथा कालोतीतानागतचिरक्षिप्रादिव्यवहारसाधकतया निराधारव्यवहारोपयोगी । यथाच कर्म प्रतिनियतभोगसाधकतया चेतनाधारमेव व्यवहारोपयोगि । तथा स्वभावं कथमुपयुज्यत इत्याकांक्षायामाहे-

त्यर्थः ॥ ॥ जगदाधारमिति ॥ चेतनाचेतनवस्त्वाधारमित्यर्थः ॥ स्वरूपेण प्रकट इति तादृशानां स्वरूपे दृष्टमात्र एव दुष्टोयमित्यादिप्रतीतेरुदयाच्चेत्यर्थः॥ पश्चादिति ॥ क्रियाविशेषणमेतत् ॥ तथा च सर्ववस्तुपश्चाद्यथास्यात्तथा सर्ववस्तुष्वाश्रितामित्यर्थः ॥ एवम्प्रमेयादेस्तन्निर्णय उक्तः ॥ ॥ एतस्येति सकल जगदाश्रितत्वेन प्रतिपाद्यमानस्य ॥ अतो बहुधोद्गम इत्यादि ॥ एतेन साधनादुक्तः ॥ ११५ ॥

ब्रजभाषाटीका ।

कालके समान कर्ममें भी चित् आनन्द आदिको तिरोभाव है कालके समानही एक होकर व्यापक है और जो कालके वश होरह्यो होय वाकूँही कर्म व्याप्त करसके है औरकूँ नहिं व्याप्त करसकेहै ॥ स्वभावको वर्णन करें है (इच्छामात्रेणेति) स्वभावहै सो सच्चिदानन्दरूप करकें नहि प्रकट होयहै किन्तु भगवान्की इच्छारूपकरकें स्वभाव प्रकट होयहै,स्वभावमें सत् चित् आनन्दको सर्वथा तिरोभावहै॥११४॥अर्थात् पदार्थनकूँ (परिणाम) बदलवेवारी जो भगवदिच्छा वाहीसों स्वभाव कहेहै वो स्वभाव सब दार्थनमें रहे है दूधको दधि बनजावेहै दूधको तैल नाहिं बनजावे तथा मृत्तिकासों पट नहि बने घटही बनेहै डोरानसो घडा नाहिं बने कपडाही बने है यामें भगवानकी इच्छाही कारणहै मयूरमें चित्र विचित्र रंग होजावे है हंस सपेत होजावेहै इत्यादि परिणामको कारण स्वभावहीहै स्वभाव इच्छारूपकरकें प्रकट होयजावेहै जैसे बुद्धि विज्ञानरूप करके प्रकट होयजावे है, जैसे काल निराधार होकरकें भूतभविष्यत वर्तमानादि व्यवहारको उपयोगीहै,कर्म चेतनको आधार होयके व्यवहारको उपयोगीहै ऐसे स्वभावहै सो चेतन अचेतन सब पदार्थनको आधारहै अंशनकरके एक एक वस्तुकोभी आधारहै और स्वभाव है सो वस्तुके पीछे अथवा वस्तुमें लीन नहि रहेहै किन्तु वस्तुकूँ अपनें भीतर स्थित करकें स्वभाव आगें प्रकट होजाय है ॥ जैसें दुष्ट पुरुषको स्वभाव वाके ज्ञानकूँ दबायकरकें स्वरूपकरकें प्रकट

होजावे है तथा पदार्थके साथही प्रकटहोवें है, पदार्थके साथही याको तिरोभाव होवें है तथा सत्त्वगुण रजोगुण तमोगुण ज्ञान कर्म मन्त्र आदिकभी पूर्व स्वभावको तिरोभावकरके दूसरे प्रकारके स्वभावकों प्रकट करदें है ॥ ११५ ॥

परिणामस्तु तत्कार्यं सर्वानुभवसाक्षिकम्॥सामान्यतो विशेषेण नप्रकाशःकदाचन ॥११६॥
एवङ्कालस्तथा कर्म्म स्वभावो हरिरेव सः ॥ अतस्तदुद्गमः शास्त्रे न कदाचिदुदाहृतः ॥ ११७॥

तत्त्वदीपप्रकाशः ।

तस्य सद्भावेऽर्थापत्तिम्प्रमाणयति ॥ परिणामस्त्विवति ॥ स्वभावस्य परिणाम एव कार्यम् ॥ अतः स्वभावः सर्वदा अनुमानगम्यः । नकदाचिदपि प्रत्यक्ष इत्याह ॥ सामान्यत इति ॥११६॥ उपसंहरति॥ एवमिति॥त्तत्वाधिक्यपरिहारायाह॥हरिरेव स इति ॥ स कालादिर्हरिरेव॥ तत्रोपपत्तिमाह ॥ अतस्तदुद्गम इति ॥ शास्त्रेभागवते॥११७॥

आवरणभंगः ।

अर्थापत्तिं प्रमाणयतीति ॥ फलान्निर्णयं वक्तुन्तां प्रमाणयतीत्यर्थः ॥ एवञ्च परिणामहेतुः पदार्थः स्वभाव इति । तल्लक्षणङ्कार्यमुखेन फलति ॥ ११६ ॥ ॥ ॥ उपसंहरतीति ॥ एवमक्षरादयश्चत्वारोर्था उक्तास्तेषान्तत्वत्वं वारयितुमुपसंहरतीत्यर्थः ॥ ॥ ततोऽत्रेति ॥ हरित्वे उद्गम इति ॥ व्युच्चरणादिरूपा उत्पत्तिः ॥ कालादिरिति ॥ ११७ ॥

व्रजभाषाटीका ।

परिणामरूप कार्यकेद्वारा ही स्वभाव जान्यो जायहै स्वभावको प्रत्यक्ष ज्ञान कोईकूं कभी नहिं होयहै ॥११६॥ याप्रकार काल कर्म स्वभाव भगवान् हरि आपहीहैं याहीसों भागवतादिकमें पृथ्वीजलादिकनके समान इनको बननों नाहिं लिख्योहै तहां काल कर्म

स्वभाव इनकी उत्पत्ति नहिं होयवेसों कार्यमें गणन नहिं करोहो तो कारणमें गणना होनी चाहिये यह शंका नहिं करनी॥११७॥

सर्वसाधरणत्वेन न तत्तत्वं तदेव तत॥अभावः कारणश्चात्र ध्वंसश्चापि तदुच्यते॥११८॥ कार्यादिशब्दवत्तस्मिन्सापेक्षा वृत्तिरेतयोः॥ अपृथग्विद्यमानत्वान्नधर्मैरधिको गणः ॥११९॥

इति कारणप्रकरणम् ॥

तत्वदीपप्रकाशः ।

तथापि कारणत्वात्तत्वता भविष्यतीत्याशंक्याह ॥ सर्वसाधारणत्वेनेति ॥ यथा भगवान्सर्वसाधारणत्वान्न तत्वकोटौ प्रविशति ॥ तथा कालादिरपि ॥ भगवत्त्वेनैवोपपत्तौ न पृथक्त्वम् । प्रागभावस्य कारणत्वात्तत्वता भविष्यतीत्याशंक्याह ॥ अभावःकारणश्चेति ॥ प्रागभावः कारणावस्थातो नातिरिच्यते ॥ तस्य भिन्नकारणत्वकल्पनाया-प्रमाणाभावात् । अग्रिमजननज्ञानेनैव तस्यानुभवः ॥ अन्यथात्यन्ताभाव एव स्यात् ॥ तस्मात्पूर्वमभावस्तस्य न कारणम् ॥ नहि तेन कोपि व्यापारः क्रियते ॥ कार्येण परन्निवर्त्यते ॥ प्रसङ्गाद्ध्वंसादीनामपि कारणत्वन्निराकर्त्तुमाह ॥ ध्वंसश्चापीति ॥ ध्वंसोऽपि दण्डादिस्वरूपमेव ॥ तिरोभावशक्त्यतिरिक्तस्य ध्वंसस्य निरूपयितुमशक्यत्वात् ॥ तेन रूपान्तरं पश्यन् पूर्वरूपस्य तिरोभावमेव मन्यते ध्वस्त इति ॥ ॥ ११८ ॥ ननु कारणातिरिक्तरूपाभावे प्रागभावे प्रागभावादिशब्दप्रयोगः कथमिति चेत्तत्राह ॥ कार्यादिशब्दवदिति ॥ नहि घटरूपादतिरिक्ता कार्यता तथा दण्डरूपादपि नातिरिक्ता कारणता ॥ तथापि तयोर्यथा कार्यकारणप्रयोगः तथा प्रागभावादिप्रयोगोऽपि ॥ ननु संख्यादयो गुणाः सामान्यादयश्च सन्ति । ततः कथमष्टाविंशतितत्वानि तत्राह ॥ अपृथग्विद्यमानत्वादिति ॥११९॥ इति कारणप्रकरणम् ॥

आवरणभंगः ।

अक्षरस्य भगवदभिन्नत्वेन सन्देहाभावात् कालादीनामेवात्र ग्रहणम् । एवम्भावान्तरस्य तत्वताया निवारणेऽप्यभावस्य भविष्यतीत्याशङ्कां वारयितुमाहुः ॥ ॥ प्रागभावस्येत्यादि ॥ ॥ कारणत्वादिति ॥ ॥ असाधारणत्वान्मूलस्थमभावपदं व्याकुर्वन्ति ॥ ॥ प्रागभाव इति ॥ ननु घटत्वेन कपालत्वेन सामान्यकार्यकारणभावे सत्यप्येतेभ्यः कपालेभ्य एतद्घटोत्पत्तौ कपालत्वेन नियमासम्भवादेतत्कपालत्वेन नियमाङ्गीकारे च विनिगमनाविरहाद्बहुकपालजे घटे गौरवग्रासाच्च तद्देशनियामकतया प्रागभावसिद्धिः साम्प्रदायिकाक्षपादीयैः क्रियते ॥ तथाच येषु कपालेषु यद्घटप्रागभावः स एव घटस्तत्रोत्पद्यते इति तस्य कारणेन्तर्भावो न वक्तुं शक्यत इत्यत आहुः ॥ ॥ प्रागभाव इत्यादि ॥ यत्र कपालानि सिद्धानि घटाश्च श्वोभाविनस्तत्र सत्यामपि कारणतायां सति च प्रागभावे कारणान्तरेषु च सत्सु स कालो नास्तीत्यवश्यं वाच्यम् ॥ सच कालः साधारणो भवंस्तत्तत्फलजननाय फलानुकूलत्वरूपमेकं सकलतत्समवायित्वकारणगतमवस्थाविशेषं सम्पादयतीत्यवश्यमभ्युपेयम् । अन्यथा श्वोभावी पदार्थोऽद्यस्यात् । श्वोभावीति व्यवहारश्च बाध्येत ॥ एवंसति सकलकारणवृत्त्येकयावस्थया निर्वाहे सकलपालवृत्त्येकातिरिक्तप्रागभावकल्पना प्रमाणरहितैवेति । अवस्था च स्वरूपातिरेकेण नानुभूयत इति तादृशावस्थाविशिष्टङ्कारणमेव स इत्यर्थः ॥ नच प्रागभावानङ्गीकारे उत्पत्त्यनन्तरम्पुनरुत्पत्तिप्रसङ्ग इति वाच्यम् ॥ तदवस्थातिरोभावेनैव निर्वाहात् । नचेह कपाले घटोनास्तीति प्रतीतिस्तत्र मानम् । तस्या घटत्वावच्छिन्नप्रतियोगिताकाभावविषयतया सामान्यत्वेन प्रागभावाख्यविशेषानवगाहित्वात् । नच प्रागभावः सामान्य एवेति वाच्यम् । तस्य विनाशित्वेन यत्किञ्चित्प्रतियोग्युत्पत्तावपि तन्नाशसम्भवे इदानीमत्र कपाले घटोत्पत्त्या तन्नाशात् । जातेऽवयविनि कार्ये तदवयवत्वेन प्रतीयमानेषु कपालेष्वपि घटोनास्तीति प्रतीतिः स्यात् । प्रागभावप्रतियोगिरेकदैकत्रास्थितौ च तस्य नित्यत्वापातः स्यादिति न किंचिदेतत् । नच यत्र पक्वे घटे स्पर्शरूपरसगन्धानाम्पाकजानामुत्पत्तिस्तत्र प्रागभावं विना कथन्निर्वाह इति वाच्यम् । एकयाप्यवस्थया फलचतुष्टयोत्पत्तौ बाधकाभावात परिणामस्य स्वभावकार्यत्वात्तस्य च कार्यैकोन्नियत्वात् । ननु सत्कार्यवादे कारण एव सम्प्रविष्टस्य पूर्ववर्त्तित्वांशस्य कथंग्रहः । तस्य प्रागभावावच्छिन्नसमयवर्त्तित्वरूपत्वात् । तस्य च प्रागभावग्रहाधीनत्वादितिचेन्न कार्यविषयकाग्निमजननज्ञानेनैव तद्ग्रहसम्भवात् । अन्यथा प्रागभावस्यापि कारणत्वेन तन्निष्ठपूर्ववर्त्तित्वस्यापि प्रागभावघटिततया तद्ग्रहण आत्माश्रयेण प्रागभावीयकारणताया एवातिदुर्ग्रह-

त्वापातात् । प्रागभावस्य कारणावस्थाव्यंग्यत्वेन तदनङ्गीकारे तदग्रहेण प्रागभावस्याप्यग्रहापाताच्च । नहि घटजननानुकूलाङ्कारणावस्थामपश्यतः कस्यापि इह घटो भविष्यति इदानीमत्र घटप्रागभाव इति बुद्धिरुदेति । अभ्यासपाठवादुदेतीति चेन्न । तथासति कारणादर्शनेपि तदुदयापत्तेः । अभ्यासपाटवादेव प्रागभावौसीनात्पूर्ववर्तित्वीयग्रहेणास्याप्यापत्तेश्च । कार्यपरत्वावच्छिन्नसमयावर्तित्वस्यैव पूर्ववर्त्तित्वात् । अग्रिमजननज्ञानगम्यस्य कालधर्मस्यैव च प्रथमपदार्थत्वात्। किञ्च कारणताघटकपूर्ववर्त्तित्वशरीरप्रविष्टस्यास्य कारणत्वे उच्यमाने तत्राप्यस्य प्रवेशाच्चक्रिकापत्तिः ॥ एतत्सर्वमभिसंधायाहुः ॥ अग्रिमेत्यादि ॥ ॥ अन्यथेति ॥ ॥ प्रागंशस्यानवगाह इत्यर्थः ॥ फलितमाहुः ॥ तस्मादित्यादि ॥ ॥ प्रागंशोदासीनाभावमात्रज्ञानस्यात्यन्ताभावविषयत्वात्कारणावस्थामपश्यतस्तूष्णीम्प्रतीयमानो यो भावः सकारणरूपो नेत्यर्थः॥ ननु प्रागभावोऽत्यन्ताभावाद्भिन्नः कारणावस्थाव्यंग्यत्वात् । ध्वंसाच्च भिन्नः कारणावस्थाव्यंग्यत्वात् । ध्वंसाच्च भिन्नः प्रतियोग्युत्पत्तिनाश्यत्वात् । भेदादपि भिन्नः संसर्गाभावरूपत्वादित्येवमभावान्तराद्भेदे साधिते अभावत्वेन प्रत्ययाद्भावेभ्योतिरिक्तः प्रागभाव एव सेत्स्यति । एवञ्च सिद्धे प्रागभावे कारणसमन्वयात्कुतो न तस्य कारणत्वमितिचेन्न । केवलप्रत्ययात्तदसिद्धेरितरभेदपूर्वकसिद्धौ च कारणावस्था समनियतस्य तदतिरेकासिद्धेः । सिद्धौ वा सामयिकत्वेन सिद्ध्याऽनादित्वाभावेन भवद्विचारितरूपस्य तस्यासिद्धेः । ताथाभूतस्य कारणताग्रहणे चक्रिकापत्तेश्च । ननु गन्धाद्यनधिकरणकालवृत्त्यभावत्वस्यादृष्टत्वावच्छिन्नानधिकरणकालवृत्त्यभावत्वस्य च प्रागभावध्वंसरूपत्वान्नेदन्दूषणमिति चेन्न तयोस्तथात्वे मानाभावात् । प्रलयदशायान्द्रष्टुः कस्याप्यभावात् । ईश्वरः पश्यतीति चेत् । तर्हि तमेव पृच्छ तद्वाचैव मंस्यामो न भवद्वाचेति दिक् । एवञ्चाव्याप्यवृत्तिसंयोगादेस्तत्तदवच्छेदेनोत्पत्तिरपि दृष्टादृष्टकारणकलापादेव । आत्मादावपि ज्ञानाद्युत्पतेः प्राक् प्रागभावो नास्त्येव । अन्यथा प्रतीयेतैव । प्रतीयमानस्त्वत्यन्ताभाव एव । प्रागंशानवगाहादित्युक्तत्वात् । ध्वंसप्रागभावाधिकारणेनात्यन्ताभाव इति तु प्रवादमात्रमिति । औदासीन्येन प्रतीयमानस्याकारणत्वे गमकमाहुः ॥ ॥ नहीत्यादि ॥ ॥ तथाचासाधारणकारणत्वेनाभ्युपगम्यमानस्य तस्य व्यापाराभावात्कारणता नाङ्गीकर्तुं शक्या व्यापारातिरिक्तस्य व्यापारवत एवासाधारणकारणत्वदर्शनात् । कार्यव्यापाराभावे च तत्सत्ताया एव दुरधिगमत्वाद्दूरापास्ताकारणतेत्यर्थः ॥ कार्येण भावकानाशत्वादपि न कारणतेत्याहुः ॥ ॥ कार्येणेत्यादि ॥ ॥ कार्येण भावकारणध्वंस एव लोके क्वचिद्दृष्टोऽश्वतर्यादिगर्भनिष्क्रमणादौ नत्वभावरूपस्यापि

कारणस्य अन्यथा प्रतिबन्धकध्वंसात्यन्ताभावाभ्यामपि दाहो जायते इति दाहे नापि क्वचित्तयोर्नाशोदृश्येत । अभ्युपगमासिद्धस्य युक्तिमूलत्व एव निर्वाहात् । नच प्रत्यक्षमेव तत्र मानं नयुक्तिरिति वाच्यम् । तस्य विप्रतिपन्नत्वेन तद्विषयकप्रत्यक्षस्यैवाभ्युपगंतुमशक्यत्वादिति न किञ्चिदेतादित्यर्थः ॥ ननु मास्तु प्रागभावोऽतिरिक्तस्तथापि पूर्वकल्पप्रलयकाले उत्तरसृष्ट्यभावात्तद्ध्वंसे च तदुत्पत्तेरुत्तरसृष्टिं प्रति पूर्वप्रलयध्वंसस्यैव वा प्रतिबन्धकध्वंसत्वेन रूपेण कारणतास्तीति तस्य तत्त्वान्तरत्वं दुर्वारमिति चेत्तत्राहुः ॥ ॥ प्रसङ्गादित्यादि ॥ ॥ आहेति ॥ ध्वंसस्वरूपमाहेत्यर्थः ॥ दंडादिस्वरूपाभिन्नोध्वंस इत्यत्र हेतुमाहुः ॥ ॥ तिर इत्यादि ॥ ॥ तिरः अप्रकटं भावयतीति तिरोभावस्तिरोभवनं वा तिरोभावः । उभयथापि निमित्तोपादानान्यतरस्वरूपातिरिक्तो ध्वंसो न निरूपयितुं शक्यः । तदतिरिक्तस्यादर्शनात् । तथाच कार्यप्रतिकूला कारणावस्थैव ध्वंस इत्यर्थः ॥ नन्वाकारान्तरमतिरिक्तं दृश्यत इति चेत्तत्राहुः ॥ ॥ नन्वित्यादि ॥ ॥ तथा चाकारान्तरमपि तद्धर्म एव नतु धर्मातिरिक्तः ॥ अन्यध्वस्त इति प्रत्यये ध्वंसस्य घटविशेषणता नप्रतीयेत ॥ तादृशप्रत्ययबलाच्च पक्के रक्तिमेव ध्वस्ते ध्वंसाख्यमाकारान्तरमेव निश्चीयत इत्यर्थः ॥ नचाभावमुखप्रत्ययोत्र बाधक इति वाच्यम् । त्वन्मते तमःप्रत्ययवदस्याप्यत्राबाधकत्वात् ॥ नच घटोन्मज्जनापत्तिः । अवस्थायाः सत्वात् । तथैव कारणकलापविघटनाच्च ॥ ११८ ॥ प्रागभावादिपदप्रयोगं साधयितुमुपपत्तिकथनायाहुः ॥ ॥ नन्वित्यादि । तयोर्यथेति ॥ घटस्यानन्यथासिद्धनियतपश्चाद्भावित्वं दण्डस्य तादृशपूर्वभावित्वञ्चावेक्ष्य यथा घटदण्डयोः कार्यकारणप्रयोगस्तथा घटादेरग्निमजननताभ्यान्तत्वाधिक्यान्निवारितम् । सन्तीति तत्तत्कृत्वोत्पत्तिकथनेन कारणाद्विभागस्य पृथक्स्थित्या च पृथक्त्वसंख्यापरिमाणपरत्वापरत्वानां श्रुत्या च सृष्ट्यादिविषयकबुद्धीच्छाप्रयत्नसंस्काराणां सृष्ट्यासामर्थ्यजदुःखस्य प्रार्थनादिना सुखस्य चानुमातुं शक्यतया ताभ्याञ्चादृष्टस्यापि स्वनुमेयतया तदा संहतोऽनेन संयोगस्य कण्ठोक्ततायाः गुरुत्वद्रवत्वस्नेहानाञ्चेदानीन्तनपृथिव्यप्तेजोदृष्टान्तसनाथेम पृथिवीत्वादिरूपेण हेतुनानुमातुं शक्यतया द्वेषस्यापि बुद्ध्यादिसाहचर्येण सिद्धप्रायतया विशिष्टज्ञानान्यथानुपपत्त्या च सामान्यस्यापि सिद्धतया वक्तुं शक्याः सन्तीत्यर्थः ॥ अपृथग्विद्यमानत्वादिति ॥ ॥ पृथक् इतरव्यावृत्ताधिदैविकरूपेण विद्यमानत्वमपृथग्विद्यमानत्वं तस्मात् तृतीयस्कन्धादौ सृष्टिप्रक्रियायां यथैते देहवत्तया स्तुतिकर्तृतया चोक्तास्तथान्ये सामान्यादयः संख्यादयश्च नोक्ता इति धर्मैर्धर्मभूतैः संख्यासामान्यादिभिः कृत्वा गणः अष्टाविंशकः । अधिकसंख्याको नेत्यर्थः ॥ अत्रेदं

हृदयम् ॥ संख्यापरिमाणपृथक्त्वविभागपरत्वापरत्वबुद्धीच्छाप्रयत्नसंस्काराहृष्ट-
सुखदुःखद्वेषगुरुत्वद्रवत्वस्नेहानां यथासम्भवं तत्वान्यादायैवान्वयव्यतिरेकग्रहणा-
त्सामान्यस्य च तत्वसहभावेनैव पूर्ववर्त्तित्वग्रहणादन्यथासिद्धत्वेन संयोगस्य च
स्पर्शेन्तर्भूतत्वेन कारणरूपतया पृथग्भूतत्वेन निबोध्यम् ॥ वस्तुतस्तु सामान्यादे-
रभाव एव सृष्ट्यारम्भसमयेऽब्रह्मणोऽद्वितीयत्वात् । बहुस्यामितीच्छोत्तरमपि
"जातिव्यक्तिविभागोयं यथा वस्तुनि कल्पित " इति षष्ठस्कन्धवाक्यात्सामान्य-
स्य कल्पनैकशरणत्वमेव तस्मान्नैयायकाद्युपगतपदार्थानां श्रुतिपुराणाविरोधे लौ-
किकयुक्तियुक्तत्वेच कार्यकोटावेव निवेश इति भावः॥११९॥ इति कारणप्रकरणम्

ब्रजभाषाटीका ।

जैसें भगवान् सर्वसाधारणहैं तासूँ तत्वकोटीमें भगवान्की गणना नहीं है ऐसेंही काल कर्म स्वभावभी सर्वसाधारण है तासूँ कारणभूत तत्वनमें इनकी गणना नहीं है किन्तु इन तीनोंकूँ भगवदात्मकता है नैयायकनके मतमें प्रागभावकूँ कारण मानें हैं वाकी भी तत्वनमें गणना होनीं चाहिये यह शंका नहिंकरनी क्योंकी कार्यके उत्पन्नभये पहली जो वा कार्यको कारणमें अभाव है वासों प्रागभाव कहेहै वह प्रागभाव कारणसों न्यारो नहिं है तासों वाकों इन कारणतत्वनसों अलग मानकरके तत्वकी अधिक संख्या बढायवेमें प्रमाण नहिं है क्योंकि आगे होयवेवारी कार्यकी उत्पत्ति देखकें वाको अनुभव होय है यहही अत्यन्ताभावमें और प्रागभावमें भेदहै तासों कार्यके पूर्व जो वा कार्यको अभाव है वो कारण नहिं है वह अभाव कार्यके उत्पन्नहोयवेमें कछुभी व्यापार नहिं करे है कार्य उत्पन्न होतेही वा प्रागभावकूं निवृत्त-करदें है ऐसेंही प्रध्वंसाभाव भी दंडादिरूपही है तिरोभावशक्तिसों अलग ध्वंसाभावको स्वरूप नहिं बतायसकें है तासों पदार्थके दूसरे रूपकूँ देखतो भयो पुरुष पहले रूपके तिरोभावकों देखकें ये कार्य ध्वस्तभयो ऐसें माने है ॥ ११८ ॥ शङ्का--कारणसों अलग

प्रागभाव नहिं होय तो अभी घटको प्रागभाव है इत्यादिवाक्य-नमें प्रागभाव शब्दको क्यों उच्चारण होनोंचाहिये ? उत्तर--जैसें घटादिकनसों अतिरिक्त कार्य नहिं है दंडादिकनसों अलग कोई कारण नहिं है तथापि लोकमें दंडादिकनसों घटादि बने है या रीतिसों बोले हैं तथा कारणसों कार्य बने हैं ऐसेंभी बोले है ऐसें ही अवस्थान्तरप्राप्त कारणमें प्रागभाव शब्दकाभी प्रयोग होय है ॥ शङ्का--संख्या, परिमाण, परत्व अपरत्व जाति आदि धर्मनकूं तत्वनमें गिणनों योग्यहै आप तत्वनकूं २८ अष्टाविंशति हि क्यों बतावोहो ? उत्तर--संख्याआदि जे गुणहैं वे इन तत्वनसों न्यारे होयकरकें नहिं रहें है तासों इन तत्वनमेंही उन गुणनको अन्तर्भावहै ॥ ११९ ॥ इति कारणनिरूपणम् ॥

आनन्त्येपि हि कार्याणां गणभेदो द्विधा मतः॥समष्टिव्यष्टिभेदेन केवले जडजीवना१२०
सर्वेषां त्रिगुणत्त्वाद्धि त्रयो भेदाः पृथङ्मताः॥
आधिदैविकमाध्यात्ममाधिभूतमितिश्रुताः ॥
॥१२१॥सच्चिदानन्दरूपेण देहजीवेशरूपिणः॥
समष्टिव्यष्टिः पुरुषो जीवभेदास्त्रयो मताः १२२

तत्त्वदीपप्रकाशः ।

एवं कारणं निरूप्य कार्यज्ञानार्थं तस्यावान्तरभेदानाह ॥ आनन्त्येपीति ॥ यद्यपि घटपटादिप्रकारेण ज्ञातुमशक्यं तथापि सर्वं कार्यं राशिद्वयात्मकम् । समष्टिरूपं व्यष्टिरूपञ्च । तच्च जीवजडात्मकम् । नानन्दांशस्तत्र प्रविशति । अतः केवलप्रकारेण विभागे क्रियमाणे जीवो जडश्च भवति नतु ततोतिरिक्तं किञ्चित् ॥१२०॥ कार्ये त्रैविध्यं निरूपयितुमाह ॥सर्वेषामिति॥ गुणानामपि त्रैविध्ये हेतुरप्रवक्तव्यः॥

भेदानाह ॥ आधिदैविकामिति ॥ अधिष्ठाता स्वतन्त्रो देव उच्यते । अभिमन्ता आत्मा । अनयोर्मध्ये अभिसंभवति सोऽधिभूतः ॥ १२१ ॥ त्रयाणाममेदायाह ॥ सच्चिदानन्दरूपेणेति ॥ सदधिभूतम् । चिदध्यात्मकम् । आनन्दोऽधिदैवमिति ॥ उदाहरणमाह ॥ देहजीवेशरूपेण इति ॥ देहोधिभूतम् । जीवोऽध्यात्मा । ईशोन्तर्याम्यधिदैवः ॥ एवं रूपभेदमुपपाद्य समुदायेन प्रवृत्तौ कुत्र कस्य प्राधान्यमित्याकांक्षायामाह ॥ व्यष्टिरिति ॥ यद्यप्येते त्रयोऽपि पुरुषावतारास्तथापि देहाभिमानिन इति । जीवभेदा उच्यन्ते तत्रैव विद्यमानोऽप्यनभिमानित्वाद्ब्रह्म ॥ १२२ ॥

आवरणभंगः ।

एवं कारणरूपस्य प्रमेयस्य स्वरूपप्रमाणसाधनफलैस्तदष्टाविंशतितत्वात्मकमेवेतिनिर्णय उक्तः ॥ अतःपरं कार्यस्यानन्त्येऽप्येवं निर्णयं वक्तुं प्रथमतः स्वरूपतोऽवगमार्थं प्रयतमाना आहुः ॥ ॥ एवमित्यादि ॥ ॥ समष्टीत्यादि ॥ सम्यक् अष्टिः एकत्वेन गणना यस्येति समष्टिर्महत्कार्यं ब्रह्माण्डात्मकं तस्य च राशिः ॥ " दृश्यन्तेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः" इति वाक्याज्ज्ञेयः ॥ विगता अष्टिर्यस्येति व्यष्टिरवान्तरकार्यमस्मदादिशरीरात्मकम् । तद्राशिः प्रत्यक्षसिद्ध एव। एवमवान्तरकार्येऽपि देहस्थितकीटाद्यपेक्षयाऽस्मदादिदेहानां समष्टित्वं ज्ञेयम् ॥ पूर्वं कारणस्वरूपविचारणे तेषां सदंशत्वमुक्तमिति कार्यमपि सदंशात्मकमेव ॥ ननु चिदानन्दांशयोरपि तत्र प्रवेश इति शंकानिवृत्त्यर्थं कार्यस्य स्वरूपमाहुः ॥ ॥ तच्चेत्यादि ॥ तदिति समष्टिव्यष्टिरूपं कार्यञ्च समाहारि । तथा च यद्यप्युत्पद्यमानानि कारणानि सदंशरूपाण्येव तथापि कारणत्वदशायां तानि सजीवानि ॥ " अनेन जीवेन " इति श्रुत्या नामरूपव्याकरणे जीवानुप्रवेशात् ॥ ततश्च कार्यमपि तत्सहितमिति समाहृतं कार्यं जीवजडात्मकम् ॥ ननु केवलसदात्मकमित्यर्थः ॥ नन्वन्तर्यामिणोऽपि देहे विद्यमानत्वात्तस्य कुतो न कार्यकोटौ प्रवेश इत्यत आहुः ॥ ॥ नेत्यादि ॥ अकार्यस्यापि जीवस्यानन्दार्थं देहाभिमानित्वेन कार्यकोटिप्रवेशोऽन्तर्यामिणस्त्वनभिमानित्वमतो नानन्दांशस्तत्र प्रविशति । तेन सिद्धमाहुः ॥ ॥ अत इति ॥ ॥ केवलप्रकारेणेति ॥ जीवं पृथक्कृत्य तथा च चेतनाधिष्ठिताः समष्टिव्यष्टिदेहा जीवगणे प्रविशन्ति । जीवाः श्रेष्ठा ह्यजीवानामिति निर्देशात् ॥ तदनधिष्ठिता घटादयोऽवान्तरभूतानि च जडगणे तेनैवमपि राशिरूपेण ज्ञानं सकलकार्यज्ञानं सुखेन भवति । तदतिरिक्तस्य का-

र्यस्याभावादतः सर्वं कार्यं समष्टिव्यष्टिरूपेण जडजीवरूपेण च प्रमेयमित्यर्थः ॥ ॥ १२० ॥ कार्येत्यादि ॥ एवम्प्रमेयज्ञानार्थं कार्यद्वैराश्यं निरूप्य तद्बलज्ञानार्थं कार्यत्रैविध्यं निरूपयितुं स्वरूपत्रैविध्यमन्तरेण कारणत्रैविध्याभावात्तदभावे च कार्यस्यापि त्रैविध्याभावात्तन्निरूपयितुमाह । कारणे स्वरूपे च त्रैविध्यमाहेत्यर्थः ॥ सर्वेषामिति ॥ ॥ हीति निश्चये सर्वेषां कार्याणां त्रिगुणत्वाज्ज्ञापकाद्धेतोः श्रुताः अथाधिदैवमथाध्यात्मथाधिभूतमित्यादिश्रुत्युक्ता आधिदैविकादयस्त्रयो भेदाः पृथक् प्रत्येकं कारणे स्वरूपे च मता इति योजना । श्रुता इत्यनेन त्रैविध्योक्तौ प्रमाणं दर्शितं ननु गुणत्रैविध्येन सर्वत्र त्रैविध्यानुमानं तद्गुणत्रैविध्यमेव कुत इत्यत आहुः ॥ ॥ गुणानामित्यादि ॥ ॥ अग्र इति ॥ ॥ सच्चिदानन्दरूपेणेत्यनेनेत्यर्थः ॥ इदञ्च " सत्वं रजस्तम इति । निर्गुणस्य गुणास्त्रय- इत्यस्य सुबोधिन्यां स्फुटम् । सदंशान्निर्गतं सत्त्वमुच्यते, चिदंशाद्रजः, आनन्दांशाच्च तम इति विवरणात् ॥ ॥ भेदानिति ॥ ॥ त्रैविध्यप्रयोजकभेदान् भेदानां स्वरूपं व्याकर्तुं तदभिधायकपदप्रकृतिपदानि व्याकुर्वन्ति ॥ अधिष्ठातेत्यादि ॥ देवपदस्यार्थद्वयं विवक्षितम् ॥ स्वतन्त्राभिमन्त्रोरधिष्ठात्राभिमन्त्रोर्वा मध्ये अभिसंभवति स्वतन्त्राभिमन्तृत्वादिव्यवच्छेदको यो भवति सोधिभूत इत्यर्थः ॥ तदुक्तं द्वितीयस्कन्धे " आध्यात्मिकस्तु यः प्रोक्तः सोसावेवाधिदैविकः । यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिकः ॥ " इति उभयोर्विच्छेद इत्यर्थः ॥ तदनुप्रविश्य सच्चत्यच्चाभवदिति पुरप्रवेशोत्तरमेकस्यैव जीवान्तर्यामिभावपक्षे सदंशेन शरीरेणैव तथात्वव्यवच्छेदः क्रियत इति तदुभयविच्छेदकोंशो देहादिरूपोधिभूत इति ॥ एतेषाञ्चाधिदैविकादिशब्दानां व्युत्पत्तिपक्षमादाय क्वचिदर्थभेदेऽपि तत्र तत्र पर्यायतताया एव प्रसिद्धेः । प्रकृते ऐकार्थ्यमेवेत्यभिप्रेत्य मूले आधिदैविकमाध्यात्ममधिभूतमित्युक्तम् ॥ १२१ ॥ ॥ त्रयाणामित्यादि ॥ ॥ जडजीवयोरिव त्रयाणां स्वान्त्र्याभिमानोभयविच्छेदैः कार्यैः सिद्धे भेदे स्वरूपमपि भिद्येतेत्याकांक्षायामभेदायाहेत्यर्थः ॥ ॥ सच्चिदानन्देत्यादि ॥ ॥ तथा चैकस्यैव पुंसः पाचकपाठकपालकत्ववदेकस्यैव सच्चिदानन्दरूपस्य ब्रह्मणो धर्मरूपसदादिपुरस्कारेण कार्यभेदे आधिभौतिकादिशब्दवाच्यत्वान्न स्वरूपतो भेद इत्यर्थः॥ ॥उदाहरणमाहेति ॥ एतान्परिचायनायोदाहरणमाहेत्यर्थः ॥ ॥ देहेत्यादि ॥ ॥ इदञ्च द्वितीयस्कन्धे " एको नानात्वमन्विच्छन् " इत्यत्र सिद्धम् ॥ तथाच ब्रह्मत्वेनैक्येपि भिन्नकार्यार्थं यथा भेदस्तथा सर्वत्रैवाभेदोऽभेदश्चावगन्तव्य इत्यर्थः ॥ ननु सांख्ये त्रैविध्यनिरूपणं कार्यकारणयोस्त्रिगुणात्मकत्वेनात्मविलक्षणत्वज्ञानद्वारा विविदावश्यकम् ॥ ब्रह्मवादे तु सर्वस्य ब्रह्मात्मत्वात्तस्यानावश्य-

कत्वेन व्यर्थं त्रैविध्यनिरूपणमित्याकांक्षायां तत्प्रयोजनं निरूपयति॥ एवमित्यादि ॥ एवं सच्चिदानन्दानामाधिदैविकादिव्यवहारप्रयोजकत्वज्ञापनेनैकस्मिन्नपि ब्रह्मस्वरूपेंशभेदेन तरतमभावमुपपाद्य समुदायेन राशिरूपेण,कार्यज्ञानार्थं प्रवृत्तौ कस्मिन्स्वरूपे कस्यांशस्य प्राधान्यमित्याकांक्षायां यस्मिन्स्वरूपे यत्प्राधान्यं तदाहेत्यर्थः ॥ तथा च त्रैविध्यज्ञानस्य स्वरूपतारतम्यनिश्चयद्वारा मूलरूपोत्कर्षज्ञापनं फलमित्यर्थः ॥ ॥ तदुदाहरन्ति ॥ व्यष्टेरिति मूले ॥ ॥ तथा च जीवशरीरेषु व्यष्टेरस्मदादिशरीरस्य सत्प्राधान्यं समष्टेः ब्रह्माण्डशरीरस्य चित्प्राधान्यं पुरुषशरीरस्यानन्दप्राधान्यमिति जीवव्यवस्थेत्यर्थः ॥ अत्राधिभौतिकादिक्रमो ज्ञेयः ॥ ननु प्रथमस्कन्धे पुरुषस्याद्यावतारत्वकथनात्कथं जीवभेदत्वमत आहुः ॥ ॥ यद्यपीति ॥ ॥ एतइति ॥ ॥ व्यष्टिसमष्ट्यावरणपुरुषात्मकाः पुरुषावतारा इति " यस्यांशांशेन सृज्यन्ते देवतिर्यङ्नरादय" इति "आद्योवतारो यत्रासौ भूतग्रामो विभाव्यत " इति " आनन्दमयोवसान " इति वाक्यात्तत्वात्मकस्य क्षरपुरुषस्यावताराः । अभिमानिन इति षष्ठी अभिमानिसंबन्धिन इत्यर्थः ॥ ननु यथाभिमानित्वं जीवगमकम् । तथानन्दप्राधान्यं ब्रह्मगमकमतः पुरुषस्य जीवभेदत्वं न युक्तमित्याकांक्षायां ब्रह्मत्वसाधकस्य हेतोरुपाहितत्वं बोधयन्त आहुः ॥ ॥ तत्रैवेति ॥ देहे विद्यमानोऽप्यन्तर्यामी अनभिमानित्वाद्ब्रह्म तथाचानभिमानित्वस्योपाधेर्विद्यमानत्वान्नानन्दांशप्राधान्यमात्रेण स्वरूपात्मकब्रह्मत्वं पुरुषेऽनुमातुं शक्यमिति पुरुषो जीवभेद एवेति निश्चयः ॥ १२२ ॥

व्रजभाषाटीका ।

ऐसें कारणको वर्णनकरकें कार्यके स्वरूपको ज्ञान होयवेकेलिये अवान्तर भेदनको वर्णन करें हैं यद्यपि कार्य अनन्तप्रकारको है तासों यह घटहै यह पटहै यह कुन्डलहै या रीतिसों नहिं जान्यो जायहै तथापि सब कार्यकी दो राशिहै समष्टिरूप ब्रह्माण्डनकी राशि १ अक्षरब्रह्ममें है व्यष्टिरूप देहादिकनकी राशी २ ब्रह्माण्डमें है जितनो कार्य है सब जडजीवरूपहै यद्यपि जीव कार्य नहिं है तथापि आनन्दकेलिये देहमें अभिमान राखे है तासों कार्यकोटिमें गिनों जायहै अन्तर्यामी देहमें रहे है परन्तु देहमें अभिमान नहिं राखे है तासों कार्यकोटिमें नहिं गिन्योंजाय है ॥ १२० ॥ गुण तीन प्रकारको है तासों कार्यभी आधिदैविक,

आध्यात्मिक, आधिभौतिक इन भेदनकरिके तीनप्रकारकोहै, स्व-
तन्त्र जो अधिष्ठाता है वह देव कहावे है आत्मा अभिमन्ता इन
दोनोंके बीचमें जो सदंश देहादिक है जासों इन दोनोंको (व्य-
वच्छेद) होय है वह आधिभौतिक है ॥ १२१ ॥ अधिदैविकादि
तीनों पदार्थनके न्यारे न्यारे कार्य दीखे हैं तासों परस्पर भेद मा-
लूम पडे है परन्तु ब्रह्मस्वरूपमें भेद नहिं है जैसें एकही पुरुष जब
रसोई बनावे तब पाचक कहावे है जब पढावें लगेहै तब पाठक
कहावे है जब रक्षा करें है तब पालक कहावेहै याहीप्रकार सच्चिदा-
नन्दरूप ब्रह्महै सो धर्मरूप सदंशको कार्य प्रकट करे है तब आधि-
भूत कहावेहै चिद्धर्मको कार्य प्रकट करे तब अध्यात्म कहावे है
धर्मरूप आनन्दांशको कार्य प्रकट करेहै तब आधिदेव कहावेहै
स्वरूपमें भेद नहिं है; ब्रह्मके सत् अंशसों सत्वगुण, चिदंशसों
रजोगुण, आनन्दसों तमोगुण प्रकटहोवें है. सत् आधिभूतहै, चित
अध्यात्म है, आनन्द अधिदेव है, जीवके तीन भेदहैं समष्टिरूप
ब्रह्माण्डाभिमानी जीव१, व्यष्टिरूप अस्मदादिदेहाभिमानी जीव२,
और आवरणपुरुष ३, ये तीन जीवके भेदहैं व्यष्टिरूप अस्मदादि-
शरीर सत्प्रधानहै, समष्टिरूप ब्रह्माण्डशरीर चित्प्रधानहै, पुरुषशरीर
आनन्दप्रधानहै, उदाहरण कहेहै देह अधिभूतहै, जीव अध्या-
त्महै, अन्तर्यामी अधिदैवहै, यद्यपि समष्टिव्यष्टि आवरणपुरुष ये
तीनों तत्वमें जो गिनोंगयो क्षरपुरुष वाके अवतार हैं तामें (य-
स्यांशांशेन सृज्यन्ते) यह प्रमाणहै तथापि देहके अभिमानरा-
खवेवारे हैं तासों जीवनमें गणना है वाही एक देहमें रहवेवारो
अन्तर्यामी शरीराभिमान नहिं राखे है तासों ब्रह्मरूपनमें गिन्यो
जायहै याप्रकार तीन भेदनको जो ज्ञानहै सो स्वरूपके तारतम्य-
को निश्चय करायके मूलरूपके उत्कर्षकूं जतावे है ॥ १२२ ॥

अन्तर्याम्यक्षरं कृष्णो ब्रह्मभेदास्तथापरे॥स्वभावकर्मकालाश्च रुद्रो ब्रह्मा हरिस्तथा॥१२३॥

तत्त्वदीपप्रकाशः ।

एकत्रैव त्रिप्रकारेण वर्तत इति प्रकारान् गणयति ॥ **अन्तर्याम्यक्षरं कृष्ण इति** ॥ यथा सारथी रथी तदन्तस्थितश्च तथान्तर्याम्यक्षरं कृष्णः । एवंसति पुरुषोत्तमत्वेन सर्वत्र दर्शनं भवति। परं ब्रह्मैव त्रिप्रकारेण वर्तत इति त्रयो भेदास्त्रयाणां प्रत्येकं बहून् भेदानाह ॥ **स्वभावेति** ॥ अक्षरस्य स्वभावकर्मकालभेदाः रुद्रादयस्त्रयः कृष्णस्य । अन्तर्यामिणः सर्वत्र भिन्नतयैव स्थितत्वान्न भेदाः ॥ १२३ ॥

आवरणभंगः ।

एवं प्रासंगिकं परिहृत्य प्रस्तुतं वदन्तः । किंचित्कार्यर्थं देहेषु त्रिस्वरूपेण ब्रह्मणः स्थितिं बोधयन्ति । एकत्रेत्यादिस्थितिप्रकारं दृष्टान्तेनाहुः॥ ॥यथा सारथीत्यादि ॥ ॥ सारथिवद्दृष्टयादिदेहजीवानां नियामकोऽन्तर्यामी । अन्तर्यामिणो नियामकत्वञ्च ॥ "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति"इति गीतावाक्यात्"अभिचाकशीति " इति श्रुतेश्च ज्ञेयम् ॥ तस्यापि रथिवन्नियामकमक्षरम् । अक्षरस्य नियामकत्वं प्रशासनश्रुत्यावगन्तव्यम् ॥ तस्याप्यन्तर्यामिवन्नियामकः कृष्ण इत्यर्थः॥भगवतो नियामकत्वं त्वन्तर्यामिब्राह्मणादेव सिद्ध्यति । तस्याक्षरनियामकत्वञ्च " अक्षरादपि चोत्तम " इति " अक्षरात्परतः पर " इति गीतावाक्यात् श्रुतेश्च ज्ञेयम् । ब्रह्मवैवर्ते अक्षराहङ्कारविमर्दकत्वकथनाच्च । एतेन निरंकुशं स्वातन्त्र्यं कृष्ण एव सिद्ध्यति इति प्रमेयबलं निर्णीतम् । एवमन्यत्र तत्तदपेक्षया तत्तदाधिदैविकस्य स्वातन्त्र्यं ज्ञेयम् ।अत्रापि क्रमस्तु पूर्ववदेव । एवं ज्ञानस्य फलमाहुः ॥ ॥ एवं सतीति॥ ॥तन्नियामकत्वेन सर्वान्तरत्वेन ज्ञाने सति तथाभवतीत्यर्थः ॥ नन्वन्तर्याम्यक्षराधिकरणयोर्मध्ये भाष्येऽन्तर्यामिणोऽक्षरस्य च स्वरूपात्मकत्वेन व्यवस्थापनात्कथं भेदत्वमेतयोरित्यत आहुः॥ ॥ परब्रह्मेत्यादि ॥ एतेन यदेकमव्यक्तमनन्तरूपमिति श्रुत्युक्तमनन्तरूपत्वं दिङ्मात्रेण बोधितम् ॥ तत्रापि गणनापरिच्छेदाभावायाहुः॥ त्रयाणामित्यादि ॥ ॥ अत्रापि स एव क्रमः। नन्वन्तर्यामिणो भेदा नोक्ता इति कथं त्रयाणामित्युच्यते इत्यत आहुः ॥ ॥ अन्तर्यामिण इति ॥ ॥ तथाच तत्र स्वरूपभेदादेव । इति न प्रतिज्ञाहानिरि-

त्यर्थः ॥ अत्र स्वभावकर्मकालाश्चेति चकारेणाक्षरे चरणासनलोकरूपत्वेन भक्तप्राप्याक्षरोपासकप्राप्यविमुक्तमानिप्राप्यत्वेनापि भेदः संगृहीतः । एवं स्वभावादीनामपि ज्ञातव्यः । कालस्य तु सूर्यस्तस्याधिभौतिकमित्यादिनोक्ताऽप्येवमन्यदपि ज्ञेयम् ॥ १२३ ॥

व्रजभाषाटीका ।

एकठिकानेहि ब्रह्म तीनप्रकारकरकें रहेहै, उन प्रकारनकूँ गिनावेहैं (अन्तर्यामीति) अन्तर्यामी १ अक्षरब्रह्म २ परब्रह्म कृष्ण ३ ये तीन ब्रह्मके भेदहैं जैसें एकरथमें रथ चलायवेवारो रथमें बैठवेवारो और बैठवेवारेको जीवात्मा ये तीन पदार्थ हैं, जैसें रथचलायवेवारो रथको नियामक रहेहै ऐसें व्यष्टिरूप देहवाले जीवनको नियामक अन्तर्यामीहै जैसें रथचलायवेवारेको नियामक रथमें बैठवेवारोहै ऐसे अन्तर्यामीको नियामक अक्षर ब्रह्महै ये वार्तो प्रशासन श्रुतिसिद्ध है (एतस्यैवाक्षरस्य प्रशासने द्यावापृथिवी विधृते) इत्यादि जैसे रथमें बैठवेवारेको नियामक वाको आत्मा है ऐसें अक्षरब्रह्मके नियामक परब्रह्म कृष्णहै यामें (अक्षरादपिचोत्तमः) इत्यादि प्रमाणहै या प्रकार सर्वपदार्थनमें भगवान् विराजमान है और सर्वके नियामकहैं ऐसो ज्ञान होय तब सर्वत्र पुरुषोत्तमत्व करकें दर्शन होयहै याप्रकार परब्रह्म ही तीन प्रकारकरकें वर्तेहै ऐसें ब्रह्मविषयक तीन भेद वर्णन किये इनमेंसों एकएकके बहुतसे प्रकारहैं जैसें अक्षरके स्वभाव कर्म काल आदि प्रकारहैं तथा ब्रह्मा, रुद्र, विष्णु आदि तीनप्रकारके भेद परब्रह्म श्रीकृष्णके तथा अन्तर्यामीके भेद नहिं हैं क्योंकि सर्वत्र भिन्न होयके स्थित रहे हैं तासों ॥ १२३ ॥

अविद्या प्रकृतिर्माया निद्रा चिन्तेन्द्रजालता ॥
महत्तत्वं ब्रह्मरूपमस्माच्चितं तथैव च ॥१२४॥

अहंकारो रुद्ररूपमहंकारोस्मदादिषु ॥ मन-
श्चन्द्रशरीरञ्च मनोस्माकन्तथैव च ॥ १२५ ॥
चक्षुः सूर्यः शरीरञ्च चक्षुरस्माकमेव च ॥
मूलेन्द्रियाणि ब्रह्माण्डं देवदेहास्तथैव च १२६
अस्मदिन्द्रियवर्गश्च रूपत्रयमुदाहृतम् ॥ च-
न्द्रश्चन्द्राभिमानी च मनःप्रेरक एव च॥१२७॥
सूर्यो मण्डलमानी च चक्षुःप्रेरक एव नः ॥
एवं सर्वत्र तद्भेदाः स्वयमूह्या विभागशः॥१२८॥

तत्त्वदीपप्रकाशः ।

त्रयाणां शक्तिभेदानाह ॥ अविद्येति ॥ अविद्या जीवस्य, प्रकृति-रक्षरस्य, माया कृष्णस्य । उपलक्षणविधाया विद्याया भेदानाह ॥ निद्रेति ॥ एवं प्रकृतिपुरुषपर्यन्तमुपरिस्थितानां भेदानुक्त्वा महदादीनामाह ॥ महत्तत्त्वमित्यादिना ॥ महत्तत्वमाधिदैविकस्थानीयम् । द्वितीयं ब्रह्मशरीरम् । तृतीयमस्मदादीनां चित्तम् । अनेनान्येषाञ्चानुपलब्धेरिति भगवत्सिद्धान्ते दोषः परिहृतः ॥ १२४ ॥ अहंकारे भेदानाह॥ अहङ्कार इत्यादिना ॥ १२५ ॥ चक्षुरित्यादीन्द्रियाणां भेदाः सामान्येनाह ॥ मूलेन्द्रियाणीति ॥ १२६ ॥ त्रयाणामवान्तरभेदाः सन्तीति ज्ञापनार्थमाह ॥ चन्द्रश्चन्द्राभिमानी चेति ॥ अतिदिशति ॥ एवमिति ॥ १२७ ॥ १२८ ॥

आवरणभंगः ।

अविद्या जीवस्येति ॥ व्यष्ट्यादित्रयस्य च जीवस्येत्यर्थः ॥ एवञ्चान्तर्यामिणः शरीररहितत्वं ज्ञापितम् ॥ उपलक्षणविधयेति ॥ एवञ्च द्वादशशक्तिमध्यगणिता आधिदैविकी ब्रह्मणःसकाशात्पञ्चपर्वरूपेणोत्पन्ना द्वितीया । अस्मदादिषु रजतभ्रमजनिका तूलविद्या तृतीयेत्यादिरूपेणापि ज्ञेयम् ॥ तथा प्रकृतिमाययोरपि ज्ञेयाः। एतावत्पर्यन्तं ये भेदा उक्तास्तेषु पूर्वोद्दिष्टमाधिभौतिकमग्रे तु

व्युत्क्रमेणेति ज्ञापयितुमाहुः ॥ ॥ महत्तत्वमाधिदैविकेत्यादि ॥ एतन्निरूपण-प्रयोजनमाहुः ॥ ॥ अनेनेति ॥ ब्रह्मादिरूपेणोपलभ्यमानत्वात्परिहृत इत्यर्थः ॥ तदेतद्भाष्यप्रकाशे उपपादयिष्यते । एवं महत्तत्वेत्यारभ्य मूलेन्द्रियाणीत्य-न्तमानन्दचित्सत्प्राधान्येनाधिदैविकाध्यात्मिकाधिभौतिकभावो निरूपितस्तेन मूलावान्तरकारणयोराधिदैविकाध्यात्मिकत्वं कार्यस्थस्याधिभौतिकत्वं बोधित-मू ॥ १२४ ॥ मूलेन्द्रियाणीति ॥ चिद्द्वारा पुरुषेन्द्रियाणि ॥ १२५ ॥ १२६ ॥ त्रयाणामिति ॥ त्रयाणामाधिदैविकादीनामवान्तरभेदाः ॥ आधिदैविकादयस्त्र-य एवमाध्यात्मिकाधिभौतिकयोरपि त्रयो ज्ञेयाः ॥ ॥ चन्द्र इत्यादि ॥ एतेना-धिदैविके त्रिरूपतोदाहृता तथान्ययोरपि ज्ञातव्या । एवं कालस्वरूपे विचार्यमाणे सूर्य अधिभौतिकः । सूर्यस्वरूपे विचार्यमाणे त्वाधिदैविक इत्येवं तत्र तत्स्वरूप-विचारे क्रियमाणे यत्र महामाहात्म्यादिकं सूर्यस्य यथा साम्बपुराणे तत्राधिदैवि-को मूलेन्द्रियात्मा ज्ञेयः ॥ एवं यत्र विष्णोरपकर्षस्तत्र स भौतिकोऽस्मच्चरण-प्रेरको ज्ञेय इत्येवं विचारतः प्रमाणानां परस्परविरोधः परिहृतो भविष्यति॥ तदेत-द्धृदि कृत्याहुः ॥ ॥ अतिदिशतीति ॥ अत्र तन्मात्रादीनां त्रिरूपत्वकथनं चेतना-धिष्ठानरहितानामपि त्रिरूपत्वबोधनार्थम् ॥ तेन वैदिकसृष्टिस्थानां घटादीनाम-प्याधिदैविकत्वं सत्सृष्टिस्थानामाध्यात्मिकत्वं, गुणसृष्टिस्थानां भौतिकत्वं बोध्यम् ॥ १२७ ॥ १२८ ॥

ब्रजभाषाटीका ।

इन तीनोंकी शक्तिको निरूपण करें है ॥ जीवकी अवि-द्या शक्ति है, प्रकृति अक्षरब्रह्मकी शक्ति है, माया कृष्णकी शक्ति है, तथा अविद्या प्रकृति माया आदिकनके भी आधि-दैविकादि तीन तीन भेद हैं जैसे द्वादश शक्तिमें जाकी गणनाहै वह आधिदैविकी अविद्याहै, पञ्चपर्वात्मिका आध्या-त्मिकी अविद्याहै, छीपमें चांदीको भ्रम तथा रस्सीमें साँपको भ्रम करायवेवारी आधिभौतिकी अविद्याहै, या प्रकार प्रकृति मायाके भी भेद समझने निद्रा तन्द्रा इन्द्रजाल आदि अविद्याके अवा-न्तरभेद हैं ऐसें महत्तत्वभी तीनप्रकारकोहै महत्तत्व आधिदैविक रूपहै, ब्रह्मशरीर आध्यात्मिकरूपहै अस्मदादिकनको चित्त आधि-

भौतिकरूपहै, ऐसें अहङ्कार आधिदैविकरूपहै, रुद्र आध्यात्मिक-रूपहै, अस्मदादिकनके अहङ्कार आधिभौतिकरूपहै ऐसें पुरुष चक्षु आधिदैविकहै,सूर्यको शरीर आध्यात्मिकहै,अस्मदादिकनके चक्षु आधिभौतिकहै, पुरुषमन आधिदैविकहै, चन्द्रमाको शरीर आध्यात्मिकहै, अस्मदादिकनको मन आधिभौतिकहै, ऐसेंही मूलेन्द्रिय आधिदैविकहै,देवतानकी देह आध्यात्मिकहै,अस्माद-दिकनकी इन्द्रिय आधिभौतिकहै,इन तीनतीन रूपनमें भी एकए-कके तीनतीन भेदहैं जैसे चन्द्रमण्डल आधिभौतिक चंद्राभि-मानी आधिदैविक मनःप्रेरक आध्यात्मिकहै ॥ १२४–१२७ ॥ जैसें सूर्यमण्डल आधिभौतिक सूर्यमण्डलाभिमानी आधिदैवि-क अस्मदादिकनके चक्षुः प्रेरक आध्यात्मिक याप्रकार सब पदार्थ-नमें तीनतीन भेद स्वयं बुद्धिसों समुझलेने अर्थात आनन्दप्रधा-न आधिदैविकहै, चित्प्रधान आध्यात्मिक है, सत्प्रधान आधिभौ-तिकहै, सब ठिकानें मूलकारण आधिदैविकहोयहै, अवान्तरका-रण आध्यात्मिक होयहै,कार्यस्थ रूप आधिभौतिक होय है;ऐसेंही कालके स्वरूपको विचारकियो जाय कालको सूर्य आधिभौतिक-रूपहै सूर्यके स्वरूपको विचार कियो जाय तो सूर्य आधिदैविक है जैसे सांबपुराणमें सूर्यकी अधिक महिमा लिखीहै वहां मूलेन्द्रिया-त्मा आधिदैविक सूर्य समुझनों ऐसेही जहां विष्णुको अपकर्ष लिखोहै तहां (विष्णुर्गत्यैव चरणौ) इत्यादिकनमें अस्मदादि-कनके चरण प्रेरक आधिभौतिक विष्णुको वर्णन समुझनो या प्रकार घटपटादि पदार्थभी तीन प्रकारके हैं, वैदिकसृष्टिके जे घ-टादिक हैं वे आधिदैविक हैं, सत्सृष्टिके घटादिक आध्यात्मिक हैं, गुणजसृष्टिस्थित घटपटादिक आधिभौतिकहैं ॥ १२८ ॥

तन्मात्राणि च भूतानां गुणाः कार्यगतास्तथा ॥ महाभूतान्यावरणं मध्यभूतानि च क्रमात् ॥ १२९ ॥ अहंकारमहत्तत्वप्रकृतीनां पुनस्तथा ॥ मूलमावरणं चैव ब्रह्मान्तःकरणन्तथा ॥१३०॥ अन्येऽप्यवान्तरा भेदाः शतशः सन्ति सर्वशः ॥ लोकपालास्तु ते त्वत्र स्वर्गस्थस्तु पुरन्दरः ॥ १३१ ॥ दश दिक्षु च ते चात्र मध्यस्थस्तु पुरन्दरः ॥ तादृशैरपि देवैः प्रतिमन्वन्तरं पृथक् ॥ १३२ ॥ लोकपालास्त्रिधा भिन्नाः स्थानैः सह विभागशः ॥ लोकालोके मानसे च मेरोर्मूर्ध्नि तथैव च ॥ १३३ ॥

तत्त्वदीपप्रकाशः ।

एवमिन्द्रियाणामुक्त्वा तन्मात्राणामाह ॥ तन्मात्राणि चेति ॥ ब्रह्माण्डस्य देहत्वात्परिच्छेदं वारयति ॥ अहङ्कारमहत्तत्वप्रकृतीनामपि भूतादिन्यायेनाह ॥ पुनस्तथेति ॥ पुनःशब्देन सिंहावलोकनमुक्तम् ॥ सामान्यतो वदन्नुपसंहरति ॥ मूलमिति ॥ मूलतत्वानि । आवरणस्थानि द्वितीयानि । ब्रह्माण्डान्तःस्थितानि तृतीयानि ब्रह्मणा अन्तःकरणं येषामिति ॥१२९॥ १३०॥ परिच्छेदं वारयति ॥अन्येपीति ॥ अस्मदाद्यधिष्ठिता पृथ्वी प्रथमा, भाराक्रान्ता गोरूपा द्वितीया, भगवतः पार्श्वे वर्तमाना तृतीयेति । एवञ्जलादावपि ज्ञातव्यम् ॥ ये दशेन्द्रियाणां देवा उक्ताः । अहङ्कारादुत्पन्नास्त एव लोकपाला इन्द्रादयः । नामसाम्यात् ॥ ब्रह्माण्डस्य देहत्वात् । अतः पिण्डपाला एव लोकपाला इत्यभिप्रायेणाह ॥ लोकपालास्त्विति ॥ मित्रो निर्ऋतिः ॥ अश्विनावुत्तरतः दिशो यमस्थानीया इति । तत्र पुरन्दरस्य मध्यस्वर्गे

स्थितिः उपरिभागद्योतिका ॥ तेषां यथेच्छां स्थितिं वारयितुमाह ॥ ॥१३१॥दश दिक्षु त्विति॥चंद्रमसो मध्यपाते पुरन्दरो मध्यस्थः। एवं सति तत्वाधिक्यं न भवति । एते सर्वे सहोत्पन्नाः सहैव तिरोहिता भवन्ति इति प्रतिमन्वन्तरं तदंशास्तन्नामानो भिन्ना इत्याह॥तादृशैरपरैरिति ॥ तेषामवान्तरभेदानाह ॥ १३२ ॥ लोकपाला इति ॥ सर्वेषां देवानां लोकालोकस्थानमेकम् । तथा मानसोत्तरे तथा मेरोर्मूर्द्धनि ॥ १३३ ॥

आवरणभंगः ।

मूले शतशः सन्ति सर्वश इति । सर्वेषु शतं शतं सन्तीत्यर्थः ॥ बह्वल्पार्थाच्छस्-कारकान्यतरस्यामिति सूत्रेऽर्थग्रहणात्पर्यायेभ्यो विशेषेभ्योऽङ्गीक्रियत इति शतश इति विशेषात्कर्त्रर्थे शस् संख्यैकवचनाच्च वीप्सायामितिसूत्रे वामनेन कुंडशो ददाति वनशः प्रविशतीति प्रत्युदाहरता एकार्थतानियतेभ्यो जातिशब्देभ्योऽप्यङ्गीकृता इति सर्वशब्दाद्वैषयिकाधिकरणकारकाच्छस् बोध्यः ॥ देवेष्वतिदेशेन प्राप्ते त्रिरूपत्वे प्रकारं विशदीकर्तुं तेषु लोकादिपालकत्वमुपपादयन्ति ॥ ये दशेन्द्रियाणामिति ॥ ॥ नामसाम्यस्याप्रयोजकत्वमाशङ्क्य हेत्वन्तरमाहुः॥ ॥ ब्रह्माण्डेत्यादि ॥ ॥ निर्ऋतौ नामसाम्याभावाद्दशानन्तर्गतत्वमाशङ्क्य समादधते ॥ मित्रो निर्ऋतिरिति ॥ " गुदं पुंसो विनिर्भिन्नं मित्रो लोकेश आविशत् " इति निर्ऋतिः पाय्वघाश्रय इति च तृतीयस्कन्धवाक्यात्तादृशलोकपतित्वं रक्षस एवोचितमिति मित्रशब्दवाच्या निर्ऋतिरेव ज्ञेया इत्यर्थः ॥ अश्विनोर्लोकपालत्वं न स्फुटमिति पूर्वोक्तमसंगतमित्याशङ्कायां तयोस्तथात्वमुपपादयन्ति ॥ आश्विनावुत्तरत इति ॥ " विनिर्भिन्नेऽश्विनौ नासे विष्णोराविशतां पदम् " इतिवाक्ये यद्यपि लोकेशपदन्नास्ति तथापि " यावद्बलिं तेऽजहरामकाल " इति पद्योक्तसामुदायिकप्रार्थनयाऽत्रापि लोकेशत्वमावश्यकम् ॥ एवंसति तयोर्भिषक्त्वेन सौम्यत्वादुत्तरस्या दिशः शान्तत्वात्तल्लोकपालकौ तावेवौचित्यान्निश्चेयावित्यर्थः ॥ दिशां देहाभावेन देवत्वस्यास्फुटत्वाल्लोकपालत्वदौर्घट्यमाशंक्य समादधते॥ दिशो यमस्थानीया इति ॥ ॥ दिशः श्रोत्रादितिश्रुतेः कर्णोत्पन्नत्वेन दिशां कर्णस्थानकत्वम् ॥ तौ च द्वौ पुरुषश्च द्वितीयस्कन्धे प्राङ्मुख उक्तस्तत्रोत्तरेशत्वं यदाश्विनोस्तदा पारिशेष्याद्दक्षिणेशत्वं दिशाम् ॥ युक्तिस्तु धर्मनियामकत्वरूपा ज्ञेया । यमस्य तदाधिभौतिकरूपत्वात् ॥ अतोयमाधिदैविकरूपास्ता इति लोकपालत्वं न तासां नदुर्घटमित्यर्थः ॥ नन्वेवं सति इन्द्रस्य हस्तयोरेव स्थितिर्भवेद्रोलकेष्वेवे-

न्द्रियस्य सदैवस्य स्थितेरौचित्यादत आहुः ॥ ॥ तत्रेति ॥ तेषु देवेषु स्वर्गमध्य इति ॥ ॥ " इन्द्रः स्वर्पतिराविशत् " इति वाक्यादित्यर्थः॥ ॥ उपरीत्यादि ॥ हस्तदेवतात्वेन वक्षःस्थले प्रचरणाल्लोकत्रयोपरिभागस्य द्योतको नतु वरुणवद्रसातलादिस्थ इत्यर्थः ॥ १२९ ॥ १३० ॥ १३१ ॥ ननु यथा द्वितीयस्कंधे " देवा वैकारिका दश " इति दश देवपक्ष उक्तस्तथैकादशे " तैजसाद्देवता आसन्नेकादश च वैकृतात् " इत्येकादश देवपक्ष उक्त इति तस्मिन्पक्षे कथं पुरंदरस्य मध्यस्थत्वमित्यत आहुः ॥ ॥ चंद्रमस इत्यादि ॥ हृदये वागीशचन्द्रमहदभिमानानां चतुर्णां स्थितिरुक्तेति चन्द्रस्यैव मध्यपत्वे विनिगमकाभावात् तस्यैव मध्ये स्थितिरुचिता राजाधिराजत्वादित्यर्थः ॥ अतएवाभिमानाधिष्ठातुरीशानस्याप्यैशान्यामेव स्थितिः। यद्वा लोकपालत्वेन पूर्वोक्तरीत्या स्थितावपि दिक्पालत्वे इन्द्रस्यैव प्राचीदिक्पतित्वेन चन्द्रमसो मध्यस्थत्वे पुरन्दरो न मध्यस्थ इत्यर्थः ॥ मूलं त्वेवं योज्यम्। तुरितर व्यावृत्तौ। अत्र ब्रह्माण्डे ते तु दशेंद्रियदेवा लोकपाला नान्येऽतिरिक्ताः। तुः पूजायां पुरन्दरस्तु पूज्यत्वात्तेषु । स्वर्गस्थः तुरितरव्यावृत्तौ। भूमौ ते दशदिक्षु स्थिता नतु यथेच्छं यत्रक्वापि तिष्ठंति तुर्विशेषावधारणे चन्द्रमसो मध्यपाते पुरन्दर एव तथेत्यर्थ इति ॥ एवञ्च कुबेरस्याप्याश्विनाधिभौतिकत्वं ज्ञेयम् ॥ अत एवातिसुंदरयोर्नलकूबरमणिग्रीवयोस्ततो जन्म । एतत्कथनस्यावान्तरफलमाहुः ॥ ॥एवं सतीत्यादि ॥ एवं निरूपस्य प्रामाणिकत्वायाहुः ॥ तेषामिति ॥ ॥ तथा च स्थानभेदोक्तेरेवात्र मानमित्यर्थः ॥ मूलेविभागश इति ॥ जातिशब्दात्करणकारके शस्विभागेनेत्यर्थः ॥ १३२ ॥ १३३ ॥

व्रजभाषाटीका ।

तन्मात्रानके भेद वर्णन करे हैं, पञ्चतत्वनके कारण जे मात्रात्मक रूप रस गन्ध स्पर्श शब्द हैं वे आधिदैविक हैं, और पञ्च तत्व आध्यात्मिकहैं, कार्यके गुणरूप जे रूप रस गन्ध स्पर्श शब्द वे आधिभौतिकहैं ॥ ऐसेंही आध्यात्मिक महाभूत भी तीनप्रकारके हैं कारणरूप महाभूत आधिदैविकहै, ब्रह्माण्डके चारोंतरफ लिपटरहे जे आवरणरूप महाभूत आध्यात्मिकहैं, ब्रह्माण्डके भीतरके जो महाभूत हैं वे आधिभौतिक हैं ॥ ऐसेंही अहंकार आधिभौतिक है महत्तत्त्व आध्यात्मिकहै प्रकृति आधिदैविक है याही प्रकार अठाईस तत्वनके भी तीन भेद हैं मूलकार-

णरूप अष्टाविंशति तत्व आधिदैविक हैं ब्रह्माण्ड जिनसों घिर रह्योहै वे आध्यात्मिक हैं और ब्रह्माण्डके भीतर जे तत्व वे आधिभौतिक हैं ऐसें एकएक तत्वभी तीनप्रकारको है जैसें पृथ्वीके तीन स्वरूप हैं जाके ऊपर मनुष्यादिक रहें हैं वह आधिभौतिक पृथ्वी है, दैत्यसों दुखितभई गौरूपवाली जो ब्रह्माजीसों प्रार्थना करवेगई हती वह आध्यात्मिक पृथ्वी है,और भगवान्‌की पत्नी है वो आधिदैविक पृथ्वी है, ऐसेंही जलादिकनके भी तीन भेद समुझलेनो ऐसेंही लोकपालभी तीनप्रकारके हैं सात्विक अहंकारसों उत्पन्नभये जे दश इन्द्रियनके देवता हैं वेही लोकपाल हैं क्योंकि उनके इनके एकही नाम हैं जैसे आपनो देह है तैसे ब्रह्माण्डाभिमानी पुरुषको ब्रह्माण्ड देहहै जैसे अपने पिंडके हाथ पांव आदि अवयवनके रक्षाकरवेवारे इन्द्र वायु आदि देवता हैं ऐसें ब्रह्माण्डरूप देहके स्वर्गादिलोकरूप अवयवनके रक्षकारवेवारे वेही देवताहैं लोकालोकमें रहवेवारे देवता उनके आधिदैविकरूप हैं, मानसोत्तरपर्वतपे रहवेवारे उनके आध्यात्मिकरूप हैं, मेरुपर्वतके ऊपर रहवेवारे देवता आधिभौतिक रूपहैं ऐसेही इनके स्थानमें भी तीन भेदहैं मेरु आधिभौतिक स्थान है,मानसोत्तर आध्यात्मिक स्थान है, लोकालोक आधिदैविक स्थान है, ये देवता साथही प्रकट होवे हैं,साथही तिरोहित होय जावे हैं,मन्वन्तर मन्वन्तरमें ब्रह्माण्डके देवतानके अंशरूप देवता न्यारे न्यारे होजावे हैं, जैसे अपने कर्णनकी दिशा देवता हैं ऐसें ब्रह्माण्डाभिमानी पूर्वाभिमुख पुरुषके कर्णनकी देवताभी दिशाहैं ऐसें सब इन्द्रियनके जानने, ये देवता पृथ्वीमें तो दश दिशानके पालक होयके अपनी दिशानमें रहे हैं तहां हस्ताभिमानी देवता इन्द्र पूर्वदिशाको पाल है, वाणीकी देवता अग्नि अग्निकोणको मालिक है, कर्ण-

नकी देवता दिशा है सो अपने आधिभौतिक यमराजके रूपसों दक्षिणदिशामें रहे हैं, पायु इंद्रियको देवता मित्र है सो अपने आधिभौतिक निर्ऋति देवताके रूपसों नैर्ऋत्यकोणमें रहेहैं जिह्वाको देवता वरुण है सो पश्चिमदिशामें रहे है, त्वचा इन्द्रियको देवता वायु वायुकोणमें रहे है, नासा इन्द्रियको देवता अश्विनीकुमार अपने आधिभौतिक कुबेररूप करके उत्तरादिशामें रहे है, अभिमानाधिष्ठाता रुद्र इशानकोणके स्वामी हैं, गुह्यके देवता ब्रह्मा ऊपरकी दशामें रहे है, चरणके देवता आधिभौतिक विष्णु नीचेकी दिशामें रहे हैं, ये देवता इंद्रियनसहित अपने अपने गोलकनमें रहे हैं परन्तु हस्तको देवता इन्द्र तो मध्यभाग जो स्वर्ग है वामें स्थित है क्योंकि हस्त जैसे सर्व शरीरको स्पर्श करसके हैं ऐसें इन्द्रभी सर्वलोकनमें विचरतोभयो तीनो लोकनमें ऊपर जो स्वर्गलोक है वामें स्थित रहतेहैं स्वर्गविराट्के मध्यभागमेंहै१२९–१३३

ब्रह्मणोऽपि तथा सत्ये विराड्जीवस्तु भोगभुक् ॥ गुणावतारस्त्वन्यःस्यादेवमन्यत्र सर्वशः ॥ १३४ ॥ कैलासादिविभेदश्च तथा वैकुंठवासिनः ॥ कृत्रिमं च ध्रुवस्थानं श्वेतद्वीपं तथैव च ॥१३५॥ एवमेकप्रकारेण गुणतस्त्रिविधं मतम् ॥ सूर्यश्चक्षुस्तथा रूपं गोलकं चेति वाभिदा॥१३६॥ बुद्धिः खानि तथा मात्राः क्वचिदेवं भिदा त्रयम् ॥ भगवद्व्यतिरिक्तानां घटादीनां यथोद्भवः ॥१३७॥ इति कार्यप्रकरणम् ॥

तत्त्वदीपप्रकाशः ।

ब्रह्मणोऽप्याह ॥ ब्रह्मण इति ॥ मेरोर्मूर्द्धनि स्पष्ट एव ॥ पुष्करद्वी-

पेऽपि स्पष्टम् ॥ अतो लोकालोकेऽपि ज्ञातव्यम् ॥ सत्यलोके आधिदैविकः ॥ विराट्देहे अभिमानी द्वितीयः ॥ मेरोर्मूर्द्धनि तृतीयः ॥ मध्यम एव भोगभोक्ता ॥ गुणावतारस्तु तेभ्यो भिन्न इत्याह ॥ **गुणावतारास्त्विति** ॥ यो नाभिकमले जातः ॥ एवं रुद्रादीनामपि कैलासादिविभेदा वक्तव्याः ॥ एवं वैकुंठस्यापि भेदास्तानाह ॥ **कृत्रिममिति** ॥ वैकुंठः कल्पितो येनेतिवाक्यात् ॥ तदाधिदैविकस्थानीयम् । चकारात्तदकृत्रिममपि भगवदिच्छामात्रेण प्राकट्यात् ॥ ध्रुवस्थानं ज्योतिश्चक्रस्थमथवा ध्रुवं निश्चलस्थानं लोकत्रयोपरि महर्लोकादर्वाक्प्रकारान्तरं वक्तुं पूर्वोक्तमुपसंहरति ॥ **एवमिति** ॥ द्वितीयं प्रकारमाह ॥ **सूर्य इति** ॥ यत्रैवाधिदैविकव्यवहारः स प्रथमः । आध्यात्मिको द्वितीयः । तृतीये प्रकारद्वयं रूपं गोलकञ्च पुनरन्यं प्रकारमाह ॥ **बुद्धिःखानीति** ॥ इंद्रियजन्या बुद्धिराधिदैविकी ॥ एवं प्रकारत्रयं निरूप्य सर्वेषां स्वरूपं निरूपयितुं भगवत्वे जन्मादिभावा न युक्ता इति ज्ञानेन्द्रियाणां कर्मेन्द्रियाणाञ्च वैयर्थ्यमाशङ्क्य त्रैविध्यसमर्थनार्थं ज्ञानाक्रिययोरुत्पत्तिं समर्थयते ॥ **भगवद्व्यतिरिक्तानामिति** ॥ भगवतोऽप्याविर्भावतिरोभावौ प्रायेण वैदिकानां संमतौ तदतिरिक्ते संदेहोऽतस्तत्र विचारः कर्तव्य इति घटादिनिर्णय एव ज्ञानक्रिययोरपि निर्णयो भविष्यतीति नेन्द्रियाणां वैयर्थ्यमित्यर्थः ॥ १३४--१३७ ॥ इति कार्यप्रकरणम् ॥

आवरणभंगः ।

भोगभोक्तेति ॥ ॥ ब्रह्माण्डदेहस्थं यत्सुखं तद्भोक्तेत्यर्थः ॥ वक्तव्या इति ॥ कैलासे एकः शिवलोकः । सत्योपरि द्वितीयः । एवं पुराणान्तरानुरोधात्तृतीयोपि ज्ञेय इत्यर्थः ॥ ॥ पूर्वोक्तमिति ॥ धर्मतस्त्रैविध्यप्रकारमित्यर्थः ॥ द्वितीयं प्रकारमिति ॥ आनन्दादिधर्मप्राधान्यमाधिदैविकादिशब्दानां यौगिकमर्थञ्च पुरस्कृत्य यः सिद्ध्यति तमित्यर्थः ॥ यौगिकार्थमात्रं पुरस्कृत्य तृतीयं प्रकारमाहुः ॥ पुनरन्यमित्यादि॥खानां शरीरनिष्ठत्वेनाध्यात्मिकत्वस्य मात्राणां भूतनिष्ठत्वेनाधिभौतिकत्वस्य स्फुटत्वात्पारिशेष्येणाहुः ॥ ॥इन्द्रियजन्येति ॥ ॥ अधिदैविकीति॥

अस्मदिन्द्रियप्रेरकमनोरूपदेवनिष्ठेत्यर्थः ॥ मनसो देवत्वमत्र व्यहाराज्ज्ञेयम् । दीव्यति व्यवहरतीति देव इति । मनसो वशे सर्वमिदं बभूव नान्यस्य मनोवशमन्वियाय ॥ भीष्मो हि देवः सहसः सहीयानिति श्रुत्या च ॥ अयं त्रैविध्यप्रकारो द्वादशस्कन्धे चतुर्थाध्याये " दीपश्चक्षुश्च रूपश्च ज्योतिषो न पृथक् भवेत् । एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात् ॥" इतिवाक्ये अन्योन्यसापेक्षत्वकथनात्तन्मूलको व्यवहारोपयोगाय ज्ञेयः॥ अत्रानन्त्येऽपि हि कार्याणामित्यारभ्य प्रतिपादितस्य समष्टिव्यष्टिभावस्याध्यात्मिकादिभावस्य च मूलमविरोधचतुर्थपादे ज्योतिराद्यधिष्ठानाधिकरणे विचारितं ज्ञेयम् ॥ एवमेतावति ग्रन्थे "प्रमेयबलमाश्रित्य सर्वनिर्णय उच्यते" इत्यत्रोक्तं प्रमेयं पञ्चात्मकेत्यारभ्य जडजीवेनेत्यन्तेन विवेचितम् । ततः सर्वेषां त्रिगुणत्वाद्धीत्यारभ्य भिदात्रयमित्यन्तेन तस्य सर्वस्य प्रमेयस्य तत्तत्कार्यक्षमस्वरूपं बलं दिङ्मात्रेणोपलक्षणविधया निरूपितम् ॥ अतः परं तदाश्रयेण विचारापरपर्यायेण सर्वस्य भगवद्व्यतिरिक्तस्य पदार्थजातस्य स्वरूपं निर्णीयते ॥ एवमित्यादि ॥ ॥ एवं तत्र तद्बलनिश्चयो येन रूपेण भवेत्तेन रूपेण प्रकारत्रयं निरूप्य कार्यकारणस्वरूपात्मकं विविच्य सर्वेषां लौकिकसच्चिदानन्दानां नामरूपकर्मणाञ्च स्वरूपं भगवदात्मकत्वलक्षणं निरूपयितुं भगवत्त्वे कार्यकारणकोटिगतानां सर्वेषां भगवदभिन्नत्वे जन्मादिभावाः । जायतेऽस्ति वर्द्धते विपरिणमतेऽपक्षीयते नश्यतीति प्रतीतिसाक्षिकाः षडपि न युक्ता इति तदभावे उभयेन्द्रियवैयर्थ्यञ्चेत्याशंक्य त्रैविध्यसमर्थनार्थमाधिभौतिकादिरूपत्रैविध्योपपादनार्थं ज्ञानक्रिययोः आधिभौतिकव्यावहारिकज्ञानक्रिययोरुत्पत्तिमुपपादयतीत्यर्थः ॥ ननु सर्वस्यैव भगवत्त्वे व्यावहारिकज्ञानक्रिययोरपि भगवत्वमेवेति तदुत्पत्तिविचारः कुतः क्रियत इत्यत आहुः ॥ ॥ भगवत इत्यादि ॥ तदतिरिक्ते संदेह इत्यादि भगवदतिरिक्ते कार्यकोटिस्थे व्यावहारिकज्ञाने कारणकोटिस्थे प्रकृत्यादौ स्वरूपकोटिस्थे कालादौ च यथायथं मायादिसांख्यवादिवैदिकवादिमतप्रकारदर्शनात्संदेहः ॥ अतो वादिवैसंमत्याद्विचारः कर्तव्य इति हेतोर्घटा- [illegible] सर्वाकारस्वरूपेणेत्यादिनानुपदं करिष्यमाणे तयोरपि सम्भविष्यतीति तथेत्यर्थः ॥ १३४–१३७ ॥ इति [illegible]णम् ॥

ब्रजभाषाटीका ।

ब्रह्मादिकनके भी त्रिविध भेद वर्णन करेहैं सत्यलोकमें आधिभौतिक ब्रह्माहै, ब्रह्माण्डदेहके सुखको भोक्ता विराड्देहमें अरु आध्यात्मिकब्रह्मा है, सुमेरुपर्वतपै जाकी पुरी है

वह आधिभौतिक ब्रह्माहै भगवान्के चिदंशसों प्रकटभये रजोगुणमें अवतारलेवेवारे नाभिकमलसों जो प्रकटभये हैं वे ब्रह्माजी इन तीनोंसों न्यारेहैं ऐसे शिवलोकके भी तीन भेदहैं कैलासमें एक शिवलोकहै, दूसरो शिवलोक सत्यलोकके ऊपरहै याप्रकार और पुराणनके अनुसार तीसरो शिवलोक भी जानलेनो ऐसेंही वैकुण्ठके भी तीन भेदहैं लक्ष्मीजीकी प्रार्थनासों प्रकटकियो आधिदैविक वैकुंठहै,ध्रुवजी जावै कुण्ठमें रहेहैं वह आध्यात्मिक वैकुण्ठहै, श्वेतद्वीपमें आधिभौतिक वैकुण्ठ है ॥१३४॥१३५॥ पहले प्रकारमें आनन्द प्रधान पदार्थकूं आधिदैविक, चित्प्रधानकूं आध्यात्मिक, सत्प्रधानकूं आधिभौतिक कह आये हैं, या द्वितीय प्रकारमें आनन्दादि धर्मनकूं ग्रहणकरके तथा व्याकरणादिद्वारा आधिदैविकादिशब्दनको जैसे अर्थ होयहै वाकूं भी लेकें तीनप्रकार वर्णन करेहैं,सूर्य आधिदैविकहै, चक्षु आध्यात्मिकहै,गोलक आधिभौतिकहै, या क्रममें आधिदैविक पदार्थकूं प्रथम, आध्यात्मिककूं द्वितीय, आधिभौतिककूं तृतीय समुझलेनों, तृतीयके दो भेदहैं गोलक और रूप, व्याकरणके द्वारा आधिदैविकादिपदनको जैसो अर्थ होवेहै वाकूं लेके तृतीय प्रकारको वर्णन करेहैं, अस्मदादिकनके इन्द्रियको प्रेरक 'भीष्मो हि देवः' इत्यादिश्रुतिसिद्ध मनरूप देवनिष्ठ जो बुद्धि है वह आधिदैविकीहै, शरीरमें रहवेवारी इन्द्रियें आध्यात्मिकहैं, पञ्चभूतनमें रहवेवारी रूप, रस, गंध, स्पर्श, शब्द आदि मात्रा आधिभौतिक हैं, ऐसें और पदार्थनमेंभी भेद जानने, ये प्रकार द्वादशस्कन्ध चतुर्थाध्यायमें (दीपश्चक्षुश्च रूपञ्च । एवं धीः खानि मात्राश्च न स्युरन्यतमादृतात्)इत्यादिस्थलमें प्रसिद्धहै, ये प्रकार व्यवहारके उपयोगार्थ वर्णन कियोहै, यारीतिसों तीनों प्रकारनको निरूपणकरके

संपूर्ण पदार्थनको यथार्थस्वरूप भगवान्हीहै यह निरूपण करेहै तहां लौकिक सच्चिदानन्द सब पदार्थ तथा इनके नाम रूप ये सब पदार्थ भगवत्स्वरूप माने तब उनके जन्म नाशादि क्यों होवेहैं ऐसी शंका होवेहै, यदि उन पदार्थनके जन्मनाशादि नहिं मानेहैं तो घटादि सब पदार्थ विद्यमानहीहैं इनकी उत्पत्तिनाशादि करवेकेलिये क्रियाकी आवश्यकता नहीं होगी तब क्रियाकेलिये हस्तपादादिक कर्मेन्द्रियभी वृथाही होयगी ऐसेंही ज्ञानभी सर्वपदार्थनको विद्यमानहीहै तब पदार्थनके ज्ञानकरवायवेवारे नेत्र श्रवणादिक ज्ञानेन्द्रियभी वृथाही होयगी याकेलिये व्यवहारमें आयवेवारे ज्ञानक्रियानकी उत्पत्तिनाशादिकनको यथार्थस्वरूप युक्ति द्वारा वर्णनकरेहै तासों कहेभये आधिदैविकादि तीन भेदनको भी समर्थन होयजायगो तहां भगवानके आविर्भाव तिरोभाव तो वैदिकननें मानें हैं उनमें संदेह नहिंहैं किन्तु लौकिक पदार्थनमें संदेह है, क्योंकि मायावादि उनकूं उत्पत्ति नाशवारे मानेहैं, सांख्यवादि आविर्भाव तिरोभाववाले मानेहैं तासों घटादिपदार्थनके उत्पत्तिनाशको निर्णय करनो आवश्यकहै ताहिमें ज्ञानक्रियाके उत्पत्तिनाशकोभी निर्णय होयजायगो तासों इन्द्रियके व्यर्थताकी शंकाभी दूर होयजायगी ॥ १३६ ॥ १३७ ॥

व्यवहारे तथा ज्ञानक्रिययोरपि निश्चयः ॥
न प्रतिस्फुरणं रूपरहितस्य कदाच न ॥१३८॥
अविद्यायास्तथाबुद्धेर्न शुद्धत्वं कदाचन ॥ बु-
द्धेर्वृत्तिः स्थितिर्नाम गुणतः सा त्रिधा मता ॥
अतो जागरणादीनि जीवस्तद्वशगो यतः॥१३९॥

तत्त्वदीपप्रकाशः।

ननु ज्ञाने प्रतिबिम्ब एव भवतु स्वरूपस्य नित्यत्वादित्याशंक्य तथा पक्षपातः त्रिष्वपि कर्तव्य इति वक्तुं ज्ञाने प्रतिबिम्बपक्षं दूषयति ॥ **न प्रतिस्फुरणमिति** ॥ तत्र हेतुः ॥ **रूपरहितस्येति** ॥ कालान्तरे देशान्तरेऽपि तथात्वं वारयति ॥ **कदाचनेति** ॥ १३८ ॥ दोषान्तरमाह ॥ **अविद्याया इति** ॥ अविद्यायां प्रतिबिम्बे जीवत्वं बुद्धौ प्रतिबिम्बे व्यावहारिकज्ञानमिति स्यादेवं यद्यविद्याबुद्धिर्वा शुद्धा स्यात् । तथासति सद्देशानामपि भावात् सर्वेषां सर्वज्ञता स्यात् ॥ सर्वेषां प्रतिबिम्बाभावे हेतुभावात् । इन्द्रियाणाञ्च वैयर्थ्यम् । अत इदं ज्ञानं कार्यरूपं भिन्नमेव चिदादिभिः सह बुद्धेः कोशादिष्वैकार्थ्यात् ॥ बुद्धिवृत्तिर्जन्यत इत्यत्र वृत्तिर्बुद्धेः पदार्थान्तरं नभवति किन्तु स्थितिरेव सत्वादिभिः ॥ अत एव भ्रमादीनामपि संग्रहः । यदीन्द्रियैर्जन्या न स्यात् घटे क्वापि तदा भ्रमो नस्यात् । जीवस्य गुणतोऽवस्थात्रयं भिन्नहेतुकं स्यात् । अतो गुणवशाद्यथा बुद्धिर्भवति तथैव मन्तव्यमिति । अत एव जीवस्यापि नस्वातंत्र्यं गुणाधीनत्वात् ॥ १३९ ॥

आवरणभंगः।

एवं ज्ञानक्रिययोरुत्पत्तिनिरूपणं प्रतिज्ञाय लौकिकक्रियोत्पत्तेः सर्ववादिसंमतत्वात्तद्विचारमकृत्वा ज्ञानोत्पत्तिं प्रतिपादयिष्यन्तो मायावादिमते ज्ञानोत्पत्त्यनङ्गीकारात्तन्मतं दूषयितुमुत्थापयन्ति नन्वित्यादिना ॥ ॥ ज्ञाने ॥ कार्यत्वेनाङ्गीक्रियमाणे ज्ञाने प्रतिबिम्ब एव भवतु । बुद्धिवृत्तौ ज्ञानस्य प्रतिबिम्ब एवास्तु ॥ स्वरूपस्य ज्ञानस्वरूपस्य नित्यत्वादित्याशंक्य तथा पक्षपातः स्वरूपनित्यत्वपक्षपातः त्रिष्वपि सच्चिदानन्देषु कर्तव्यः कर्तुमुचित इति ॥ ज्ञाने प्रतिबिम्बं दूषयतीति योजना ॥ ॥ अत्रायमर्थः ॥ सिद्धान्तिना हि द्विविधं ज्ञानमङ्गीक्रियते । नित्यं कार्यञ्च । तत्र नित्यं चतुर्विधं कार्यं षड्विधमिति तृतीयस्कन्धसुबोधिन्यां 'तया विभ्रंशितज्ञाना' इत्यत्र । तत्र नित्यं वृत्त्याऽभिव्यज्यते वेदादिशरीरञ्च गृह्णाति भगवद्धर्मरूपं यत्तद्भगवद्दत्तं जीवेपि समायाति ॥ कार्यज्ञानं तु तत्तदिन्द्रियाणां विषयसन्निकर्षद्वारा जाग्रदादिवृत्तौ मनसि जन्यते । तथासत्यर्द्धजरतीया-

पत्तिरनेकव्यक्तितदुत्पत्तिनाशादिगौरवापत्तिश्चेति तदनादृत्यैकमेवात्मरूपं ज्ञानं नित्यमङ्गीकार्यं लाघवात् । सर्वस्य ब्रह्मात्मकत्वं वदता सिद्धान्तिनापि जन्यज्ञानस्य भगवद्रूपताङ्गीकरणाच्च सिद्धे चैवं स्वरूपनित्यत्वे वृत्तौ यदभिव्यञ्जनं समागमनं जननं वाङ्गीकृतं तदपि प्रतिबिम्बद्वारकमेव भवति सात्विकवृत्तेः शुद्धत्वादतो ज्ञानप्रतिबिम्ब एव युक्तः । तदेतदुक्तं ज्ञाने प्रतिबिम्ब एव भवतु स्वरूपस्य नित्यत्वादित्याशंक्येति । एवं ज्ञानस्यात्मस्वरूपत्वेन नित्यत्वस्वीकारे ब्रह्मणः सच्चिदानन्दरूपस्यात्मत्वेन स्वरूपात्मकज्ञानवत्तादृशस्वरूपात्मकसदानन्दयोरपि नित्यत्वात् । तन्मध्ये व्यावहारिकज्ञानस्यैव वृत्तौ प्रतिबिम्बोन्ययोस्तु न प्रतिबिम्ब इति । तवाप्यर्धजरतीयं स्वरूपे समानमिति तन्निरासार्थं तयोरपि ज्ञानस्य इव वृत्तौ प्रतिबिम्ब एव भवतापि स्वीकार्यः । तथासति सविषयभानावसरे सदानन्दावपि स्वरूपभूतौ भासेतां तदेतदुक्तं तथा पक्षपातस्त्विष्वपि कर्तव्य इति । अथ तथा न स्वीक्रियते तदाऽप्रामणिकार्द्धजरतीयाद्दृश्यपाणदोषाच्च ज्ञानप्रतिबिम्बपक्षोप्यप्रयोजकस्तदेतदुक्तम् ॥ ज्ञाने प्रतिबिम्बं दूषयति इति ॥ दूषणमाहुः ॥ नेत्यादिरूपरहितस्येति ॥ ॥ चक्षुरयोग्यस्य ननु सर्वदा चक्षुरयोग्यस्य शब्दस्य कूपादौ प्रतिध्वनिदर्शनात्तस्य च शब्दप्रतिरूपत्वान्न सार्वत्रिकश्चक्षुरयोग्यस्य प्रतिबिंबभावनियमोऽतो न दोष इतिचेत् । अत्र केचित् । प्रतिध्वनिर्नपूर्वशब्दप्रतिबिम्बः । पंचीकरणप्रक्रियया पटहादिशब्दानां क्षितिसलिलादिशब्दत्वेन प्रतिध्वनेरेवाकाशीयशब्दतया तस्यान्यशब्दप्रतिबिंबत्वायोगात् । नापिवर्णरूपप्रतिशब्दस्तथा वर्णाभिव्यंजकध्वनिनिमित्तकप्रतिध्वनेः । प्रथमध्वनिवदेव वर्णाभिव्यंजकत्वोपपत्तेः । पूर्ववर्णप्रतिबिम्बत्वकल्पनायोगादित्याहुः ॥ वस्तुतस्तु प्रतिध्वनेः शब्दप्रतिबिंबत्वं मानाभावग्रस्तमेव नच साजात्यानुभव एव मानमिति वाच्यम् । तस्य शब्दांतरेपि तुल्यत्वात् । बिंबस्थित्यधीनस्थितिकत्वस्य प्रतिबिम्बताविनिगमकस्यात्रासत्वात् । नच बिम्बरूपपूर्वशब्दस्थितिः ॥ शक्यवचना शब्दस्य त्रिक्षणावस्थायित्वेन तदानीं नाशात् । आभासतया अप्यत एवाशक्यवचनत्वात् । चिरकालस्थायित्वपक्षाभ्युपगमेनेष्टसाधने कूपस्थवायुना प्रतिध्वनिवद्ध्वन्यानयनस्यापि संभवदुक्तिकत्वाद्ध्वनिद्वयश्रवणापत्तेः । ध्वन्यनानयने नियामकाभावात् ॥ अनानीते च ध्वनौ प्रतिबिम्बतानिश्चयस्याशक्यत्वात् ॥ न च छायाप्रत्याह्वयाभासा असंतोऽप्यर्थकारिण इति । भगवद्वाक्ये प्रतिध्वनेरसत्त्व-
…त्सादृश्यस्य चोपलभ्यमानत्वात्प्रतिबिम्बत्वं कल्प्यत इति वाच्यम् ॥ न-
…रावतार्ङ्क्तवदुक्तहेतुभ्यां मायाजन्यशब्दांतरत्वस्यापि शक्यवचन-
…पि वर्णरूपप्रतिशब्दस्य पूर्ववर्णप्रतिबिंबत्वं व्यंजनाक्षराश्रवणात् । नच

स्वराक्षरस्यैव प्रतिबिंब इति वाच्यम् ॥ नियामकस्याशक्यवचनत्वात् । युगप दुभयस्वरग्रहणाभावात्। पूर्वध्वनिवद्द्वितीयस्य प्रतिध्वनेरपि पूर्ववर्णव्यंजकता याः शक्यवचनत्वेन संदेहानपायाच्च। नापि ध्वनेर्वर्णप्रतिबिंबत्वं मानाभावात् व्यंजकतया संनिधिमात्रेण स्वधर्माणामुदात्तादीनां वर्णेष्वारोपस्य शक्यत्वादेक वदेव ग्रहणाच्च ॥ यत्तु। आकाशस्य शब्दसमवायिनः कूपादौ सत्वेनास्मदादि शब्दजन्यशब्दपरंपराजनितस्तथ्यः शब्दविशेष एव प्रतिध्वनिरिति केचिदाहुः ॥ तन्न। अश्रवणापत्तेः। वीचीतरंगादिन्यायेन तत्रोत्पन्नस्य ध्वनेः पुनर्वैपरीत्येन तत उत्पादकस्याशक्यवचनत्वात् । कूपादिप्रतिबद्धस्य वायोस्तथात्वकल्पनेपि तत्तथ्यतागमकस्याभावात्। समाचारोपलंभयोर्व्यभिचारित्वात्। अतो मायिक-मेव प्रतिबिंबातिरिक्तं शब्दांतरं तदिति निश्चयः। नाप्याकाशदृष्टांतेन सिद्धिः॥ शास्त्रार्थप्रकरणे तस्य निराकृतत्वात्। स्वरूपभूतसदानंदयोरपि रूपाभावेन तद-भावाच्च। अतः सुष्टूक्तं न प्रतिस्फुरणमित्यादि ॥ १३८ ॥ एवं निमित्तस्वरूप-विचारेण ज्ञानप्रतिबिंबपक्षं निराकृत्य अधिकरणस्वरूपविचारेणापि निराकर्तु-माहुः ॥ ॥ दोषांतरमित्यादि ॥ ॥ अत्राविद्यायामित्यादिनोक्तः। पक्षो यद्यपि पूर्वप्रकरणे निराकृतस्तथाप्यधिकरणस्वरूपविचारेण न निराकृत इति पुनरनूद्य निराकुर्वंति ॥ ॥ स्यादेवमित्यादि ॥ ॥ ननु प्रतिबिंबार्थं ते शुद्धे एवांगीकार्ये को-दोष इतिचेत्तत्राहुः ॥ ॥ तथासतीत्यादि ॥ ॥ इतिभावात्। प्रतिबिंबभवनात्। सर्वेषां सर्वज्ञता स्यात्। अयमर्थः। अरूपस्य ज्ञानस्य प्रतिबिंबोऽविद्याबुद्ध्योः शुद्धत्वांगीकारेणाभ्युगतश्चेत्सरूपाणां सदंशानां बाह्यानां घटादीनामांतराणां शि-रांत्रादीनां च तत्र तत्र प्रतिबिंबो निर्बाधः। निर्बाधे च प्रतिबिंबे तत्समानाधिकरणा-नामविद्यायां प्रतीतानां व्यापकानां जीवानां सर्वसंसर्गे द्विगुणीकृत्य जाते सर्वतादा-त्म्यापन्नस्य ब्रह्मण इवैतेषामपि सर्वसंसृष्टत्वात्साक्षित्वाच्च वृत्तिंविनैव स्वरूपचैत-न्येन सर्वावभासकतायाः शक्यवचनत्वेन ब्रह्मवत्सर्वेषां सर्वज्ञता स्यात् । न-चांतःकरणभेदेन प्रमातृभेदात्तदनापत्तिः । व्यापकत्वेन सर्वेषां सर्वांतःकरणसं-सृष्टतया प्रमातृभेदस्याशक्यवचनत्वात् ॥ संसर्गतौल्ये एकस्यैवैकांतःकरणवैशि-ष्ट्यं नापरस्येत्यत्र हेत्वभावात्। अदृष्टादीनां हेतूनां कल्पनस्य पूर्वप्रकरण एव निरस्तत्वात्। ननु दूषणग्रासान्मास्तु व्यापकानेकजीववादः। किंतु। व्यापकैक-जीववादे तस्य सर्वज्ञातायामिष्टापत्तिरितिचेत्। सत्यमिष्टापत्तिः स्यात् । यद्येक-स्यैव सर्वज्ञता स्यात्। अविशेषेणैकस्यैव सर्वशरीराधिष्ठाने सर्वत्राविद्योपहितस्य साक्षिण एकत्वात्सर्वत्रोपाधौ सर्वप्रतिबिंबेषु संसृष्टत्वाद्ब्रह्मण इव जीवस्यापि सर्व-त्र सर्वज्ञातायां बाधकाभावात्॥ नच ब्रह्माप्येकत्रैव सर्वज्ञं न सर्वत्रेति वाच्यम्।

ब्रह्मविष्णु शिवादिशरीरावच्छेदेन सर्वज्ञताप्रतिपादकशास्त्रविरोधापातात् । नचोपाधौ सर्वप्रतिबिंबेऽप्यंतःकरणभेदेन प्रमातृभेदात्तन्निकटस्थस्यैव ज्ञानं प्रमातुर्भविष्यतीति न सर्वत्र सार्वज्ञापत्तिरितिवाच्यम् । प्रमातृभेदे करणभेदस्यैव साक्ष्यभेदे प्रमातृभेदस्याप्यप्रयोजकत्वात् ॥ सर्वत्र साक्षिण एव भासकत्वात् । नच तस्याविद्योपहितरूपेण न साक्षित्वम् । किंतु । अंतःकरणोपहितरूपेण । तथा च रूपभेदेन साक्षिभेदान्न सार्वज्ञापत्तिरितिवाच्यम् । अप्रयोजकत्वात् ॥ तथा सत्यपि हृदयनाडीप्रभृतीनामांतराणामंतःकरणे प्रतिबिंबितानां ज्ञानं तस्य निर्बाधमित्यांतरसर्वज्ञताया दुर्वारत्वात् ॥ तदेतदुक्तं तथासतीत्यादि ॥ ननु सर्वेषां प्रतिबिंबो नास्माभिरंगीक्रियत इतिचेत्तत्राहुः ॥ सर्वेषामित्यादि ॥ ॥ अयमर्थः । यदयं नस्वीक्रियते कस्तत्रहेतुः ॥ न तावदसंनिधिः । अविद्यायाः व्यापकत्वात् ॥ अंतःकरणस्य चांतरसन्निहितत्वात् । नापि बिंबालोकसंयोगाभावः।सूर्यादेर्विद्यमानत्वात् । अंतर्गृहगतदर्पणप्रतिबिंबितसूर्यप्रकाशेनांतरवस्तूनां प्रतिबिंबदर्शनादिहापि जीवचैतन्यप्रकाशितांतःकरणसंसृष्ट आंतरबिंबे आलोकांतरानपेक्षणात् । तेनांतरप्रकाशानंगीकारे साक्षात्संसृष्टांतःकरणतद्धर्मादीनामप्यनवभासप्रसंगात् ॥ मते च तदवभासे तद्वदेव तत्संसृष्टानामप्यवभासादहंकारादिवद्धृदयनाडीप्रभृतीन्यप्यनुसंधीयेरन् संस्काराधायकस्य तुल्यत्वात् ॥ अथैकप्रतिबिंबावरुद्धे दर्पणादावन्यस्य प्रतिबिंबादर्शनाद्व्यापकजीवावरुद्धे विद्यादावितरेषां प्रतिबिंबो न भविष्यतीत्यवरोध एव प्रतिबिंबाभावे हेतुरिति विभाव्यते तदप्यसंगतम् । एकप्रतिबिंबावरुद्धेऽन्यप्रतिबिंबस्तदा न भवति यदा बिंबातरं पूर्वबिंबव्यवधेयं भवति । इह तु ब्रह्मणो व्यापकत्वेन परिच्छिन्नानां सर्वेषां ब्रह्मान्तर्वर्तित्वेन तद्व्यवधेयत्वाभावान्न जीवेन तत्प्रतिबिंबावरोध इति दुर्वार एव सर्वेषां प्रतिबिंब इति ॥ तदेतदुक्तं सर्वेषां प्रतिबिंबाभावे हेत्वभावादिति ॥ ननु भवतु सर्वेषां प्रतिबिंबः । तथापि न जीवस्य सर्वज्ञतापत्तिर्भवित्री जीवसाक्षिवादस्यानंगीकारात् ॥ तथासति कूटतस्थचैतन्यं वा जीवाभिन्नं सर्वप्रत्यग्भूतं शुद्धं ब्रह्मैव वा परमेश्वरस्यैव रूपांतरं वा साक्षी भविष्यति तस्य तु सर्वज्ञत्वेऽप्यदोषः ॥ जीवस्तु यथासर्वगतं गोत्वसामान्यं स्वभावादश्वादिसंगित्वाभावेपि सास्नादिवद्व्यक्तौ संसृज्यते तथा विषयादौ सन्नपि जीवः स्वभावादंतःकरण एव संसृज्यते यदा चांतःकरणपरिणामो वृत्तिरूपो नयनद्वारेण निर्गत्य चक्षूरश्मिवज्झटिति दीर्घप्रभाकारेण परिणम्य विषयं प्राप्नोति तदा तमुपारुह्य जीवं स विषयं गोचरयति । केवलाग्न्यदाह्यस्य तृणादेरयःपिंडसमारूढाग्निदाह्यत्ववत्केवलजीवचैतन्याप्राकाश्यस्यापि घटादेरंतःकरणवृत्त्युपारूढतत्प्रकाश्यत्वं युक्तमिति चिदुपरागार्थत्वेन वृत्तिनिर्गमनमपेक्ष्य वृत्तिसं-

सृष्टविषयमात्रावभासकत्वात्तस्य किंचिज्ज्ञत्वमुपपत्स्यत इति चेत्तत्राहुः ॥ इंद्रियाणां च वैयर्थ्यमिति ॥ ॥ स्वभाववादेन समाधानेपि जीवस्य प्रकाशकप्रतिबिंबत्वात्स्वप्ने स्वयंज्योतिष्ट्वे प्रतिपादनाच्च प्रकाशरूपत्वेन स्वप्न इवापरोक्षवृत्ताविव च पूर्वपूर्वानादिसंस्कारवशादेवेंद्रियं विनापि प्रत्यक्षोपपत्तेर्ज्ञानेंद्रियाणि वृथैव स्युः। किंच अयःपिंडसमारोहेण दाहकस्याग्नेः साक्षात्संसृष्टदाहकतादर्शनाद्वृत्त्युपारोहे प्रकाशकस्य जीवस्य साक्षादंतःकरणसंसृष्टप्रकाशकत्वं सुतरां सुवचमित्यंतःकरणे प्रतिबिंबितानां प्रकाशोऽस्य स्यादेवेत्यधिकं तत्रानुप्रविष्टमित्यर्थः। वस्तुतस्त्वेवमपि गोत्वस्य सकलगोव्यक्तिष्विवैकस्यैव जीवस्य सर्वांतःकरणेषु संसर्गस्य वक्तव्यत्वात्तथासति तत्तदंतःकरणवृत्तिनिर्गमेण तत्तद्विषयप्राप्तौ तत्तद्वृत्त्युपारूढस्य जीवस्यापि तत्तद्विषयोपरागसंभवात्सर्ववृत्तिसंसृष्टविषयाणां गोचरीकरणे बाधकाभावेन किंचिज्ज्ञत्वमनुपपन्नमेव। अतो विषयविषयिभावो वा विषयसन्निहितजीवचैतन्यतादात्म्यापन्नवृत्तिविषयसंयोगद्वारको जीवतद्विषययोः परंपरासंबंधो वा। अंतःकरणोपादानस्य जीवस्य वृत्तिविषयसंयोगजनितः साक्षात्संयोगो वा। अंतःकरणोपहितस्य विषयावभासकचैतन्यस्य विषयतादात्म्यापन्नब्रह्मचैतन्याभेदाभिव्यक्तिद्वारा विषयतादात्म्यसंपादनं वा। अन्यद्वा यत्किंचित् ॥ चिदुपरागत्वेनाभिधित्सितं तस्य सर्वस्य वृत्तिसंसर्गजनितत्वेन वृत्तिजनकानां चांतःकरणानां सर्वशरीरव्यापकजीवसंसृष्टत्वेन तत्तद्वृत्तिद्वारा सर्वेषां सर्वज्ञतापत्तिरनिवार्यैव। तत्राप्यनुपदोक्ते विषयातादात्म्यसंपादनपक्षे मैत्रस्य चैत्रदर्शनेऽहं चैत्र इत्याद्याकारकज्ञानापत्तिरधिकायातीति फल्गून्यैवैतानि कल्पनानि। अथ जीवःसर्वगतोप्यविद्यावृतत्वात्स्वयमप्रकाशमानतयाविद्याकारकज्ञानापत्तिरधिकाया या विषयाननवभासयन् विषयविशेषे वृत्त्युपरागादावरणातिरोधानेन तत्रैवाभिव्यक्तस्तमेव विषयं प्रकाशयतीत्यावरणभंगपक्षः किंचिज्ज्ञत्वार्थमालंब्यते ॥ तदाप्यावरणस्य वृत्त्युपरागातिरोभाव्यत्वाज्ज्ञाने वृत्त्युपरागे तेन चावरणे भग्ने सर्वांतःकरणसंसृष्टो जीवस्तत्तद्विषयेष्वभिव्यक्तस्तंस्तं विषयं प्रकाशयेदेवेति न किंचिज्ज्ञत्वोपपत्तिः। एवं च चैतन्यमात्रावरकाज्ञानस्य खद्योतप्रकाशेन महांधकारस्येव ज्ञानेनैकदेशाज्ञाननाशो वा पटवत्संवेष्टनं वा भीतभटवदपसरणं वा चैतन्यमात्रावरकस्याप्यज्ञानांतरनाशो वाऽन्यो वा यः कश्चनावरणभंगो निरुच्यते स सर्वोपि वृत्त्युपरागज एवेति जाते वृत्त्युपरागे पूर्वोक्तरीत्या सकलांतःकरणसंसृष्टस्य जीवस्य सर्वज्ञतैवायातीति नैतेपि रोचिष्णवः पक्षा नन्वेकस्मिन्नपि जीवे जन्मांतरमापन्ने पूर्वजन्मानुसंधानादर्शनात्। शरीरभेदस्य सुखाद्यननुसंधा-

नप्रयोजकत्वं क्लृप्तमिति स शरीरभेद एवेत्यर्थः ॥ एवं किंचिज्ज्ञताया अपि प्रयोजको भवतु । तथा च व्यापकस्यापि जीवस्य शरीरांतरे शरीरांतरीयांतःकरणवृत्त्यादिभिर्ज्ञानं न भविष्यतीति न सर्वेषां सार्वज्ञापत्तिरिति चेत् । न शरीरभेदस्य पूर्वजन्माद्यननुसंधानप्रयोजकतया योगिकायव्यूहे जातिस्मरे भूतादौ च व्यभिचारेण तस्य किंचिज्ज्ञतायामप्यतंत्रत्वात् ॥ एतेनैव भोगायतनभेदस्य विश्लिष्टोपाधिभेदस्य चाननुसंधानप्रयोजकत्वं परास्तं बोध्यं "उद्यदायुधदोर्दंडाः पतितस्वशिरोक्षिभिः । पश्यंतः पातयंतिस्म कबंधा अप्यरीन् युधि" ॥ इतिभारते भूतार्थवादाच्च नच योगिप्रभृतिषु प्रभावविशेषेणानुसंधानेऽपि पूर्वोक्तोपाधीनामुत्सर्गतस्तथात्वान्नाननुसंधानप्रयोजकत्वहानिरिति वाच्यं बहुषु व्यभिचारदर्शनात् । एकत्र तथादर्शने ह्यौत्सर्गिकाननुसंधानतंत्रत्वाविघातः प्रभावविशेषसमवधानवशात्कल्पयितुं शक्यते । नतु बहुषु तथादर्शने । अतो मनुष्यविशेषेषु भूतेषु मनुष्यादुत्कृष्टयोनिषु सर्वेषु च पूर्वजन्मीनज्ञानस्य तत्रतत्रोक्तेः शास्त्रस्य प्रामाण्याच्च नपूर्वोक्तोपाधीनामननुसंधानतंत्रत्वं साधीयः । नाप्यंतःकरणभेदस्य ताथात्वं दृष्टिसृष्टिवादे पूर्वपूर्वस्यांतःकरणस्य नष्टत्वेनाग्रिमाग्रिमस्य तस्य भिन्नत्वात् पूर्वदृष्टानुसंधानाभावप्रसंगात् । साक्ष्यैक्येन तत्समर्थने तु अंतःकरणभेदस्याप्रयोजकत्वादंतःकरणांतरेणास्य सर्वज्ञताया एवापत्तेः । अंतःकरणवैजात्यादिकल्पनं तु फेनावलंबनकल्पत्वात्कदर्यमेव सृष्टदृष्टिवादमालंब्यांतःकरणैक्यांगीकारेण समर्थने तु यथापादेन स्पृशामि कर्णाभ्यां शृणोमि चक्षुषा पश्यामीति करणभेदेऽप्येकस्य ज्ञानं तथा तेन तेनांतःकरणादिना तत्तज्जानामि स्पृशामि शृणोमि पश्यामीत्यादिज्ञानमपि बहिःकरणभेदस्येवांतःकरणभेदस्याप्यप्रयोजकत्वात् निर्बाधमेव । नच फलानामंतःकरणभेदस्याप्रयोजकत्वमिति वाच्यं फलबलस्य साधनभेदकल्पनामात्रप्रयोजकत्वेनांतःकरणभेदकल्पने अप्रयोजकत्वात् । फलबलेन जीवभेदकल्पनेपि दोषाभावात् । अतो व्यापक एकः प्रतिबिंबो जीव इति पक्षे कथमपि न सर्वज्ञतापत्तिपरिहारः । ननु तर्ह्यस्तु नानाजीववादः । तथासत्यंतःकरणे प्रतिबिंबितचैतन्यरूपस्य जीवस्य वृत्तिपरिच्छिन्नत्वेन सर्वसंसर्गाभावान्न सर्वज्ञतापत्तिर्भवित्री विषयप्रकाशस्तु विषयसंसृष्टवृत्तिद्वारा तडागसलिलस्य कुल्याद्वारा केदारसलिलैक्यवद्विषयावच्छिन्नब्रह्मचैतन्याभेदाभिव्यक्तौ भविष्यतीति किंचिज्ज्ञत्वमुपपत्स्यत इति चेत् । नेदं युक्तं भाति । सलिल एको द्रष्टा भवतीति श्रुत्या सुषुप्तावेव जीवब्रह्मणोरेकीभावश्रावणात्सदितरत्र जाग्रदादौ व्यावर्त्तकोपाधेर्विद्यमानत्वाच्च दर्पणसत्वे बिंबप्रतिबिंबयोरिव जीवब्रह्मणोर्भेदस्य शक्यवचनत्वात् । किंच जीवब्रह्मणोरिदानीमभेदेऽन्यो-

न्यधर्मविनिमयाद्ब्रह्मणोऽल्पज्ञताऽन्यस्य सर्वज्ञता चापत्स्यत इति नोक्तदूषणोद्धारसंभवः। यदि च बिंबभूतं विषयाधिष्ठानचैतन्यमेव साक्षादाध्यासिकसंबंधला भाद्विषयाप्रकाशकमित्याध्यासिकसंबंधोपलक्षितचैतन्यात्मना जीवैकीभावो नतु बिंबत्वविशिष्टरूपेणेति भेदस्यापि सद्भावान्नोक्तदूषणापत्तिरिति विभाव्यते। तदापि विषयतादात्म्यापन्नब्रह्मणा त्वेकीभावोऽस्य जात एवेति। अहं घट इत्याकारकज्ञानापत्तिः। अध्यासेनांतःकरणात्तादात्म्यापत्त्याहमिति ज्ञानत्वात्। अंतःकरणधर्माणां सुखादीनां स्वास्मिन्नभिमानवद्विषयधर्माणामप्यभिमानप्रसंगश्च। अयं घट इत्यादिज्ञानाभावश्च स्यात्। यदि च विषयावच्छिन्नं ब्रह्मचैतन्यं विषयसंसृष्टाया वृत्तेरग्रभागे विषयप्रकाशकं प्रतिबिंबमर्पयति तस्य प्रतिबिंबस्य जीवेनैकीभावे विषयाग्रमितिरिति विभाव्यते। तदा तु सुतरामसंगतम्। वस्त्वंतररुद्धे दर्पणादौ प्रतिबिंबादर्शनाद्विषयसंसृष्टेऽग्रभागे ब्रह्मप्रतिबिंबायोगाद्विषयप्रकाशस्यैवाभावप्रसक्तेः। किंच प्रतिबिंबार्पकं चैतन्यं यदि विषयाद्बहिस्तदा तस्य वृत्तिसंसृष्टत्वात्प्रतिबिंबायोगः। यदि च विषयान्तस्तदापि विषयेन व्यवधानात्तथा। यदि विषयाद्दूरवार्त्ति तदा विषयावच्छिन्नत्वस्यैवायोगः। किंच। अंतःकरणोपाधिपरिच्छिन्नप्रतिबिंबस्याप्यणुत्वाद्दूरदर्शने वृत्तिद्वारा तस्य निर्गमात्प्राणानामपि निर्गमापत्तिः। तमुत्क्रामंतं प्राणोनूत्क्रामतीति श्रुतेः। किंचैवं कल्पनैकशरणत्वे गोलकद्वारा तैजसस्य वेगवतो वृत्तिरूपपरिणामस्य निर्गमादेव प्रमातृवृत्तिविषयचैतन्याभेदसिद्ध्या विषयाप्रकाशसंभवे गोलकातिरिक्तेंद्रियकल्पनापि वृथा स्यात्। तस्मादनादरणीया एवैते पक्षा इति दिक्॥ तदिदं हृदि कृत्वाहुः॥ अत इत्यादि॥ ॥ अतः बिंबधर्मप्रतिबिंबाधारस्वरूपयोर्विचारेण ज्ञानेंद्रियवैयर्थ्यापत्तिरूपदूषणान्तरग्रासेन च प्रतिबिंबपक्षस्यासंगतत्वात्। इदमर्थप्रकाशरूपं ज्ञानं कार्यरूपत्वात्। नित्यज्ञानातिरिक्तमेवेत्यर्थः॥ अत्रोपष्टंभाय तर्कगतं हेत्वंतरमप्याहुः॥ चिदादीत्यादि॥ ॥ तथाच कार्यरूपं ज्ञानं यद्यात्मभिन्नं न स्यात् कोशादिषु चिदादिभिर्बुद्धेरैकार्थ्यं नस्यात्। आदिपदं व्याकरणसंग्राहकम्। बुध अवगमने बोधो ज्ञानमिति चितीसंज्ञान इति नच वृत्तौ ज्ञानत्वोपचाराच्चिदादिप्रयोग इति शक्यवचनः। कोशादीनां शक्तिग्राहकत्वेन तत्रौपचारस्याशक्यवचनत्वात्। तस्माज्जन्यं ज्ञानमतिरिक्तमेवेति निश्चयः॥ ननु नेंद्रियाणां वैयर्थ्यं बुद्धिवृत्तिजननार्थं तेषामुपयोगात्। स्वप्ने स्वयं ज्योतिष्ट्वप्रतिपादनेनान्यदा जीवस्याप्रकाशकतयाऽवश्यं वृत्त्युपेक्षणात्। अत एव चांतराणामपि ज्ञानाभावासिद्धेर्नकोपि दोष इत्याशंकायां वृत्तिस्वरूपं निश्चेतुमाहुः॥ बुद्धिवृत्तिरित्यादि॥ ॥

नेत्रनिमीलने कृते बहिर्दृष्टपदार्थस्येव कश्चिदाकारो नेत्रांतर्भासते स आकारो न बाह्यवस्तुनः । आश्रयमतिहाय तस्य तत्राशक्यवचनत्वात् । अतः स आंतरस्यैव कस्य च न भवितुमर्हतीति तदाश्रयत्वेन सांख्यैराहंकारिकं तत्वांतरं वृत्तिनामकं कल्प्यते । यथाहि प्रवचनसूत्रद्वयं प्रमार्थप्रकाशलिंगा वृत्तिसिद्धिः । भागगुणाभ्यां तत्वांतरं वृत्तिरिति । अर्थस्तु प्रमापूर्वोक्तरीतिकमाकारज्ञानं तत्सहितो योर्थप्रकाशः विषयज्ञानम् ॥ एवमुभयविधाल्लिंगात् वृत्तिसत्तानिश्चयः । यदि वृत्तिर्न स्यात् उक्त आकारो न प्रतीयेत ॥ अतैजसत्वादचलं चक्षुर्विप्रकृष्टं विषयमप्राप्नुवत्तत्प्रकाशनं नकुर्यात् । जायते च तदुभयमतः सास्तीति निश्चयः । एवं भागो विभागः अहंकाराद्विभज्य विषयदेशावधिगमनं गुण उक्ताकारः। ताभ्यां कृत्वा आहंकारिकं तत्वांतरं वृत्तिरिति । अभियुक्तोक्तिश्च । वृत्तयः प्रसरद्रूपास्फारिताक्षस्य यत्र च अदृष्टानुग्रहात्तत्तत्संबद्धार्थावबोधिका इति ॥ अमूर्त्तायास्तस्याः कथं क्रियेत्यतस्तृतीयं सूत्रम् ॥ नद्रव्यानियमस्तद्योगादिति ॥ अनियतत्वात्पदार्थानां नद्रव्य एव क्रियानियमः। किंतु यत्र यत्प्रमाणतः सिद्ध्यति तत्र तदनुमन्यामहे । अतो दूरस्थवस्तुन आकारग्रहणदर्शनात्सापि क्रियावतीत्यर्थं इति ॥ एवं मायावादिनोपि अंतःकरणविशिष्टस्य प्रमातृत्वमंगीकृत्य तस्मिंज्ञानसूक्ष्मावस्थारूपं विषयसंस्कारमाधातुं विषयेंद्रियसन्निकर्षसामर्थ्यजन्यामंतःकरणपरिणामरूपां वृत्तिमंगीकुर्वंति । नैयायिकादयस्तु नयनकिरणानां निर्गमेन विषयसन्निकर्षाज्ज्ञाने तेन च भावनासंस्काराख्यं गुणांतरं चरमस्मृतिनाश्यमात्मन्यंगीकुर्वंतो वृत्तिपदार्थमेव नेच्छंति । तत्र नेत्रांतरानुभवस्य सार्वजनीनत्वादप्रयोजकं नैयायकादिमतमिति वृत्तिः सर्वथाभ्युपेयैव । परंतु या वृत्तिः संस्काराधानार्थं जन्यत इत्युच्यते या वृत्तिः बुद्धेर्बुद्धितत्वादतिरिक्तं पदार्थांतरं न भवति । किंतु स्थितिरेव अवस्थाविशेष एव सत्वादिभिः कालादिक्षुब्धैस्सत्वादिगुणैः कृतः । तथाच यदा चक्षुषा ज्ञानं जाग्रति जन्यते तदा तदाकारिका बुद्धिवृत्तिरपि तेन जन्यते । बुद्धिर्विज्ञानरूपिणी । द्रव्यस्फुरणविज्ञानमित्यादिभिस्तल्लक्षणवाक्यैस्तस्या विशिष्टज्ञानसमानाकारतयैव सिद्धत्वात् । सैव वृत्तिर्नेत्रनिमीलने गोलकांतरेऽनुभूयते । एवमेवेंद्रियांतरजन्यापि ज्ञेया । अत एतावतैव निर्वाहे सांख्याभिमतं तस्याः पदार्थांतरत्वमप्रामाणिकं गुरुभूतं च । तथैव मायावादिप्रतिपन्नं तस्याज्ञानप्रतिबिंबाधारत्वमपि व्यावहारिकत्वमिति कल्पनावैरूप्यादिदोषग्रासात् । अत उक्तरीत्येंद्रियसार्थक्यादिसाधनेऽपि जन्मज्ञानमतिरिक्तमवश्यमभ्युपेयमित्यर्थः ॥ नन्वस्त्वेवं तथापि इंद्रियसंप्रयोगोत्तरं संप्रयुक्तार्थसमानो वृत्तावाकारो जायत इति प्रमा भविष्यति नतु भ्रमादिकं शुक्त्यादौ तद्विरुद्धस्य रजताद्याकारस्याभावेन वृ-

त्तौ तत्सर्पणायोगात् । अत इदमपि मतमनुपपन्नमित्याशंकायामाहुः ॥ अत ए-
वेत्यादिवृत्तेर्गुणजन्यत्वांगीकारादेव संशयोऽथविपर्यास इत्यत्रोक्तानां भ्रमादिवृ-
त्तीनामन्यख्यात्याद्यंगीकारेणोपपत्तिरिति नदोष इत्यर्थः ॥ इदं यथा तथा तृती-
यस्कंधे बुद्धिलक्षणे व्युत्पादितम् । नन्विंद्रियाणामनुग्रह इतिबुद्धेः कार्यलक्षणा-
त्तस्या इंद्रियानुग्राहकतयेंद्रियसमानकालिकत्वाद्वृत्तेस्तदभेदे तस्यामिंद्रियजन्यत्वं
दुर्घटमित्याकाक्षायां तत्साधयितुमिंद्रियाजन्यत्वे बाधकं तर्कमाहुः ॥ ॥ यदित्या-
दि ॥ ॥ क्वापीति ॥ कस्मिन्नप्यंशे । अयमर्थः। यत्र भ्रमद्दृष्टो गृह्यते तत्र वृ-
त्त्युपरंजकस्य भ्रमणस्य विषयनिष्ठत्वाभावेन ततश्चिदुपरागायोगात् । घटाका-
रिकया वृत्त्या विषयावरणाभिभवेन क्रियांशे विक्षेपस्याप्यशक्यवचनत्वात् वृत्त्या
विषयचैतन्याभेदाभिव्यक्तावपि विषयप्रकाशके ब्रह्मचैतन्ये तदाभावान्नयनप्रदे-
शे दृतननुभवेनेंद्रियेपि दृतभावाद्वृत्तिमात्रजनकस्येन्द्रियसंप्रयोगस्य विषयकारण-
त्वात्क्लृप्तेः संप्रयोगेनापि विषये तदाधानायोगादंतःकरणावच्छिन्ने प्रमातर्यप्यहं-
भ्रमामीत्यननुभवात् । भ्रमः सर्वत्रालब्धसत्ताको घटेऽपि न स्यात्। यस्मादप्यसन्न
घटदेशेऽनुभूयते । तस्मात्तद्देशावच्छेदेनानुभूयमानायां वृत्तावस्ति । यस्मादेवं त-
स्माद्वृत्तिरिंद्रियजन्यैवेत्यर्थः ॥ एवं सिद्ध एकत्र इंद्रियजन्यत्वेऽन्यत्रापि तथैवां-
गीकार्यमिति भावः। नच शुक्तिरजतादिस्थले इदमाकारवृत्तौ सत्यामपि रजता-
ध्यासदर्शनादंशत एवावरणानाश इत्यंशांतरेणेहापि भ्रमविक्षेपोपि भविष्यतीति
नतदननुभवानुपपत्तिरिति वाच्यम्। विषये तत्सत्वेऽन्येषामपि तदनुभवापत्तेः ।
अन्येषां घटद्रष्टॄणां प्रमाणवृत्त्या तदंशावरणनाशादस्यापि तदननुभवापत्तेश्च
विषयाश्रितावरणपक्षस्यैव दुष्टत्वात् । पुरुषाश्रितत्वपक्षे तूक्तरीत्या प्रमातरि प्र-
माणे च वक्तुमशक्यत्वेन भट्टकुटीप्रभातवदननुभवस्यैवाप्त्यात् शुक्तिरजतस्या-
प्येतत्तुल्यत्वात् । एवं मूलाज्ञानावस्थारूपाज्ञानानां नानात्वमंगीकृत्य घटावर-
काज्ञानस्य घटाकारकवृत्त्या निवृत्तावपि नैश्चल्यावरकस्यानिवृत्त्या भ्रमविक्षेप
इत्यादरणेपि पूर्वोक्तरीत्या पुरुषनिष्ठतैव तस्य वाच्येति तस्य तद्वदेवासिद्धेः।
वृत्तेर्ज्ञानात्मकत्वमात्रकल्पनया तस्योत्पत्तिनाशशालित्वमात्रेण निर्वाहे विषयाव-
रणतन्नानात्वकल्पनयोर्गुरुत्वादप्रामाणिकत्वाच्च । एतेनैव घटावरकाज्ञानगता-
वरणशक्तिमात्रनिवृत्तिरपीति पक्षो निरस्तो बोध्यः । नैश्चल्यावरणमंतरेण भ्रमण-
विक्षेपासंभवादावरणशक्तिनिवर्त्तकताया अप्रयोजकत्वाच्च। जलप्रति बिंबितवृक्षा-
धोग्रत्वभ्रमे तु प्रतिबिंबपदार्थस्यातिरिक्तत्वेन मूलसमीपवर्तिनि जले मूलस्य ततो
विप्रकृष्टेग्रस्य प्रतिबिंबात् प्रतिबिंबत्वेनैवावगाहाद्भ्रमत्वस्यैव दुर्वचत्वेन तत्रावरणा-

दिकल्पनाया एवायोगाच्चेति दिक् । तर्कान्तरमाहुः ॥ ॥ जीवस्येत्यादि ॥ ॥ इंद्रियाणां जागरणे जाग्रत् तेषां लये स्वप्न अंतरींद्रियस्यापि लये सुषुप्तिरितीं-द्रियहेतुकमवस्थात्रयं गुणतस्तत्तथा न स्यादित्यर्थः ॥ १३९ ॥

ब्रजभाषाटीका ।

मायावादिके मतमें कार्यरूपज्ञानकी उत्पात्ति नहिं मानें हैं किंतु ज्ञानके स्वरूपकूँ नित्यमानें हैं तासों नित्य ज्ञानको जो बुद्धिवृत्तिमें प्रतिबिंब है वाकूँ कार्यरूप ज्ञान कहें है तहाँ उनसों यह पूछनों योग्य है तुम केवल ज्ञानरूप चितकूँ नित्य कहो हो तैसें सतकूँ तथा आनंदकूँभी नित्य माननो चाहिये क्योंकि (सत्यं ज्ञानमनन्तं ब्रह्म) याश्रुतिमें सत् ज्ञान आनंदरूप ब्रह्म कह्यो है तासों जैसे ज्ञान ब्रह्मस्वरूप है तैसें सत् आनंदभी ब्रह्मस्वरूप है नित्यमानो हो तो इन तीनो पदार्थनकूँ हीं नित्य माननों योग्यहै किञ्च ज्ञान रूप-रहित वस्तु है याको कोई कालमें कोई देशमें प्रतिबिम्ब नहिं हो-यसके है ॥ १३८ ॥ दूषणांतर आज्ञाकरे है--अविद्यामें ब्रह्मरूप ज्ञा-नको प्रतिबिंब जीव कहावे है,बुद्धिमें ब्रह्मात्मक ज्ञानको प्रतिबिंब लौकिक व्यवहारमें आयबेवारो ज्ञानकहावे है, यह कथन मायावा-दीको जब बनसकें, विद्या बुद्धि, ये दोनो शुद्ध होय, ये तो दोनों-ही मलिन हैं मलिन वस्तुमें प्रतिबिंब नहि बनसकें हैं ॥ जो वि-द्याबुद्धिकूं शुद्ध माँनके इनमें अरूप ज्ञानकोभी प्रतिबिम्ब मानोंगे तो रूपवाले शरीरके भीतरके अन्त्रनको तथा बाहिरके घटादि सदंशनको अविद्या बुद्धिमें प्रतिबिंब होवेमें कछु बाध कह्यो नहिं तब तो जा अविद्यामें व्यापक जीव प्रतिबिंबितहै वा अविद्या-मेंही घटादि सब पदार्थ प्रतिबिंबितहैं सबके साथ तादात्म्यसंब-न्धवाले ब्रह्मके समान जीवभी सब पदार्थके साथ संसर्गवालो हो-यवेंसों स्वरूपचैतन्यकरकें सब पदार्थनको प्रकाशक होय सके हैं तब तो सब जीवनकूँ सर्वज्ञता होनींचैये कदाचित् कहोगे अन्तः-

करण अलग अलग है तथा (प्रमाता) जानवेवारेभी न्यारेन्यारे हैं तासों सब जीव सर्वज्ञ नहिं हैं यह बात तो नहिं बनसके है जीवकूं व्यापक मानोहो तासों सब जीवनको सबनके अन्तः-करणनके साथ सबन्ध है फिर जानवेवारेनको भेद नाहिं हो सकें है अन्तःकरणको संबन्ध सब जीवनके साथ समानही है फिर एक जीव अन्तःकरणविशिष्ट है, दूसरो जीव वा अन्तः-करणविशिष्ट नाहिं है, यामें कोई कारण नहिं होसके है, अदृ-ष्टकी कारणताको तो पूर्वप्रकरणमें खंडन कर आये हैं, जीवन को ही अविद्यामें प्रतिबिम्ब होयहै और सब घटादिकनको प्रति-बिम्ब नहिं होयसके है यामेंभी कोई हेतु नहिं हैं किञ्च जीव प्रका-शक प्रतिबिम्बरूप होयवेसों स्वप्नमें जैसें इंद्रिय बिनाही प्रत्यक्ष ज्ञान होजायहै तैसें पूर्व संस्कार वशसों बिनाही इन्द्रिय प्रत्यक्ष ज्ञान होय जायगो इन्द्रियनकी उत्पत्ति व्यर्थ होजायगी अतः प्रतिबिम्ब प्रक्ष नहिं बनसके है तासों पदार्थ प्रकाशक ज्ञानहै सो कार्यरूप ज्ञानहै वह ज्ञान नित्यज्ञानसों अलग है तासोंही कोश तथा व्याकरणमें बुद्धिके साथ चित्त आदि शब्दनकी एकार्थता लिखी है ॥ नेत्रमीलन करे पीछे बाहिरके पदार्थको आकार भीतर दीखे है वाको नाम वृत्तिहै वह वृत्ति बुद्धिसों अलग नहिंहै किन्तु सत्व, रज, तम करकें बुद्धिकी अवस्था बदलें है वाहीसों वृत्तिकहे हैं वृत्ति गुणजन्यहै तासों ही तमआदि जन्य वृत्तिमें भ्रमादिकनको भी संग्रह है वह वृत्ति इंद्रियन करकें जन्य है भ्रमतेभये घटके ग्रहणमें भ्रमहै सो वा देशमें अनुभूयमान वृत्तिमेंही है घटमें तथा आत्मामें नहीं है वृत्तिकूं इंद्रियजन्य नहिं मानोंगे तो घटमें कहूँभी भ्रम नहिं होनों चाहिये किञ्च बुद्धिवृत्तिनकूं गुणजन्य नहिं मानोंगे तो स्वप्न जग्रात् सुषुप्ति इन जीवकी तीन अव-

स्थानको कारण कछु और माननों पडैगो तो (सत्वाज्जागरणम्) इत्यादि भागवतवाक्य विरोध आवेंगो तासों सत्वादिगुणवशसों निश्चय संशयादि रूप बुद्धि वृत्तिनकूं जैसें इंद्रियें प्रकट करे हैं तैसेंही तत्समानाकार विशिष्टज्ञानभी गुणवशसोंही होवेहैं तासों बुद्धि इन्द्रियजन्य नहिंहै तथापि बुद्धिकी अवस्थारूप वृत्ति तो इन्द्रियजन्यहीहै जीव बुद्धिके आधीनहै तासों ज्ञानकी उत्पत्तिमें जीव स्वतंत्र कर्ता नहि है सत्व अधिक होवेसों इंद्रियकरकें निश्चयरूप वृत्ति होयहै सत्व रज समान होवेसों संदेह होवे है तम अधिक होवेसों अज्ञानरूप बुद्धि वृत्ति इन्द्रिय करकें प्रकट होवेहै याप्रकार ज्ञानकी उत्पत्ति निरूपण करकें प्रतिकूलज्ञानसों जानोजाय ऐसो जो विषयदुःख तथा अनुकूलज्ञानसों जानोजाय ऐसो जो विषय सुख इन दोनोंकी उत्पत्तिको निरूपण करे हैं ॥ १३९ ॥

सुखदुःखसमुत्पत्तिर्नित्या ब्रह्मसुखात्पृथक् ॥ १४० ॥ अंधंतमः प्रवेशाच्च ह्रिच्छादीनां च सर्वशः ॥ मनोधर्माश्च ये चान्ये भगवत्संगवर्ज्जिताः ॥१४१॥ उत्पद्यंते विलीयंते घटादिरिव नान्यथा ॥ आविर्भावतिरोभावौ शक्ती वै मुरवैरिणः ॥ १४२ ॥

तत्त्वदीपप्रकाशः ।

एवं ज्ञानस्योत्पत्तिं निरूप्य सुखदुःखयोरपि ज्ञानफलयोरुत्पत्तिं निरूपयति ॥ सुखदुःखसमुत्पत्तिरिति ॥नित्या न विवादास्पदमित्यर्थः ॥ ब्रह्मसुखमपि तथा भविष्यति इत्याशंक्याह ॥ ब्रह्मसुखादिति॥१४०॥ दुःखार्थमाह ॥ अंधंतमः प्रवेशादिति ॥ अंधंतमो नित्यमसुराणां फलं तथा ह्रीच्छादीनां भगवद्धर्म्मव्यतिरिक्तानामुद्भवः । अनुक्तसमु-

च्चयार्थमाह ॥ मनोधर्मा इति ॥ भगवद्धर्मा मनोधर्म्माश्च तुल्या भवंति न त्वेकविधाः । नित्या भगवद्रूपा भगवद्धर्माः । अनित्याः कार्यरूपा मनोधर्मा इति ॥ अनेन सोऽकामयत इत्यत्र दोषः परिहृतः ॥ १४१ ॥ एवं सर्वेषां तुल्यतामुपपाद्य घटादीनामपि ब्रह्मत्वान्नित्यतेति वक्तुं युक्तिमाह ॥ आविर्भावतिरोभावाविति ॥ आविः प्रकटं भावयतीत्याविर्भावः । आविर्भवनं वा धर्म्मः । तथा तिरोभवनम् । एते भगवतः शक्ती । अनंतशक्तित्वाद्भगवतः । अन्यथा बीजादिपरिणामानां देहादिभावे को हेतुः स्यात्तस्माद्भगवच्छक्तिरेव कारणत्वेन वक्तव्या । प्रभुचरणाः ! अत्रेदं प्रतिभाति । द्वितापपक्षे आविर्भवनरूपाद्धर्मादेव घटादेराविर्भावरूपधर्मसिद्धौ सत्यामाविर्भावरूपधर्म एव कारणं नन्वस्य धर्मरूपत्वाद्धर्म्याश्रयो वाच्यः। तथासति घटादेरपि पूर्वं सत्वादाविर्भावतिरोभावयोरपि भगवच्छक्तित्वेन नित्यत्वात् । सदैवाविर्भावतिरोभावपत्तेनैवं पक्षः साधीयान् तत्राह ॥अन्यथेति॥इच्छाशक्तिसहकारेणानुपपत्तिपरिहारः। स्वमते उक्तन्यायेन सर्वेषां हरिरूपत्वादद्वैतश्रुतिरत्र साधिका धर्मोधर्मसिद्धौ कारणं भवति । अन्यथोत्पत्तिपक्षेपि दोषस्तुल्यः । उत्पत्तिर्नाम कश्चन धर्मः स कस्मिन् धर्मिणि भवेदिति अनवस्था च स्यात्। कालसंबंधोपि धर्मः । अतो यः कश्चिन्निरुच्यतां सोऽवश्यं धर्म एव भवतीति धर्मी पूर्वसिद्धो वक्तव्यः। घटो भवतीति कर्तरिप्रयोगश्चानुपपन्नःस्यात्। भूसत्तायामिति धात्वर्थश्चासंगतः स्यात् । अनुत्पन्नो घटो नष्टो घट इति व्यवहारश्चासंगतः स्यात् । अतो धर्मी सनातनो वक्तव्यः स भगवानेव भवति नान्य इति अद्वैतश्रुतेः सर्वश्रुतेश्च धर्मिणो भगवत्वमंगीकर्तव्यम् । तदनुधर्माणामपि तेनैव न्यायेन भगवत्वं द्योत्स्यति । अतो भ्रांतानां बालानां विचारसामर्थ्याभावात् । शब्दार्थावुल्लंघ्योत्पत्त्यादिनिरूपणं नदूषयामः ॥ मुरवैरिण इति ॥ मुरो दैत्यः पापात्मकः तन्निवर्तनार्थमाविर्भावो भगवतः । तथा सर्वत्र सर्ववस्तुस्वरूपेण तदनुद्र-

मे प्राप्तदोषपरिहारार्थं तदुद्गम इति सूचितं इति। दुःखं तु निर्वृत्यभाव इति तिरोभावफलत्वान्नव्यभिचारः ॥ १४२ ॥

आवरणभंगः ।

यद्वा वृत्तीनां गुणाजन्यत्वे बाधकं तर्कमाहुः ॥ ॥ जीवस्येत्यादि । बुद्धिवृत्तयो यदि गुणजन्या न स्युस्तदा जीवस्यावस्थात्रयं भिन्नहेतुकं स्यात्। यदि तथा स्यात् तर्हि "सत्वाज्जारणं विद्याद्रजसा स्वप्नमादिशेत्। प्रस्वापस्तमसा जंतोस्तुरीयं त्रिषु संततम्" इति । "जाग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः । तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः" ॥ इत्येकादशस्थभगवद्वाक्यं हंसवाक्यं च विरुद्ध्येत । यतो नेदं विरोद्धव्यमतस्तत्तदवस्थासु बुद्धिवृत्तयो गुणव्यत्ययजा एवेति निश्चयः । एवंच सत्वबाहुल्ये प्रमाणवृत्तिः सत्वरजःसाम्ये संशयस्तमोबाहुल्येऽज्ञानं रजोनुवेधे भ्रम इंद्रियैर्जन्यत इत्याद्यूह्यम् । यत्तु जाग्रद्भोगप्रदकर्मोद्बोधे जागरणं तदुपरमे निद्रया स्वप्नसुषुप्ती इति मतम् । तत्रापि कर्मोद्बोधोपरमहेतोरवश्यं वाच्यत्वाल्लाघवादीश्वरेच्छानुगृहीतानां परस्परोपमर्दकादिस्वभावानां गुणानामेवावस्थाहेतुत्वं साधीय इति । एवं तर्कसूचितेन प्रमाणेन वृत्तिकारणं निश्चित्य फलितमाहुः ॥ ॥ अत इत्यादि ॥ अत इंद्रियाणामनुग्रह इति वाक्येन बुद्धेरिंद्रियानुग्राहकत्वात् गुणवशात् सत्वादिगुणानुबोधाद्यथानेकप्रकारेण संशयादिरूपा बुद्धिवृत्तिर्भवति । इंद्रियैर्जन्यते तथैव तत्समानाकारमेव विशिष्टज्ञानं मंतव्यमंगीकार्यं तथा च बुद्धेरिंद्रियाजन्यत्वेपि तदवस्थारूपाणां वृत्तीनामिंद्रियजन्यत्वं सुघटमित्यर्थः ॥ एवं च तृतीयस्कंधोक्ते स्थिरज्ञानपक्षे आधिभौतिकं बुद्धिरूपाणां वृत्तीनामेव विशिष्टज्ञानत्वम् । त्रिक्षणावस्थायिज्ञानपक्षे तु वृत्तिभिन्नत्वमिति बोध्यम् । अत्र नैयायकादिवत् कार्यज्ञानं भिन्नं स्वीकृतमिति तद्वदेव ज्ञानोत्पत्तिप्रक्रियापि भविष्यतीति शंकाव्युदासाय भिन्नां प्रक्रियां सूचयंत आहुः ॥ अत एवेत्यादि ॥ ॥ अत एव बुद्ध्यधीनत्वादेव स्वातंत्र्यमिति । न ज्ञानजनने कर्तृत्वघटकं स्वातन्त्र्यम् । तथा च । आत्मा मनसा संयुज्यते मन इंद्रियेण इंद्रियमर्थेनेति प्रक्रिया नास्मदभिमता । किंत्वधिष्ठानं तथा कर्तेति वक्ष्यमाणगीतावाक्यादन्यैवेत्यर्थः ॥ सात्रानुक्तापि सूचितत्वात् बोधनार्थं किंचिद्व्युत्पाद्यते । तथाहि ॥ अधिष्ठानं तथा कर्तेति "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" इति गीतावाक्याभ्यां दैवेनांतर्यामिणा च क्षुब्धगुणयुक्तं मनस्तत्तकार्यार्थं प्रेर्यते । तच्चाणवपि सक्षोभमिति तत्तदिंद्रियेण संसृज्यते । तत्र तत्तदिंद्रियदेवतानुकूल्ये विषयसंसृष्टं सत् पूर्वं निर्विकल्पकमुत्पादयति । ततो बुद्ध्यापि तदनुग्रहे सविकल्पकं

भवति। चाक्षुषे तु नयनकिरणसंसृष्टं मनः विषयपर्यंतं गच्छति। इंद्रियांतरे तु किरणाभावादिंद्रियेण सह विषयं प्राप्नोति तदा क्रमेण सहैव वा निर्विकल्पकं सविकल्पकं च मनस्युत्पद्यतोर्ज्ञानयोर्द्वयेपि विषयेंद्रियस्पर्शादिकं व्यापारः स मया प्रस्थानरत्नाकरे व्युत्पादित इति ततो बोध्यः। तत्र सविकल्पकं प्रमेयाकारानंत्यादनंतविधं भवति। तत्रापि कारणांतरसमवधानेन संशयविपर्यासनिश्चयस्मृतिभेदा जाग्रति भवंति यथासंभवं स्वप्नेपि। तेपि तत्रैव लक्षिताः। सविकल्पकजन्यहानोपादानबुद्धौ तु विशेषः "इंद्रियैर्विषयाकृष्टैराक्षिप्तं ध्यायतां मनः। चेतनां हरते बुद्धेः स्तंबस्तोयमिवह्रदात्" इतिवाक्याद्विषयैरिंद्रियाकर्षः ततस्तैर्मनसस्तच्च कामादिहतमिति तत्र कामोत्पत्तावुपादानबुद्धिः। तादृशे मनसि द्वेषोत्पत्तौ तु हानबुद्धिः यदा मनसो नाकर्षस्तदोपेक्षाबुद्धिरिति। नचेदमप्रयोजकं कामिनीकुचकुंभदर्शनादौ चक्षुषः, शीतादिकालेष्वूष्णादिना त्वचो, रागादियुक्तगीतेन श्रवणस्य, चंदनादिगंधेन घ्राणस्य, भक्षितस्यापिदध्यादेः पुनरास्वादनेन रसनस्य, तैश्च मनस आकर्षस्य प्रत्यक्षसिद्धत्वात्। एवं ज्ञानक्रमः। अत्र यथासंभवमन्यदपि शास्त्रेणावगत्योहनीयं यदि न्यूनं भाति ॥ ॥ ज्ञानफलयोरिति ॥ ॥ सुखदुःखयोरनुकूलप्रतिकूलबुद्धिवेद्यत्वेन पूर्वमज्ञस्य पश्चादर्थज्ञाने तस्यार्थस्य स्वरूपेपि एतद्वेवेदं सिद्धं भूतमिति भानाज्ज्ञेयत्वस्यापि फलांतःपातित्वमाभिप्रेत्यैवमुक्तम्। नविवादास्पदमिति। ननु यथाऽत्युत्कृष्टस्य धवलरूपस्य मालिन्यतारतम्ययुक्तेष्वनेकेषु दर्पणेषु प्रतिबिंबे सत्युपाधिमालिन्यतारतम्यात्तत्र तत्र प्रतिबिंबे धावल्यापकर्षस्तारतम्येनाध्यस्यते। एवं वस्तुतो निरतिशयस्यैकस्यैव स्वरूपानंदस्यांतःकरणप्रतिबिंबिततया साक्ष्यानंदभावे प्राक्तनसुकृतसंपत्त्यधानविषयविशेषसंपर्कप्रयुक्तसत्वोत्कर्षापकर्षरूपशुद्धितारतम्यायुक्तसुखरूपांतःकरणवृत्तिप्रतिबिंबिततया विषयानंदभावे च सति तस्मिन् तमोगुणरूपोपाधिमालिन्यतारतम्यदोषात्तारतम्येनापकर्षोप्यध्यस्यत इति तस्य सातिशयता तेनातृप्तिश्च। विद्योदये तु निखिलोपाधिनिवृत्त्यापकर्षाध्यासस्यापि निवृत्तेः। कृतकृत्येति सांसारिकानंदब्रह्मानंदयोर्विशेष इत्येतावतैव निर्वाहे उत्पत्त्यादिविचारस्य व्यर्थत्वात्कथं न विवादास्पदत्वमिति चेत्। नेदं युक्तम्। दृष्टांतविरोधात्। आनंदे रूपानुपधानात्। अंतःकरणस्य चाशुद्धत्वात्। अन्यथा हृदयनाड्यादिप्रतिबिंबापातेन तदानुसंधानापातादित्यादिपूर्वोक्तयुक्तिभिः साक्ष्यात्मप्रतिबिंबनिरासेन तदानंदप्रतिबिंबस्यापि निरस्ततरत्वात्। वैषयिकानंदस्यापि वृत्तिविषयसंसर्गोत्तरभावित्वेन विषयसंसर्गरुद्धायां वृत्तौ प्रतिबिम्बस्य च पूर्वं दूषितत्वेन प्रतिबिंबरूपताया वक्तुमशक्यत्वात्सुखरूपवृत्तिमंतरेण च तदनभिव्यक्तेस्तस्या आवश्य-

कत्वाल्लाघवाच्च त्वदुक्तरीतिकसत्वोत्कर्षापकर्षतारतम्यवती अंतःकरणवृत्तिरेव वैषयिकं सुखम् । साचोत्पत्तिमती भवताप्यंगीक्रियत एवेत्यतो न सा विवादास्पदमिति जानीहि । एवमेव वृत्तिरूपदुःखस्याप्युत्पत्तिर्ज्ञेया ॥१४०॥नैयायिकादयो ब्रह्मणि सुखं नाङ्गीकुर्वन्तीति ब्रह्मसुखस्याप्युत्पत्तिः संभाव्यत इति तन्निरासायाहुः ॥अंधंतमइत्यादि॥"मामप्राप्यैव कौन्तेय ततो यांत्यधमां गतिम्" इति वाक्यात्।"अंधं तमः प्रविशंति"इति श्रुतेश्चासुराणामविद्योपासकानां तत्फलम् ॥ तस्य च नित्यानंदतिरोभावरूपत्वादुत्पत्तिरहितत्वम् ॥ तदग्रे दुःखस्वरूपनिरूपणे व्याकरिष्यते । एवं मनोधर्म्माणां ज्ञानसुखादीनामुत्पत्तिं निरूप्य मनोधर्मांतरेपि तामतिदिशंति ॥ तथेत्यादि । ह्रीस्तु अकर्मणि जुगुप्सा । जुगुप्साह्रीरकर्मस्विति भगवता लक्षितत्वात् ॥ इच्छा अभिलाषरूपा प्रसिद्धैव ॥ आदिपदेन द्वेषयत्नप्रीतिप्रभृतयो नाना तु व्यवसायगम्या ज्ञेयाः॥ ह्रीर्धीभीरित्येतत्सर्वं मन एवेति श्रुतौ प्रकारवाचिना इतिशब्देन समुच्चितत्वात् । तुल्या इति समानाकाराः ॥ ॥दोष इति ॥ ॥ भगवति विकारित्वरूपः कामे अनित्यत्वविकारत्वरूपश्चेत्यर्थः ॥ १४१ ॥ एवमिति । " उत्पद्यंते विलीयंते " इति मूलोक्तेनोत्पादविनाशशालित्वेनेत्यर्थः ॥ युक्तिमिति ॥ ॥ उत्पत्त्यादिस्वरूपविवेचकतर्करूपां नित्यत्वसाधिकामित्यर्थः ॥ आविरित्यादि ॥ ॥ आविः प्रकटं भावयति कारणांतःस्थं कार्यं बहिःप्रकटीकरोति या शक्तिर्निमित्तगतोपादानगता च सा आविर्भावशब्दवाच्येत्यर्थः ॥ सत्कार्यवादे शक्तस्य शक्यकरणांगीकारात्सा कारणगता । आविर्भवनं वा धर्म इति ॥ प्राकट्यरूपो धर्मः कार्यगतः स आविर्भाव इत्यर्थः ॥ तथा तिरोभवनम् । मुद्गरादिगता तिरोभाविका शक्तिर्घटादिगतं तिरोभवनं वा तिरोभावः ॥ एते शक्तित्वेन धर्मत्वेन च व्यवस्थाप्यमाना उक्ताश्चत्वारोपि भगवच्छक्तिद्वयावांतरभेदरूपत्वाद्भगवतः शक्ती इत्यर्थः ॥ एतेषां भगवच्छक्तित्वे प्रमाणं सूचयंत आहुः ॥ अनंतेत्यादि ॥ परास्य शक्तिर्विविधैव श्रूयत इति श्रुतेरित्यर्थः ॥ कारणगतशक्तीनां भगवच्छक्तित्वसाधनाय विपक्षबाधनाय च कारणे शक्तिसाधकं तर्कमाहुः ॥ ॥ अन्यथेत्यादि ॥ ॥ यदि कारणसामान्ये कार्यजननानुकूला तत्तत्कारणविशेषे तत्तदाकारककार्यादिजननानुकूला च शक्तिर्न स्यात्तदा तथेत्यर्थः ॥ अत्रैतद्बोध्यम् ॥ ॥ कार्यस्य नियतावधिकत्वदर्शनात्प्रागभावस्य च पूर्वं दूषितत्वात्सत्कार्यवादस्य शिष्टादृतत्वम्॥तत्र प्रथमपक्षे तंतुतुरीवेमादिभ्यः पटोत्पत्त्या।मृद्दंडचक्रादिभ्यश्च घटोत्पत्त्या तस्य तत्तज्जनने शक्तिर्निश्चीयते । सा च न स्वभावो नापि स्वरूपम् ॥ तथासति तस्य सार्वदिकत्वात् । शीर्णेभ्योऽपि तंत्वादिभ्यः पटाद्युत्पत्तिः स्यात् । भर्जिताद्बीजादप्यंकुरोत्पत्तिः स्यात्

मणिसमवधानेपि वह्निस्तृणादिकं दह्येत । स्वभावस्यानपायित्वात् । स्वरूपस्य च सत्वात् । अतः सा कालेन भर्जनेन च नाश्या मणिसमवधानप्रतिबध्या च काचित्स्वभावात्स्वरूपाच्चातिरिक्तैवांगीकार्या। ननु तंत्वादीनामविशीर्णत्वेन बीजानामप्यभर्जितत्वेन रूपेणैव कार्यजननदर्शनाद्रूपभेदमात्रांगीकारेण निर्वाहेऽतिरिक्तशक्तिकल्पनं गुरुभूतम्॥एवं वह्निस्थलेऽपि मणेः प्रतिबंधकत्वेन तदभावस्य प्रतिबन्धकाभावरूत्वात्तस्य सहकारित्वेन निर्वाहाच्च ज्ञेयम् । यदि च प्रतिबंधकत्वं नाम कारणीभूताभावप्रतियोगित्वं तदभावस्य च कारणत्वमिति कल्पनाद्वयात् । गौरवं विभाव्यते तदा शक्तिकारणतावादेपि शक्त्यंतरेण स्वरूपतः केवलायास्तस्याः कारणत्वादर्शनात्प्रतिबंधकत्वस्य च केनचिद्रूपेण भवतापि कल्पनीयत्वात् । कल्पनाद्वयं भवतोऽप्यापतीति तौल्यमेव । वस्तुतस्तु न मण्यादीनां प्रतिबंधकत्वं नवा तदभावस्य कारणत्वं किंतूत्तेजकाभावविशिष्टमण्यभावकल्पनाऽजागलस्तनप्रायैवेति चेत् ॥ नेदं युक्तं वक्तुम् ॥ गुरुशरीरतादृक्कारणस्वरूपप्रवेशेन गुरुभूतस्य तादृक्कार्यकारणस्य कल्पनापेक्षया श्रुत्यनुगृहीतस्यातिरिक्तशक्तिकल्पनस्यैव वरीयस्त्वात् । किमत्र गुरुत्वमिति चेत् । उच्यते ॥ मण्याभावस्य प्रतिबंधकाभावत्वेन प्रवेशे प्रतिबंधकस्य च पूर्वोक्तलक्षणकत्वेऽत्रापि कार्यकारणभावद्वयकल्पनात्रापयाति विसामग्रीहेतुत्वं प्रतिबंधकत्वमिति लक्षणकत्वे कल्पनाद्वयाच्चौल्यं वस्तुतस्त्वभावप्रवेशादत्रापि गौरवप्रतिपत्तेः ॥ तथासति शरीरगौरवस्याजागलस्तनप्रायतैव मण्यभावत्वेन प्रवेशे तु नानाकार्यकारणभावकल्पनाऽत्यन्तमेव गुर्वी मंत्रौषधादिनापि दाहाभावदर्शनात् । एवमुत्तेजकानामपि नानात्वाच्चतत्स्वरूपेण प्रवेशे ततोऽप्यत्यंतगौरवम्॥यत्किंचित्त्वेन प्रवेशे यावत्तदभावविशिष्टमण्यभावविशिष्टस्य वह्नेर्दाहंप्रत्यकारणत्वाच्चतो दाहाभावापत्तिः । तथैव यावत्त्वेन प्रवेशेपि यत्किंचिद्वैशिष्ट्ये ॥ तथा । यथाकथंचित्त्वेन प्रवेशेऽपि तादृशकार्यकारणभावज्ञानस्योत्तेजकतदभावमणितदभावतत्तद्वैशिष्ट्यज्ञानाधीनतया तादृशगुरुशरीरकरणतास्वरूपज्ञानस्यैव दौर्घट्यमिति तदपेक्षया शक्तिकल्पनमेव सौकर्यान्न्यायः । बीजानामप्यभर्जितत्वेनैव रूपेण नाकारणता । दावदग्धवेत्रबीजेभ्यः कदलीकांडजननस्य भामतीनिबंधे प्रदर्शितत्वात् । अतस्तत्रापि काचिच्छक्तिर्भर्जनेन नाश्यत अपरा आधीयत इति मंतव्यम् । किंच ॥ कार्यकारणभावपक्षेपि प्रसिद्धरूपातिरिक्तं रूपांतरं तूत्पादविनाशशालिकल्पनीयमेवेति नाम्न्येव कलहः । पर्यवस्यति । ननु स्वरूपे इति मुधैवायमाग्रह इति दिक् । एवं सिद्धायां शक्तौ बीजादिपरिणामस्थलेपि सैव मंतव्या ताश्च सर्वत्र भगवत एव मयूराश्चित्रितायेनेत्यादिवाक्यात् । परास्य शक्तिरिति श्रुत्यनुगृहीतत्वाच्च भगवतैव परं तत्र तत्र

कार्यार्थं प्रजायेयेतीच्छया विभज्य स्थापिताः ॥ विश्लिष्टशक्तिर्बहुधेव भातीत्यादिवाक्यात्तदाहुः ॥ तस्मादित्यादि ॥ ॥ एवं प्रथमपक्षे कारणत्वं व्यवस्थापितम् ॥ अथ द्वितीयपक्षे कथं मृद्दंडादिषु घटादिकारणत्वव्यवहार इत्याकांक्षायामाहुः ॥ धर्मादित्यादि ॥ ॥ तदिदं व्याकुर्वंति प्रभवः ॥ अत्रेदमित्यादि ॥ ॥ धर्मादिति ॥ भगवद्धर्मात् ॥ कारणमिति ॥ ॥ आविर्भावजनकत्वात् । घटादिकारणं तथा च दंडमृदादिषु घटादिकारणत्वव्यवहारो भ्रान्त एव नतु तात्विकः ॥ पदार्थमात्रस्य नित्यत्वादित्यर्थः ॥ एवमनेन पक्षेण सांख्योक्ताविर्भावतिरोभाववादस्याप्यैकदेशित्वं बोधितम् ॥ उक्तं दृढीकर्तुं प्रतिबंदीमवतारयंति ॥ नन्वित्यादि ॥ ॥ मूले—अन्यथेत्यादि ॥ ॥ अन्यथा धर्माधर्मसिद्धिमनुपगम्य उत्पत्तिपक्षे धर्मिणोऽप्युत्पत्त्यंगीकारे दोषः । उत्पत्तेरुत्पत्त्यंतरानंगीकारात्तस्याः प्राप्तेः नित्यत्वे घटादिपदार्थानिर्वाच्यत्वरूपो दोषस्तुल्यः । वादिप्रतिवादिनोः समः । तथा च साम्यादेव न वयं पर्यनुयोगार्हा इत्यर्थः ॥ प्रतिबंदींव्युत्पादयंति ॥ उत्पत्तिरित्यादि ॥ ॥ अयमर्थः ॥ ॥ उत्पत्तिर्नाम किं प्रागभाव उत कश्चिद्धर्मः । तत्र नाद्यः । तस्य घटपूर्वकालवर्त्तित्वेन इदानीं घटोत्पत्तिरस्तीति प्रत्ययोभिलापश्च स्यात् । कोशादौ तयोः पर्यायता चोच्येत । द्वितीयश्चेत्तस्य साधारत्वनियमादुत्पत्तिदशायामपि धर्मे वाच्य एव॥ अन्यथा स कस्मिन्धर्मिणि भवेत् । नच यथा दशदिनानि व्यतीयुः षड्भिरहोभिर्गन्तासीत्यादौ भूतभाविषु दिवसेष्वसत्स्वपि दशत्वषट्त्वसंख्यारूपो धर्म उपेयते तथोत्पत्तिरप्यनुत्पन्नघटाद्याधाराभ्युपेयेति वाच्यम् ॥ तेषामपि कालचक्रे सूर्यपरिस्यन्दवशेन तत्तद्वत्सरर्त्तुमासपक्षगततया पुनःपुनः परिवर्त्तमानानां सतामेव संस्कारादिनोपनये तत्रापेक्षाबुद्ध्या संख्याकल्पनस्य शक्यत्वेऽप्युत्पत्तेरकाल्पनिकत्वेनात्र तथावक्तुमशक्यत्वात् । अथ तत्रापेक्षाबुद्ध्या संख्या जन्यत एव नकल्प्यत इति चेत् ॥ न समवायिनं विना केवलनिमित्तेन कार्यजननस्य क्वाप्यसिद्धित्वेनात्र तथावक्तुमशक्यत्वात् । चिंतामण्यादौ निरुपादानकदधिवसनसुवर्णादिजननं सिद्धमिति चेत् । न अविक्रियमाणानां तेषामेवोपादानत्वात् ॥ योगित्वसामर्थ्यविशेषेण दध्यादिजनकभूतभेदाकर्षणस्य तत्र वक्तुं शक्यत्वाच्च । अनुपादानकसृष्ट्यंगीकारे समवाय्यसमावायिनिमित्तजन्यत्वं सर्वस्येति नैयायकादिसिद्धांतहानेश्च । किंच । जन्यत इति पक्षेपि संख्यादिवदुत्पत्तेरप्युत्पत्तिः स्वीकार्या । एवंसति निःप्रमाणकानवस्थापत्तिस्तत्तत्करणादिकल्पनागौरवग्रासश्च ॥ उत्पत्तिर्जानेत्यादि ॥ प्रत्ययानुरोधादुत्पत्तेरुत्पत्तिमंगीकृत्य विशेषाणां स्वतो व्यावर्त्तकत्ववत्परिसमाप्तौ तु तावतैव

निर्वाहाद्धर्मिण उत्पत्त्यंगीकारोऽजागलस्तनप्राय एव । अनेकतत्प्रागभावध्वंसादि-कल्पनाग्रस्तश्चेत्यनादरणीय एव । एवमेव वर्त्तमानप्रागभावप्रतियोगित्वमुत्पत्ति-रित्यप्यसंगतम् ॥ प्रागभावस्य पूर्वं दूषितत्वेन तस्यैवाभात् ॥ प्रतियोगित्वस्य स्व-रूपसंबंधविशेषत्वेन स्वरूपद्वयात्मकत्वात् ॥ घटस्वरूपस्य तदानीमभावेन तस्य वक्तुमशक्यत्वाच्च । ननु भाविनां सत्तामादाय तत्र प्रतियोगित्वमुच्यत इतिचेत् । न धर्मिणस्तदानीमसत्वेन भाविन्याः सत्ताया अनिश्चयात्तथावक्तुमशक्यत्वात् ॥ सूक्ष्मरूपेण वर्तमानामेव सत्तामादायोच्यत इत्यस्यापि वक्तुं शक्यत्वाच्च । नापि प्रथमसमयवर्त्तिभावविकारत्वं तत् ॥ तस्य कालनिष्ठत्वे उत्पद्यंते काल इति प्रतीत्यापत्तेः । भावनिष्ठत्वे तस्य भावस्यापि तदानीं सत्वापातेन भट्टकुटीप्रभा-तात् ॥ आद्यक्षणसंबंधः सेतिचेत्तदापि संबंधघटकतया घटादिसत्ता आवश्यकैव तदेतद्धृदि कृत्वोक्तम् ॥ अतो यः कश्चिन्निरूप्यतामित्यादि ॥ एवमुत्पत्तेः पूर्वं धर्मिसत्तां साधयित्वा प्रतिबंदेरनुत्तरत्वाद्धर्मिनित्यत्वसाधनायानित्यत्वबाधकं तर्कमाहुः ॥ घटोभवतीत्यादि ॥ ॥ अत्रापादकमनुक्तमेव सिद्ध्यतीति यदि घ-टः सदा सन्न स्यादिति कंठतो नोक्तम् ॥ क्रियाश्रयत्वस्य कर्तृत्वेन भवन-क्रियाश्रये घट एवाख्याताभिहिते लडर्थकालस्य समानपदोपात्तत्वेनान्वया-त्तदानीं घटानंगीकारे तदनन्वयापत्त्यनुपपन्नः स्यादित्यर्थः । नच कालान्वय-स्य समानपदोपात्ते व्यापारेऽपि शक्यवचनत्वान्नानुपपत्तिः प्रयोगस्येति वाच्यम् । एवमप्याश्रयवर्त्तमानत्वमंतरेण व्यापारवर्त्तमानताया अनुपपद्यमानत्वेन घटसत्ता-या अनुक्तसिद्धत्वात् । पदांतरोपात्तफलान्वयपक्षेपि सत्तारूपस्य फलस्य धर्म-त्वेन धर्मिणं विना तदसिद्ध्या तदा धर्मिसत्ताया अर्थादेव सिद्धेः । नचैवं सत्युत्प-न्नेपि घटे उत्पद्यत इति प्रयोगापत्तिः कालान्वितस्य कर्त्तुः सत्वादिति वाच्यं फलं द्वारीकृत्यैवान्वयांगीकाराद्युत्पत्तिरूपे फले तिरोहिते द्वाराभावेन कालान्वया-भावात्तादृशप्रयोगस्यानायासेन सिद्धेः। ननु घटो भवतीत्यादौ भवतिरुत्पत्त्यर्थक इतिचेत् तत्राहुः ॥ ॥ भूसत्तायामित्यादि ॥ ॥ फलितमाहुः ॥ अत इत्यादि ॥ स-र्वश्रुतेरिति इदं सर्वं यदयमात्मा सर्वं खल्विदं ब्रह्मेत्यादिश्रुतेः।तथाचैवं श्रुत्यनुकूला-भिर्युक्तिभिर्धर्मिनित्यत्वे सिद्धे प्रतिबिंबादेरप्यत्रोत्तरत्वमेवेत्यर्थः ॥ ननु भवतु धर्मी सदातनस्तथापि व्यवहारसिद्ध्यर्थं धर्माद्धर्मसिद्धिस्त्वंगीकृतैवेति धर्मस्योत्पत्त्यादि-भिरनित्यत्वेनाभगवत्वात्सर्वश्रुतिपीडा तु नापैतीत्यत आहुः ॥ ॥ तदन्वित्यादि ॥ अयमर्थः । निमित्तकारणत्वेनाभिमतेषु कार्यत्वेनाभिमतस्याविर्भाविका या भ-गवच्छक्तिस्तया समवायित्वेनाभिमते दुर्ज्ञेयरूपेण विद्यमानमेव कार्यं आविर्भा-

व्यते स आविर्भाव उत्पत्तिरित्युच्यते । तत्संसर्गेण कार्यस्योत्पत्तिमत्वम् । तत्र निमित्तसामग्रीकोटौ प्रविष्टस्य क्षणाख्यस्य कालावयवस्य सूर्यपरिस्यंदांतरेण तिरोभावे तद्विशिष्टानुत्पत्तिरपि विशेषणतिरोभावात्तिरोहितेति उत्पन्ने कार्ये उत्पद्यते इति न व्यवहारः ॥ सूर्यपरिस्यंदतिरोभावश्चेश्वरेच्छामर्यादया 'भीषोदेति-सूर्य' इत्यादिश्रुतेः । तस्या अपि यद्यपि नित्यत्वं तथापि तदाकारः श्रुत्यविरोधेन तथा कार्यबलात्कल्पः स एव विद्वन्मंडने प्रदर्शित इति न व्यवहारानुपपत्तिर्न वा धर्मानित्यता । द्वितीयपक्षेतु वक्ष्यमाणरीतिकभगवदिच्छयैव तथा । तदेतदुक्तं धर्माणामपि तेनैव न्यायेन भगवत्वं सेत्स्यतीति । तथाच न सर्वश्रुतिपीडेत्यर्थः ॥ एवं च प्रथमसमयमात्रसंसर्गीभावविकार उत्पत्तिरिति पक्षो निरस्तः । तेन गौडवार्त्तिकोक्ताः सत्कार्यवाददोषा अपि विकारानंगीकारादेव परिहृताः ॥ अतएव च श्रुतिर्विकारस्य वाचारंभणतां वक्ति नतु वस्तुनो मिथ्यात्वम् ॥ तथा प्रतीत्यभावोऽन्यथाप्रतीतिश्चाविद्यावलेपादिति नकाचिदनुपपत्तिः । तदेतद्धृदि कृत्वाहुः ॥ अतो भ्रांतानामित्यादि ॥ ॥ भ्रांताः श्रुतिसंसर्गरहिता नैयायिकाद्याः । बालाः श्रुतिमनुसरंतोऽपि तात्पर्यज्ञानरहिता मायावादिप्रभृतयः । आद्याः शब्दोल्लंघनकर्त्तारः । द्वितीया अर्थस्य । अतो नदूषयाम इत्युपहासः ॥ आविर्भावे प्रयोजनमाहुः ॥ ॥ सुरेत्यादि ॥ ॥ सर्ववस्तुस्वरूपेणेति विद्यमानस्येति शेषः ॥ ॥ तदुद्गम इति ॥ तेनतेन प्रतिनियतस्वरूपेण दर्शनविषयात्वयोग्यतेत्यर्थः ॥ नन्वेवमपि सर्वश्रुतिविरोधो नापैति । भगवत आनंदरूपत्वेन दुःखे व्यभिचारादित्यत आहुः ॥ ॥ दुःखं त्वित्यादि ॥ ॥ तथा च यथा आविर्भावस्य फलं निर्वृतिस्तथा तिरोभावस्य फलं निर्वृतितिरोभाव इति तेन रूपेण तस्यापि भगवदभिन्नत्वान्न भगवत्वव्यभिचार इत्यर्थः ॥ एवं सर्वस्य पदार्थजातस्य वास्तवं स्वरूपं सोपपत्तिकं निरूपितम् ॥ १४२ ॥

व्रजभाषाटीका ।

(सुखदुःखसमुत्पत्तिरिति) सत्वगुणके बढवे घटवेसों जाको (तरतमभाव) अर्थात् बढनों घटनों होवे ऐसी जो अंतःकरणकी वृत्ति वासों लौकिक सुख कहेहैं । ऐसेंही तमोगुणके बढवे घटघटवेसों तरतमभाववाली अंतःकरणकी वृत्ति लौकिकदुःख कहावे हैं इन वृत्तिरूप सुखदुःखनकी उत्पत्ति तो परमतवालेभी माने हैं तासों यामें विवाद नहीं । नैयायकादिक ब्रह्ममें सुख नहीं माने हैं

तासों ब्रह्मसुखकी भी कोई उत्पत्ति मानले ताको निरास करे है (ब्रह्मसुखात्पृथगिति) ब्रह्मसुखसों लौकिक सुख न्यारो है ब्रह्मसुख उत्पत्तिवालो नहिं है ॥ ऐसेंही अविद्याके उपासक जे असुर हैं उनको अंधतममें प्रवेश होवै है नित्य जो ब्रह्मानंदहै वाके तिरोभावसोंही अंधतम कहे हैं नित्यानन्द तिरोभावरूपहै ताहीसों उत्पत्तिरहित होयवेके कारणसों वह नित्यहै अर्थात् असुरनकूं अन्धतमप्रवेश सदाही रह्यो आवेहै ऐसेंही लज्जा इच्छा द्वेष प्रयत्न प्रीति आदि जे भगवद्धर्मसों जुदे मनके धर्म हैं उनकी उत्पत्ति होवेहै यद्यपि भगवान्के धर्म इच्छादिक तथा मनके धर्म इच्छादिक (तुल्य) इकसारही मालुम पडे हैं तथापि उनको समान नहिं समुझनो कपूर और कपास दोनो एकसे सफेदहैं तथापि बुद्धिवान् पुरुष इनकूं एक नहिं मानेहैं ऐसेंही भगवान्के धर्म जे इच्छा आदि हैं वे नित्यहैं भगवद्रूप हैं मनके धर्म जे इच्छा द्वेषादिक हैं वे कार्यरूपहैं अनित्यहैं तहां कितनेक ऐसी शंका करेहैं (सोऽकामयत) या श्रुतिमें बहुतरूप होयवेके लिये भगवान् इच्छा (कामना) करते भये ऐसो लिख्योहै सो कैसे बनसकै इच्छा तो बिकारहै तथा अनित्य पदार्थहै जो भगवान् इच्छा करतेहोय तो भगवानभी इच्छावाले होयवेसों विकारी भये इत्यादि शंका करे हैं ताकोभी यहही समाधानहै । अर्थात् भगवान्के धर्म इच्छा आदिकहैं वे लौकिक कार्यरूप अनित्य धर्मनसों न्यारे हैं तथा नित्यहैं भगवद्रूपहैं याप्रकारही अवतारादिकमेंभी इच्छा प्रीति लज्जा आदि धर्म हैं वेभी नित्य अविकारी आविर्भावतिरोभाववाले नित्यहीहैं याप्रकार सब पदार्थनकी उत्पत्ति लयवाले होयवेके कारणसों तुल्यता बतायके घटपटादिक (घडा वस्त्र) सब पदार्थ ब्रह्मरूप हैं तासों नित्यहैं यह

बात सिद्ध करवेके लिये उत्पत्ति नाशादिकनके स्वरूपको निर्णय करवेवारी युक्तिकूँ आज्ञा करैहै (आविर्भावतिरोभावाविति) करणस्थित जो कार्य ताकूँ कारणसों बाहिर प्रकटकरवेवारी जो निमित्तकारण तथा उपादान कारणमें रहवेवारी शक्ति तासों आविर्भाव कहे है ऐसेंही तिरोभाव करवेवारी जो शक्ति सो तिरोभावशक्ति कहावे हैं अथवा कार्यमें जो प्रकटहोयवेकी सामर्थ्य है वो आविर्भाव कहावेहै तथा कार्यमें जो तिरोभूतहोयवेकी सामर्थ्य है वो तिरोभाव कहावेहै ये दोनों भगवान्की शक्ती हैं (परास्य शक्तिः) इत्यादिश्रुतिनमें भगवान्कूँ अनन्तशक्तिवाले वर्णन कियेहैं । यदि कारणमें आविर्भाव शक्ति नहिं होय तो बीज वृक्षरूप कैसे होजावेहै तथा वीर्य देहरूप कैसे होजावेहै तासों उनउन बीजवीर्यादि कारणमें रहवेवारी अपनें अपनें कारणकेही आकारके कार्यकूं प्रगट करवेवारी भगवान्की आविर्भावशक्ति जरूर माननी वहही शक्ति वीर्यादिकनकूँ देहादि रूपकरके परिणामकरवेमें कारण है यामें श्रीभागवत एकादशस्कंधमें " शक्तिभिर्दुर्विभाव्यभी रचितावयवा हरेः । " इत्यादिवचन भी प्रमाणहैं दूसरे पक्षमें प्रगट होनो तथा तिरोहित होनो आविर्भाव तिरोभाव शब्दनको अर्थ होयहै ये दोनो धर्म घटादिकार्यमें रहे हैं घटादिकनके प्रति आविर्भाव धर्मही कारणहै ये दोनो भगवच्छक्तिहैं तासों नित्यहैं और घटादि पदार्थभी नित्यही हैं उनके आश्रयही ये दोनो धर्म रहे आवेहैं । तहाँ आविर्भाव तिरोभाव नित्यहै तो सदाही घटादिकनके आविर्भाव तिरोभाव होतेरहनो चाहिये ऐसी शंका नहिं करनी क्योंकि जैसे आविर्भाव तिरोभावशक्तिहै तैसें भगवान्की इच्छाशक्तिभी सब शक्तिनसों प्रबलशक्ति है तासों भगवान्की इच्छासहितही आविर्भाव तिरोभावशक्ति पदार्थनको

प्राकट्य तथा तिरोधान करसकैहै तथा उत्पत्ति मानवेवारेनके मतमैंभी उत्पत्ति धर्म कोन धर्मीमें रहे हैं तासों धर्मीकूँ नित्य माननो और उत्पत्तिकी उत्पत्ति तथा वाकी उत्पत्ति मानवेरूप अनवस्था दोषभी उनके मतमैं आवेहैं किंच घटादिधर्मीपदार्थ-नकूं नित्य नहीं मानेंगे तो घट नष्टहै घट उत्पन्न नहिं भयो है घट होवेहै इत्यादि व्यवहारभी नहिं बनसकेंगे क्योंकि उत्पन्न नहिं भयो तथा फूट्योभयो जो घडा वाकूँ फूट्यो ऐसेंही कहस-केंगे फूट्यो भयो घडाहै ऐसें नहिं कहसकेंगे तासों जा समयमें घडा उत्पन्न नहिं भयो अथवा फूटगयो वा समयमें भी कारणमें छिप्यो भयो घडा जरूर रहेहै तासों धर्मीकूं सनातनही समुझनो धर्मी है सो भगवान्ही है उन सिवाय धर्मी और नित्य नहीं होय सकेहैं तथा दियासों दियाको उजियाला अलग नहिं होय स-केहै तैसें धर्मभी धर्मी सों जुदो नहिं है तासों धर्मभी भगवान्कोही रूप है या प्रकार सर्व जगत् भगवद्रूपहै तथा कारणरूप करके नित्यहै तासों भ्रमवाले बालकनकी विचारकरवेकी सामर्थ्य नहिं है तासों शब्दार्थको उल्लंघन करके मनमाने उत्पत्ति नाश पदके अर्थ करेहै तासों उनके मतमें हम दूषणभी नहिं देहैं जैसे पापरूप मुरदैत्यकूँ दूरकरके मुरारि नामसों प्रसिद्ध भये ऐसेंही सर्वत्र जगतमें प्राप्तभये अनित्यत्वादि दोषनकूं दूरकरवेके लिये सब पदार्थनके स्वरूप धारणकरके भगवान् प्रगट होयके सर्वात्मा सर्व रूप कहावेहै ॥ १४० ॥ १४१ ॥ १४२ ॥

भक्त्यात्वाद्यो द्वितीयस्तु तदभावाद्धरौसदा ।
सर्वाकारस्वरूपेण भविष्यामीति या हरेः१४३
वीक्षा यथा यतो येन तथा प्रादुर्भवत्यजः ।

मृदादिभगवद्रूपं घटाद्याकारसंयुतम् ॥ १४४ ॥

तत्त्वदीपप्रकाशः ।

एवं सति सर्वसाधनवैयर्थ्यमाशंक्य शक्तिद्वयस्य तदधीनत्वं वक्तुमादित आरभ्य निरूपयति ॥ भक्त्यात्वाद्य इति ॥ भक्त्यैव भगवानाविर्भवति । तच्च यस्य भक्त्याविर्भावः सा भक्तिर्यादृशी देशकालयुक्ता तत्तिरोभावे तिरोभवति नत्ववतारेष्वप्यन्यः प्रकार इत्यर्थः ॥ अन्येष्वाह ॥ सर्वाकारस्वरूपेणेति ॥ तत्तदाकारस्वरूपेण घटपटाद्याकारेण यस्मिन् देशे येन प्रकारेण येन साधनेन यथाविर्भावेच्छा तथा सर्वं संपाद्याविर्भवतीत्यर्थः ॥ तत्र निदर्शनमाह ॥ मृदादीति ॥ मृदि घटादयो यावंतो भविष्यंति ते सर्वे कारणत्वेन वर्तंत इत्यंगीकर्तव्यम् । अन्यथा ततः प्रादुर्भावो नोपपद्येत तथा सामर्थ्यं भगवत्त्वेन संगच्छते अतो मृदादिकं भगवद्रूपमेव । घटादिकार्यं च तत्रैव लीनं तिष्ठति । तदपि भगवद्रूपं प्रपंचस्थानीयम् ॥ १४३ ॥ १४४ ॥

आवरणभंगः ।

एवं सतीत्यादि ॥ ॥ एवंसति यथा भगवतस्तत्र तदभावजदोषनिवृत्त्यर्थं प्रनाड्या अरण्यानीषु नानानोकहादिरूपेणाविर्भाव एवं दुःखनिवृत्त्यर्थमपि कयाचित्प्रणाड्या मूलरूपेणाप्याविर्भावस्य शक्यवचनत्वे सति सर्वसाधनवैयर्थ्यमाशंक्य दोषभावार्थं बुद्धिपूर्वकं तत्साधनानां कर्मज्ञानभक्तिप्रभृतीनां वैयर्थ्यं जलाहरणार्थं बुद्धिपूर्वं घटादिग्रहणस्याऽपि वैयर्थ्यमिति शास्त्रेऽपि तन्नोपदिश्येत । लोकेपि तत्तथा नगृह्येतेति नायं पक्षः साधीयानित्याशंक्य शक्तिद्वयस्य आविर्भावकतिरोभावकशक्त्योराविर्भावतिरोभावयोश्च तदधीनत्वं भगवदधीनत्वं वक्तुमादित आरभ्य भगवदाविर्भावादिकं पूर्वावधीकृत्य अंत्यावयवपर्यंतमाविर्भावतिरोभावौ निरूपयति सार्द्धद्वयेन समादधानः कथयतीत्यर्थः ॥ तत्र पूर्वं मूलरूपाविर्भावतिरोभावयोः प्रनाडीमाहुः ॥ ॥ भक्तेत्यादि ॥ ॥ एवकारेण द्वारांतरं निराक्रियते "भक्त्याहमेकया ग्राह्य" इति । "भक्त्या मामभिजानाति" इति । किंबहुना एकादशस्कंधे स्वाविर्भावो भक्त्यैव तत्रतत्र प्रतिपादितः । तर्हि भक्त्या आविर्भूतः कुतः सर्वदा नतिष्ठतीत्याकांक्षायां तत्रापि विशेषं फलेनाहुः ॥ तच्चेत्यादि ॥

॥ तच्चेत्याविर्भवनम् । तथाच भगवति प्राकट्यरूपो वाविर्भावशक्तिरिति न कालतिरोभावे तस्यास्तिरोभावः । किंतु भक्त्यैवेति तस्या विशेषणवैसादृश्ये बहिस्तिरोभवति हृद्येव प्रकटोभवति चेतसो वृत्त्यंतरे जाते भक्तिः संस्कारवत्सूक्ष्मरूपेण तिष्ठति तदा ततास्तिरोभवतीत्यर्थः॥ इदमेव पंचाध्याय्यामात्मा यावत्प्रपन्नोभूदिति कारिकया निरूपितं ज्ञेयम् । नन्ववतारेषु कालेनाविर्भावतिरोभावौ दृश्येत इति नायंनियम इत्याकांक्षायामुक्तस्य तात्पर्यकथनमुखेनाहुः॥ ॥ नत्वित्यादि ॥ ॥ तथा च धर्मग्लानिनिवृत्तयेऽसुरहतयेपि कार्यांतरायापि यदा प्रादुर्भावस्तदापि वचनानां बलेन भक्तिरेवाभिव्यंजिकावधेया यथा भगवतो नृकेसरिणः प्रादुर्भावे प्रल्हादस्य । अतएवोद्धवैः"स्वाशांतरूपेष्वितरैः स्वरूपैरभ्यर्द्यमानेष्वनुकंपितात्मा । परावरेशो महदंशयुक्तो ह्यजोपि जातो भगवान् यथाग्निः " इत्यत्र प्रपन्नेर्पिता कृपैवावतारहेतुत्वेनोक्तेत्याद्यनुसंधेयम् । तथाचासुरव्यामोहेपि भूमिमातृत्रिविधभक्तनिष्ठभक्तितिरोभाव एव हेतुरित्यपि बोध्यम् । एवं मूलरूपाद्याविर्भावतिरोभावौ समर्थयित्वा कार्यरूपस्य तौ वक्तुमाहुः॥ ॥अन्येष्वित्यादि ॥ अर्थो निगदव्याख्यात एव साधनसोपानकोटावदृष्टादेरपि प्रवेशेन जीवाविर्भावतिरोभावावप्युक्तप्रायौ ज्ञेयौ । उपादानगतां शक्तिमुपादेयेपि बोधयितुं तादात्म्यसंबंधेन कार्यांतरानाधारत्वमेव कार्यस्योत्तरावधित्वप्रयोजकं रूपमिति बोधयितुं चाहुः॥ ॥ तत्रेत्यादि ॥ ॥ अर्थस्तु स्पष्ट एव ॥ १४३ ॥ १४४ ॥

व्रजभाषाटीका ।

आविर्भाव तिरोभाव स्वतःही सब पदार्थनके होते रहेहैं तब तो भगवान्‌को भी आविर्भाव स्वतःही होयजायगो तथा लौकिक कार्यकोभी आविर्भाव होयजायगो फिर शास्त्रमें लौकिक अलौकिक साधन क्यों वर्णन किये या शंकाकूँ दूरकरतेभये आविर्भाव तिरोभाव भगवान्‌के आधीनहैं यह बात सिद्धकरतेभये भगवान्‌के आविर्भाव तिरोभावसों लेके जितनें पदार्थहैं उनके आविर्भाव तिरोभावको निरूपण करेहैं तहां मूलभूत आविर्भावतिरोभावकी प्रनाडी दिखावैहै (भक्त्यात्वाद्य इति) भगवान्‌को आविर्भाव भक्तिसों है वह भक्ति जैसे देश काल भक्तिके अनुकूल है वैसे देश काल सहित होय तब वासों भगवान्‌को आविर्भाव होय वाके तिरोभावमें भगवान् तिरोहित होजावेहै देशकाल भक्तिके अनुकूल

नहिं होय तो बाहिरसों तिरोभावहोयकें हृदयमें आविर्भाव होय-जाय धर्मकी रक्षा करवेकेलिये असुर मारवेकेलिये भगवान् प्रकट होवे है तबभी भक्तिकरकें ही होवेहै जैसे हिरण्यकशिपुकूँ मारवेके-लिये नृसिंहजी को आविर्भाव प्रल्हादजीकी भक्तिकरकेंही भयो ॥ ॥१४३॥ ऐसेंही और पदार्थनमें आविर्भाव तिरोभावको भी वर्णन करेहैं जा जा आकार करकें अर्थात् घटपटआदि आकारकरके जा देशमें जा प्रकारकरके जा साधन करकें प्रकट होयवेकी भगवा-न्की इच्छा होयहै वैसे सब साधनकूँ सिद्धकरकें उनके द्वारा आप प्रकट होवेहैं तहां दृष्टान्त देतेहैं । जैसें मृत्तिकासों घटको आविर्भाव होयहै अर्थात् मृत्तिकामें जितने घडा उत्पन्न होयवेवारेहैं वे सब कारणताकरिकें मृत्तिकामें विद्यमानहैं यह माननो आवश्यकहै यदि ऐसें नहीं होय तो मृत्तिकासों घडानको उत्पन्न होनों नहिं बनसकेंगो मृत्तिका आदि कारणमें घटादिकार्यके प्रादुर्भाव करवेकी जो सामर्थ्य है सो कारणकूँ भगवद्रूप मानवेसों संगत होवेहै तासों मृत्तिका आदि पदार्थ भगवद्रूपही हैं घटादिकार्यभी मृत्तिकामें ही लीन रह्यो आवेहै वह घटादि कार्य भी प्रपञ्चस्थानीय भगवद्रूपहै॥

मूलेच्छातस्तथा तस्मिन्प्रादुर्भावो हरेस्तदा ।
तिरोभावस्तथैव स्याद्रूपांतरविभेदतः ॥१४५॥
वृद्धिर्विपरिणामश्च तथापक्षय एव च । पूर्वरू-
पतिरोभावो द्वितीयस्यादिमस्तथा ॥ १४६ ॥
उभावेकीकृतौ लोके वृद्ध्यादिभिरुदीरितौ ।
परिणामाधिक्यतश्च वैजात्यान्न्यूनभावतः १४७

तत्त्वदीपप्रकाशः ।

ततः किमत आह ॥ मूलेच्छात इति ॥ पुरुषोत्तमेच्छातः ॥ तथा ।

तथैवानुपूर्व्या कार्यरूपहरेरेव प्रादुर्भाव इत्यर्थः ॥ यथा नटः सहस्रं रूपाणि गृह्णाति क्रमशः । तथापि कटकमुकुटादयः । एवमाविर्भावं निरूप्य तिरोभावं निरूपयति ॥ **तिरोभाव इति** ॥ तिरोभविष्यामीति या इच्छा यथा येन तथा तत्र तिरोभवति । परं तत्र रूपांतराविर्भावावश्यकत्वम् । इयानेव भगवतः सकाशात्प्रपंचेपि विशेषः॥तत्र तिरोभावेन रूपांतराविर्भावः । दाहशोषादावपि रूपांतरमिति मतम् ॥ अथवा सर्वथा भगवता तुल्यतां वक्ष्यति चाग्रे । अखंडं कृष्णवत्सर्वमिति ॥ १ ४ ५॥वृद्ध्यादीनां स्वरूपमाह॥वृद्धिरितिद्वाभ्याम्॥वृद्धावग्रिमं रूपं परिमाणतोऽधिकम्॥अपक्षयेन्यूनं विपरिणामे विजातीमिति विशेषः १ ४ ६॥ १ ४ ७॥

आवरणभंगः ।

यथेत्यादि ॥ ॥ एतेन अज्ञातं नटवद्ब्रह्म कारणं शंकरोब्रवीदिति कल्पतरूक्तमनुमतं ज्ञेयम् ॥ ॥ तिर इत्यादि॥ ॥ तथा च तिरोभविष्यामीति मूलेच्छया कार्यनाशकत्वेनाभिमतेषु कार्यतिरोभाविका भगवच्छक्तिस्तथा बहिःस्थितं कार्यं कारणेंतर्भाव्यते स तिरोभावो नाशादिशब्दैरुच्यते तत्संसर्गेण कार्यस्य नश्वरत्वं तत्र नाशकसामग्रीकोटौ प्रविष्टस्य क्षणस्य तिरोभावे तद्विशिष्टो नाशोपि तिरोहित इति न नष्टे नश्यतीति व्यवहारः । वस्तुनि विकारानंगीकारादेव ननिवृत्तेश्वरमसमयसंसर्गिभावविकारत्वम् ॥ शेषं पूर्ववदेव ध्वंसस्याभावत्वं तु पूर्वमेव निरस्तं कार्यस्य लोके पुनरुन्मज्जनाभावस्तु तथेच्छाभावस्तु तथेच्छाभावात् । तस्यां सत्यपुनरुन्मज्जनमपि ॥ आश्रयवासिके तथोक्ते । तदेतद्विद्वन्मंडने विस्तृतमिति नकोपि शंकालेशः ॥ कार्यभगवत्तिरोभावयोर्विशेषं वक्तुमाहुः ॥ ॥परमित्यादि ॥ ॥ नियमव्यभिचारमाशंक्याहुः ॥ दाहेत्यादि ॥ ॥ एवं च यथा अनित्ये जननं नित्ये परिच्छिन्ने समागमः नित्यापरिच्छिन्नतनौ प्राकट्यं चेति सा त्रिधेत्याविर्भावशक्तिस्त्रिविधा तथा नाशनिर्गमाप्राकटयभेदेन तिरोभावशक्तिरपि त्रिविधा । तत्र जडे कालभेदेन त्रिविधेपि द्वे जीवे समागमोंतःप्रागट्यं निर्गमो बहिरप्राकट्यमिति देशभेदेन द्विविधे द्वे भगवतीत्येकविधे द्वे इति ज्ञेयम् । ननु विरुद्धधर्माश्रयत्ववदुत्तरोत्तरं ह्रासः । तस्याकारः कमलमुकुलवत् । अनयोस्तु तरुवत् ज्ञेयः । दाहादौ रूपांतरादर्शनादरुच्याधर्माद्धर्मसिद्धिपक्षं हृदि कृत्वा पक्षांतरमाहुः ॥ अथवेत्यादि ॥ ॥ १४५ ॥ वृद्ध्यादीनामित्यादि ॥ ॥ ननु षट्सु विकारेषु द्वयोः

कत्वाच्छ्लाघवाच्च त्वदुक्तरीतिकसत्वोत्कर्षापकर्षतारतम्यवती अंतःकरणवृत्तिरेव वैषयिकं सुखम् । साचोत्पत्तिमती भवताप्यंगीक्रियत एवेत्यतो न सा विवादास्पदमिति जानीहि । एवमेव वृत्तिरूपदुःखस्याप्युत्पत्तिर्ज्ञेया ॥१४०॥नैयायिकादयो ब्रह्मणि सुखं नाङ्गीकुर्वन्तीति ब्रह्मसुखस्याप्युत्पत्तिः संभाव्यत इति तन्निरासायाहुः ॥अंधंतमइत्यादि ॥"मामप्राप्यैव कौन्तेय ततो यांत्यधमां गतिम्" इति वाक्यात्।"अंधं तमः प्रविशंति"इति श्रुतेश्चासुराणामविद्योपासकानां तत्फलम् ॥ तस्य च नित्यानंदतिरोभावरूपत्वाद्नुत्पत्तिरहितत्वम् ॥ तदग्रे दुःखस्वरूपनिरूपणे व्याकरिष्यते । एवं मनोधर्म्माणां ज्ञानसुखादीनामुत्पत्तिं निरूप्य मनोधर्मांतरेपि तामतिदिशंति ॥ तथेत्यादि । ह्रीस्तु अकर्मणि जुगुप्सा । जुगुप्साह्रीरकर्मस्विति भगवता लक्षितत्वात् ॥ इच्छा अभिलाषरूपा प्रसिद्धैव ॥ आदिपदेन द्वेषयत्नप्रीतिप्रभृतयो नाना तु व्यवसायगम्या ज्ञेयाः॥ ह्रीधीभीरित्येतत्सर्वं मन एवेति श्रुतौ प्रकारवाचिना इतिशब्देन समुच्चितत्वात् । तुल्या इति समानाकाराः ॥ ॥दोष इति ॥ ॥ भगवति विकारित्वरूपः कामे अनित्यत्वविकारत्वरूपश्चेत्यर्थः ॥ १४१ ॥ एवमिति । " उत्पद्यंते विलीयंते " इति मूलोक्तेनोत्पादविनाशशालित्वेनेत्यर्थः ॥ युक्तिमिति ॥ ॥ उत्पत्त्यादिस्वरूपविवेचकतर्करूपां नित्यत्वसाधिकामित्यर्थः ॥ आविरित्यादि ॥ ॥ आविः प्रकटं भावयति कारणांतःस्थं कार्यं बहिःप्रकटीकरोति या शक्तिर्निमित्तगतोपादानगता च सा आविर्भावशब्दवाच्येत्यर्थः ॥ सत्कार्यवादे शक्तस्य शक्यकरणांगीकारात्सा कारणगता । आविर्भवनं वा धर्म इति ॥ प्राकट्यरूपो धर्मः कार्यगतः स आविर्भाव इत्यर्थः ॥ तथा तिरोभवनम् । मुद्गरादिगता तिरोभाविका शक्तिर्घटादिगतं तिरोभवनं वा तिरोभावः ॥ एते शक्तित्वेन धर्मत्वेन च व्यवस्थाप्यमाना उक्ताश्चत्वारोपि भगवच्छक्तिद्वयावांतरभेदरूपत्वाद्भगवतः शक्ती इत्यर्थः ॥ एतेषां भगवच्छक्तित्वे प्रमाणं सूचयंत आहुः ॥ अनंतेत्यादि ॥ परास्य शक्तिर्विविधैव श्रूयत इति श्रुतेरित्यर्थः ॥ कारणगतशक्तीनां भगवच्छक्तित्वसाधनाय विपक्षबाधनाय च कारणे शक्तिसाधकं तर्कमाहुः ॥ ॥ अन्यथेत्यादि ॥ ॥ यदि कारणसामान्ये कार्यजननानुकूला तत्तत्कारणविशेषे तत्तदाकारककार्यादिजननानुकूला च शक्तिर्न स्यात्तदा तथेत्यर्थः ॥ अत्रैतद्बोध्यम् ॥ ॥ कार्यस्य नियतावधिकत्वदर्शनात्प्रागभावस्य च पूर्वं दूषितत्वात्सत्कार्यवादस्य शिष्टादृतत्वम्॥तत्र प्रथमपक्षे तंतुतुरीवेमादिभ्यः पटोत्पत्त्या।मृद्दंडचक्रादिभ्यश्च घटोत्पत्त्या तस्य तत्तज्जनने शक्तिर्निश्चीयते । सा च न स्वभावो नापि स्वरूपम् ॥ तथासति तस्य सार्वदिकत्वात् । शीर्णेभ्योऽपि तंत्वादिभ्यः पटाद्युत्पत्तिः स्यात् । भर्जिताद्बीजादप्यंकुरोत्पत्तिः स्यात्

आश्चर्य होयहै तैसें यहांभी अंकुर दीखतोभयो ही थोडे कालमें वृक्ष दीखवेलगेहैं येही मूलरूप भगवानसों प्रपञ्चरूप भगवान्में विशेषताहै मूलरूपमें दूसरे रूपके आविर्भाव करवेकी आवश्यकता नहिं जहां तक भगवान् जगत्को बिस्तारकरनों चाहेहै तहां तांई पूर्वपूर्व रूपके तिरोभावके साथही दूसरे दूसरे रूपको आविर्भाव करते रहे है ऐसेंही जो बस्तु बलजावेहै दूसरो भस्मरूप प्रकट होजावै है लोकप्रतीति मानकरकें अनित्य जडवस्तुके आविर्भाव तिरोभाव उत्पत्ति नाश शब्दनकरकें कहेजावेहैं; नित्य परिच्छिन्न जीवके आविर्भाव तिरोभाव समागम निर्गम शब्दसों कहे जावे हैं नित्य अपरिच्छिन्न भगवदवतारके आविर्भाव तिरोभाव प्राकट्य तिरोधान शब्दकरकें कहेजावेहै अथवा या जगत्की भगवान्के साथ तुल्यता (अखण्डं कृष्णवत्सर्वम्) या श्लोकके व्याख्यानमें कहेंगे ॥ १४५ ॥ पहलीके रूपसों अधिक परिमाणवाले दूसरे रूपके आविर्भावकों (वृद्धि) बढनो कहे हैं पहले रूपके परिमाणसों न्यून परिमाणवाले दूसरे रूपके आविर्भावसों (ह्रास) घटनों कहे हैं पहलेरूपसों विलक्षण दूसरे रूपके आविर्भावकूँ (परिणाम) अर्थात् बदलजानो कहेहै जैसें दुग्धको दधिरूपसे परिणाम होजावे है याप्रकार (जायते, वर्द्धते, विपरिणमते) इत्यादि छ ६ भावबिकारभी आविर्भावतिरोभावनमें ही गतार्थ हैं १४६॥१४७

मनश्चान्नमयं वेदे तदस्माकमथापि वा । पोषितत्वात्तदन्नेन तद्रूपेणोपवर्ण्यते ॥ १४८ ॥ एवं सृष्टिप्रभेदेषु कल्पेषु च तथैव च ॥ प्रकारभेदा दोषाय न भवंति तदिच्छया ॥ १४९ ॥ इंद्रियाणां प्रमाणत्वं सत्वयोगान्न चान्यथा ॥ स-

त्वस्य तारतम्येन याथ्यार्थ्यं वस्तुनः स्फुरेत् ॥ १५० ॥ अतः प्रमाणगणना लोकेषु न विचार्यते । व्यवहारः सन्निपातो गुणानां स च लौकिकः ॥ १५१ ॥ शास्त्रसिद्धः पूर्वसिद्धः प्राणिमात्रस्य सर्वतः ॥ तस्य त्रिविधरूपत्वन्नामनामात्रेण सा प्रमा ॥ १५२ ॥

तत्त्वदीपप्रकाशः ।

एवं कार्यरूपं निरूप्य वेदविरोधपरिहारार्थमाह ॥मनश्चान्नमयमिति॥अन्नमयं हि सौम्य मन आपोमयः प्राणस्तेजोमयी वागिति श्रुतेः॥ अत्र चाहंकारकार्यत्वेन मनो निरूपितम् ॥ तत्र सिद्धांतद्वयं वेदनिरूपणप्रकारादवगम्यते तदाह ॥ तदस्माकमिति ॥ अथवा पंचदशोपवासाः कारिता इति । अन्नेन पोषणमेवाभिप्रेतम् ॥ १४८ ॥ एवं सर्वत्र प्रकारभेदे समाधानमतिदिशति ॥ एवमिति ॥ अनेकधा भगवान् कार्यं करोतीति सृष्टिभेदान्मुक्तत्वात्तथा वा समाधानम् ॥ १४९ ॥ एवं प्रमेयं निरूप्य प्रत्यक्षबाधनिराकरणार्थं लौकिकप्रत्यक्षादेरप्रमाणत्वमाह॥ इंद्रियाणाम् इति ॥सत्वसहिताबुद्धिः प्रमाणम्।सत्ववृद्धावंतःकरणं प्रमितिं जनयति । सत्वात्संजायते ज्ञानमिति । अन्यथा सत्त्वलये सैव सामग्री भ्रमं जनयति । अतोऽन्वयव्यतिरेकाभ्यां सत्वमेव प्रमाणं तत्कार्यमेव प्रामाणिकम् । रजस्तु व्यवहारिकम् । तमस्त्वप्रमाणमेव। अतोऽन्यमिश्रणे तारतम्येन वस्तुयाथात्म्यस्फुरणम्॥१५०॥ अतो लोकेषु चक्षुषः कदाचित्प्रामाण्यं कदाचिन्नेति । व्यवस्थाभावात् लोके न प्रमाणगणना। नैयायिकादिभिरिव नास्मादिभिः कृता। व्यवहारार्थं कर्त्तव्येतिचेत् नेत्याह ॥ व्यवहारः सन्निपात इति ॥ नहि सन्निपातकार्यं प्रामाणिकम् । तर्हि शास्त्रीयमपि सन्निपातकार्यं भविष्यती-

त्याशंक्याह ॥ स च लौकिक इति ॥ औषधाज्जायमानो भावो न सन्निपातकार्यम्। अतः शास्त्रसिद्धेः पूर्वसिद्ध एव सन्निपातः ॥ लौकिकत्वं ज्ञापयति ॥ प्राणिमात्रस्य सर्वत इति ॥ सर्वप्राणिसाधाणो व्यवहारो लौकिक एव। तत्रापि सदसद्भेदाः संतीत्याह ॥ तस्य त्रिविधरूपत्वादिति ॥ १५१ ॥ १५२ ॥

आवरणभंगः।

वेदविरोधमिति ॥ ॥ कस्मिंश्चिदंशे वेदविरोधमित्यर्थः ॥ वेदनिरूपणप्रकारादिति साक्षात्सृष्टिप्रकारेषु "एतस्माज्जायते प्राणो मनः सर्वेंद्रियाणिच" इति श्रुतौ मनसो भिन्नरीत्योत्पत्तिकथनेन छांदोग्ये च यथा तु खलु सौम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तन्मेविजानीहीति प्रतिज्ञायान्नमयत्वकथनेन च प्रकारभेदादित्यर्थः ॥ ॥ तदास्माकमिति ॥ ॥ तथाचाहंकारिकव्यतिरिक्तं यदस्मदादिमनस्तदेवान्नमयमिति सिद्धयतीत्यर्थः ॥ अस्मदादिमनसोऽन्नमयत्वे मासाद्युपवासिनां निरन्नानाममनस्कतैव स्यादित्यरुच्या पक्षांतरमाहुः ॥ अथवा पंचदशेत्यादि ॥ ॥ षोडशकलः सौम्य पुरुषः पंचदशाहानि माशीः काममयः प्राणःपिबतो न विच्छेत्स्यत इत्याद्युक्त्वा आरुणिना श्वेतकेतोः कारिता इति तथेत्यर्थः ॥ अतएव कंडिकासमाप्तौ यथासौम्य महतोऽभ्याहितस्यैकमंगारं खद्योतमात्रं परिशिष्टं तत्तृणैरुपसमाधाय प्रज्वालयेत्तेन ततोऽपि बहु दहेदेव २ सौम्य षोडशानां कलानामेककालातिशिष्टाभूत्सान्नेनोपसमाहिता प्राज्वालीत्तयैतर्हि वेदाननुभवसीत्युक्तम्। एतेनैव प्राणवाचावपि व्याख्यातौ ज्ञेयौ ॥ १४८ ॥ तृतीयं समाधानप्रकारमाहुः ॥ ॥अनेकधेत्यादि ॥ ॥ तथाच नात्र श्रुतिविरोधगंधोपीत्यर्थः ॥ प्रत्यक्षबाधनिराकरणार्थमिति ॥ ॥ यथा तंत्रांतरे पंचषट्चतुस्त्रिद्व्यादिसंख्याकानि प्रमाणान्यंगीक्रियंते तेषां बलाबलं शीघ्रमंथरगामित्वादिना आद्रियते प्रत्यक्षस्य सर्वतः प्राबल्यं च। तथात्रापि प्रत्यक्षस्य बलवत्वमुपगम्य प्रमाणगणनाऽऽदरणीया सर्वस्य नित्यत्वादिकं च प्रत्यक्षविरुद्धत्वादनादरणीयमित्याकांक्षयां तस्य दोषत्वनिराकरणार्थमित्यर्थः ॥ ॥ प्रमाणत्वे हेतुः ॥ सत्वप्रवृद्धावित्यादि ॥ ॥ व्यावहारिकमिति ॥ ॥ व्यवहारोपयोगिपृथक्त्वेन तु यत् ज्ञानं नानाभावानिति गीतावाक्यादित्यर्थः ॥ अतोन्यमिश्रणेत्यादि ॥ ॥ गुणांतरस्याप्रमाणत्वाद्गुणांतरमिश्रणे सत्वस्योत्तरोत्तरमपकर्षे सति नवस्तुयाथात्म्यस्फुरणं ज्ञानिवन्नैकरूपा प्रमा किन्तु रजःसत्वानुगृहीतैरिंद्रियैर्व्यावहारिकी प्रमा-

रजस्तमोभ्यां सत्त्वोपमर्दे संशयस्तत्रापि तमसो बाहुल्ये भ्रम इत्येवं जाग्रद्वृत्तौ जायंत इति व्यवस्थाभावात् ॥ १५० ॥ एकादशे पंचविंशाध्याये गुणानां केवलानां वृत्तीरुक्त्वा "सन्निपातस्त्वहमिति ममेत्युद्धव या मतिः । व्यवहारः सन्निपातो मनोमात्रेंद्रियासुभिः ।" इति कथनात्तथा क्रियमाणस्य व्यवहारस्याप्रामाणिकत्वात्तदर्थमपि नावश्यकीत्यर्थः ॥ ॥ तर्हीति ॥ ॥ व्यवहारमात्रस्य तथात्वमित्यर्थः॥ ननु मनोमात्रादिप्रयुक्तत्वं शास्त्रीयेपि तुल्यमिति कथं तत्कार्यस्य नाप्रामाण्यमत आहुः ॥ औषधादित्यादि ॥ त्रयोदशे भगवता "अहमित्यन्यथा बुद्धिः प्रमत्तस्य यथा" इत्यादिना रजोवेगमोहितं मनः कार्यस्यैव तथात्वोक्तेः शास्त्रीयस्य तत्प्रयुक्तत्वाभावात्तथेत्यर्थः ॥ १५१ ॥ ॥ तदेतदाहुः ॥ लौकिकत्वमित्यादि ॥ प्रवृत्तिलक्षणेनिष्ठेत्यादीनां पंचविंशाध्यायवाक्यानां तात्पर्यमाहुः ॥ तत्रापीत्यादि ॥ एतेन व्यहारमात्रस्याप्रामाण्यं वदंतो निरस्ता बोध्याः ॥ १५२ ॥

व्रजभाषाटीका ।

शंका—(एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च) या श्रुतिमें ब्रह्मसों मनकी उत्पत्ति लिखी है (अन्नमयं हि सौम्य मनः) या श्रुतिमें मनकूँ अन्नमय वर्णन कियो है दोनो कैसे संभवसके हैं ? उत्तर—अहंकारकार्यसों अतिरिक्त अस्मदादिकनके मनकूँ अन्नमय समुझनो अथवा आरुणि ऋषिने श्वेतकेतुनामवाले शिष्यकूँ पंचदश उपवास कराये तब मन सूक्ष्म होगयो फिर अन्न भक्षणकरवेसों मन बढतो चलोगयो इत्यादिकथासों मालुम पडे है अन्नकरके मन पुष्ट होवे है अन्नके नहिं खायवेसों सूक्ष्म होजावेहै तासों मनकूँ अन्नमय कह्यो है या प्रकार भगवान अनेक कल्पनमें अनेक प्रकारसों सृष्टिकरे है न्यारे २ प्रकारसों सृष्टिके भेद न्यारे न्यारे कल्पके अनुसारी हैं तासों उनमें बिरोधभी नाहिं आवे है ये भेद परस्पर सृष्टिमें विचित्रता दिखायवेकी इच्छाकरकें किये हैं ॥ १४८ ॥ १४९ ॥ शंका—सबही प्रमाणवादीनके मतमें प्रत्यक्षप्रमाणकूँ सब प्रमाणसों प्रबल मान्यो है जगत्कूँ नित्य माननों यह बात प्रत्यक्षप्रमाणसों बिरुद्ध है प्रत्यक्षमें जगत्के पदार्थ

(अनित्य) नाशवाले दीखे हैं ॥ उत्तर—सत्वगुणसहितही बुद्धि प्रमाण है सत्वगुण बढै है तब अन्तःकरण यथार्थज्ञानकूँ उत्पन्न करे है (सत्त्वात्संजायते ज्ञानम्) अर्थ—सत्वगुणसों ज्ञान प्रकट होय है ऐसो भगवद्वाक्य है सत्वगुणके लयभयेसों ज्ञान प्रकट करवेवारी सामग्री जे इंद्रियादिक हैं वेभी भ्रमकूँ पैदाकरवे लगे हैं तासों सत्वगुणही प्रमाण है सत्वगुणको कार्यही प्रामाणिक है रजोगुण तो लौकिक व्यवहारको उपयोगी है लौकिक व्यवहारमें अर्थात् रजोगुणसंयुक्त इंद्रियनकरिकें जो भेद सहित नानापदार्थनको ज्ञान होय है वह लोकव्यवहारको निर्वाहक है तमोगुण तो अप्रमाणही है रजोगुण तमोगुणके मेल होयवेसों जैसें जैसें सत्वगुण घटतो जावे है तैसें तैसें यथार्थज्ञानमें हीनता होती चलीजावे है जैसें शुद्धसत्वसों यथार्थ ज्ञान सत्वरजसों लौकिक ज्ञान रजतमकरकै दबायेभये सत्वसों संदेह, तमोगुणके अधिकहोयवेसों भ्रम उत्पन्नहोवे है; याहीसों लोकमें कभी नेत्रसों यथार्थ रस्सी दीखें है कभी उनही नेत्रनसों रस्सीमें सर्पको धोका होजावेहै या प्रकार इन्द्रियादिककी यथार्थ व्यवस्था नहिं है तासों नैयायकमतके समान प्रत्यक्ष अनुमान उपमानादि प्रमाणनकी गणना हम नहीं करे हैं क्योंकि रजोगुणमिश्रित लौकिक ज्ञानको परमार्थदशामें कछु उपयोग नहिं ॥ १५० ॥ कदाचित कहोगे लौकिक व्यवहार चलवेकेलिये तो प्रत्यक्षादि प्रमाणनकी गिनती करनोचाहिये ? उत्तर—(व्यवहारः सन्निपातो मनोमात्रेंद्रियासुभिः) इत्यादि भगवद्वाक्यकरकें लौकिक व्यवहार तो सन्निपातरूप है सन्निपातको कार्य प्रमाण नहिं होवे हैं ॥ शंका—जैसें लौकिक व्यवहार मन मात्रा इंद्रियादि करकें होवे हैं तैसें शास्त्रमें कहे यज्ञ श्राद्ध उपासनादिकभी मन इंद्रियादिकनकरकें ही होय

हैं इनकूँ भी सन्निपातरूप अप्रामाणिकही माननें ॥ उत्तर–सन्निपातरोगीकी औषधलिये पहलीकी जो कुचेष्टा है वेही सन्निपातकार्यसमुझी जावे है सन्निपातनाशक औषधलिये पीछे जे सुंदरचेष्टा है वेह सन्निपातकार्य नहिं समुझीजावे है ऐसेही पहिलीसों होरह्यो जो सब प्राणी पशु आदिकनके समान ये मैं ये मेरो इत्यादि लौकिक व्यवहार वह ही सन्निपात है क्योंकि (अहमित्यन्यथाबुद्धिः प्रमत्तस्य यथा सदा ॥ मनसो हृदि वर्तेत रजोवेगविमोहिता) इत्यादिभागवतवचनसों रजोगुणके वेगकरकें मोहित मनके कार्यकूँ ही सन्निपातकार्य कह्यो वेदशास्त्रसिद्ध जे यज्ञादिक व्यवहार वेतो रजोगुण प्रेरित मनके कार्य नहिं हैं किन्तु शास्त्र विधिप्रेरित हैं तासों औषधवत् सन्निपात निवर्तक है सन्निपात कार्य नहिं है लौकिक व्यवहारमेंभी तीन भेद हैं वे एकादशस्कन्ध भागवत पञ्चविंशाध्यायमें (प्रवृत्तिलक्षणे निष्ठा) इत्यादिश्लोकनमें कहे हैं तासों (जीवो जीवेन निर्मुक्तो) इत्यादिवाक्यनकरकें लौकिक व्यवहार नाममात्रकरके प्रमाण है परमार्थमें प्रमाण नहिं है ॥ १५१ ॥ १५२ ॥

तस्माद्वेदादिरेवात्र प्रमाणं तच्च कीर्तितम् ॥ अ-
पञ्चीकृतरूपं हि सूत्रमात्रं हरिः स्वयम् ॥१५३॥
सुषुम्णामार्गतो व्यक्तः शब्दब्रह्मप्रकाशते ॥ पं-
चाशद्वर्णरूपश्च सूक्ष्मो नित्यो निरंतरः ॥१५४॥
सर्वतोंतो नित्यरूपो बहुरूपः स्वभेदतः ॥ वर्णः
पदं तथा वाक्यं तस्य नामत्रयं मतम् ॥१५५॥

तत्त्वदीपप्रकाशः ।

उपसंहरति ॥ तस्मादिति ॥ वेदस्यैव वेदादेरेव प्रामाण्यात्तदनु-

सारेणैव प्रमेयस्य निरूपितत्वाल्लौकिकविरोधाभावाच्च सर्वं सुस्थं वेदस्यापि प्रमेयत्वं वक्तुं प्रपंचांतरमाह ॥ **अपञ्चीकृतरूपं हीति**॥ भगवान् पञ्चात्मको रूपप्रपञ्चकर्ता अधिष्ठानं तथाकर्तेति वाक्यात् । कालः कर्म स्वभावश्च मायाभगवांश्चेति तथा नामप्रपञ्चे नापेक्षते किंतु सूत्रमात्रमत्र-कारणम् । स एष जीव इति आसन्यरूपो भगवान्नामप्रपंचे हेतुरित्यर्थः ॥ १५३ ॥ तस्य सृष्टिप्रकारमाह ॥ **सुषुम्णामार्गेत इति** ॥ तस्य व्यक्तस्यापि ब्रह्मत्वमित्याह ॥ **शब्दब्रह्म प्रकाशत इति** ॥ तस्यांशानामपि पूर्णतेत्याह ॥ **पञ्चाशद्वर्णरूपश्चेति** ॥ षोडश स्वराः । स्पर्शाः पञ्चविंशतिः । यादयोऽष्टौ क्षकारोंतिमः । संध्यक्षरत्वेपि पृथगुपादानं भिन्नश्रुत्या । ज्ञाक्षरस्याप्युपलक्षकः । अत्रावान्तरभेदा बहवः संति । क्वचिच्चतुःषष्टिः क्वचिच्च त्रिषष्टिः वर्णाः क्वचिदेकपञ्चाशत् । द्विपंचाशदिति।तथापि मुख्यमातृकाविद्यायां सिद्धः पक्षःपरिगृहीतः॥ १५४॥वर्णाश्च नित्या व्यापकाः सर्वेष्वपि देशेषु निरंतराः । अनभिव्यक्तिस्थानेष्वपि विद्यमानाः भगवानिव सर्वशक्तियुक्ता अनंतरूपाश्च ते च स्वभावत एव बहुरूपाः ।रूपतो भगवत्त्वमुक्तम्। भगवत्त्वप्रतिपादनाय विशेषमाह ॥**वर्ण इति**॥ यथा सच्चिदानंदभेदाः तथा वर्णवाक्यपदभेदाः॥ १५५॥

आवरणभंगः ।

मूले तच्च कीर्तितमिति ॥ पूर्वप्रकरणे शब्द एव प्रमाणमित्यंगीकृतम् । तेन तदविरोधि यदेव तदेव प्रमाणमतो न प्रमाणगणनाभावान्न्यूनतेत्यर्थः ॥ एवं रूपप्रपंचं निरूप्य नामप्रपंचनिर्णयार्थं प्रतिजानते ॥ वेदस्यापीत्यादि ॥ ॥बलनिरूपणार्थं वेदस्य प्रमेयत्वं वक्तुमित्यर्थः ॥ मूले अपञ्चीकृतरूपमिति ॥ ॥ अपञ्चपञ्चसंपादितंपञ्चीकृतं नपञ्चीकृतं रूपं येन तादृशसूत्रमात्रं महत्तत्त्वे यस्यावतारस्तत् आसन्यरूप अपहतपाप्मत्वात्स्वयं हरिः स्वाभिन्नं तत्स्वरूपं नामप्रपंचे कारणमिति शेषः ॥ तदुपपादयितुमाहुः ॥ भगवानित्यादि॥ ॥ नन्वधिष्ठानमिति गीतावाक्ये शरीरजीवेन्द्रियचेष्टादैवानि संख्याघटकानि प्रतीयंत इत्यत्रांतरसृष्टौ तथास्तु ननु प्रथमसृष्टावपीति शंकायामाहुः ॥ काल इत्यादि ॥ ॥ गीतावाक्येधिष्ठानं शरीरम् । आदिसृष्टौ माया । कर्ता जीवः । तत्स्थाने भगवान्

कारणमिंद्रियं तत्स्थाने कर्म चेष्टाः कर्माणि । तत्स्थाने स्वभावः । तृतीयस्कंधे ऊनत्रिंशे दैवं कर्म विचेष्टितमित्यत्र विविधचेष्टायुक्तत्वेन स्वभावस्य व्याख्यानात् । दैवं कालः देवसंबंधित्वात् । एषां रूपप्रपञ्चव्यवस्थेत्यर्थः॥ तद्वैलक्षण्यं नामप्रपञ्चे आहुः ॥ तथेत्यादि ॥ ॥ तत्र प्रमाणमेकादशस्कंधीयद्वादशाध्यायस्थभवद्वाक्यमाहुः ॥ स एष जीव इति ॥ ॥ " स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः । मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठः ॥ यथाऽनलः खेनिलबंधुरूष्मा बलेन दारुण्यधिमथ्यमानः । अण्डः प्रजातो हविषा समिध्यते तथैव मे व्यक्तिरियं हि वाणि " इति द्वाभ्यां सर्वोपि नामप्रपञ्च उत्पत्त्या निरूपितस्तत्र घोषेण हृदयाकाशं प्रविष्टस्य जीवस्य सृष्टीच्छावशगस्य हरेः मनोमयसूक्ष्मरूपभवनद्वारा मात्रास्वरादिस्थूलवर्णात्मकतायां प्रयत्नं विशेषेण स्थानविशेषाच्च वह्निदृष्टांतेन वैखरीत्वमुक्तं जीवपदं चात्र जीवस्य मुख्योपधिभूतो य आसन्यः सूत्रात्मा प्राणस्तत्परम् । वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवंतीति श्रुतौ तथानिर्णयात् ॥ सूत्रं महानहमिति प्रवदंति जीवमिति पिप्पलायनवाक्यं सुबोधिन्यां च तथोक्तेः । एकविंशाध्याये च " शब्दब्रह्म सुदुर्बोधं प्राणेंद्रियमनोमयम् ॥ अनंतपारं ह्यक्षोभ्यं दुर्विगाह्यं समुद्रवत् ॥ मयोपबृंहितं भूम्ना ब्रह्मणाऽनंतशक्तिना । भूतेषु घोषरूपेण बिसेषूर्णेव लक्ष्यते ॥ यथोर्णनाभिहृदयादूर्णामुद्वमते मुखात् । आकाशाद्घोषवान् प्राणो मनसा स्पर्शरूपिणा । छंदोमयोऽमृतमयः सहस्रपदवीं प्रभुः । ॐकाराद्व्यंजितस्पर्शस्वरोष्मांतस्थभूषिताम् ॥ विचित्रभाषाविततां छंदोभिश्चतुरुत्तरैः । अनंतपारां बृहतीं सृजत्याक्षिपते स्वयम् ॥ " इति संदर्भे च घोषवतः प्राणस्य ॐकारद्वारा स्पर्शादिभूषितवाणीस्रष्टृत्वकथनाच्च । एवं सति तृतीये सुबोधिन्युक्तदिशा प्रकाशरूपस्याविर्भूतस्याविकृतस्य भगवद्गुणरूपज्ञानस्यैव । उक्तरूपेण वेदशरीरग्रहणमानंत्यं विराज इव ततः शब्दशरीरविशिष्टस्य तस्यैव बीजतायां व्यष्टिरूपविकृतनानावाक्योत्पादकत्वमित्यतो न शंकांशः कोपि ॥ १५३ ॥ सुषुम्णामार्गेत इति ॥ स एष इति वाक्यस्थविवरपदस्यार्थोयम् ॥ तस्य व्यक्तस्येत्यादि ॥ ॥ मे व्यक्तिरित्युपसंहारात् । शब्दब्रह्मसुदुर्बोधमितिकथनाच्च तथेत्यर्थः ॥ तथा च सूत्रमात्रो भगवानेव व्यक्तः सन् शब्दब्रह्मात्मा वेदरूप इत्यर्थः ॥ तेन प्रमाणमूर्द्धन्यत्वं सिद्ध्यति । एतद्व्यक्तिमार्गस्य ब्रह्मपथत्वशासनाय सुषुम्णापदं तस्यांशेत्यादि । ब्रह्मत्वदृढीकरणाय विशेषांतरमेतत्संख्यापूरणार्थमवांतरोपाधीनाहुः ॥ षोडशेत्यादि ॥ ॥ अ. आ. इ. ई. उ. ऊ. ऋ. ॠ. ऌ. ॡ. ए. ऐ. ओ. औ. अं. अः । इत्येवं स्वराणां

षोडशत्वम् । शेषं स्फुटम् ॥ बहव इति॥ अनुनासिकादिभेदैर्बहव इत्यर्थः ॥ चकारसूचितं पक्षांतरमाहुः ॥ क्वचिदित्यादि ॥ ॥ आद्यौ शिक्षायामुक्तौ । "त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शंभुमते मताः । अनुस्वारो विसर्गश्च ≈ क ≈पौ चापि पराश्रयौ ॥ दुःस्पर्शश्चापि विज्ञेयो ऌकारः प्लुत एव च" इति । एतद्वावेकश्च । अ आ आ३ इ३ उ३ ऋ३ ऌ१ ए२ ऐ२ ओ२ औ२ कादयो यादयश्च स्पष्टाः । यमाः पलिक्क्नीं चख्नतुः अग्निः घ्नंतीत्यादौ वेदे द्विरोष्ठचरूपः प्रसिद्धः । एवं चतुःषष्टिः । ऌकारागणने द्विषष्टिः । एकपञ्चाशत्पक्षश्च पंचाशदुपांतेळ्क्षरस्य निवेशात् । द्विपञ्चाशत्पक्षो ज्ञाक्षरस्य पृथगुपादानात् । एवमनेकपक्षेषु पञ्चाशत्पक्षांगीकारे बीजमाहुः ॥ तथापीत्यादि ॥ १५४ ॥ पूर्वप्रतिज्ञातं पूर्णत्वं स्पष्टीकर्तुं वैयाकरणनैयायकमताद्वैलक्षण्यं ज्ञापयितुं चाहुः ॥ वर्णाश्चेत्यादिना ॥ भगवत्त्वेन सर्वस्य नित्यत्वेपि व्यवह्रीयमाणकादिरूपेण नित्यत्वाय वर्णा इति बहुवचनम् । अत्र व्युत्पादनार्थं तत्रांतरस्थं बोधार्थमुच्यते तत्र शब्दो नित्यो न वा । प्रलयवृत्तिर्न वा स्वाधिकरणक्षणाधिकचतुर्थादिक्षणावृत्तिर्नेत्यादिविप्रतिपत्तौ तावन्नैयायका आहुः ॥ शब्दोऽनित्यः । उत्पत्तिविनाशप्रतीतेः । नापि वर्णरूपो नित्यः । उत्पन्नो गकारो विनष्टो गकार इति प्रतीतिः । नच सोयं गकार इत्यबाधितप्रत्यभिज्ञाबलेन तस्य नित्यत्वं शंक्यम् ॥ तदेवौषधमित्यादौ साजात्यमादाय प्रत्यभिज्ञावदत्रापि वक्तुं शक्यत्वात् । नचात्र विनिगमकाभावः । उत्पत्तिनाशप्रतीत्योरेव मानत्वात् । तादृक्प्रतीतिभ्यां विना प्रत्यभिज्ञानादर्शनात् । अत एवैतयोः प्रत्यभिज्ञाबाध्यत्वं भ्रांतित्वं च निरस्तम् । एतयोः प्रत्यभिज्ञाबाध्यत्वकल्पनापेक्षया प्रत्यभिज्ञाया एवैतद्बाध्यत्वकल्पनायां लाघवाच्च । तस्मादनित्य एव शब्द इति । तदेतन्मीमांसकादयो न क्षमंते । तत्र गुरवो व्योमैकगुणत्वेन भाट्टाश्च निःस्पर्शद्रव्यत्वेन नित्यत्वं शब्दमात्रस्यानुमेयं सोयङ्गकारयोरभेदसिद्धावर्थबलादेव तेषां नित्यत्वेन च गकाराद्युत्पत्तिनाशप्रतीती प्रत्यभिज्ञाया बाधिके । तयोः परंपरया गकारादिव्यंजकवाय्वाद्युत्पत्तिनाशविषयत्वात् । नच प्रतीत्योः साक्षात् गकारादिगत्वेनैवानुव्यवसायान्नैवमिति वाच्यं तस्य भ्रमत्वात् । प्रत्यभिज्ञया तद्बाधात् । नच गत्वादिजातिगतमेव नित्यत्वं स्वाश्रयसमवायरूपेण परंपरासंबंधेन गकारेभासत इति प्रत्यभिज्ञाया एव साक्षात्वांशे भ्रमत्वमस्तु । यद्यपि विनिगमनाविरहस्तथापि नाशोत्पत्तिविषयस्य प्रतीतिद्वयस्य भ्रमत्वकल्पनापेक्षया प्रत्यभिज्ञामात्रस्य तथात्वकल्पने लाघवादिति वाच्यम् ॥ अभिव्यञ्जकवाय्वाद्युत्पत्तिविनाशस्योभयवादिसंमतत्वात्तावतैव निर्वाहे नानावर्णोत्पत्तिनाशकल्पनस्यात्यंतगुरुत्वेन वैपरीत्यात् । व्यक्त्यभेदग्रस्तत्वेन गत्वादौ जातित्वस्या-

शक्यवचनत्वाच्च । नापि प्रत्यभिज्ञाया आकृतिविषयत्वं शक्यवचनम् । व्यक्तिप्रत्यभिज्ञानात् । द्विर्गोशब्द उच्चारित इति प्रतिपत्तेः। द्वौ गोशब्दाविति प्रत्ययाभावाच्चेति शारीरकभाष्येऽपि व्यवस्थापनात् । नच परस्परविरुद्धानां तारत्वमंदत्वादीनामेकत्र वक्तुमशक्यत्वात्तारतरमंदमंदतरादिरूपविलक्षणप्रतीत्यनुपपत्तिरिति वाच्यम् ॥ वर्णव्यञ्जकध्वनीनां नानात्वात्तत्तद्गततारत्वादेरेव तदातदा तत्र भानादुपपत्तेः । वायुव्यञ्जकत्वपक्षे तु वायुना यथाभिव्यज्यते तथा प्रतीयते घटादिनाकाशवदिति तेषामैकव्यक्तिगतव्यंजकत्वेनांगीकारेण विरोधस्यैवाभावाच्छंकाया एवानुदयाच्च । नच ध्वनिषु तारत्वादिदर्शनाद्वर्णे च द्रव्यत्वपृथ्वीत्वयोरिव तेषां व्याप्यव्यापकभावाभावेन सांकर्यात्तारत्वादीनां जातित्वानुपपत्तिरिति वाच्यम् ॥ तेषामखंडोपाधित्वोपगमेनेष्टापत्तेः । नचैवं सति तारात्तारतरोन्य इति प्रतीतिर्नस्यादिति वाच्यम् । तादृशप्रतीतौ मानाभावात् । शिखी विनष्ट इति वत्तत्तद्विशेषणपुरस्कारेण प्रतीत्युपपत्तेश्च । नच वर्णानां नित्यत्वे एकसाक्षात्कारकालेऽपरसाक्षात्कारापत्तिः सर्वेषां श्रोत्रसमवायस्य तुल्यत्वादिति वाच्यम् ॥ तत्र तद्व्यंजकविजातीयवायुसंयोगाभावात्तदनापत्तेः । भवन्मतेप्युत्पादकत्वेन तस्यावश्यकत्वात् । नच विजातीयवायुसंयोगस्य कार्यतावच्छेदकत्वे तदभावेन लाघवाच्छब्दानित्यत्वमेव ज्याय इति वाच्यम् ॥ विप्रतिपत्तौ विनिगमनाविरहस्य दुर्वारत्वात् ।विषयतासंबंधेन कत्वस्यैव कार्यतावच्छेदकताया वक्तुं शक्यत्वाच्च नच कत्वादेरखंडोपाधित्वांगीकाराज्जातीतरधर्मस्य च किंचिद्धर्मस्य च किंचिद्धर्मावच्छिन्नस्यैवावच्छेदकत्वनियमादत्रापि किंचिद्धर्मविशिष्टस्यैव तस्य कार्यतावच्छेदकगौरवापेक्षया नानाशब्दतदुत्पत्तिनाशानां शब्दस्य नाशं प्रति विशिष्य हेतुतायाश्च कल्पनासु गौरवभूयस्त्वेन शब्दानित्यत्त्वस्य कदर्थत्वात् । नच शब्दवृत्तित्वविशिष्टविशिष्टा या प्रतियोगितेति कर्मधारये प्रतियोगितया नाश्यं प्रति विषयतया श्रावणत्वेन नाशकत्वमिति ध्वनिनाशस्थले क्लृप्तानुगतनाश्यनाशकभावादेव वर्णस्यापि नाशोपपत्तेर्न हेतुतांतरकल्पनगौरवमिति वाच्यम् ॥ अश्रूयमाणशब्दे व्यभिचारेणास्य कदर्थत्वात् । ध्वनिनित्यत्वाभ्युपगमेनोक्तनाश्यनाशकभावे मानाभावाच्च । यत्तु । शब्दबोधं प्रति पदज्ञानं हेतुः पदं च घोत्तरटादिरूपम् । तच्च स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति स्वाधिकरणक्षणध्वंसाधिकरणत्वरूपाव्यवहितोत्तरत्वघटितमिति वर्णनित्यत्वपक्षे न संभवति। सर्वेषामेव क्षणानां वर्णाधिकरणत्वात् । स्वस्वपूर्वक्षणानादाय स्वाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणत्वेनाव्यवहितोत्तरत्वस्याप्रवेशात् । नच भवन्मतेपि सर्वेषां क्षणानां स्वपूर्वक्षणोत्पन्नवत्वावच्छिन्नयत्किंचिदाधिकरणक्षणध्वंसाधिकरणत्वादेतदसंभव इति वाच्यम् ।

अस्मन्मते तत् घत्वादिना निवेशेन दोषाभावादिति ॥ तत्र । वर्णनित्यत्वपक्षेपि घज्ञानोतरटज्ञानविषयत्वं तत्वमित्युक्तदोषाभावात् । नचाधिकज्ञानाभावप्रवेशे गौरवत्वमिति वाच्यम् । यथा भवन्मते तत्तद्व्यक्तित्वेनैव वर्णनिवेशो नतु घत्वादिना । असंभवात् । तथा अस्मन्मतेपि घत्वादीनां तत्तव्यक्तित्वेनैव निवेशतः साम्येन लाघवानपायात् । अतः पुनः पुनरुत्पत्तिनाशादिकल्पनापेक्षया वर्णनित्यत्वमेव ज्याय इति अन्ये तु वर्णो नित्यो ध्वन्यन्यशब्दत्वात् । स्फोटवदिति प्रयुंजते वैयाकरणास्तु स्फोटाख्यमतिरिक्तं शब्दमंगीकृत्य तस्यैव नित्यत्वमाहुः ॥ तदेतदन्ये न क्षमंते । यथोक्तमुपवर्षमतानुसारेण शारीरकभाष्ये । वर्णेभ्यश्चार्थप्रतीतेः संभवात्स्फोटकल्पनाऽनर्थिकेति । शाबरभाष्येपि तथा । उचितं चैतत् । वर्णस्फोटस्थले वर्णेनैवार्थप्रतीतेः । पदादिस्फोटस्थले पूर्ववर्णगोचरसंस्कारसहितचरमवर्णोपलंभव्यंग्यस्फोटकल्पनापेक्षया तादृशवर्णेनैवार्थप्रतीत्यंगीकारस्य लघुत्वात्प्रत्यक्षानुरोधित्वाच्च । अनेकेषां वर्णानामेकबुद्धिविषयत्वं च पंक्तिवनसेनादिदृष्टांतेन तत्रैव व्युत्पादितम् । एवं च क्रमविशेषविशिष्टा वर्णा एव सामस्त्येनैकबुद्धिविषयाः पदं स्युरिति । तत्तत्पदव्यवस्थाया वृद्धव्यवहारादिना तत्तत्पदेभ्यस्तत्तदर्थावबोध इति च । आचार्यैस्तु स्फोटो नदूषितो नवा प्रसाधितः परंतु दशमस्कंधे गुणप्रकरणे वसुदेवस्तुतौ 'दिशः खं स्फोट आश्रय' इत्यत्रोक्तस्तेनानुमत एव । अयं च वैयाकरणमताद्भिन्नः । वाग्व्यंजकत्वेन वर्णाद्यव्यंग्यत्वात् । अस्य शास्त्रस्य कल्पनाशास्त्रत्वाभावेन शब्दैकशरणत्वात् । सिद्धे वर्णनित्यत्वे इंद्रियदेवतावत्तस्याप्यादरणौचित्याद्वृत्तिनिरोधे तस्य प्रत्यक्षीभावाच्चेति । सिद्धांते त्वेतावान्विशेषः । रूपसृष्टिमध्यपातिनो ध्वनेर्घटादिवच्चिरकालस्थायित्वात्तस्य वायुनान्यत्र नयनमेव । तदस्माभिः प्रस्थानरत्नाकर उपपादितम् । वर्णस्य तु कंठताल्वादिस्थानाभिघातजन्यो वायुः स्वबलानुसारेण व्यञ्जनं करोति ततो व्यापकं वर्णं व्यंजयन्नेव बहिर्वायूढो गच्छति । श्रवणं तु ध्वनिवदेव । तत्र वर्णस्य पूर्वोक्तयुक्त्या नित्यत्वे सिद्धे प्रत्यभिज्ञाया उत्पत्तिविनाशप्रतीत्यनंतरभावित्वं तेनापि न तस्य विघटनं प्रत्यभिज्ञाया वार्णाभिव्यञ्जकानन्तर्यसापेक्षतया तादृशप्रतीत्यानंतर्यानपेक्षित्वेपि अभिव्यञ्जकप्रतीतेः । सामग्र्यन्तरेण स्थूलरूपतिरोधानादानंतर्ये तदपेक्षाभिमानात् । तत्क्षणोज्ज्वालितदीपनाशोत्तरं सोयं दीप इति प्रत्यभिज्ञानवत् । अव्यवहितोत्तरत्वलक्षणो ध्वंसस्थले तिरोभावपदेनाभिलापः कार्य इति । शेषं त्वनुगुणमेव । प्रकृतमनुसरामः । व्यापकत्वं विवृण्वंति सर्वेष्वित्यादि । एवं सिद्धे वर्णनित्यत्वे तेषां व्यापकताप्येककालावच्छेदेनानेकदेशेष्वनेकैरुच्चारणात्सिद्ध्यति । नच तेषां कंठादिस्थाननिर्देशात्परिच्छिन्नता ।

शरीरिण्या आकाशवाण्याः शब्दे व्यभिचारात् तदेतदुक्तं सर्वेष्वित्यादि। स्थाननिर्देशस्त्वभिव्यक्तिनिबंधनः। व्यापकात्मवादिमते शरीरस्य वृत्तिलाभस्थानत्ववत्। ननु व्यापकत्वे उच्चारणदशायां प्रदेशतोऽभिव्यज्येरन्नतु पूर्णा इति चेत्तत्राहुः॥ भगवानिवेत्यादि॥ ॥ अनंतमूर्त्तित्वमनंतमूर्तयो वर्णा इत्यत्रापि गौणमुख्यभेदेन व्युत्पाद्यम्। उदात्तानुदात्तस्वरितानुनासिकानुनासिकादिसंग्रहार्थमाहुः॥ तेचेत्यादि॥ एवं षड्धर्मप्रतिपादनतात्पर्यमाहुः॥ रूपत इत्यादि॥ ॥ मूले-तस्य नामत्रयमित्यत्र तस्येति शब्दब्रह्मण इत्यर्थः॥ तेन सिद्धांतिना नाद एव शब्द इति बोधितम्। तच्च शब्दब्रह्मवर्णाद्यभिन्नमिति स्फोटवादो नांगीकृतः १५५

व्रजभाषाटीका।

तासों ही पूर्वप्रकरणमें शब्दरूपवेदादिकनकूँ ही प्रमाण कहेंहै। वेदके अविरोधि जो होय वहही प्रमाणहै॥ ऐसें रूपप्रपञ्चको वर्णन करकें। नामप्रपञ्चरूप वेदादिकनको निर्णय करेंहै। अधिष्ठान कर्ता करण कर्म दैव ये पाँचरूपात्मक प्रपञ्चके प्रकटकरवें वारेहैं अर्थात अधिष्ठान माया कर्ता भगवान्, करण कर्म क्रिया स्वभाव, दैव, काल, या प्रकार पञ्चात्मक भगवान् आदिसृष्टिमें पदार्थनके प्रकटकरनेवारेहैं। अवान्तरसृष्टिमें। अधिष्ठान। शरीर। कर्ता। जीव। करण। इन्द्रिय। कर्म। विविधचेष्टा। दैव। भाग्य या प्रकार पाँचरूपवाले भगवान्। सृष्टिकरेंहैं। शब्दसृष्टि। इन पाँच रूपनकरकें रहित सूत्रात्मा भगवान् जिनको महतत्त्वमें अवतारहै वह आसन्य प्राणरूप भगवत्स्वरूप शब्द सृष्टिके कारण हैं॥१५३॥ शब्दसृष्टिको प्रकार दिखावेंहै सुषुम्णामार्गकरके शब्दब्रह्म प्रकाशित होवेहै। जैसें अवकाशमें काष्ठके घिसवेसों पवनकी सहायता करके बढीभई जो ऊष्मा उष्णता अणुमात्र अग्नि कणरूपहोयके घृतादिकसों बढती भई चलीजायहै। ऐसेंही शब्दसृष्टिकरवेकी भगवानकूँ इच्छा भई तब भगवान् जीवकी मुख्योपाधिरूप आसन्य सूत्रात्मा प्राणात्मा होयके। घोष। अव्यक्तनादसहित-हृदयमें प्रवेशकरकै मनोमय सूक्ष्मरूप द्वारा प्रयत्न विशे-

षसों हृदय, कण्ठ, आदि स्थानभेदकरकें मात्रास्वरादि स्थूल वर्णरूप वैखरी होजावेहै। तृतीयस्कन्ध सुबोधिनीकी रीतिसों प्रकाशरूप जो अविकृत भगवान्को गुणरूप ज्ञान है। वहही घोषवान् प्राणरूप होयके वेद शरीरको ग्रहणकरेहै। शब्दब्रह्मके अंशभी पूर्णहीहैं। अर्थात् पचास वर्ण हैं ये शब्द ब्रह्मके अंशहैं शोडश स्वरहैं अ आ इ ई इत्यादि। पञ्चविंशति स्पर्श हैं। क ख ग घ ङ सों लेके प फ ब भ म पर्यन्त। अन्तस्थ चार य र ल व। ऊष्माण चार श ष स ह। अन्तको अक्षर (क्ष) है ककार षकार मिलेसों (क्ष) बने है परंतु याको श्रवण भिन्नहै तासों न्यारी गणना है क्ष है सो (ज्ञ) काभी उपलक्षक है अवान्तर अनुनासिकादि भेद बहुतहैं कोई ग्रंथमें चार और साठ वर्ण मानेहैं। कोईमें त्रेषट कहीं इकावन् कोई ग्रन्थमें ५२ बावन् वर्ण मानेहैं तथापि मातृकाविद्यामें सिद्ध जो पक्षहै वाको ग्रहणहै भगवद्रूप होयवेसों सर्व वस्तु नित्यहै तोभी व्यवहारमें आये वे कखगघङ आदि वर्णकूं नित्यता सिद्धकरवेकेलिये (वर्णाः) इति बहुवचनको प्रयोगकियोहै ॥ १५४ ॥ जितने वर्ण हैं सब नित्यहैं और व्यापकहैं जो वर्ण व्यापक नहिं होय तो अनेकदेशमें एककालमें अनेक पुरुष उच्चारण नहिं करसकते सब ठिकाने सब वर्ण निरंतर विद्यमानहैं। कण्ठ तालु आदि स्थाननमें प्राणवायुके आघातसों प्रकट होवें हैं और ठिकाने जहाँ प्रकट होयवेकी साहित्य नहीं है। वहाँभी विद्यमानहैं भगवान्के समान सर्वशक्तियुक्त हैं अनन्तरूपवालेहैं अर्थात् भगवान् बहुरूप ऐसें शब्दभी बहुरूपहैं। जैसे भगवान्में तीन भेद सत् चित् आनंद ऐसें शब्दमें वर्ण पद वाक्य ये तीन भेद हैं ॥ १५५ ॥

द्वयं चाविकृतं लोके वेदे सर्वं स्वयं हरिः ॥ व-

र्णाः पदानि सर्वाणि भगवद्वाचकत्वतः॥१५६॥
सर्वार्थान्येव सर्वत्र व्यवहृत्यै तथापि तु॥शक्ति-
संकोचतो लोके विशेषख्यापनानि वै ॥१५७॥

तत्त्वदीपप्रकाशः ।

तत्र वर्णा नित्याः पदानि च । वाक्यं लौकिकमनित्यम् । वैदिकं तु नित्यमिति विशेषः ॥ तत्र हेतुः ॥ स्वयं हरिरिति अत्र केषांचिन्मते पदान्येवार्थवंति न वर्णा न वाक्यान्यपीति केचित् । अस्मन्मते तु वर्णा अप्यर्थवंतः । वेदाक्षराणि यावंतीति वाक्यात् ॥ अतः प्रथममक्षरपदयोरर्थमाह ॥ वर्णाः पदानीति ॥ सर्वेषां वर्णानां सर्व एव वाच्यः ॥ तथा पदानां तत्र हेतुः ॥भगवद्वाचकत्वत इति ॥ भगवान् सर्वमिति ॥ १५६ ॥ भगवान्वाच्य इति सर्वे वर्णाः पदानि च सर्ववाचकानीति वस्तुस्थितिः । तथापि व्यवहारार्थं शक्तिसंकोचः कृतः।आदेशकालविभेदेनास्माभिरुच्चार्यमाणोऽयं शब्दः इममेवार्थं बोधयितुं नत्वन्यमिति संकोचः॥ अतो लोके विशेषाख्यायकानि जातानि तत्र सूपः कूपो यूप इत्यत्र वर्णानां तुल्यत्वेपि नानार्थप्रतिपादकत्वम् । व्यवहारसिद्ध्यै तथांगीकारात् । अन्यथा च प्रत्ययादेरर्थो न स्यात् । धातोश्च नच तयोः पदसंज्ञाविशिष्टयोरेव तथात्वात् । अतो व्यवहारस्य नियामकत्वान्नातिप्रसङ्गः ॥ १५७ ॥

आवरणभंगः ।

ननु सर्वस्यैव वर्णजातस्य भगवद्रूपत्वे लौकिकवैदिकयोरविशेषाद्वेदे आधिक्यं नसिद्ध्येदित्याकांक्षायां स्वरूपे विशेषं प्रतिपादयितुमाहुः ॥ भगवत्त्वेत्यादि ॥ ॥ इति विशेष इति ॥ ॥ वाक्यनित्यत्वेन त्रयाणां भगवद्रूपत्वात् विशेषः । मे व्यक्तिरियं हि वाणीत्युक्त्या लोकवेदसाधारण्येन वैखरीमात्रस्य भगवत्त्वे प्राप्तेप्येवं गदिरित्यतिदेशाद्वैलक्षण्यमवश्यं वाच्यमित्यत एवमुक्तम् । अत एव च परमार्षं सूत्रम् । अत एव च नित्यत्वमिति । अखंडवाक्यरूपत्वेन -नित्यभगवद्रूपार्थसंबंधस्य सार्वदिक्त्वादेवास्य नित्यत्वमित्यर्थः ॥

तेन लौकिकशब्दादुत्कर्षः स्फुट इति । नैयायकास्तु वेदः पौरुषेयो वाक्यत्वाद्भारतवदित्यनुमानेन पौरूषेयत्वं वदंतः शब्दस्याशुतरविनाशित्वेन वाक्यत्वेन चानित्यत्वं वेदस्याहुः ॥ सांख्यप्रवचने तु न नित्यत्वं वेदानां कार्यत्वश्रुतेः । न पौरुषेयत्वं तत्कर्त्तुः पुरुषस्याभावात् । न मुक्तामुक्तयोरयोग्यत्वात् । नापौरुषेयत्वान्नित्यत्वमंकुरादिवदिति चतुःसूत्र्याम् । तस्मात्तपस्तेपानात्त्रयो वेदा अजायंतेत्यादिश्रुत्या वेदानां कार्यत्वम् । ईश्वरानंगीकारान्मुक्तानामसंगत्वेन संसारिणां च युगपदुपादानानभिज्ञत्वेन वेदकर्तृत्वायोगाच्चापौरुषेयत्वम् ॥ अंकुरादिवदनित्यत्वं चोक्तम् । जैमिनीयदर्शने तु । प्रथमस्य प्रथमपादांतिमे उक्तं तु शब्दपूर्वत्वमित्यधिकरणे चिंतितम् । वेदाः किं पौरुषेया नवेति संदेहे पूर्वोक्तरीतिकेन सामान्यतो दृष्टेन वाक्यत्वलिंगकानुमानेन सामान्यतः कर्तारमनुमाय केचिदीश्वरं केचित्प्रजापतिं केचिद्धिरण्यगर्भं कर्तृत्वेनाहुः ॥ तद्यदि कर्त्ता कश्चित्स्यात्तदायं नानाविधो विवादो नावकल्पेत । मन्वादिवत्कर्त्तुः स्मर्यमाणत्वात् । नहि मानवे भारते शाक्यग्रंथे वा कश्चिद्विवदते । अतः स्मर्त्तव्यत्वे सत्यस्मर्यमाणत्वायोग्यानुपलब्धिबाधितं सामान्यतो दृष्टं न कर्तृसाधनायालं भवति । नचातिजीर्णकूपारामादिषु विशेषस्मरणेपि यथासामान्यतो दृष्टेन कर्तृपूर्वकत्वासिद्धिस्तथात्रेति वाच्यम् । विमतं वेदाध्ययनं गुर्वध्ययनपूर्वकं वेदाध्ययनत्वात् । आधुनिकाध्ययनवदिति प्रतिसाधनत्वेन तथावक्तुमशक्यत्वात् । नच काठकादिसमाख्यातः पौरुषेयत्वमिति बाह्यवचनमपि बाधकम् । समाख्यायाः प्रवचनमूलकत्वात् । अत एव तस्याः शाखाविशेषविषयत्वं युज्यते । तस्मादपौरुषेया एव वेदा इत्युक्तम् । एवं च तस्मात्तपस्तेपानादिति श्रुतिरपि नकार्यत्वं बोधयति किंतु प्रादुर्भावमात्रम् । नाप्यंकुरादिवज्जन्यत्वं निश्वसितश्रुतिविरोधात् । तस्मादीश्वरात्मत्वं वेदस्य सर्वप्रमाणाविरुद्धम् । एवं वेदस्य स्वरूपतो लौकिकवैलक्षण्यमुक्त्वा लौकिकशब्दाद्वेदे विशेषांतरमर्थतोपि वक्तुं वर्णाद्यर्थं वदिष्यंतो मतांतरानुवादपूर्वकं स्वमतमाहुः ॥ अत्रेत्यादि ॥ ॥ अत्रेति त्रिविधशब्दमध्ये । केषां चिदिति नैयायकादीनाम् ॥ केचिदिति ॥ एकदेशिनः । वाक्यं तु श्रौतानुष्ठानपद्धत्तौ प्रसिद्धम् "वेदाक्षराणि यावंति पठितानि द्विजोत्तमैः । तावंति हरिनामानि कीर्तितानि नसंशयः ॥" अत्राक्षराणां भगवन्नामत्वकथनेन भगद्वाचकत्वसिद्धेर्वर्णा अप्यर्थवंत इत्यर्थः ॥ नच वर्णपदेन चादयो ग्राह्याः तेष्वर्थवत्ताया अपि संमतत्वादिति वाच्यम् । उक्तवाक्यगतयावत्पदविरोधात् । तेषां प्राधान्येन वाचकत्वे समुच्चयः शोभनः समुच्चयो द्रष्टव्य इतिवत् । च शोभनः च द्रष्टव्य इति प्रयोगापत्तिरूपदोषस्य मीमांसकैरेव दर्शितत्वात् । गुणत्वेन वाचकस्य द्योतकत्वे

पर्यवसानाच्च । व्याख्येयग्रंथविरोधाच्च ननु वर्णार्थवत्ता तथापि दुर्घटैव । वाक्ये अक्षरपादात् । वर्णाक्षरपदयोश्च पर्यायताविरहात् । घृणिरिति द्वे अक्षरे । सूर्य इति त्रीणि । आदित्य इति त्रीणीति । अष्टाक्षरागायत्रीत्यादिश्रुतिभिरज्जलसमुदायस्यैवाक्षरत्वप्रतीतेः । समुदायस्य च पदत्वादिति चेत् न । आश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरमित्यादिश्रुतिव्यापकोपप्रसंगात् । अत्राकारस्य अकारस्य च केवलस्याप्यक्षरत्वोक्तेः । अक्षराणामकारोस्मीति गीतावाक्याच्च । वर्णत्वं च न केवलव्यञ्जनस्य । वर्णात्कार इत्यस्योदाहरणेन ककारः पकार इत्यादिरूपेण तथा निश्चयात् । एवं चाक्षरत्वं वर्णत्वं च केवलानां व्यंजनोपष्टंभकाच्च सिद्ध्यतीति पर्यायता निराबाधैवेति निरर्थकत्वं केवलव्यञ्जने पर्यवस्यतीति न वर्णार्थवत्तादौ घट्यमिति दिक् ॥ अत इति ॥ अबाधितप्रत्यभिज्ञाया वर्णपदयोः सर्वत्राभिन्नत्वात् ॥ अर्थं व्याकुर्वंति ॥ सर्वेषामित्यादि ॥ तत्रेति ॥ सर्वेषां सर्वार्थवाचकत्वे भगवद्वाचकत्वमेव कथमित्याकांक्षायां शास्त्रस्य श्रौतत्वेन श्रुतेरिति बोधयितुं तात्पर्यमुखेनाहुः ॥ ॥ भगवानित्यादि ॥ अयमर्थः सर्वं खल्विदं ब्रह्म । आत्मा वा इदं सर्वम् इदं सर्वं यदयमात्मेत्यादिश्रुतिसमर्थनेन पूर्वोक्तरीतिकाविर्भावनिरूपणद्वारा सर्वस्य ब्रह्मत्वं साधितमिति स एव सर्वम् । किंच । मांडूक्यादौ प्रणवार्थविचारे ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानमित्यनेन प्रणवस्वरूपं सर्वस्य वाङ्मयस्य तद्व्याख्यानत्वमुक्तम् । व्याख्यानव्याख्येययोश्चैकार्थ्यम् । एवंसति व्याख्यानस्य विशेषप्रतिपत्त्यर्थकत्वाद्योर्थः । सामान्याकारेण प्रणवेनोच्यत इति सिद्ध्यति । तद्वेव भूतं भव्यं भविष्यदिति सर्वमोंकार एव यच्चान्यत्त्रिकालातीतं तदप्योंकार एवेत्यादिनोक्तम् । द्वादशस्कंधेच–"समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ॥ हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥ यदुपासनया ब्रह्मन् योगिनो मलमात्मनः । द्रव्यक्रियाकारकाख्यं धूत्वा यांत्यपुनर्भवम् ॥ ततोभूत्त्रिवृदोंकारोऽव्यक्तप्रभवः स्वराट् । यत्तल्लिंगं भगवतो ब्रह्मणः परमेष्ठिनः ॥ शृणोति य इमं स्फोटं सुप्तश्रोत्रे च शून्यदृक् । येन वाग्व्यज्यते यस्य व्यक्तिराकाश आत्मनः ॥ स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः ॥ स सर्वमंत्रोपनिषद्वेदबीजं सनातनम्" इतिसूतवाक्ये प्रणवसूक्ष्मरूपस्य नादस्य ब्रह्मवाचकत्वं वाग्व्यंजकत्वं सर्वमंत्रोपनिषद्वेदबीजत्वं चोक्तम् ॥ बीजशक्तिरेव च कार्ये बीजं च ब्रह्मवाचकमित्यतोपि वर्णादीनां ब्रह्मवाचकत्वम् ॥ तदेतदुक्त इति ॥ ॥ वस्तुस्थितिरिति ॥ नन्वेवं वस्तुस्थितौ भाष्यप्रत्याहाराह्निकस्थो वर्णानां स्वभावतः सार्थकानर्थकत्वविभागो विरुध्यते तथा पदानामपि सर्वार्थकत्वे व्यवहारस्यापि न सिद्धिरिति तदर्थमुपायमाहुः ॥

॥ तथापीत्यादि ॥ "सर्वाणि रूपाणि विचिंत्य धीरः नामानि कृत्वाभिवदन्यदास्ते" इत्यादिश्रुतेः " वेदेन नामरूपाणि विषमानि समेष्वपि । धातुषूद्भव कल्पंते एतेषां स्वार्थसिद्धये" इति वाक्यात्॥ यदश्वयत्तदश्वस्याश्वत्वम्। एतद्वा अपां नामध्येयगुह्यं यदाधावा इत्यादिषु तथा नियमनदर्शनाच्च ज्ञायते शक्तिसंकोचः कृतइति तस्य स्वरूपमाहुः॥ ॥ आदेशेत्यादि॥ आ सर्वतः। तथाच नैयायिकप्रतिपन्नो यः संकेतः। अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारकेश्वरेच्छारूपः स शक्तिसंकोचरूप एव न तु शक्तिः। शक्तिस्तु पदपदार्थयोर्नित्यसंबंधरूपा पदार्थांतरमेव नत्विच्छायुक्तं चैतत्। अन्यथा शक्तेर्वृत्तिविशेषत्वं न स्यात्। शाब्दबोधानुकूलस्य पदपदार्थसंबंधस्य वृत्तित्वेनेच्छायाश्च तद्व्याप्यत्वाभावेन तद्विशेषत्वस्याशक्यवचनत्वात्। किंच। परेच्छायाः परेण ज्ञातुमशक्यत्वेनेश्वरेच्छायाः सुतरां तथात्वात्तज्ज्ञापको व्यवहारप्रवर्त्तकोऽभिलापः सर्वथांगीकार्यः। तथासति स एव संकेतोऽस्तु नेच्छा स च पूर्वोक्तश्रुत्यादिरूप एवेति संकोचिकैव सा श्रुत्यंतरानुरोधात्। अतोपि शक्तिरतिरिक्ता फलति। एवं च संकोचेन तस्याः शाब्दबोधानुकूल्ये व्याप्यतायां वृत्तिविशेषरूपत्वं सुघटमिति पदार्थांतरत्वपक्ष एव मीमांसकाभिमतः साधीयान्। एतदभिसंधायाहुः ॥ अतो विशेषाख्यापकानि जातानीति। इयं च ज्ञातोपयुज्यते। तद्ग्रहे पदैः पदार्थबोधादर्शनात्। तद्ग्रहणं च शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदंति सांनिध्यतः सिद्धपदस्य वृद्धा इत्यभियुक्तोक्तेर्व्याकरणादिभिर्ज्ञेयम्। प्राथमिकशक्तिग्रहप्रकारादिकं प्रस्थानरत्नाकरे मयोपपादितमिति नेहोच्यते। नन्वेवं शक्तिसंकोचेपि न व्यवहारसिद्धिः। वर्णानां वाचकत्वांगीकारेण पदावयवभूतानामपि वाचकत्वात् वर्णपदाभ्यां युगपत्स्वस्वार्थबोधने शाब्दबोधदौर्घ्यम्। क्रमेण बोधने च पटादिपदोच्चारणे प्रथमोपस्थितेन पकारेण स्वार्थबोधे द्वितीयेन च स्वार्थबोधे निराकांक्षतायां पटबोधादन्यार्थमुच्चारितेनान्यार्थबोधनेनातिप्रसंगाच्चेत्याशंकायां संकोचांतरमाहुः॥ ॥ तत्रेत्यादि॥ तत्रेति पदेषु॥ ॥ वर्णानां तुल्यत्वेपीति ॥ यदावयवभूतानां केवलवर्णसदृशत्वेपि। नन्वेवं वर्णानां क्वचिदर्थवत्त्वं क्वचिन्नेत्यर्द्धजरतीयाद्वर्णानामनर्थकत्वमेव वरमित्याकांक्षायां वर्णार्थानंगीकारे बाधकं तर्कमाहुः॥ ॥ अन्यथेत्यादि ॥ तथा च यथोत्पलस्याल्पोधिको वा संकोच एव तथाल्पवाचकत्वमिवावाचकत्वमपि संकोच एवेति संकोचे च व्यवहारस्यैव नियामकत्वमिति तथेति भावः॥ १५६॥ १५७॥

ब्रजभाषाटीका।

वर्ण पद ये दोनों नित्य हैं। लौकिक वाक्य अनित्य है।

क्योंकि आधुनिक बुद्धिपरिकल्पित हैं लोकमें वाक्यके वर्ण तो नित्यहीहैं । वैदिक वाक्य तो नित्यहै । वेदमें तो वर्ण पद वाक्य तीनों स्वयं हरिहै कोईके मतमें पदही अर्थवाले माने हैं वर्ण वाक्य अर्थवाले नहिं मानेहैं कोईके मतमें वाक्यनकूँभी अर्थवाले माने हैं हमारे मतमें तो वर्णभी अर्थवाले हैं (वेदाक्षराणि यावन्ति पठितानि द्विजोत्तमैः । तावन्ति हरिनामानि कीर्तितानि न संशयः) इत्यादिवाक्यनमें वेदको एक एक अक्षर भगवान्को नामहै यह स्पष्ट लिखोहै सर्व वर्ण भगवानके वाचकहैं ॥ १५६ ॥ और भगवान् सर्वरूपहै तासों सब वर्ण तथा पद सर्ववस्तुके वाचकहैं परन्तु लोकमें जल अन्न वस्त्र आदि पद सबके ही वाचक मानेजाँय तो बुभुक्षित पुरुषके मुखसों (अन्नं देहि) ऐसो उच्चारण सुनके वस्त्र दियोजाय तथा शीतातुर पुरुषकों(वस्त्रं देहि) ऐसो उच्चारण सुनके जल दियो जाय तो लौकिक व्यवहार बिगडजाय तासों शब्दनकी सामर्थ्यकों संकोच करकै एक एक दोय दोय पदार्थके वाचकही एक एक शब्द मानेहैं अर्थात् देशकालके भेदकरके उच्चारण कियोभयो यह शब्द याही अर्थको बोध करावो और अर्थको बोध मत करावो यारीतिकों शक्तिसंकोच करेहै तासों जितने शब्दहैं सब संकुचित शक्ति होयके पदार्थ विशेषके वाचक होगये जैसे घट यह शब्द सबही पदार्थको वाचकहै परन्तु व्यवहार सिद्धिके लिये घडाकोई बाचक मानेहैं ॥ कूप, सूप, यूप, इन शब्दनके अवयव जे वर्णहैं वे केवल वर्णनके समानहैं तथापि एक एक वर्ण एकएक अर्थको प्रतिपादन नहिं करेहै वैसे होय तो व्यवहार सिद्धि नहिं होय व्यवहार चलवेके लिये पदमध्यपाति वर्णकों सर्वथा शक्तिसंकोच मानके उनकूं अवाचक मानके पदकूं वाचक

वर्णनकूँ निरर्थक तो नहिं माने हैं अन्यथा

अच् प्रत्ययादिकनको भूआदि धातुनकोभी अर्थ नहीं होयगो व्यवहारही या विषयमें नियामक है ॥ १५७ ॥

तत्र व्याकरणादीनां व्यवस्थापकता मता ।
देशे देशे तथोच्चारो भाषाभेदैरनेकधा ॥१५८॥
अनंतमूर्त्तयो वर्णाः पदे तेनार्थवाचकाः ।
केवलाःकोशतो ज्ञेया वाचकाःपदतोथवा१५९

तत्त्वदीपप्रकाशः ।

तत्रापि व्यवस्थामाह ॥ तत्र व्याकरणादीनामिति ॥ नकेवलं कोशादिरेव नियामकः किंतूच्चारो भाषाभेदश्च । अतः सर्वमुपपद्यते ॥ १५८ ॥ इदानीमुत्तरोत्तरबलिष्ठत्वं वक्तुं पदे वर्णानामवाचकत्वं वाक्ये पदानामित्याह ॥ अनन्तमूर्तयो वर्णा इति ॥ वर्णानां गौण-मुख्यभेदेन नानामूर्तित्वम् । तेन पदावयवभूताः गौणा इति नार्थवा-चकाः केवलाश्च वर्णाः । एकाक्षरनिर्घंट्वादिभिर्व्यवहारेऽप्यर्थवाचकाः । तेषां पदत्वं वा प्रत्ययरहितानामर्थाज्ञापकत्वात् ॥ १५९ ॥

आवरणभंगः ।

ननु व्यवहारार्थसंकोचश्चेत्तदर्थं पदलक्षणमेवान्यद्वाच्यम् ॥ वर्णसमुदायः पद-मिति ॥ ॥ तथा सत्यर्द्धजरतीयं विनैव प्रत्ययादेरर्थवत्ता सेत्स्यते व्यवहारेपि सेत्स्यतीति चेत्तत्राहुः ॥ ॥ तत्रापीत्यादि ॥ ॥ तत्रेति संकोचे । तथाच शक्तिग्रहं व्याकरणोपमानेत्याद्यभियुक्तावपि व्याकरणादीनामेव शक्तिग्राहकत्वमुक्तमिति तान्येव व्यवस्थापकानि नतु यस्य कस्यापि कल्पनम् ॥ यद्यपीदं नैयायकलक्षणं विवृत्तौ प्रविशति तथापि व्याकरणस्याङ्गत्वात्तदपेक्षया लौकिकस्यास्य निर्बल-त्वाल्लोकस्य व्याकरणाद्युपजीवकत्वाच्च तद्विरोधेऽनादरणीयत्वम् ॥ अन्यथाक-ल्पनैकशरणत्वे शास्त्रविप्लवापत्तिरिति तान्येव व्यवस्थापकानीति न लक्षणांतरा-दिभिर्निर्वाह इत्यर्थः ॥ संस्कृतव्यवस्थापकान्युक्त्वा भाषाव्यवस्थास्थापकानि वक्तुमाहुः ॥ ॥ नकेवलमित्यादि ॥ ॥ तेन भाषायामपीश्वरकृतादेव संकोचात्तेपि शक्त्यैव बोधका नतु शक्तिभ्रमेण तत्र बोध इति ज्ञापितम् ॥ वक्ष्यति चाग्रे "अस्म-दादिमुखेनापि क्रीडार्थं सर्वतो हरिः। शब्दभेदं वितनुते रूपेष्विव विनिश्चयः" इति॥

मूलयोजना तु देशे देशे भाषाभेदैरनेकधोच्चारस्तथा संस्कृते व्याकरणादिवत्तत्तद्देशिकव्यवहारो व्यवस्थापक इत्यर्थः ॥ एवं सति शक्तिसंकोचलक्षणे अयं भाषाशब्दोऽस्मिन्देशे इत्यधिकं निवेश्य भाषायामपि सल्लक्षणीय इति तात्पर्यम् ॥ तदेतदभिसंधायाहुः ॥ अतः सर्वमुपपद्यत इति ॥ ॥ अत एव शक्तपदादिव तेभ्योपि तत्तद्देश्यानां तेषु गृहीतशक्तिकानामन्यद्देश्यानां च पदार्थोपस्थितिदर्शनं युज्यते । नच तत्र शक्तिभ्रमात्पदार्थोपस्थित्यादिकमिति युक्तम् ॥ भ्रमत्वविनिगमकस्याभावात् ॥ पर्यायशब्देष्विव तेष्वपि पूर्वोक्तरीत्या संकोचेन शक्तिसिद्धौ तद्ग्रहस्य प्रमात्वसंभवे भ्रमत्वकल्पनाया अन्याय्यत्वात् ॥ ॥ अग्रे बाधाभावाच्च ॥ ॥ न च तत्र लक्षणा । कुत्रापि शक्यभावे शक्यसंबंधरूपाया लक्षणाया अप्यसंभवेनाशक्यवचनत्वात् ॥ १५८ ॥ एवं व्यवहारसिद्धिमुपपाद्य तदर्थमन्यदप्याहुः ॥ ॥ इदानीमित्यादि । इत्याहेति॥ ॥ इदं प्रमेयं सार्द्धेनाहेत्यर्थः ॥ ननु केवलानां वर्णानां वस्तुगत्या वाचकत्वमस्तु परं व्यवहारानुपयोगात्तन्नादरणीयमित्यत आहुः ॥ केवलाश्चेत्यादि ॥ ॥ तथा च न वर्णार्थस्यानादरणीयतेत्यर्थः ॥ ननु ते विभक्तिभाज एव लोके प्रयुज्यंत इति न तेषां वर्णत्वेन रूपेणार्थवत्वमपि तु पदत्वेनेत्यतस्तदुपगम्याहुः ॥ तेषामित्यादि ॥ ॥ तेषामिति ॥ ॥ निघंट्वाद्युक्तानाम् ॥ एतेन वेदे वर्णानामक्षरत्वेन रूपेण भगवद्वाचकत्वम् । अन्यत्र तु पदत्वेनेत्यपि बोधितम् ॥ नच सिद्धांतभंगः ॥ तेषामिति कथनेन तद्भिन्नानामेकाक्षरप्रत्ययादिरूपाणामर्थवत्तानपायसूचनात् ॥ केवलानां पदावयवाभावाच्च ॥ वाक्यार्थवत्तां साधयितुं वाक्ये पदानां गौणानामेव सत्वमिति बोधयंतोऽवयवभावे पदेप्यवाचकत्वमतिदिशंति ॥ १५९ ॥

व्रजभाषाटीका ।

जब शक्तिसंकोच मान्यो तब घटपटादिशब्दनकरकें कोन पदार्थनकी उपस्थिति होयगी तहाँ व्यवस्था कोश व्याकरणादिनकरकें करलेनी भाषाके शब्दनके उच्चारणमें न्यारे न्यारे देशके न्यारे न्यारे भाषानके भेदनकरके व्यवस्था करलेनी यारीति सर्व व्यवहार बनसके हैं ॥ १५८ ॥ वर्णसों पद बलिष्ठहै पदसों वाक्य बलिष्ठहै पदमें वर्ण वाचक नाहिं हैं वाक्यमें पद वाचक नाहिं हैं वर्ण अनन्तमूर्तिवाले हैं पदनमें जे वर्ण हैं वे गौणहैं केवल जे

वर्ण हैं वे एकाक्षरकोशके अनुसार तथा निघण्टुद्वारा व्यवहारमेंभी अर्थके वाचक हैं वे मुख्य हैं ॥ १५९ ॥

पदं न वाचकं वाक्ये साद्दश्यात्स्मारकं परम् । विशिष्टं वाक्यमेवात्र वाक्यार्थस्य च वाचकम् ॥ १६० ॥ पदान्तरप्रवेशेन विशिष्टे वाच्यवाचके । पटवद्वाक्यभेदश्च वाक्यार्थश्चापि भिद्यते ॥ १६१ ॥

तत्त्वदीपप्रकाशः ।

तथा वाक्येपि पदं न वाचकं तर्हि संकेताग्रहेपि वाक्यार्थज्ञानं स्यात् । गौरवं च स्यादित्याशंक्याह ॥ **साद्दश्यात्स्मारकं परमिति ॥** वाक्यावयवभूतस्य स्वतंत्रपदतुल्यत्वात्पदार्थस्मारकत्वम् । अन्यथा स्वार्थं प्रतिपाद्य कृतार्थत्वे वाक्यार्थो नतैर्ज्जन्येत । आकांक्षादेर्वाक्यशेषत्वात्प्रकृतिप्रत्यययोरपि नैकार्थवाचकत्वं स्यात् । पदार्थकरणपक्षेपि पूर्वपदार्थानां निवृत्तत्वात्पुनरुपस्थानं केन वा स्यात् । अविद्यमानानां वा कथं बोधकत्वम् । वाक्यार्थसमाख्याविरोधश्च । अतो वाक्यमेव वाचकमित्याह ॥ **विशिष्टमिति** ॥ स्वावयवैः स्वावयवार्थमिति चकारार्थः ॥ १६० ॥ वाक्यानामानंत्यात्संकेतग्रहो दुर्लभ इत्याशंक्याह ॥ **पदांतरप्रवशेनेति** ॥ घटमानयेति वाक्याद्घटं शीघ्रमानयेति भिन्नम् । एवमानंत्येपि न दोषः ॥ **तत्र द्दष्टान्तः ॥ पटवदिति** ॥ द्वितन्तुकपटात् त्रितन्तुकोऽन्यः ॥ तथोत्तरत्रापि आरंभकवादस्यानंगीकारात् । तथा अपूर्वत्वाद्वाक्यार्थस्य पूर्वसंसर्गादुत्तरस्य भिन्नत्वम् ॥ १६१ ॥

आवरणभंगः ।

तथेत्यादि ॥ ॥ तर्हीत्यादि ॥ ॥ वाक्यस्यावाचकपदघटितत्वे वाक्यावयवभूतानामवाचकत्वे भिन्नत्वे च कोशादौ तदनिर्देशेन संकेताग्रहेपि वाक्या-

र्थज्ञानं स्यात् । अर्द्धजरतीयभेदाभ्यां कृतं गौरवं च स्यात् । नच यथाप्रभाकरमते द्वेधापदशक्तिरनुभाविका स्मारिका च ॥ कार्यान्विते जातौ च स्वीकृता ॥ तथानुभाविकां केवलेषु स्मारिकां वाक्यावयवभूतेषूपगम्यैतेषु द्वितीयस्याः सत्वाचेन द्वारेण वाक्यार्थज्ञानं निराबाधमिति वाच्यम्॥ तथापि शक्त्यंतराकल्पनाकृतं गौरवं तु स्यादित्याशंक्याहेत्यर्थः ॥ सादृश्यादित्यादि ॥ ॥ तथाच केवलेषु गृहीतस्य संकेतस्य सादृश्यमहिम्नैवेति स्मारणात्तद्वारा वाक्यार्थज्ञानसंभवः शक्त्यंतराकल्पनाच्च न गौरवामित्यर्थः ॥ नचैवं सति गृहीतविस्मृतशक्तेस्ततः शाब्दबोधो न स्यादिति वाच्यम् । तुल्यत्वात् । शब्दानित्यतावादिमतेपि वाक्यार्थबोधावसरे शक्तिग्रहसामयिकपदस्याभावाच्छक्तिस्मारकसंस्कारोद्बोधहेतुत्वेन सादृश्यस्यैव वक्तव्यत्वादनेन तदभावेहेत्वंतरस्य तेनापि वाच्यत्वात् । नित्यतावादेपि स एवायमिति तेन स्वार्थबोधाजनने तत्र हेत्वंतरस्य तेनापि वाच्यत्वात् । ननु वक्ता पदार्थमवगम्य वाक्यार्थमवगमयितुं तानि वाक्ये प्रयुज्यंते । यदि तान्यनर्थकानि स्युः तदा तेषां प्रयोगो नोपपद्येत नच स्मारकत्वमपि ज्ञात्वा सदृशान्येव प्रयुज्यन्त इति शक्यवचनम् । तस्यासिद्धत्वात् ॥ अन्यथेत्यादि ॥ ॥ वाक्यार्थ इति ॥ ॥ संसर्गरूपो वाक्यार्थः ॥ तथा च स्मारकत्वानंगीकारे सकृदुच्चारितानां तेषां सकृत्स्वार्थं गमयित्वा तथात्वे पदांतराकांक्षाया अभावाच्चैर्वाक्यार्थः संसर्गरूपो नजन्येतेत्यर्थः ॥ पदेभ्यश्च पदसमूहो भिन्नः ॥ अन्यथा पदैर्वाक्यार्थबोधने पदेषु युगपद्वृत्तिद्वयापत्तिः पदार्थवाक्यार्थयोर्बोधिके वृत्ती इति द्वयम् । दूषणांतरमाहुः ॥ प्रकृतीत्यादि ॥ ॥ प्रकृतेः स्वार्थं प्रतिपाद्य कृतार्थत्वे प्रत्ययाकांक्षाया अभावाद्भिन्नार्थतैव स्यान्नत्वैकार्थ्यम् । तथाच प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोस्तु प्रत्ययः प्राधान्येनेति नियमश्च व्याहन्येतेत्यर्थः॥ ननु तर्हि भाट्टाभिमतः पदार्थकरणपक्षोऽस्तु तथासति पदानां कृतार्थत्वेपि पदोपस्थापितपदार्थैरेव वाक्यार्थो भविष्यतीति न कोपि दोष इत्यतस्तत्रापि दूषणमाहुः ॥ पदार्थेत्यादि ॥ ॥ नन्वेवं सति शक्तिमत्पदज्ञानस्यैव शाब्दबोधे करणत्वमस्तु इत्याशंकायां दूषणांतरमाहुः ॥ वाक्यार्थेत्यादि ॥ ॥ समाख्याया यौगिकशब्दत्वाद्वाक्यस्यार्थाभावे योगस्याप्रवृत्तेस्तथेति नायमपि पक्षः साधुरित्यर्थः ॥ चकारेण वाक्यार्थस्याशाब्दत्वं स्यादित्यपि समुच्चीयते । तथासति चाक्षुषादिशब्दवत्करणोपाधिनिबंधनः शाब्द इति व्यवहारोपि बाध्येतेतिच । एवं सति वाक्यावगींकारे दोषबाहुल्यात्स्मारकत्वपक्ष एव साधीयान् । एवं च यथारूस्वावर्णस्य प्रक्रियादशायां विवृतत्वं प्रयोगे संवृतत्वमनुशासने शाब्दिकैस्तथावक्ता वाक्यघटनार्थमर्थवत्तां स्मरणेऽप्युच्चार-

णदृशायां तत्सदृशानि स्मारकान्येवाभ्युपयंतीति लाघवाद्दोषाभावाच्चाङ्गीकार्यमिति निष्कर्षः ॥ तदेतद्धृदि कृत्वाहुः ॥ अत इत्यादिविशिष्टमिति ॥ ॥ अवांतरान्वयविशिष्टम् । अन्वयश्च विवक्षितार्थविबोधकः पदादिसंबंधः स्वावयवार्थमिति ॥ अवांतरान्वयम् ॥ एवं च स्वावयवैरवांतरवाक्यैः स्वावयवार्थमवांतरान्वयवद्वाक्यमेव तत्तत्कारकनिष्ठक्रियान्वयरूपस्य मुख्यवाक्यार्थस्य वाचकमित्यर्थः फलति ॥ वाक्यप्रयोगं विना केवलपदेनान्वयाबोधादन्वयस्य पदलभ्यत्वाभावात् । विशिष्टे शक्तिग्रहः । प्रथमं भवतीति पक्षस्तु प्राथमिकशक्तिग्रहस्य नियमतो व्यवहारजन्यत्वनिराकरणादेव निराकृतः ॥ नाप्यन्वयस्यार्थसंसर्गमर्यादालभ्यत्वं सन्निहितेऽश्वे गामानयेति वाक्ये तदतिहायाश्वबोधापत्तेः ॥ नापि पदसमभिव्याहारलभ्यत्वम् ॥ तस्य संनिधिरूपत्वेन दूरान्वये श्लोकादौ तत्सत्वेप्यन्वयाबोधप्रसंगात् ॥ नापि स्मृत्या तत्रापि पदसमभिव्याहारसंभवान्न दोष इति वाच्यम् ॥ तथासति बोधविलंबादिप्रसंगात् ॥ अन्वयबोधस्याशाब्दत्वादिप्रसंगाच्च ॥ नचेष्टापत्तिः ॥ पूर्वोक्तदोषाणामापत्तेः ॥ तस्मादाकांक्षादिमत्पदकदंबरूपवाक्यस्य प्रयोजनायापरिष्कृतस्यैवान्वयोभिधेय इति वाक्यस्यैवार्थ इति सिद्धम् ॥ एवं च शाब्दानुभवत्वावच्छिन्नं प्रतिज्ञायमानवाक्यत्वेनैव कारणत्वमनुगतं बोध्यम् ॥ वृत्तिमत्पदस्मारितपदार्थोपस्थितिः साकांक्षावान्तरवाक्योक्तान्वयोपरिस्थितिश्च यथायथमवांतरवाक्यमहावाक्ययोर्व्यापारभूते ज्ञेये इति दिक् ॥ अत्रैवं क्रमो निष्पद्यते । पूर्वं पदशक्तिं गृहीतवतो वाक्यश्रवणोत्तरं तदवयवभूतैः पदैः शक्तिग्रहजन्यसंस्कारोद्बोधे पदार्थस्मरणं ततोऽवांतरवाक्यैस्तं व्यापृत्यावांतरवाक्यार्थबोधस्ततस्तमपि व्यापृत्य महावाक्ये वाक्यार्थबोधो जन्यत इति ॥ १६० ॥ वाक्यानामित्यादि ॥ शाब्दज्ञानत्वावच्छिन्नप्रतिशक्तिग्रहस्य सहकारितानियमाद्वाक्यार्थज्ञानं प्रत्यपि वाक्यशक्तिग्रहस्य सहकारिता वाच्या तत्र संकेतग्रहस्तु दुर्लभः । वाक्यानामानन्त्ये तत्तच्छक्तिग्राहकानुशासनकोशवाक्यशेषाणामभावात् ॥ अर्थस्य काल्पनिकत्वेन पूर्वमदर्शनात् । द्रष्टुराप्तस्याभावेन तद्वाक्यस्याप्यशक्यवचनत्वात् ॥ अतएव विवृतेरप्यभावात् ॥ नाप्युपमानात् ॥ यथा गोसदृशपिंडदर्शनोत्तरमुद्बुद्धसंस्कारस्यातिदेशवाक्यार्थस्मरणेनायं गवयपदवाच्य इति संज्ञिपरिच्छित्तिस्तथात्र प्रकारमाहेत्यर्थः ॥ पदांतरेत्यादि ॥ पदांतरप्रवेशेन कृत्वा वाच्यवाचके वाक्यार्थसहिते वाक्ये विशिष्टे यथायथमर्थांतरपदांतराभ्यां सप्रकारके सति पटवदित्यादि ॥ घटमानयेत्यादि ॥ अयमर्थः ॥ यद्वाक्यानामानंत्यं भवतोक्तं तदर्थांतरप्रवेशेन पदांतरप्रवेशेन वा तत्राद्यन्तु न शक्यवचनं वाक्यावयवभूतैः पदैः पदार्थेषु स्मारितेषु तेषां चारितार्थ्यात्पदात् । स्मारितस्यार्थस्य तत्र प्रवेशे गौ-

रानीयतामित्यादावप्याक्षिप्तसांनिध्यादिवशेनाश्वादिप्रवेशापत्तेः । तत्तद्वारमित्यादौ पदस्मारिताया एव क्रियायाः प्रवेश इति वाच्यम् । तत्रापि समयादिविशेषवशेन संवरणाद्यवगमदशायामपि शब्दस्मारणपूर्वकमेवार्थस्मारणस्यानुभवसाक्षिकत्वात् । अतः क्रियादिवाचकपदांतरप्रवेशेनैवानंत्यं वक्तव्यम् ॥ एवमानंत्येपि न संकेतग्रहदौर्लभ्यमित्यर्थः॥ कुत इत्याकांक्षायां व्यवहारोपमानाभ्यामिति वक्तुमाहुः॥ तत्र दृष्टांत इत्यादि ॥ ॥ तद्विवृण्वंति ॥ द्वितंतुकेत्यादि ॥ ॥ श्रुतौ सत्कार्यवाद इति तदनुयायिभिरारभ्यारंभकवादानंगीकाराद्वितंतुकपटात्त्रितंतुकः पटोऽन्यः । कारणीभूतावयवसमुदायभेदाद्भिन्न एव भवति । तथा त्रितंतुकाच्चतुस्तंतुकादिरपि । तथा तद्वद्वाक्यार्थस्यान्वयरूपस्य पदार्थांतरसंसर्गेण पूर्ववाक्यार्थापेक्षायान्नूतनत्वादुत्तरस्य संसर्गस्य पूर्वसंसर्गात्सरूपतो भिन्नत्वं नतु विजातीयत्वेन भिन्नत्वम् ॥ तथासति यथैकत्र पटे गृहीतशक्तिकं पटपदमवयवभेदभिन्नान् पटांतरानपि तथैव शक्त्या पटत्वेन रूपेण बोधयति । तथैकं गोपदयुक्तं वाक्यमेकत्र गवान्विते वाक्यार्थे वृद्धव्यवहारेण तद्वाक्येन वा गृहीतशक्तिकं जातं चेत् तदा तद्दृष्टांतेन पदांतरप्रवेशकृतवाक्यांतरमपि नानासंसर्गकान् वाक्यार्थान् बोधयिष्यतीत्युपलक्षणविधया क्रियापदयुक्तं यद्वाक्यं तत्तदर्थान्वितं वाक्यार्थं बोधयतीति व्याप्त्या ततोऽभ्यासदार्ढ्येन बोधयिष्यतीति नसंकेतग्रहदौर्लभ्यमित्यर्थः ॥ एवं च पूर्वं शब्दब्रह्मणो घोषस्येव वर्णपदवाक्यसंज्ञावत्वं नतु परस्परं भेद इति यत्प्रतिज्ञातमासीत्तदपि दृढीकृतं ज्ञेयम् ॥ १६१ ॥

व्रजभाषाटीका ।

वाक्यमें पदभी अर्थवाचक नहिं हैं तहाँ वाक्यके पदनकूँ अर्थवाचक नहिं मानोहो तो जो पुरुष पदनके अर्थकूँ नहिंजाने हैं वाकूँ भी वाक्यके अर्थको ज्ञान होनो चाहिये ऐसी शंका नहिं करनी वाक्यके अवयवरूप होयरहे जे पदहैं वे उनके तुल्य स्वतन्त्रपदनके अर्थनकूँ स्मरणकरायवेवारे हैं उनके द्वारा वाक्यार्थको ज्ञान होये है तासों वाक्यसदृश स्वतन्त्र पदनके अर्थ जानवेवारेकूँ ही वाक्यार्थ को ज्ञान होय है यदि वाक्यके अवयवरूप पदनकों अपने अपने अर्थनके वाचक मानलें तो वे अपने अपने अर्थकूँ ...रके कृतार्थ होजायँ फिर वे पद वाक्यार्थकूँ नहिं प्रकटकरेंगे ...वयसहित वाक्य है सो वाक्यार्थको बोध करवेवारो है

विवक्षित अर्थके बोधक पदनके सम्बन्धकूँ अन्वय कहेंहै ॥१६०॥ तहाँ वाक्य अनन्तहैं उनमें संकेतको ज्ञान कैसें होयगो यह शंका नहिं करनी क्योंकि जैसें दो तन्तुके बुनेभये वस्त्रकूँ पहिचानवेवारो तेहरे तन्तुके बुनेभये वस्त्रकूँ भी पहिचानलेहै ऐसेही (घटमानय--घडाकूँलाव) या वाक्यकूँ जानवेवारो शीघ्र पदके प्रवेश करके (शीघ्रं घटमानय--जलदीघडाकूँ लाव) पहलीके वाक्यसों न्यारो जो ये वाक्यहै याके अर्थकूँ भी जानजावेंहै या प्रकार क्रियापदनके प्रवेशकरकें जुदे जुदे भये अनेक वाक्यनके अर्थकूँ भी अभ्यासके दृढहोयवेसों जानजावेंहै ॥ १६१ ॥

अवांतराणां वाक्यानां स्मारकत्वं तथापरे। वाक्यमेकं हरिश्चैको वेदवाक्यार्थरूपधृक्१६२ अवान्तरेषु च तथा पदे वर्णे तथैव च । त्रयोपि वैदिका भिन्ना नाना धर्म्मयुतास्तथा॥१६३॥

तत्त्वदीपप्रकाशः।

तथा महावाक्ये अवान्तरवाक्यानामवाचकत्वम्। किन्तु पूर्ववत्स्मारकत्वमेव । एवमवान्तरभेदेन सर्वं निरूप्य सम्पूर्णवेद एकं वाक्यं तदर्थोप्येक एवेत्याह॥**वाक्यमेकमिति** ॥ तात्पर्यवृत्त्या तथात्वं वारयति। वाक्यार्थरूपधृगिति ॥ १६२ ॥ तथावान्तरवाक्येषु अवान्तरवाक्यार्थरूपधृक्। एवमुत्तरत्रापि । इदानीं लौकिकवैदिकयोर्वर्णादीनां वैजात्यमाह । त्रयोपि वैदिका भिन्ना इति । उदात्तादिधर्मयोगात् । लोकव्यवहारवर्णादिभ्यो वैदिका भिन्नाः ॥ १६३ ॥

आवरणभंगः।

ननु महावाक्येषु केषांचित्पदानां विस्मरणेपि तदर्थावगतिर्दृश्यतेऽतः पदार्थकरणपक्ष एव साधुर्नतु वाक्यकरणपक्षः । महावाक्यार्थबोधानापत्तेरिति चेत्तत्राहुः ॥ तथा महावाक्येत्यादि ॥ ॥ तथा च तादृशस्थले महावाक्यार्थस्य तावता

नावगतिः ॥ विवक्षितशब्दबोधस्य तदानीमदर्शनात् । घटं शीघ्रमानयेत्यादिषु स्वल्पवाक्येष्वपि शीघ्रपदास्मरणे शीघ्रानयनाभावस्य सर्वानुभवसाक्षिकत्वेन महावाक्येष्वपि तादृशबोधाभावस्येष्टत्वात् । तस्मान्नायमपि दोष इति भावः । एवं वेदस्य प्रमेयत्वकथनायोपोद्घातेन प्रसंगेन चावांतरं यत्सर्वं निरूपितं तदुप-संहरंत एव पूर्वप्रतिज्ञाते प्रमेयैकत्वे युक्तिमाहुः ॥ एवमित्यादि वाक्यमेकमिति । तथार्थैकत्वादेकं वाक्यं वेदः एकवाक्यताप्रकारः पूर्वमुपपादितः । लीलार्थत्वेन कर्मज्ञानबोधककांडयोः परस्पराकांक्षत्वेन च भगवत एकत्वं च सर्वात्मकत्वेन वाक्यार्थरूपत्वं च सर्वे वेद इत्यादिश्रुत्या ॥ एवं लौकिकवाक्यादर्थतोपि विशेष उक्तः ॥ १६२ ॥ उत्तरत्रापीति ॥ ॥ पदे पदार्थरूपो वर्णे वर्णार्थरूप इत्यर्थः ॥ इदानीमित्यादि ॥ ॥ ननु सर्वेषां शब्दानां भगवद्रूपत्वाद्वेदे को विशेष इत्या-कांक्षायामवसरसंगत्या पूर्वं वेदे विशेषं वक्तुमाहेत्यर्थः ॥ कुतो भिन्ना इत्याकांक्षा-यां मूले नानेत्यादिनोक्तामुपपत्तिं व्याकुर्वंति ॥ उदात्तेत्यादिना ॥ एतेनोदा-त्तादीनां ध्वनिधर्माणां वर्णे संक्रमो लोक एव नतु वेदेपीति ज्ञापितं "स्वपादिर्हि-सामच्यनिटि" इत्यादिवद्यादिवर्णानामेवोदात्तत्वादिधर्मयोगकथनात् ॥ नचेदं संक्रमेपि तुल्यमिति वाच्यम् ॥ धर्मयोगस्येच्छाविशेषप्रयुक्तोच्चारणाधीनत्वेन वि-धानवैयर्थ्यस्य दुष्परिहरत्वात् । नचैवमपि कृत्रिमत्वानापायान्न पूर्वोक्तदोषहानिरि-ति वाच्यम् ॥ विधानस्य व्युत्पत्तिमात्रार्थत्वेनाव्युत्पत्तिपक्षस्यैव मुख्यतया तस्य साहजिकत्वेन दोषाप्रसक्तेः ॥ अतएव मंत्रो हीनः स्वरतो वर्णतो वेत्यादिरपि सं-गच्छत इति नेह विवादलेशः ॥ १६३ ॥

ब्रजभाषाटीका।

यापकार महावाक्यमें अवान्तरवाक्यभी वाचक नहिंहैं किन्तु पूर्वरीतिके अनुसार महावाक्यके जो वाक्यहैं वे उनके सदृश स्वतन्त्र अन्य वाक्यनके अर्थकूँ स्मरण करायवेवारे हैं यदि अवा-न्तर वाक्यनकूँ भी वाचक मानोंगे तो वे वाक्य अपने अपने अर्थकूँ जतायके निवृत्त होजायँगे महावाक्यके अर्थकूँ नहि जतावेंगे याप्रकार शब्दसृष्टिके अवान्तर भेदनको निरूपण करकें (घोष) नादरूप शब्दब्रह्महीं वर्ण पद वाक्यरूप होवेहै तासों परस्पर भेद नहिंहैं यह बात दृढकीनी एवं संपूर्ण वेदभी एक महावाक्यहै और एक (हरिः) भगवानही वा वेदरूप महा-

वाक्यार्थके धारणकरवेवारे हैं ऐसें ही अवान्तरवाक्यनमें अवान्तरवाक्यनके अर्थ धारणकरवेवारे भी भगवान्हैं पदमें पदार्थरूप, वर्णमें वर्णार्थरूप भी भगवान्ही हैं ॥ १६२ ॥ लोकके जे वर्ण पद वाक्य हैं उनसों वेदके वर्ण पद वाक्य न्यारेहैं क्यूँकि वैदिक वर्णनमें उदात्त अनुदात्त स्वरित प्रचय न्युब्ज इत्यादि अनेक भेद हैं तासों व्यवहारके वर्णनसों वेदके वर्ण जुदे हैं ॥ १६३ ॥

साहृश्येऽपि न वेदत्वं ताहृग्वाक्ये ततोऽन्यतः॥ अधिकारिविभेदेन धर्माधर्मौ तथापरे॥१६४॥ प्रत्येकं पूर्णता वाक्ये शाखाभेदेषु सर्वतः॥ दर्शादिषु तदंगेषु मंत्रमात्रे तथैव च॥ १६५ ॥ हरिस्तत्तत्स्वरूपेण तस्मात्सर्वत्र वाचकः॥ पुराणे च ततोन्यत्र वाक्यार्थो बुद्धिकल्पितः ॥ ॥१६६॥ पदानामानुपूर्वी तु तत्र कल्प्या ह्यनेकधा॥ सर्वप्रतीतिनाशे तु तन्नाश उपचर्यते ॥ ॥ १६७ ॥ तथावाक्यत्वनिष्पत्ते नदूषणमिहाण्वपि । अद्यापि तानि जायन्ते घटवज्ज्ञानतः स्थितिः ॥ १६८ ॥ विप्रलिप्सादिमूलत्वादप्रामाण्यं च लौकिके॥अप्रामाण्येपि प्रामाण्यं कर्तृविश्वासतःक्वचित् ॥ १६९ ॥ अतो वेदाद्यसंवादी नार्थो ग्राह्यः कथंचन ॥वेदे सर्वत्र नाधिक्यं वाक्येन न्यूनतापि वा ॥ १७० ॥ अतो न वाक्यभेदः स्यात् लोके तन्नैव दूषणम् ।

भूतसूक्ष्मो ध्वनिर्वर्णो नामसृष्टौ निरूप्यते १७१

तत्त्वदीपप्रकाशः ।

क्वचित्काव्यादौ वैदिकतुल्यता भासते तथापि नवेदत्वमित्याह॥ **सादृश्येपि न वेदत्वमिति** ॥ लोकवेदाधिकरणं तु कल्पितमेव जैमिनिनानुक्तत्वात् । लौकिकानां वैदिकानां चेति भाष्यात् । "मयड्वैतयोर्भाषायां, द्व्यचश्छन्दसि, सर्वत्रविभाषागोः" इत्यादिसूत्रकरणाच्च छंदसि च लोकवेदयोः पृथग्निरूपणात् । अतः सादृश्येपि न वेदत्वं शूद्रादीनां वेदबुद्ध्या तथापाठ एव दोषः ॥ १६४ ॥ एवं भेदं निरूप्य वेदैश्च सर्वैरहमेव वेद्य इति यथाश्रुतसिद्ध्यर्थं सर्वत्र वेदे भगवानेवार्थ इत्याह ॥ **प्रत्येकं पूर्णतावाक्य इति** ॥ महावाक्यार्थरूप एव हरिर्नावान्तरवाक्यार्थरूप इति निराकरणार्थं पूर्णता निरूप्यते शाखाभेदेष्वपि पूर्णता । एवमुत्तरत्रापि तदंगेषु प्रयाजादिषु इषेत्वेति मंत्रमात्रे सिद्धार्थेऽपि ॥१६५॥ तत्रहेतुः ॥ **तत्तत्स्वरूपेणेति** ॥ पुराणानामपि वेदतुल्यत्वमभिप्रेत्याह ॥ **पुराणेचेति** ॥ वेदपुराणव्यतिरिक्तस्थले वाक्यार्थो बुद्धिकल्पितः । न भगवद्रूप इत्यर्थः ॥ १६६ ॥ अतस्तत्र विश्वासेन पुरुषार्थसिद्धिः संसर्गस्यापूर्वत्वात् । पदानुपूर्वीनानात्वादिति हेतुः कालिदासवाक्यानामपि बहुकालं स्थितिसिद्ध्यर्थमाह ॥**सर्वं प्रतीतिनाशेत्विति** ॥ रूपसृष्टौ क्रियातः स्थितिः, नामसृष्टौ ज्ञानेनेति ॥ १६७ ॥ तत्र हेतुः ॥ **तथावाक्यत्वनिष्पत्तेरिति** ॥ बुद्ध्यारचनां कृत्वोच्चारयतीति यथान्यायमते तदुच्चारितः शब्दस्तदैव नष्टः सादृश्यभ्रमादेव तदीयव्यवहार इति । तथासति तदीयत्वाभावाल्लोके वेदे न महद्दूषणन्न तथास्मन्मते नित्यत्वात् । उत्पन्नानां च बहुकालं स्थितत्वाच्चेत्याह ॥ **न दूषणमिहाण्वपीति** ॥ तदेव स्पष्टयति ॥ **अद्यापीति** ॥ १६८ ॥ परं प्रामाण्ये विवाद इति वक्तुं तद्धेतूनाह ॥ **विप्रलिप्सादीनि** ॥ यत्र

पुरुषदोषाः संभवंति तदप्रमाणं व्यवहारस्ततोपि भ्रांत इत्याह ॥ अप्रामाण्येपीति ॥ प्रमाणे वेदेऽप्रामाण्यम् । अप्रमाणे प्रतारकवाक्ये प्रामाण्यमिति ॥१६९॥ एतद्वचनस्य प्रयोजनमाह॥ अतो वेदाद्यसंवादीति ॥ ननु वेदेपि दोषसंभवात् विचारेण तथा क्रियत इत्याशंक्याह ॥ वेदे सर्वत्र नाधिक्यमिति ॥ अन्येषामपि वादिनां वेदे नान्ये दोषाः । किंत्वाधिक्यन्यूनते सृष्ट्याद्यर्थवादा अधिकाः ॥ मायानिरूपणाभावश्च न्यूनः । तदुभयं वेदे नास्ति । अतः पदपरित्यागेनाधिकमेलनेन वा नवेदार्थो वक्तव्यः । अतो वेदे वाक्यभेदा अप्रामाणिकाः । लोके तु तन्न दूषणं लौकिकानां बहुदोषग्रस्तत्वात् । ननु वर्णैर्नित्यैस्तत्वाधिक्यं कुतो न भवतीत्याशंक्याह ॥ भूतसूक्ष्म इति ॥ शब्दतन्मात्ररूपो ध्वनिर्वर्णस्तु नामसृष्टौ उभयत्रापि शब्दपदप्रयोगः । परं अतः सृष्टिभेदान्नाधिक्यम् ॥ १७० ॥ १७१ ॥

आवरणभंगः ।

क्वचिदित्यादि ॥ ॥तथा च धर्मयोगमात्रेण लोकवेदशब्दयोर्भेदो न शक्यवचनः । तादृशानुपूर्वधर्मादियोगेनोच्चारितस्य लौकिककाव्यादिवाक्यस्यापि वेदत्वापातादित्याकांक्षायां तत्र तुल्यतया वक्तुरिच्छाधीनत्वेन साहजिकत्वाभावान्न वेदत्वमित्याहेत्यर्थः॥ ननु लोकावगतसामर्थ्यः शब्दो वेदेपि बोधक इत्यादिना लौकिकवैदिकशब्दयोरभिन्नत्वं लौकिकवेदाधिकरणे भट्टवार्त्तिके प्रपञ्चित इति तयोर्भेदो न प्रमाणपदवीमधिरोक्ष्यतीत्यत आहुः ॥ ॥लोकेत्यादि ॥ ॥तत्कल्पितत्वे गमकान्याहुः ॥ ॥ जैमिनीत्यादि ॥ ॥ भाष्यादिति ॥ महाभाष्यात्॥ छंदसीति ॥ अत्रलौकिकमिति सूत्रेण छंदःशास्त्रे इत्यर्थः ॥ तथा च सूत्राकारमहाभाष्यपाणिनिच्छंदःशास्त्रविरोधात् । वार्तिककारोक्तं प्रौढिवादमात्रमेवातो भेदो नाप्रामाणिक इत्यर्थः ॥ ननु यदि वेदसादृश्येपि नवेदत्वं तदा तादृगानुपूर्वस्वरादियोगेन तादृग्वाक्यपाठे शूद्रादेः पापं नस्यात्तथा सत्यपशूद्राधिकरणं विरुध्येत । अतो जैमिनिनैव तन्मुखेन लोकवेदशब्दयोरैक्यं सूचितम् । अतः शास्त्रांतरविरोधोप्यकिंचित्कर इति चेत्तत्राहुः ॥ ॥ शूद्रादीनामिति ॥ तथाचापशूद्राधिकरणस्यैतदभिप्रायकत्वाद्व्याकरणस्मृतेश्च "तामिंद्रो मध्यतो परोव्याकरोदिति" श्रुत्या श्रुतिसामानाधिकरण्यबोधनाच्छंदसोपि तथात्वात्तद्विरुद्धं वार्तिककारोक्त-

मेव दुष्टमिति भावः । मूलयोजना तु । ततस्तस्माद्धेतोः । अन्यतः वैदिकभिन्नात्सदृशवाक्यात् तथामतेः तत्र वेदबुद्धेः पुंसोधिकारभेदेन धर्माधर्मौ शूद्रादेरधर्मो रथकारस्य पल्यादेर्धर्मश्च स्यातामिति ज्ञेयम् ॥ १६४ ॥ ॥ एव मित्यादि ॥ शब्दमात्रस्य भगवद्रूपत्वेपि वेदे यो विशेषस्तद्बोधनाय लौकिकवैदिकशब्दयोर्वैजात्यमुपपादितम् । तदेतत् स एष जीव इति श्लोके वेदस्य गदेश्वभेदकथनात्सिद्धं तन्निरूप्य अर्थेपि लौकिकाद्भेदं दर्शयितुं प्रणवविकारस्य वेदस्यावयवानामपि वाचकत्वं च समर्थयितुं गीतावाक्यतात्पर्यं प्रकटयितुं चाहेत्यर्थः ॥ ननु गीतावाक्यस्य यथाश्रुतार्थसिद्धिरतिदुर्घटा ॥ यज्ञो वै विष्णुरिति वदवांतरवाक्यार्थस्वरूपस्य भगवत्त्वाश्रवणादित्याशंकाया निवृत्यर्थं युक्तिमाहुः ॥ ॥ महावाक्येत्यादि ॥ ॥ पूर्णता निरूप्यत इति ॥ ॥ विजज्ञौ विजज्ञौ इति ह स्माह शांडिल्यः शांडिल्य इत्यादिषु तावद्वाक्यार्थज्ञानमात्रेण ब्रह्मवित्त्वस्य विद्यासमाप्तेश्च बोधनात्तथेत्यर्थः ॥ तथाच वाक्यपूर्णतैवावांतरवाक्यार्थस्य भगवद्रूपत्वावबोधिकेति भावः । पूर्णतायां गमकान्याहुः ॥ ॥ शाखेत्यादि ॥ ॥ अन्यथा तत्तच्छाखोक्तस्य ज्योतिष्टोमादेः फलाजनकत्वापत्तेरित्यर्थः ॥ ॥ उत्तरत्रेति ॥ ॥ तदावांतरे कांडद्वये । तस्याप्यवान्तरे तत्तयज्ञतत्तद्विद्यातत्तदुपासनादिवाक्येषु तदवयवेषु चेत्यर्थः ॥ एवं चावयवानां तत्तद्रूपभगवद्वाक्यकत्वेपि खंडशः प्रतिपादकत्वात्तेषां महावाक्यवाच्ये पूर्णे ब्रह्मण्येव तात्पर्यम् । अंगप्रतिपादकानां याग इव बोध्यम् । तेन न श्रुतिगीतासुबोधिन्या अपि विरोधः । एवं पूर्वप्रतिज्ञाताया वाक्यवाचकताया आकारः प्रदर्शितः । एवं पुराणेष्वतिदेष्टुमाहुः ॥ ॥ पुराणानामित्यादि ॥ तदर्थस्य भगवद्रूपत्वमाहेत्यर्थः ॥ तथाच शतकोटिप्रविस्तरे । अष्टादशसु । तत्स्कन्धखंडसंहिताध्यायवाक्येष्वपि पूर्णतादर्शनात्तत्रापि तत्तद्रूपो भगवानेवार्थ इति ॥ तान्यपि सर्वत्र वाचकानीति भावः ॥ ननु वाक्यार्थः संसर्गरूपो जन्यत्वान्न भगवत्त्वमर्हतीति कथमेवमुच्यत इत्यत आहुः ॥ ॥ वेदेत्यादि ॥ ॥ तथाच पदानुपूर्व्याः सदैकरूप्यात्संसर्गस्यापि सिद्धत्वेनापूर्वत्वाभावेनाजन्यत्वान्नतत्र भगवत्त्वभंगः । किंतु लौकिक एव जन्य इति स एव तथेतिभावः ॥ ननु जन्यत्वेपि घटादिवत् भगवत्त्वसिद्धेरभगवत्त्वकथनं नातीवोपयुज्यत इत्यत आहुः ॥ अत इत्यादि ॥ पदानामिति ॥ ॥ मूलं व्याकुर्वंति ॥ संसर्गेत्यादिहेतुरिति ॥ ॥ उभयोः कल्पितत्वे हेतुरित्यर्थः ॥ कालिदासेत्यादि ॥ एवमर्थसहितयोर्वैदिकलौकिकवाक्ययोर्वैजात्यमुपपाद्य मतांतरवैलक्षण्यार्थं प्रसंगाल्लौकिकवाक्यानां स्थितिप्रकारमाहेत्यर्थः ॥ सर्वप्रतीतेत्यादि । तथा च यावद् ज्ञानं तस्य स्थितिरित्यर्थः ॥ कथमेवमित्यत आहुः ॥ ॥ रूपेत्यादि ॥ ॥ रूपसृष्टौ च तद्वैलक्षण्यात्तथेत्यर्थः ॥

किमत्र बीजमित्याकांक्षयामाहुः॥ ॥ तत्र हेतुरित्यादि ॥ ॥ तथा वाक्यत्वनिष्पत्तेरिति तथा च बुद्ध्या रचनां कृत्वोच्चारयतीति बुद्धिकृतरचनाप्रकारेण पदानां वाक्यत्वनिष्पत्तेः पदानि बुद्ध्यैव लौकिकवाक्यरूपाणि जायंत इति तन्नाशे वाक्यनाशोप्युपचर्यंत इति बुद्ध्यैव स्थितिरिति युक्तमेवेति भावः॥ ननु वाक्यरूपशब्दानां त्रिक्षणावस्थायित्वांगीकारे को दोषो येन तन्नाद्रियत इत्यत आहुः॥ यथेत्यादि॥ ॥ लोके वेदे च महद्दूषणमिति लोके राजकीयवाक्योक्तौ तद्वाक्यमनुकरोतीति व्यवहारापत्तिस्तेनानुकरणेन राजदण्डापत्तिर्दूतानां भंडत्वापत्तिश्चेत्यादि वेदे च यज्ञांगं मंत्रैः प्रेषादौ च तत्तत्फलानाप्तिप्रसंगश्चेत्याद्यूह्यम्॥ नच वेदे तादृशानुपूर्व्यैव फलसिद्धिरिति वाच्यम्॥ मानाभावात्। अनेकशब्दकल्पनागौरवप्रसंगाच्चेति॥ तदेवेति ॥ ॥ उत्पत्तिस्थितिप्रकारं चेत्यर्थः॥ विवाद इति॥ ॥ लौकिकवैदिकवाक्ययोस्तुल्यं प्रामाण्यं प्रबलनिर्बलभावो वेति विप्रतिपत्तिजन्यः स इत्यर्थः॥ तद्धेतुमिति॥ ॥ अप्रामाण्यहेतून्पुरुषदोषानित्यर्थः॥ विप्रलिप्सादयस्तु विप्रलिप्साभ्रमप्रमादकरणापाटवाद्याः॥ तत्रान्यथा ज्ञात्वा परप्रतारणायान्यथाकथनेच्छाविप्रतिलिप्सा। भ्रमोऽतद्वति तदवगाहिज्ञानम्। प्रमादोऽन्यमनस्कत्वम्। संश्लिष्टवाक्त्वं करणापाटवम्॥ एवमन्येप्यूह्याः तेषां संग्रहायाहुः॥ ॥ यत्रेत्यादि॥ ॥ ननु लोकेपि विप्रलिप्सादिमूलस्यैव वाक्यस्याप्रामाण्यं सर्वसंमतं नतु निर्दुष्टवक्तृकस्यापीति। कथं सर्वस्याप्रामाण्यमित्यत आहुः॥ ॥ व्यवहार इत्यादि॥ ॥ ततोपि भ्रान्त इति॥ ॥ सन्निपातकार्यत्वेन भ्रांतोपि विप्रलिप्सादिमूलकत्वादत्यन्तं भ्रान्त इत्यर्थः॥ तद्विशदीकुर्वंति॥ प्रमाण इत्यादि॥ ॥ बौद्धादिवाक्ये भ्रांतप्रतारकवाक्ये च लौकिकानां प्रामाण्याभिमानात्तथेत्यर्थः॥ प्रयोजनमाहेति॥ ॥ अस्य प्रासंगित्वपरिहारायाहेत्यर्थः॥ एतेन पूर्वोक्तं वेदस्य प्रामाण्यं प्रमेयविचारेण साधितम्॥ नन्वित्यादिब्रह्मवादे वेदस्येश्वरकर्तृकत्वात्पुरुषदोषस्तत्रापि संभवदुक्तिक इति॥ तथा क्रियते यदंशे निर्दोषता तत्तदेवाद्रियतेऽतः पूर्वोक्तमनुपपन्नमित्याशंक्याहेत्यर्थः॥ वेदेत्यादि॥ ॥ तथाच वाक्यभेदस्य वैदिकैर्दूषणत्वाभ्युपगमात्तथानिश्चीयते। तत्र पौरुषेयत्वस्यैव दूषकताबीजत्वात्॥ तेषां दोषवत्वस्य संभावितत्वात्॥ ननु वाक्यभेदस्य लोकेपि दूषणत्वांगीकारान्नेदं निश्चायकमित्यत आहुः॥ लोके त्वित्यादि॥ सिंहावलोकनेन कारणसंख्याप्रतिज्ञाहानिं परिहर्तुमाशंकन्ते। ननु वर्णैरित्यादि। ननु कारणे शब्दतत्वस्याङ्गीकृतत्वात्तेनैव निर्वाहे मुधैवेमौ शंकापरिहारावित्याशंकायामाहुः॥ शब्देत्यादि॥ तथाच श्रुतौ नामसृष्टेर्भेदेन कथनान्न शब्दतत्वेऽस्यान्तर्भावोऽतो न तौ मुधेति भावः॥ १६५–१७१॥

व्रजभाषाटीका ।

कोई कोई काव्यके वर्ण वेदके वर्णनके समान दीखैं हैं तथापि उन वर्णनकूँ वेदरूपता नहिं समुझनी (मयड्वैतयोर्भाषायाम् । द्व्यचश्छन्दसि) इत्यादिसूत्रनमें लोकके शब्दनको तथा वेदके शब्दनको भिन्न भिन्न निरूपण पाणिनि ऋषिनें कियोहै लोक-वेदाधिकरणमें भट्टवार्त्तिकमें जो लोकवेदके शब्दको अभेद लिखोहै सो अप्रमाणिक है क्योंकि जैमिनि ऋषिने कहूँभी लोक-वेदके शब्दनको अभेद नहिं लिख्यो वेदबुद्धिकरके अधिकारी वेदको पाठ करें तब वाकूँ धर्म होय अनधिकारी स्त्री शूद्रादिक वेदबुद्धिकरके वेदको पाठकरें तब उनकूँ अधर्म होय प्रकार लौकिकशब्दसों वैदिकशब्दकी उत्तमता सिद्ध करके ॥ १६४ ॥ याके आगें (वेदैश्च सर्वैरहमेव वेद्यः) या वाक्यके अनुसार संपूर्ण वेदमें भगवानही प्रतिपादन कियेहैं यासों संपूर्ण वेदको अर्थ भगवानही है यह निरूपण करे हैं (प्रत्येकं पूर्णतेति) महावाक्यार्थरूप हरि है तासों वेदके अवान्तर वाक्यार्थरूप हरि नहिं होयँगे ऐसी शंका नहिं करनी वेदके अवान्तर वाक्यभी पूर्णहीहैं (विजज्ञौ इति ह स्माह शांडिल्यः) या श्रुतिमें उतनेमात्र अवान्तर वाक्यके ज्ञानसों ब्रह्मवेत्ता होयजानो लिख्योहै तासों शाखाभेदनमेंभी पूर्णता समुझनी कर्मकांडमें भी प्रयाज अनुयाजादिकनकूँ पूर्णही समुझनो (इषेत्वेत्यादि) एक एक मंत्रके अर्थकूँ भी पूर्ण माननो ॥ १६५ ॥ भगवानही वेदमें वर्ण पद वाक्य मन्त्र शाखा उपनिषदादिरूप करके वाचकहै तत्तद्रूप भगवान्के खंडशः प्रतिपादनकरवेवारे अवयवरूप पदनकोंभी संपूर्ण वेदात्मक महावाक्यवाच्य पूर्णब्रह्ममें ही तात्पर्य है, पुराणनमें भी याहीरिति शब्द अर्थ इन दोनों कूँ भगवद्रूप समुझनों वेदपुराणसों जुदे जितने

वाक्यहैं सब बुद्धिकल्पितहैं वेदके वाक्यमें तो पदनकी आनुपूर्वी सदा एकसी रहैहै तासों उन पदनको संबन्धभी सिद्धहीहै लोकमें तो पदनके मिलायवेसों वाक्य बनेहैं तासों लौकिक वाक्य वेदवत् पुरुषार्थको साधक नहिं. प्रश्न—जैसें पुरुषके प्रयत्नकरकें बनें-भये घटादिकनकूँ सर्वदा विद्यमान भगवद्रूप मानोहो पुरुषकों केवल आवरण दूरकरवेवारो मात्र मानो हो तैसेंही बनें वाक्यकूँ भी भगवद्रूपही माननो चाहिये वाक्य बनायवेवारेकूँ तो सिद्ध-वाक्यकूँ प्रकटकरवेवारो मात्र माननो चाहिये । उत्तर—जिन बुद्धिवाननकूँ यह निश्चयहै कि मनुष्य वाक्य नहिं बनासकें किन्तु मूल भगवदिच्छासों गुप्तरीतिकरकें सर्वदा विद्यमान जे वाक्यहैं उनकूँ मनुष्य कंठ तालु दन्तादिद्वारा प्रकटमात्र करेहै उनके ऐसें दृढ विश्वास करके लौकिक वाक्यभी पुरुषार्थसाधक है ॥ १६६॥ कालिदासादिकनके जे वाक्यहैं वे भी बहुतकाल स्थित रहेहैं क्रियाकरके रूपसृष्टिकी स्थिति रहैहै ऐसें ज्ञानकरके नाम-सृष्टिकी स्थिति रहे है ॥ १६७ ॥ तात्पर्य यह है बुद्धिसों रचना करके वाक्य उच्चारण कियोजायहै जहाँतक बुद्धिकी स्थिति त-हाँताईं वाक्यकी स्थिति बुद्धिके नाशमें वाक्यके नाशकोभी उप-चार कियो जायहै किञ्च नैयायकनके मतमें जैसे शब्दकूँ तीन क्षणमात्र रहवेवारो मानें है अर्थात् उच्चारण करतेही शब्दको नाश होजावैहै वाके सदृश दूसरे शब्द उत्पन्न होजावे हैं तिनसों लोकव्यवहार चले हैं ऐसें मानें हैं या पक्षमें बडेबडे दूषण हैं ये दूत राजाकी आज्ञाकूँ कहरह्यो है याठिकाने यह दूत राजाकी आज्ञाकी नकल कररह्योहै ऐसेंभी कह सकेंगे तब तो जैसें भांडके वाक्यमें कोईकी श्रद्धा नहीं होय तैसें दूतके वाक्यमेंभी कोईकी श्रद्धा नहीं होयगी या प्रकार आज्ञाभंग होयवेसों राजमर्यादा

भंग होयगी तथा वेदके मंत्रको उच्चारणकरकें प्रेष दियोजायहै वा प्रेषसों कछु फलसिद्धि नहिं होयगी क्योंकि वेदके मंत्रको तो उच्चारण होतेही नाश होगयो वाके नकलके मन्त्रसों दियेभये प्रेषसों न देवता प्रसन्न होयँगे न फल देंयगे ये दूषण हमारे मतमें नहीं हैं या मतमें तो शब्द नित्यहै तथा बहुतकाल स्थित रहे है परन्तु कैसें शब्दकूँ प्रमाण माननों कैसें शब्दकूँ अप्रमाण माननो यह विचार आगेके श्लोकमें करेंगे ॥ १६८ ॥ जा वाणीमें भ्रम प्रमाद (विप्रलिप्सा) ठगवेकेलिये मिथ्या भाषण आदि पुरुषके दोषकी संभावनाहै वो लौकिक वाणी अप्रमाणहै व्यवहारहै सो सन्निपातरूपहै या व्यवहारकरकें भ्रान्त पुरुष भ्रम प्रमादयुक्त वाक्य सुनवेसों अत्यन्त भ्रान्त होजावे हैं तब प्रमाण वेदको अप्रमाण मानवे लगे अप्रमाण प्रतारक तथा बौद्धवाक्यकूँ प्रमाणमानवें लगे हैं ॥ १६९ ॥ तासों वेदविरुद्ध वाक्यनके अर्थकूँ नहिं माननो और कितनेक वादि वेदमें भी दोष बतावें हैं तहाँ और दोष तो नहिंहै परंतु एकतो जिन अर्थवादनमें—ब्रह्मसूँ सृष्टिको निरूपण कियो है वे अर्थवाद वेदमें जादे लिखे हैं ब्रह्मतो कर्ताही नहिं होयसके है तथा मायाको निरूपण वेदमें नहीं हैं यह वेदमें बडी कमी है क्योंकि जगत् तो रज्जुसर्पवत्—मिथ्याहै मायाको ही बनोभयो है तासों मायिक सृष्टिको जरूर वर्णन वेदमें होनो योग्य है याप्रकारको विचारकरकें वेदमें मायाको वर्णन अधिक मिलाय देहै और ब्रह्मसों सृष्टि—वर्णनकरवेवारे वाक्यनको त्यागकरके वेदमें वाक्यभेद करडारे हैं वे वाक्यभेद सर्वथा अप्रामाणिक हैं ॥ १७० ॥ लोकमें तो वाक्यभेद है सो
हैं है क्यूँकि लौकिक वाक्य तो भ्रमप्रमादादि अनेक
ही हैं, शंका—वर्णनकी अष्टाविंशति तत्वनमें

गिनती क्यों नहिं कीनी ? उत्तर-(रूप) पदार्थसृष्टिके प्रति कारण जे पदार्थ हैं उनहीकी उन तत्वनमें गिनती है उनमें आकाशतन्मात्रारूप शब्दकी तत्वनमें गणना लिखी है वेदमें रूपसृष्टिसों नामसृष्टिको न्यारो निरूपण है तासों या ग्रंथमेंभी ध्वनिवर्णको नामसृष्टिके निरूपणमें न्यारो वर्णन कियो है ॥ १७१ ॥

प्रकृतिप्रत्ययौ लोके व्युत्पत्त्यर्थं निरूपितौ । नैतावता कृत्रिमत्वं शब्दे वक्तुं हि शक्यते ॥ ॥ १७२ ॥ प्रपञ्चभेदात्तत्वानामाधिक्यं वर्णतो नहि । संस्कारमात्रविलयादथवा तद्विलीनता॥ ॥ १७३ ॥ तदभावाद्वासुदेवे तच्छब्देषु न लीनता । अस्मदादिमुखेनापि क्रीडार्थं सर्वतो हरिः ॥ १७४ ॥ शब्दभेदं वितनुते रूपेष्विव विनिश्चयः । वाक्यार्थयोग्यावयवैर्वाक्यं सर्वत्र संमतम् ॥ १७५ ॥ आकांक्षायोग्यतासत्तिः पदेतस्मादुदीरिता । मृदा घोटकनिर्माणे नशृंगकरणं मतम् ॥१७६॥ तथा युक्तार्थबोधाय नाकांक्षारहितं पदम् । अर्थद्वारा पदे धर्मा लोकदृष्ट्यैव कल्पिताः ॥ १७७॥ तस्माद्वाक्यं सर्वमेव सा यतो विश्वतोमुखी । पदद्वयं सुप्तिङन्तं ताभ्यां चलति वाक्पतिः॥ १७८ ॥

तत्त्वदीपप्रकाशः ।

ननु पदानां कथं नित्यता प्रकृतिप्रत्ययविभागस्य निरूपितत्वादित्याशंक्याह ॥ प्रकृतीति ॥ ज्ञानार्थमेव विभागं कल्पयित्वा निरूपितौ

नतु तयोर्विभागो वस्तुतः ॥ १७२ ॥ लौकिकवाक्यानां लयप्रकारमाह ॥ **संस्कारमात्रविलयादिति** ॥ वस्तुतस्तु न विलयः। अथवा विलयाङ्गीकारश्चेत्संस्कारमात्रविलयात् । तद्विलीनतेत्यर्थः ॥ १७३ ॥ अयमपि पक्षो भगवद्वाक्येषु नास्तीत्याह ॥ **तदभावादिति** ॥ ऋषीणां संस्कारस्य महाप्रलयपर्यन्तमवस्थानात् ॥ एवं व्यवहारमाश्रित्यावान्तरभेदः शब्देषु निरूपितः ॥ वस्तुतस्तु सर्वं वेदतुल्यमित्याह ॥ **अस्मदादिमुखेनापीति** ॥ सर्वं वाक्यं भगवत्कर्तृकमेव । नन्वेवं सति किंचिद्वाक्यं युक्तं किंचिदयुक्तं तत्र त्वाकांक्षादयो धर्मा इति कल्पना कथमुपपद्यत इत्याशंक्याह ॥ **वाक्यार्थयोग्यावयवैरिति** ॥ रूपसृष्टाविव नामसृष्टावपि योग्यावयवैरेव पदार्थनिर्माणम् । तावतैव ते धर्मा अंगभावं प्राप्नुवंति । एषापि कल्पनैवेत्यर्थः ॥ तदेव साधयति ॥ **मृदा घोटकनिमाण इति** ॥ यथा यथर्षीणां पुरातनानि वाक्यानि तथाधुनिकानामपि । अन्यथा वाक्यार्थप्रतीतिर्न स्यात् । नत्वपूर्वपदार्थः कश्चित्कल्प्यते । उपसंहरति ॥ **अर्थद्वारेति** ॥ लोकदृष्ट्यैव नतु परमार्थतः । अनेनाकांक्षाद्यभावेपि वाक्यत्वं न विरुध्यत इत्युक्तं भवति । दश दाडिमानीत्यपि पदार्थनिरूपकत्वात् वाक्यं प्रमाणं, वह्निना सिंचतीत्यपि उष्णजलेन सिंचतीत्यर्थो भवति । यथा गंगायां घोषः । प्रतारकवाक्यमेवासत्यादियुक्तमपि बाधितार्थत्वादवाक्यं तस्मात् सर्वमेव वाक्यं प्रमाणम् । यतः सा सरस्वती सर्वतोमुखी उपासनार्थमाह ॥ **पदद्वयमिति** ॥ वाग्रूपः पतिर्भगवान् ॥ १७४—१७८ ॥

आवरणभंगः ।

एवं प्रासंगिकं परिहृत्य वर्णनित्यत्वस्य जैमिन्युपवर्षादिसंमतत्वात्पदनित्यतामाक्षिपन्ति ॥ नन्वित्यादि ॥ ॥ समादधते ॥ प्रकृतीत्यादि ॥ ॥ अपक्षस्य सूत्रकाराभिमतत्वात् । तथा निश्चीयत इति भावः ॥ लौकिके- ॥ एवं पदानां नित्यत्वं साधयित्वा लौकि[illegible]

तन्नाश आवश्यक इत्यतस्तेषां लयप्रकारमाहेत्यर्थः ॥ तत्र ब्रह्मवादं व्यवहारं चाश्रित्य पक्षद्वयमाहुः ॥ वस्तुत इत्यादि॥ संस्कारस्तु ज्ञानस्य वृत्तेर्वा सूक्ष्मावस्थेति । वाक्यविषयकसंस्कारनाशे वाक्यस्य बुद्धावस्फुरणात्तन्नाश उपचर्यत इत्यर्थः ॥ ॥ १७२ ॥ १७३ ॥ तर्हि व्यवहारे लौकिकस्य वेदात् को विशेष इत्यत आहुः॥ अयमपीत्यादि ॥ ॥ ननु तथापि नविशेषः । भगवद्ज्ञानस्य नित्यत्वेन लौकिकवाक्यविषयकस्यापि तस्यानाशादिति शंकायामाहुः ॥ ऋषीणामित्यादि ॥ तथाचान्यविषयकः संस्कार ऋषीणां न तिष्ठतीति तथेत्यर्थः ॥ ब्रह्मवादसिद्धान्तं वक्तुमाहुः ॥ एवमित्यादि ॥ ॥ अतो विद्वत्तायां सर्वं नित्यमेव प्रमागमेवेत्यर्थः ॥ एतेन अथवा सर्वरूपत्वादिति पूर्वोक्तं समर्थितं ज्ञेयम् । एवं सतीति तुल्यत्वे प्रामाण्ये च सतीत्यर्थः ॥ तत्रेति वाक्यावयवेषु आहेति ॥ कल्पनायां बीजमाहेत्यर्थः ॥ पदार्थनिर्माणमिति ॥ ॥ लौकिकवाक्यस्य तदर्थस्य च बुद्धिकल्पितत्वात् ॥ तदंगभूतपदार्थस्यापि नानानुपूर्वकपदोच्चारणेन कल्पितत्वावधारणात्तथैव वस्तुनिर्माणमित्यर्थः ॥ तावतैवेति ॥ ॥ योग्यावयवरूपतामात्रेणैवेत्यर्थः ॥ ते धर्मा इति ॥ ॥ आकांक्षादय इत्यर्थः ॥ एषापि कल्पनैवेति । वस्तुमात्रस्य भगवद्रूपत्वेन नित्यतया जन्यत्वाभावेन धर्माणामंगभावप्राप्तिरपि कल्पनैवेत्यर्थः ॥ प्रसंगादाकांक्षादीनां स्वरूपमुच्यते तत्र व्याकरणपरिष्कृतप्रकृतिप्रत्ययसमभिव्याहारः । पदे आकांक्षा नच विभक्तिविशेषसमभिव्याहारमात्रं सेति वाच्यम् । जल अम् आनीञ् सिप् इति वाक्यादपि जलमानयेति बोधापत्तेः । नापि यत्पदं यत्पदेन सह यादृशान्वयबोधजनकं तत्पदसमभिव्याहारस्तादृशान्वयबोधे सा केवलयोः प्रकृतिप्रत्यययोः पदसंज्ञायामनुशासनविरहात् ॥ अर्थच्छब्बदत्वमिति स्वकृत्यदोषः परिहारेपि घटादौ वारि अम् आनीञ् सिप् इति वाक्यादपि बोधापत्तेर्दुर्वारत्वात् । अनुशासनविरहेऽप्यर्थवत्तया पदतासद्भावात् ॥ पदपरिष्कारायानुशासनापेक्षायां तु तदीयपदसंज्ञानुशासनत्यागस्यानुचितत्वात् ॥ नापीच्छा तस्याचेतनधर्मत्वेन शब्दे तस्या वक्तुमशक्यत्वात् ॥ नापि श्रोतरि पदोच्चारणजसंसर्गावगमप्रागभावः सा तस्यात्मनिष्ठत्वेन व्यधिकरणत्वात् । प्रागभावस्यैव विप्रतिपन्नत्वेन तद्रूपताया वक्तुमशक्यत्वाच्च । तस्माद्व्युत्पत्तिपक्षे पूर्वोक्तरूपैवाकांक्षेति दिक् । इयं च पदधर्मः । योग्यता तु विवक्षितकार्यान्वयानुकूलबाधकाभावो वा सा चार्थधर्मः । आसक्तिः संनिधिः । अव्यवधानेन स्वप्रतियोगिज्ञानं वा पदस्यैव धर्मः । यत्रापि निपुणतमराजभृत्यादीनां पदसन्निधिविरहेपि बोधो दृश्यते तत्र बोद्धा पदसन्निधिरस्त्येवेति न दोषः । एतदेव स्पष्टयितुं दृष्टांतं वदन्त आहुः ॥ तदेवेत्यादि ॥ ॥ वाक्यस्य युक्तत्वायुक्तत्वमित्यर्थः ॥ मृद्रेत्यादि ॥

मूलंत्वेवं योज्यं मृदा घोटकनिर्माणे श्रृंगकरणं युक्तार्थबोधाय यथा न मतं तथा आकांक्षारहितं पदमपि तादृशार्थबोधाय नमतमिति । तथाच बोधानुरोधेन आकांक्षादीनामंगानां यत्र सद्भावस्तद्युक्तमिति कल्प्यते यत्र । च तदभावस्तदयुक्तमित्युच्यते । इत्येषा बोधानुरोधिनी कल्पनेति सिद्धमित्यर्थः ॥ एतस्याः कल्पनायाः परंपराप्राप्तत्वायाहुः ॥ यथायथेत्यादि ॥ ॥ तस्या दृष्टानुरोधित्वमाहुः ॥ अन्यथेति ॥ घटः कर्मत्वमानयनं कृतिरित्यादिरूपेण वाक्यघटने । अप्रतीतौ हेतुमाहुः ॥ नत्वित्यादि ॥ ॥ एवं वाक्यानां युक्तायुक्तत्वे समर्थयित्वा आकांक्षादीनामंगतायाः कल्पितत्वं समर्थयंत आहुः ॥ उपसंहरतीत्यादि ॥ ॥ तथाच वाक्यादर्थोपस्थितौ पदजन्यपदार्थस्मृतेर्द्वारत्वात्पदैश्चाकांक्षितयोग्यासन्नानामेव स्मारणादाकांक्षादयोर्थधर्माः श्रोतृवक्तृभ्यां पदेषु कल्प्यन्त इति पदधर्मत्वव्यवहार इत्यर्थः ॥ तदाहुः ॥ लोकेत्यादि ॥ ॥ परमार्थतस्तु ब्रह्मरूपतया सर्वस्य सर्वरूपत्वेन सर्वकारकनिर्वाहः । सर्वैरिति तथेत्यर्थः ॥ एवं परमार्थसूचने यत् सिद्ध्यति तदाहुः ॥ अनेनेत्यादि ॥ ॥ कथमित्यत आहुः ॥ दशेत्यादि ॥ तथाच पदात्पदार्थप्रमावत्पदसमूहादर्थसमूहप्रमापि बाधकाभावादुत्पद्यत इति तथेत्यर्थः ॥ नन्वस्त्वनाकांक्षितपदसमूहस्य प्रामाण्यं तथाप्ययोग्यवाक्यमपि सेवकमूर्खत्वप्रतीतिफलकलक्षणया बोधकं संभवतीति न तस्यापि व्यवहारबाधकत्वमिति तदपि प्रमाणमित्यर्थः ॥ आसक्तिरहितस्य बोधकत्वं तु चादिव्यवधानेन कालव्यवधानेन च गूढार्थवक्तृषु तादृशसमयबोद्धृषु च प्रमितिजनकत्वेन प्रसिद्धमेवेति प्रामाण्यविचारे तादृशवाक्यमत्र नोदाहृतमिति ज्ञेयम् ॥ नन्वेवमयोग्यस्यापि प्रामाण्ये सति प्रतारकवाक्येपि प्रामण्यापत्तिरित्याशंकायामाहुः ॥ प्रतारकेत्यादि ॥ ॥ लौकिकवाक्यार्थस्य बुद्धिकल्पितत्वेन भ्रान्तस्य च यथादृष्टार्थवादित्वेन तद्वाक्यंना प्रमाणं किंतु तस्य ज्ञानमेवाप्रमाणम् ॥ अतएव लोके तादृशोऽनृतवादी नोच्यते किंत्वज्ञ एवोच्यते अतएव ब्रह्मणा "नानृतं तव तच्चापि यथा मां प्रब्रवीषि भो । अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे" इत्यनेन नारदवाक्यस्य प्रमाणत्वं नारदस्य चाज्ञत्वमुक्तम् ॥ एतेन प्रमत्तं वाक्यमपि व्याख्यातम् ॥ एतावानन्योपि विशेषः । यत्तादृशवाक्याद्वाक्यसत्यत्ववक्तृभ्रांतत्वयोरेव प्रमा नतु वाक्यार्थस्येति प्रतारकस्तु लोके शास्त्रेपि मिथ्यावादित्वेन गर्हित इति तद्वाक्यं वाक्याभास एवेत्यर्थः॥ एवं चाबाधितार्थबोधकपदसमूहत्वं प्रमाणवाक्यत्वमिति लक्षणं ज्ञेयम् ॥ उपासनार्थमिति ॥ एवं विचारितस्य नामप्रपञ्चस्य भगवद्रूपत्वेनोपासनार्थमित्यर्थः ॥ उपासनायाः सुप्तिङ् तयोः पदत्वकथनादन्येषां व्याकरणसिद्धानामंगत्वमुपासकैरूह्यमिति बोधितम् । वाचंधेनुमितिवत् ॥ १७४—१७८ ॥

ब्रजभाषाटीका।

शंका–पद कैसें नित्य होयसके प्रकृति प्रत्ययनके द्वारा पद तो बनाये जावें हैं ? उत्तर–पद तो सब नित्यही हैं सुगमरीतिसों पदनके अर्थ समुझायवेकेलिये प्रकृति प्रत्ययको विभाग कल्पना कियो है वस्तुतः शब्द सब (अव्युत्पन्न) स्वतःसिद्धही हैं प्रकृति-प्रत्ययके विभागसों उनको कृत्रिमपणों नहिं होयसके है॥१७२॥ लौकिक वाक्यनके लयको प्रकार दिखावै है (संस्कारमात्रेति) व्यवहारके अनुसार तो लौकिक वाक्य अनित्य हैं क्योंकि जीवबुद्धिपरिकल्पित हैं, वेदवाक्य नित्यहै सर्वदा वैसेही रहे है ब्रह्मवादके अनुसार तो ज्ञानकी अथवा बुद्धिवृत्तिकी सूक्ष्मावस्थारूप संस्कारके तिरोहित होजायवेसों बुद्धिमें वाक्यको स्फुरण नहिं रहै तब वाकूं वाक्यको नाश कहे है यारीतिको नाशभी वेदवाक्यको नहिं होय है क्योंकि वेदमन्त्रके द्रष्टा भगवानूको ज्ञान नित्यहै तथा वेदके मंत्रके देखवेवारे ऋषिलोगनके संस्कारभी महाप्रलयपर्यन्त वैसेकेवैसे स्थितरहेआवें हैं ये व्यवहारके अनुसार लौकिक वैदिक शब्दनमें अनित्यत्व नित्यत्व बतायो, ब्रह्मवादके अनुसार तो सब शब्द वेदतुल्यही हैं (नामरूपे व्याकरवाणि) इत्यादि श्रुतिके अनुसार जैसे सब पदार्थसृष्टिके कर्ता भगवान् हैं तैसे सब शब्दसृष्टिके कर्ताभी भगवानही हैं ऐसें नहिं होय तो भगवानूको सर्व कर्तापनो वेदमें कह्यो है सो मिथ्याही होय तासों सब वाक्य भगवानूके करेभयेही मानने ॥ क्रीडाकेलिये अस्मदादिक मनुष्यके मुखद्वारा अनेकप्रकारके वाक्यको बिस्तार भगवानूही करें है ऐसेंही रूपसृष्टिमें भी घटपटादि पदार्थनकूं मनुष्यनके हस्तादिद्वारा भगवानूही क्रीडाकेलिये प्रकट करे है तासों ज्ञानभयेपीछें सबही नित्य है सबही प्रमाण है

गतान् धर्म्मान् विचार्य तस्य प्रवर्त्तकत्वमास्ति नवेति विचार्यते ॥ ॥ **प्रवर्त्तकत्वमित्यादिना** ॥ ब्रह्मवादव्यतिरिक्तेषु शब्दश्रवणानंतरभाविन्यां प्रवृत्तौ कारणताशब्दस्यावसीयते तत्र षट्पक्षाः संभवन्ति। स्वरूपमभिप्रायज्ञानं भावना अभिधा आज्ञा इष्टसाधनताज्ञानमिति। तान् सर्वानेकहेलया स्वमतेन दूषयति। कृष्णस्यैव प्रवर्तकत्वम् ॥ **नविध्यर्थस्येति** ॥ काकतालीयतया पूर्वभावो नहेतुत्वसाधकः। अव्यभिचारस्तु विध्यादीनां नास्ति। ननु दृश्यते ममेष्टं ममैतत्कार्यमित्यादिज्ञानं कृत्वा प्रवर्तनात्कारणत्वमित्याशंक्याह ॥**कार्यतादीति**॥ कुत एतदत आह ॥ **अनिष्टमिति** ॥ इष्टसाधनताज्ञानस्य प्रतर्वकत्वं तदा स्यात्। यद्यनिष्टसाधनतां ज्ञात्वा निवर्त्तेत विषभक्षणे युद्धे द्रुपतने प्रवृत्तिदर्शनात्। तथा पाषंडमतेऽसाध्येऽपि मोक्षप्रवृत्तिदर्शनात्। अतो भगवानेव यथेष्टं यथैव प्रवर्तयते तथा ज्ञानमुत्पाद्य प्रवर्त्तते वस्तुतस्तु न किंचिदिष्टं नकिंचित्साध्यमित्यर्थः। नत्वेवं सत्यर्थवादादीनां वैयर्थ्यमित्याशंक्याह ॥ **मिथ्याप्रलोभनमिति** ॥ वेदे कर्म्मादिष्वविद्यमानं फलरूपं कोप्यंगीकरोति तेन सार्थकता स्यात्। किंतु यथास्थितमेवाह ॥ अतः सर्वस्यापि स्वरूपप्रतिपादकत्वान्नैकवाक्यतासिद्ध्यर्थमपि प्रवृत्तमंगीकर्तव्यम् ॥ १८१–१८३ ॥

आवरणभंगः ।

अधुनेत्यादि ॥ एवं शुद्धपदानां स्वरूपे निरूपितेऽपि न नामलीलापूर्तिरिति विकारवत्पदानां यथा मृदादीनां नाना आकृतयो रूपसृष्टौ विकारास्तथा नामसृष्टौ पदानां पदान्तरगर्भत्वमिति तद्वत्तां पदानामर्थद्वयं वक्तुं भगवति नामप्रपञ्चात्मकविकारानाहेत्यर्थः। मूले—बहुश इति बहूनीत्यर्थः ॥ सुप्तिङ्मध्ये विभेदत इति सुप् सुबंतं मध्ये यस्येति सुब्मध्यं च सुप्तिङ्मध्यं तत्कृतविभेदादित्यर्थः ॥ एवं च सुबंतेऽपि तिङन्तपदद्वयं कुरु भवेत्यादावूह्यमित्याशयेनाहुः ॥ एवमित्यादि ॥ ॥ एतत्कथनप्रयोजनमाहुः ॥ तत्र पदभेदः शास्त्रार्थ इति ॥ तथाच शास्त्रार्थत्वात्कथनमित्यर्थः॥ मूले 'ते भिन्ना अंशतः परे' इति। अंशतः भिन्नाः ते

शब्दाः परे विकृतत्वादखंडपदेभ्योऽतिरिक्ता इत्यर्थः ॥ १७९ ॥ अग्रिमे मूले–तत्र योगादिकल्पनेतिश्लेषस्य नानार्थाश्रयत्वादेकपदे केवलरूढ्या नानार्थता सर्वत्र न निर्वहतीति तदर्थं श्लेषे योगस्य योगरूढेर्वृन्यन्तरस्य च कल्पनेत्यर्थः ॥ अत्रादिपदेन तात्पर्यवृत्तेरपि संग्रहः "मामा वैदर्भ्यसूयेथा" इत्यस्य सुबोधिन्यां शब्दस्य मुख्या गौणी तात्पर्यवृत्तिश्चेति भेदेन त्रेधा वृत्त्यंगीकारात्। नच लक्षणया चतुर्द्धाशंक्या लक्षणागौण्योस्त्वभेद इति तत्रोक्तेः। मुख्यार्थबाधस्योभयत्रापि तौल्यात्। तेन शक्यसंबंधो गौण्या एव लक्षणं फलार्थेत्यादि। तथाच गौणी फलार्थं आद्रियमाणा लक्षणा प्रोक्ता चोऽवधारणे। उपचारतः सैव गौणी प्रोक्तेति गौण्या एव फलमुपचारश्चेति भेदकं द्वयमित्यर्थः ॥ तात्पर्यं च शक्त्यतिरिक्तत्वे सति बुभुत्सितार्थप्रतीतिजनकत्वमेव। नतु तत्प्रतीतीच्छया उच्चारितत्वं तेन व्यंजनाया अपि संग्रहः। वस्तुतस्तु मुख्यतात्पर्यं चेति द्वे एव वृत्ती इति सिद्ध्यति। तात्पर्ये वा अंतर्भाव इति लक्षणागौण्योरभेदपक्षोत्तरं तत्रैवोक्तेः विशेषः प्रस्थानरत्नाकरादवगंतव्यः ॥ ननु रूढिलक्षणाया अपि सद्भावादवृत्तीनां भेदः साहजिक एवांगीकार्यो नतु भेदककृत इत्याशंकायामाहुः ॥ ॥ रूढीत्यादि ॥ कुशलादिपदे कोशेन शक्तेरेव ग्राहणात्पदानां चाकृतौ प्रवाहे वा शक्तत्वेन चित्रतुरगादौ च तदाकृतेः सत्वेन सारूप्यनिबंधनया गौण्या ध्वस्तघटादावपि सूक्ष्मरूपेण धर्म्मिसद्भावाच्छक्त्यैव निर्वाहात्तथेत्यर्थः ॥ गौण्यामपि कंचिद्विशेषमाहुः ॥ ॥ गौणीत्यादि ॥ "तत्सिद्धिजातिसारूप्यप्रशंसालिंगभूमभिः। षड्भिः सर्वत्र शब्दानां गौणीवृत्तिः प्रकल्पिता ॥" इति पूर्वतंत्रोक्ता गौणी वृत्तिर्गुणयोगात् नतत्सिद्ध्यादिगुणयोगात्किंतु विधेयस्तुत्यर्थोपचारत एव ॥ तत्र हेतुः। तादृशेत्यादि ॥ तादृशो यजमानः प्रस्तर इत्यादौ यजमानादिरूपो यो धर्मी तद्रूपेण धर्म्मिणः प्रस्तरादेरेवोपचारात्। तेन रूपेण धर्म्युपचर्यते नतु धर्म इति तथेत्यर्थः ॥ ननु जैमिनीये तत्सिद्ध्यादिसूत्रितमिति तदनंगीकारे तस्य का गतिरित्यत आहुः ॥ धर्मेत्यादिवाक्यश्रवणोत्तरं प्रथमतो धर्म्येव ज्ञायत इति पश्चाद्धर्मस्फुरणार्थं तथा सूत्रितमतो नतद्विरोध इत्यर्थः ॥ एवमत्र शक्तिस्तात्पर्यं गौणी चेति तिस्रो वृत्तयः स्वीकृताः। तद्भेदास्तु शास्त्रान्तरे प्रसिद्धा इति नात्र प्रपञ्चिताः प्रस्थानरत्नाकरे केचनोक्ताश्चेति ततो ज्ञेयाः ॥ १८० ॥ हेतुमिति प्रयोजकं प्राकट्येत्यादि। तथाच लीलार्थमेवं भेद इति लीलैव प्रयोजिकेत्यर्थः ॥ विचार्यत इति। वेदाख्यस्य प्रमेयस्य बलज्ञानार्थं विचार्यत इत्यर्थः ॥ प्रवर्त्तकत्वमित्यत्र षट्पक्षेषु स्वरूपमिति प्रवृत्तिपरवाक्यस्वरूपम् ॥ अभिप्रायज्ञानमिति ॥ ॥ लौकिकवाक्ये वक्तुस्तात्पर्यज्ञानं वेदे पुरुषानंगीकाराच्छब्दनिष्ठाभिप्रायज्ञानम् ॥ भावनेति ॥ ॥

आख्यातनिष्ठा आर्थीभावना अभिधेति । लिंगनिष्ठा शाब्दीभावना भाट्टमते आज्ञेति नियोगः । प्रभाकरमते इष्टसाधनता नैयायकमते अत्र बलवदनिष्टाननुबन्धित्वमपि विशेषयंति । एवं कार्यतापि वैयाकरणमतसिद्धा ज्ञेया । ननु दृश्यत इत्यादि । तथा च षट्सु पक्षेसु पंचानामर्थानां पराहतिसंभवेपि सार्वजनीनानुभवसाहाय्येन षष्ठस्य प्रवर्त्तकत्वमस्त्वित्यर्थः ॥ तदुत्तरं तु मूल एवोक्तं साध्यमसाध्यं वा नेति मूलयोजना, सिद्धांतितमर्थं द्रढयितुं विपक्षे बाधकं तर्कमाहुः ॥ ॥ इष्टसाधनतेत्यादि ॥ ॥ ननु तत्रेष्टसाधनत्वकृतिसाध्यत्वभ्रमादेव प्रवृत्तिरिति चेत् । सत्यं तथापि संभ्रमः । केषां चिदुदेति केषां चिन्नेत्यत्र किं कारणमिति पृच्छामः । शब्द इतिचेन्न, सर्वान् प्रति तुल्यत्वात् ॥ अदृष्टं चेत् न, ईश्वरेच्छयैव निर्वाहात् । यथेदं तथा श्रुतिगीतौ अपरिमिता ध्रुवा इत्यत्रान्यत्र च प्रपञ्चितमिति ततोऽवधेयम् ॥ वैयर्थ्यमिति ॥ ॥ इष्टाद्यभावे प्ररोचनानुपयोगात्तथेत्यर्थः ॥ प्रवृत्तमिति ॥ प्रलोभनं प्रवृत्तमित्यर्थः ॥ १८१--१८३ ॥

व्रजभाषाटीका ।

जैसें रूपसृष्टिमें आप सहस्रन चरणवालेहैं ऐसें शब्दसृष्टिमें भी दोचरणके मध्यमें सहस्रन चरणहैं (तत्रास करवालात्) या वाक्यमें तत्रास या एक तिङन्तमें दो चरण तत्र १ आस २ (करवालात्) या एक सुबन्तमें कर १ वालात् २ दो सुबन्त हैं जैसे (कुरुभव) अर्थ है कुरुदेशके होयवेवारे । या एक सुबन्तचरणमें (कुरु) कर (भव) हो । ये दो तिङन्त चरणहैं जैसें एक मृत्तिकापिंडमें घट शरावादि अनेक पदार्थ हैं तैसे एकपदमें अनेक पद विद्यमानहैं ॥ १७९ ॥ एकपदमें स्थित जे अनेक पदहैं उनको श्लेषमें उपयोगहै श्लेषहै सो नाना अर्थनके आश्रितहै केवल रूढिकरकें एकपदमें सब ठिकाने अनेक अर्थ नहिं बनसकेहैं तासों श्लेषमें नानार्थसिद्धिकेलिये योग योगरूढी तात्पर्यवृत्ति इन तीनकी कल्पना करनी, वृत्ति तीन प्रकारकी सुबोधिनी भागवत दशममें मानी है मुख्या १ गौणी २ तात्पर्यवृत्ति ३ इन भेदनकरकें वृत्ति तीनप्रकारकी है, लक्षणा कूँ चतुर्थवृत्ति नहिं मानेहै गौणीवृत्तिमेंही लक्षणाको अन्तर्भावहै, काव्यमें

लक्षणाके दो भेदहैं शुद्धा १ गौणी २ तहाँ शुद्धा दोप्रकारसों होय है एक तो रूढीसों लक्षणा जैसें (देवदत्तः सर्वकर्मणि कुशलः) अर्थ—देवदत्त सब काममें कुशलहै यद्यपि या वाक्यमें कुशल शब्दको योगशक्तिसों कुशनके लेवेवारेको नाम होय है यह अर्थ यहाँ नहिं संभवसकेहै तासों जैसें कुशलेवेवारो कुशलेवेमें (साव-धान) निपुण होयहै ऐसेंही जो कार्यमें सावधान होय वासों कुशल कहेहै तासों यहाँ रूढिसों कुशलशब्दकी (सावधान) निपुणमें लक्षणा भई या लक्षणाकूँ हम नहिं मानें हैं क्योंकि यहाँ (अभिधा) शक्तिवृत्तिसोंही कुशलशब्दको (सावधान) निपुण अर्थ होसकेहैं शक्तिवृत्तिके जतायवेवारे व्याकरण कोशादिक हैं (कृती कुशल इत्यपि) या अमरकोशके पदसों कुशलशब्दकी निपुणमें शक्ति स्पष्ट मालुम पडेहै दूसरी शुद्धा फलार्थलक्षणा प्रयोजनवती लक्षणाहै जैसें (गङ्गायां घोषः) अर्थ--गंगाजीमें अहीरनको ग्रामहै । यहाँ जलप्रवाहरूपगंगाजीमें ग्रामको स्थित-होनो असंभवहै तथापि वक्ताने गंगाजीमें गामकी स्थिति कहीहै सो गाममें शीतलता पवित्रता आदि फल जतायवेकेलिये कहीहै तासों गंगापदको फलार्थलक्षणा करके तीर अर्थ करनो तब या-वाक्यको गंगाजीके तीरपें अहीरनको गामहै यह अर्थ भयो. काव्यमें गौणीलक्षणा दोप्रकारकी है सारोपा १, साध्यवसाना २, सारोपाको उदाहरण (सिंहोमाणवकः) अर्थ—बालक सिंह है। यहाँ बालक सिंह नहिं होयसकेहै तासों विषयी सिंह जैसो क्रूर शूरहै वैसोही अनिगीर्ण विषय (बालक) क्रूर शूर जानकें बाल-कमें सिंहको आरोपकरके बालक सिंहहै ऐसें कहेहै, दूसरी गौणी साध्यवसानाहै जैसें बालककूँ देखकें (अयंसिंहः) अर्थ-यह नाहर है निगीर्ण विषय (बालक) को नाम न लेकें विषयी सिंह जैसो

क्रूर शूर बालककूँ जानकें बालकमें सिंहपनेकी बुद्धिकरकें यह सिंहहै ऐसें कहैहै, हमारे सिद्धान्तमें पहली वृत्तिशक्तिहै कोशव्याकरणादिद्वारा जा शब्दको जो अर्थ प्रसिद्धहै वा शब्दसों वाही अर्थकी जतायवेवारी वृत्तिसों मुख्या (अभिधा) शक्ति नामसों कहेंहै योग योगरूढी आदि याहीके भेदहैं निरूढलक्षणाको रूढीमें अन्तर्भावहै इनके काव्यनमें अनेक भेदहैं दूसरी गौणीवृत्ति है (शक्यार्थबाधे सति सादृश्यरूपस्तादितरो वा शक्यसंबन्धो गौणीवृत्तिः) अर्थ--शक्तिवृत्तिसों जा शब्दको जो अर्थ है वह अर्थ जहाँ नहिं संभवसकें तहाँ सदृशतारूप अर्थ अथवा समीपता कार्यकाराणता आधाराधेयता आदि कोई जो शक्य (मुख्य)अर्थके साथ कोई संबन्धहै वाकूँ गौणी वृत्ति कहे है याही गौणीवृत्तिमें दो भेदहैं फलसों गौणी तथा उपचारसों गौणी फलसों गौणी जैसें (गङ्गायां घोषः) इत्यादि उपचारसों गौणी (सिंहोमाणवकः। यजमानः प्रस्तरः) इत्यादि अर्थ--बालक सिंह है यहाँ सिंहके क्रूरता आदि गुणनको बालकके साथ (योग) संबन्ध होयवेसों बालककूँ सिंह नहिं कह्यो है किन्तु क्रूरता धर्मवाले सिंहके रूपकरके दूसरे धर्मीवालेको उपचार है अर्थात् जैसो क्रूर सिंह है वैसो क्रूर बालककूँ देखकें बालकको सिंहके साथ उपचार (अभेदज्ञान) कियो है अर्थात् सिंह कह्यो है बालक सिंह है ऐसें कह्यो है एसेंही (यजमानः प्रस्तरः) यहाँभी यजमानरूप धर्मी करके (प्रस्तर) दर्भमुष्टीरूप धर्मीको उपचार अभेदज्ञान कियो है अर्थात् यज्ञमें बहुतसे कार्य यजमानके करवेके दर्भके मुँठियामें कियेजायँ हैं तहाँ यजमानके साथ दर्भके मुठियाको उपचार अभेदमानके डाभको मूठिया यजमान है ऐसें कह्यो है बालक सिंहहै इत्यादिकमें क्रूरता आदि धर्मनको स्फुरण तो

सिंहादिधर्मोके ज्ञानहोयवेसों स्वतः ही होय हैं या गौणीवृत्तिमें ही रूढिलक्षणा तथा फलार्थलक्षणा आदि भेदसहित मुख्या लक्षणाको तथा सारोपा साध्यवसानादि भेदसहित गौणीलक्षणाको अन्तर्भावहै क्योंकि मुख्यार्थको बाधहोनो तथा लक्ष्य अर्थमें मुख्य अर्थको सदृशता समीपता आदि संबन्ध होनों जो गौणीवृत्तिको लक्षण है वह सब प्रकारकी लक्षणामें विद्यमान है॥ तीसरी तात्पर्यवृत्तिहै (शक्त्यतिरिक्तत्वे सति बुभुत्सितार्थप्रतीतिजनिका तात्पर्यवृत्तिः) अर्थ--शक्तिवृत्तिसों अलग होवे और जा अर्थके जानवेकी इच्छा होय वाकी प्रतीति करायवेवारी होय वासों तात्पर्यवृत्ति कहै है जैसें (सैन्धवमानय) अर्थ सैंधव नाम घोडाको तथा लोनको है तहाँ भोजनके समयमें जानवेकी इच्छायोग्य अर्थ लोन है वाकी प्रतीति तात्पर्यवृत्तिकरकेही होयहै अर्थात् भोजनके समयमें भोजनकरवेवारेके मुखसों सैंधवलाव ऐसें शब्दकों सुनकें श्रोताकों शक्तिवृत्तिकरके घोडा तथा लोन दोनों अर्थ उपस्थित भये परन्तु भोजनकर्त्ता लोनकूं ही चाहेहै ऐसें जानकें वह श्रोता तात्पर्यवृत्तिद्वारा लोनकूँ हीं लावेहै या तात्पर्यवृत्तिमेंही व्यंजनाको अन्तर्भावहै इन तीनों वृत्तिरूप भगवान् ही होवेहै अर्थात् शक्तिरूप होयके अपने अर्थरूपको प्रकट करेहै लक्षणारूप होयकें अपने अर्थरूपको कछुक(तिरोधान)अर्थात् छिपावेहैं, तापर्त्यवृत्तिरूप होयके अपनें अर्थरूपको सर्वथाही छिपावे है शक्तिलक्षणा तात्पर्यवृत्ति आदि शब्दधर्मनको विचार करके शब्दहै सो श्रोताकूँ कार्यमें प्रवृत्त करसकेहै या नाहिं, या बातको विचारकरे हैं (प्रवर्त्तकत्वमिति) ब्रह्मकों जे पुरुष कार्यमात्रमें प्रेरक नाहिं माने हैं उनके मतमें शब्दके सुने पीछें जो कार्यमें पुरुषकी प्रवृत्ति होय है वामें शब्दही कारणहै अंर्थात् शब्दही कार्यमें प्रवृत्त करें है तहाँ

६ छ पक्षहैं, कितनेकतो शब्दस्वरूपकूँ ही प्रेरक मानें हैं, कितनेक प्रवृत्तिकरवेवारे वाक्यके अभिप्रायज्ञानद्वारा शब्दकूँ प्रेरक मानेहैं, अर्थात् लौकिकवाक्यमें वाक्य वक्ताके अभिप्रायज्ञानद्वारा प्रेरक मानेहैं वेदवाक्यमें शब्दनके अभिप्रायज्ञानद्वारा प्रेरक मानेहैं कितनेक आर्थीभावनाद्वारा शब्दकूँ प्रेरक मानेहैं, कितनेक भाट्ट-मतानुवर्ती मीमांसक (अभिधा) अर्थात् लिङ् लकारमें रहवेवारी शाब्दीभावनाकों प्रेरक माने हैं, प्रभाकरमतवाले आज्ञा (नियोग) कूँ प्रेरक मानें हैं नैयायकमतमें (इष्टसाधनताज्ञानकूँ) अर्थात् या कार्यसों हमारो अनिष्ट नहिं होयगो और अभिलषित पदार्थकी प्राप्ति होयगी तासों ये कार्य करनों ऐसो ज्ञान जिन लिङ्गादि-शब्दनसों होयहै वे शब्दही प्रेरकहैं इन ६ छ पक्षनकूँ एकसाथ दूषितकरें हैं (कृष्णस्येति) शास्त्रोक्तविधिहै सो पुरुषकूँ सत्कर्ममें प्रवृत्त नहिं करसकेहै तथा कुकर्मसों निवृत्तभी नहिं करसकेहै पर-ब्रह्म श्रीकृष्णही कर्ममें प्रवृत्त करेहै यद्यपि (स्वर्गकामो यजेत) अर्थ–स्वर्गकी कामनावालो यज्ञ करै या वेदवाक्यसुने पीछै ही पुरुष यज्ञ करें हैं तथापि जैसें काकको आयवो और वाही समय तालके फलको गिरनों होजाय तापीछें ही वो काक तालफलको भक्षणकरें हैं तासों तालफलके खायवेमें तालफलको गिरनो कारण नहिं है (वाके प्रारब्धकर्मद्वारा भगवानही तालफलके मिलवेमें कारणहैं) ऐसें यज्ञकरवेमें पूर्वसिद्ध विधिवाक्यको श्रवण कारण नहिं है कृष्णही प्रेरणाकरवेवारेहैं याहीसों भारतमें लिखोहै, (जा-नामि धर्मं नच मे प्रवृत्तिर्जानाम्यधर्मं नच मे निवृत्तिः । केनापि देवेन हृदिस्थितेन यथा प्रयुक्तोस्मि तथाकरोमि) ॥ अर्थ–मैं धर्मकूँ जानोहूँ परन्तु धर्मकरवेमें प्रवृत्त नहिं होयसकूँ हूँ पापकूँ जानूँ हूँ पापकरवेसूँ निवृत्त नहिं होयसकूँ हूँ कोई देव

हृदयमें स्थित है वह प्रेरणा करैहैं तैसेंही करूंहूँ ॥ जो (स्वर्गकामो यजेत) स्वर्गकी कामनावारो यज्ञकरे इत्यादि वाक्यनकूं ही प्रेरणा करवेवारे मानो हो तो जितने या वाक्यके सुनवेवारे ब्राह्मणादिक हैं सब ही क्यों नहिं यज्ञकरवेलगजावे हैं कदाचित् कहोगे यज्ञ है सो स्वर्गको देवेवारो है मोकूं अवश्य करनो चाहिये ऐसो ज्ञान उत्पन्नकरकें वेद विधिवाक्यनेही पुरुषकों यज्ञमें प्रवृत्त कियो है तासों विधिको प्रेरक मानो ताको उत्तर यह है जाकूं परब्रह्म यज्ञमें प्रवृत्त करनो चाहता है वाकूं ही वेद विधिवाक्यद्वारा ये कर्म मोकूं अवश्य करनों चाहिये ऐसोज्ञान प्रकट करकें प्रवृत्त करे हैं याहीसूं विधिवाक्यको सुनवेवारे सबही पुरुष यज्ञादिकनमें प्रवृत्त नहिं होय हैं जाकूं भगवत्प्रेरणा होय वोही यज्ञादिसत्कर्ममें प्रवृत्त होय है यदि यह कार्य अभिलषित फलको सिद्ध करवेवारो ऐसो ज्ञान जो पुरुषकूं सत्कार्यमें प्रवृत्त करसकतोहोय तो यह कार्य अनिष्ट (दुःख) को करवेवारो है ऐसो ज्ञान अनिष्टकरवेवारे कर्मसों पुरुषकूं निवृत्त क्यों नहिं करले है यदि ऐसेही होय तो जहर खायवेमें युद्ध करवेमें जानकरके नदी आदिनमें गिरपडवेमें बहुतसे मनुष्य क्यों प्रवृत्त होजावे हैं तथा जिन मतनसों सर्वथा मोक्ष नहिं होय ऐसे पाखंडमतमें मोक्षके लिये क्यों प्रवृत्त है जावें हैं कदाचित् कहोगे भ्रम (धोखा) सों प्रवृत्त होजावे है ताको यह उत्तर है पाखंड मतकी पुस्तकनके वाक्यको सब पुरुषनके प्रति इकसारही सुनवेमें आवे हैं परन्तु कोई पुरुषकी तो प्रवृत्ति होय कोईकी नहिं होय यामें कहाँ कारण है तासों ईश्वरेच्छाही कारण है वासोंही कितनेक अदृष्ट कहे हैं साँची पूछो तो इष्ट अनिष्ट साध्य असाध्य कुछभी नहिं है तथापि भगवान्की इच्छाकरकें कोई पुरुष कोई कार्यमें प्रवृत्त रह्योही आवे हैं ॥ शंका--ईश्वरही प्रवृत्त

करवेवारे हैं तब तो वेदमें यज्ञादिकर्मनमें प्रवृत्ति करायवेकेलिये यज्ञादिदेवतानकी प्रशंसा करवेवारे अर्थवादवाक्य वेदमें लिखे हैं वे वृथाही होजायँगे । उत्तर--वेदमें जो देवतानकी प्रशंसा करी है सो पुरुषकी यज्ञमें प्रवृत्तिकरायवेकेलिये नहिं करीहै वेदहै सो परम आप्तहै झूँठी प्रशंसा प्रलोभनार्थ कभी वेद नहिं करे हैं॥१८०–१८३

तथैव कर्म्मविज्ञानं धर्म्मस्तेनैव न्यथा । साधनानि स्वरूपं च सर्वस्याह श्रुतिः फलम् ॥ ॥ १८४॥ न प्रवर्तयितुं शक्ता तथाचेन्नरको नहि । लोकेऽपि राजदण्डादेरन्यथा विषयोनहि ॥१८५॥प्रेरको भगवानात्मा स्वात्मना दोषवर्ज्जितः । न विशेषोऽस्ति लोकेऽस्मिन्तारतम्यं नचैव हि॥ १८६ ॥ अखंडं कृष्णवत्सर्वं यथा तत्तु निरूपितम् । आत्मैव तदिदं सर्वं सृज्यते सृजति प्रभुः॥ १८७॥ त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः । आत्मैव तदिदं सर्वं ब्रह्मैव तदिदं तथा ॥ १८८ ॥ इति श्रुत्यर्थमादाय साध्यं सर्वैर्यथामाति । अयमेव ब्रह्मवादः शिष्टं मोहाय कल्पितम् ॥ १८९ ॥

तत्त्वदीपप्रकाशः ।

तर्हि अवचनमेवास्त्वित्याशंक्याह ॥ तथैव कर्मविज्ञानमिति ॥ क्षिप्रकारिणीं देवतां ज्ञात्वैव कर्म्म कर्तव्यम् ॥ स्तुतिरुत्कर्षाधायकगुणवर्णनं तत्कर्माङ्गमेव प्रकरणात् । वषट्कारो वै गायत्र्यैशिरोऽच्छिनत् तस्यै रसः परापतत्स पृथिवीं प्राविशत्स खदिरोभवदिति खदिरस्वरूपं

तादृशमेव ज्ञात्वा कर्त्तव्यम् ॥ एवं सर्वत्र । अतो वेदे सर्वस्यापि स्वरूपप्रतिपादकत्वान्न प्रवर्त्तकत्वं किंतु सर्वस्यापि साधनं फलं चाह ॥ तावतैव प्रवर्त्तकत्वं यदि तदोमिति ब्रूमः फलमुखप्रवृत्तिश्चेत् सर्वानेव प्रवर्त्तयेत् ततश्च नरकादिकं न भवेत् । अतो दृष्टादृष्टारिष्टदर्शनान्न वेदः प्रवर्त्तकः ॥ १८४ ॥ १८५ ॥ ननु भगवत्प्रवर्तनापक्षेऽपि अयं दोषः स्यात्, परमकृपालुत्वाद्भगवतस्तत्राह ॥ प्रेरको भगवानात्मेति ॥ सर्वेषामात्मत्वाद्यथासुखं प्रेरयतु नकोऽपि दोषः । अधिकं तु भेदनिर्देशादित्यत्र विस्तृतमस्माभिः । तर्हि भगवान् स्वात्मानमपि कथमेवं प्रेरयति समतयापि प्रेरणसमर्थस्तत्राह ॥ **न विशेषोऽस्ति लोकेऽस्मिन्निति** ॥ सर्वासु योनिषु सर्वेषु जीवेषु सुखदुःखयोस्तुल्यता पुरुषः स्वभ्रमादेव तारतम्यं पश्यति । अन्यथा तत्सुखेच्छा कदाचिज्जायमाना न स्यात् । राज्यांते नरकं ध्रुवमिति वाक्यानि संगतानि भवंति ॥ १८६ ॥ तस्मात् फलं सर्वत्र समं स्वरूपं च सममिति पूर्वोक्तमित्याह ॥ **अखंडं कृष्णवत्सर्वमिति** ॥ आविर्भावतिरोभावावित्यत्र प्रमाणमाह ॥ ॥ **आत्मैव तदिदमिति** ॥ १८७ ॥ १८८ ॥ एवं पुराणवाक्यानि श्रुतिवाक्यान्यप्युदाहृत्य सज्जीवान्प्रत्याह ॥ **इति श्रुत्यर्थमादायेति** ॥ एकं शास्त्रं देवकीपुत्रगीतमिति पूर्वं प्रतिज्ञातत्वात् । तच्छास्त्रं ब्रह्मवादः शिष्टानि मतानि मोहार्थमुत्पन्नानीत्यवोचामः ॥ १८९ ॥

आवरणभंगः ।

तर्हीति॥ यदि नैकवाक्यतार्थमपि प्ररोचनमभिप्रेयते तर्हीत्यर्थः ॥ कर्मविज्ञानप्रकारं दिग्मात्रेण दर्शयंति ॥ क्षिप्रेत्यादि ॥ ॥ सर्वत्रेत्यंतेन तदिति ज्ञानम् ॥ एतेन विधिना त्वेकवाक्यत्वादिति जैमिनीयविरोधः परिहृतो बोध्यः । कर्मांगज्ञानविषयप्रतिपादकत्वेनैकवाक्यत्वस्य सूपपादत्वादिति । तथा चायमर्थः ॥ विधिवाक्यादिश्रवणोत्तरं यत्र प्रवृत्तिस्तत्रापि विध्याद्यर्थबोधनद्वारेण भगवानेव प्रवर्त्तको नतु विध्यर्थः प्रवर्त्तकः ॥ अर्थवादोक्तस्तुत्यादिकं च कर्म तत्संबंधि तद्विरुद्धान्यतमस्वरूपं प्रतिपादयेत् । तद्बोधकतयांगभावं भजते नतु प्ररोचनयेति ॥ ॥ १८४ ॥ १८५ ॥ एवं वेदस्य प्रमेयबलं विचार्य निर्णयं वक्तुं किंचिदाशंकते

॥ नन्वित्यादि । अयमिति ॥ नरकादिभवनरूपः । मूले—स्वात्मनां प्रेरक इति संबंधः ॥ ॥ पूर्वोक्तमिति ॥ शास्त्रार्थप्रकरणे यत्र येन यतो यस्येतिवाक्योपन्यासेन तद्व्याख्यानेन च प्रागेवोक्तमित्यर्थः ॥ एवमन्यत्र न विशेषोऽस्ति लोकेऽस्मिन्नित्यादि कारिकाद्वयेन यथायथं प्रमेयप्रमाणाभ्यां सर्वं भगवानिति निर्णीतम् ॥ आत्मैव तदिति वाक्यं त्वेकादशस्कंधेऽष्टाविंशाध्याये भगवतोक्तं ज्ञेयम् ॥१८६॥ ॥ १८७ ॥ १८८ ॥ अतःपरं वादिनां बहुत्वाद्वाक्विभिस्तैः किंचिदन्यथा आशंक्यैता युक्तयश्चेत्पराभूयंते तदा एतन्मार्गीयैः स्वमतस्थापनं कथं कार्यमित्यपेक्षायां स्थापनप्रकारमुपादिशंत आज्ञापयंति ॥ एवं पुराणेत्यादि ॥ ॥ ननु पूर्वप्रकरणे वेदाः श्रीकृष्णवाक्यानीत्युक्त्वा उत्तरं पूर्वसंदेहवारकमिति प्रतिज्ञातं प्रकृते तु श्रीभागवतवाक्येन निर्णीतं नगीतयेति प्रतिज्ञाविरोध इत्याकांक्षायामयमेव ब्रह्मवाद इति मूलं विवृण्वंति ॥ एकं शास्त्रमित्यादि ॥ ॥ ब्रह्मवादस्तु तत्र विभूतिविश्वरूपाध्याययोः स्फुटति । तथाचायमपि गीतोक्तनिर्णय इति न प्रतिज्ञाविरोध इत्यर्थः ॥ १८९ ॥ इति प्रमेयप्रकरणम् ॥

व्रजभाषाटीका ।

तासों वेदोक्त जितनी स्तुति है अर्थात उन उन देवतानकी उत्तमता जतायवेकेलिये गुणवर्णन किये हैं वे सब सत्य हैं उन गुणनकूँ जानकेंही कर्म करनों चाहिये जैसें व्रीहीनको प्रोक्षण (चावलनको धोवनो कूटनो) आदि यज्ञको अङ्ग है जाप्रकार (प्रोक्षण) धोवनो (अवहनन) कूटनो लिख्यो वैसेंही कियेसों फलहोय ऐसेंही (वायुर्वैक्षिप्रकारिणी देवता) अर्थ—वायु शीघ्र कार्यकरवेवारो देव है; ऐसें वायुकी स्तुति लिखी है याकूँ जानकेही कर्म करनो याप्रकार जितनी स्तुति अर्थवादमें लिखी है वे सब कर्मको अङ्ग हैं उनकूँ जानकें कर्मकरवेसोंही कर्म साङ्ग सफल होवे है जैसें गायत्री सबन्धी रस पृथिवीपें गिरो वह पृथ्वीमें धसगयो वह खैरको वृक्षरूप भयो इत्यादि (खदिर) खैर वृक्षको स्वरूप जानके खैरको (यूप) यज्ञस्तम्भ बनावनो वेद है सो स्वर्गादिफलनको वर्णन करें है तथा स्वर्गादि प्राप्त होयवेके साधन जे सोमयामादिक हैं उनके स्वरूपको वर्णनकरेहै पुरुषसों जबर-

दस्ती यज्ञादिक नहिं करायसकैहै जो साधन फल बतायवेमात्र करकेंही वेदकूँ प्रवृत्तिकरवेवालो मानलो तो बहुत अच्छी बातहै सबहीकूँ वेद सत्कर्ममें प्रवृत्ति क्यों नहिं करलेहै यदि करलेहै तो नरकनमें मनुष्य क्यों जावे हैं तथा चोरी हिंसा आदि करकै राजदंड क्यों पावेहैं तासों वेद प्रवृत्ति नहिं करसकेहै ॥ १८४ ॥

॥ १८५ ॥ शंका–भगवान्‌ही कर्ममें पुरुषकूँ प्रवृत्तकरेहै ऐसें मानवेमें भी ये दोष आवे हैं क्योंकि भगवान् तो परमकृपालुहै अधर्ममें पुरुषकों प्रवृत्त करके नरक राजदंडादिक दुःख क्यों देवेहैं ? उत्तर–(प्रेरकोभगवानात्मेति) भगवानकूँ प्रेरकमानवेमें कछु दोष नहिं आवेहै क्योंकि भगवान् तो सबकी आत्माहै तासों जैसें सुख होय तैसें प्रेरणा करें हैं जैसें पुरुष अपने अङ्गनमें यथासुख चेष्टा करेहैं कोई समय वामें पाँवकूँ नीचे धरके वाके ऊपर दायें पाँवकूँ धरेहै कोई समय दायें पावकूँ नीचे धरकें वाके ऊपर बायें पाँवकूँ धरेहै ऐसेंही (तमेव साधु कर्म कारयति) या श्रुतिके अनुसार इच्छाहोय जा जीवकूँ राजा बनायके उच्च करदेहै, इच्छाहोय जा जीवकूँ हीन दास बनायदेहै तहाँ भगवान् तो ऐसीभी प्रेरणा करसकेहै जासों सब जीव सुकर्मकरकें समानरहेआवें फिर भगवान् जीवात्मक अपने स्वरूपनकूँ ऐसी क्यों प्रेरणाकरेहैं तासों अनेक मनुष्य गौ गधा आदि जोनीनमें जीव जन्म ले, तो फिर ऐसी शंका नहिं करनी. सब जीव समान होयजावें तो राजाही राजा सब होजायवें सो जगत्क्रीडा नहिं संभवसके तथा जगत्में विचित्रताभी नहिं होयसके और सुखदुःख तो सबही जोनीनमें सबही जीवनमें समान है पुरुष है सो अपने भ्रमसों ऊँच नीच तथा सुखदुःखादि (तरतमभाव)उतार चढाव देखेंहै यदि गर्दभादियोनिनमें दुःखही होय तो गर्दभकी योनीमें गयो जीव वा योनीके सुखकी इच्छा

क्यों करेहैं भगवान् स्वयंही जीवरूप धारणकरकें क्रीडाकरेहैं जब चाहै तब अपने जीवरूपको राज्याधिकारी करदेहै जब चाहै तब नरकाधिकारी करदें है सब ठिकाने फलभी समान है स्वरूपभी समानहै याहीसों गीतामें (शुनि चैव श्वपाके च पण्डिताः समदर्शिनः) भागवत् षष्ठस्कन्ध सप्तदशाध्यायमें (स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः ।) अर्थात् गौ हस्ती श्वान आदि योनिमें तथा स्वर्गनरकादिकमें ज्ञानी भक्त समान दृष्टि राखें हैं ॥ १८६ ॥ अखंड विश्व कृष्णके समानहै ऐसें मध्यमाधिकारीकूँ प्रतीत होय है उत्तमाधिकारीकूँ अखंड कृष्णरूप है ऐसे अनुभव होवे है यह बात शास्त्रार्थप्रकरणमें (यत्र येन यतो यस्य) या श्लोकमें निरूपण कीनीहै वहाँ सब कारक भगवद्रूपहै यह बात लिखीहै जैसें ब्रह्म सृष्टिके आदिकालमें इच्छाकरकें आत्मासों जीवनके लिये ब्रह्मांडकूँ करें है या वाक्यमें ब्रह्म कर्तृकारकहै, जीव संप्रदानकारकहै; ब्रह्मांड कर्मकारक है, आदिकाल अधिकरणकारक है, इच्छा करणकारक है, आत्मा उपादान कारक है, सृष्टि संबन्ध है ये सब पदार्थ भगवद्रूप समुझनों या प्रकारमात्र भगवद्रूप है एकादशस्कन्धमें (आत्मैव तदिदं सर्वम्) (ब्रह्मैव तदिदं तथा) या श्लोकमें लिखी है भगवानही सर्वरूप है भगवानही उत्पन्नकरे है भगवानही उत्पन्न होवे है ॥ १८७ ॥ भगवानही रक्षाकियेजावे हैं भगवानही रक्षाकरें हैं विश्वात्मा भगवान् आप अपने स्वरूपकोही संहारकरे हैं । और भगवानही आविर्भाव तिरोभाव शक्तिद्वारा उत्पत्ति स्थिति संहारलीला करे हैं श्रीवल्लभाचर्यजी श्रेष्ठ जीवनके प्रति उपदेशकरें हैं प्रथम प्रकरणमें देवकीपुत्रगीत जो गीता है वह ही एक शास्त्र है यह प्रतिज्ञा कर आये हैं गीतामें जो लिखो है वाकूँ ब्रह्मवाद समुझनों जे वादी उलटी शंकाकरकें कहीभई

युक्तिनको बाध करें उनके आगे गीताद्वाराही अपने सिद्धान्तको स्थापनकरनों गीताजीमें दशमाध्यायमें (एकांशेन स्थितो जगत्) या श्लोकमें तथा एकाशाध्यायमें अर्जुनकों अपनो विश्वरूप दिखायो तहाँ जगत् भगवद्रूप है यह स्पष्ट मालुमपडे हैं श्रीकृष्णने भी गीतामें (वासुदेवःसर्वमिति) या श्लोकमें सब जगत् भगवानूही है । ऐसें मानवेवारेकूँ महात्मा कह्यो है ये गीताशास्त्र ही ब्रह्मवाद है यासों विरोध राखवेवारे जितनें मत हैं जीवनकूँ धोखा देवेवारे हैं तहाँ या ब्रह्मवादमें चोरी आदि करवेवारेकूँ दण्ड नहिं होनों चाहिये क्योंकि परमात्माकों प्रेरक मानो हो तब चोरीकरवेमें भी परमात्माही प्रेरक भयो ? उत्तर—देह इंद्रिय आदिकनमें अहंता नहिं होय मैंने ये कार्य कियो ऐसी जाकी कभी बुद्धि नहिं होय वाकूँ पाप नहिं है (यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिम्पते । हत्वापि स इमान् लोकान् न हन्ति न निबध्यते) यह गीतामें लिखा है लोकमें भी अहंतारहित परमहंसादिककूँ दण्ड नहिं होवे है जहाँतक अहंकार वहाँतक दण्डभी है ॥ १८८ ॥ १८९ ॥

इति प्रमेयप्रकरणंसमाप्तम् ॥

वर्णाश्रमवतां धर्मः श्रुत्यादिषु यथोदितः । तथैव विधिवत्कार्यः स्ववृत्त्यन्नेन जीवता ॥ ॥ १९० ॥ आचारो वृत्तिहीनश्चेदर्धं फलति नाखिलम् । अनभ्यासेन वेदानामाचारस्य च लंघनात् ॥ १९१ ॥ आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति । शिलोंच्छवृत्त्या संतुष्टः श्रौतं कर्माखिलं चरेत् ॥१९२॥ तपन्स्वाध्यायनिरतो ह्यग्निहोत्रादिपञ्चकम् ॥ स्मार्तं

कृताकृतं तस्य सर्वं जानन्हरिं यथा ॥ १९३ ॥
क्रमेण मुक्तिमाप्नोति ब्रह्मलोकम्परङ्गतः । एत-
स्य तारतम्येन मानुषानन्दतो द्विजः ॥१९४॥
अक्षरानंदपर्यंतमानंदान्विंदते क्रमात् । उपां-
त्यानंदपर्यंतं पुनर्ज्जन्म भवेद्ध्रुवम् ॥१९५॥ त-
त्तद्रूपेण लोकेषु भोगान् भुक्त्वा तथाविधान् ।
एकाश्रमेण वा तिष्ठेत् विशेद्वा समनंतरम् १९६
आयुर्भागक्रमेणैव चतुष्टयमथापि वा । त्रि-
दण्डं परिगृह्णीत सर्वशास्त्राविरोधि तत् ॥१९७॥
शास्त्रेऽपि भगवानाह दण्डस्यैकस्य धारणम् ।
प्रतिपत्तिरियं सर्वा देहस्य ज्ञानिनो भवेत् १९८

तत्त्वदीपप्रकाशः ।

एवं प्रमेयप्रकरणं समाप्य फलं निरूपयितुं न विहितसाधनमात्रेणै-व फलं किंतु सर्वांगसहितेनेति वक्तुं बहिरंगाणि निरूपयति ॥ वर्णा-श्रमवतामिति ॥ उक्तेनैव प्रकारेण कर्त्तव्यं नत्वनुकल्पैः । तथासति प्रत्यवायपरिहार एव भवति नतु फलमित्यर्थः ॥ तथा स्ववृत्त्यन्नेनैव जीवता सर्वं साध्यम् ॥ १९० ॥ ननु तावन्मात्र एव वैगुण्यमस्तु किं-सर्वनाशेनेत्यत आह ॥ आचार इति ॥ वस्तुतस्तु न फलतीत्याह ॥ अनभ्यासेनेति ॥ १९१ ॥ तर्हि कथं फलतीत्याकांक्षायामाह ॥ शिलोञ्छवृत्त्येति ॥ १९२ ॥ असन्तोषे तदपि व्यर्थं तस्य बहुकर्त-व्यं चेत्तदाऽशक्यं भविष्यतीति स्मार्त्तं कृताकृतमित्याह ॥ स्मार्तमि-ति ॥ १९३ ॥ एतादृशस्य फलं ब्रह्मलोकं गत्वा ब्रह्मणा सह मुक्तिः । श्रौतस्योत्तमनिष्ठायामेतत्फलम् ॥ तारतम्ये फलाभावमाशंक्याह ॥ एतस्येति ॥ श्रोत्रियत्वमकामहतत्वं च तारतम्येन जायमानं तत्तत्फ-

लसाधकं ब्रह्मानन्दोऽक्षरानंदः, चतुर्मुखपक्षे ततोऽग्रे गणनाभावात् । अग्रे गणनाभावादिति ॥ तथा च सत्यलोकस्य सप्तमत्त्वेन अग्रे व्यावर्त्यलोकस्याभावात् । ब्रह्मलोकं परंगत इत्यत्र परपदवैयर्थ्यं स्यात् । ब्रह्मपदेनाक्षरोपादाने चतुर्मुखलोकनिवर्त्तकत्वेनैव परपदं सफलमिति भावः । एकस्यैव वर्षे यदाधिक्यं चेत् क्रमेणैव सर्वमाप्नोति । प्रत्येकपक्षे फलगतं दोषमप्याह ॥ **उपांत्यानन्दपर्यन्तमिति**॥१९४॥१९५॥ प्रकारमाह ॥ **तत्तद्रूपेणेति** ॥ वृत्त्यन्यस्य कारणत्वात् । आश्रमव्यवस्थामाह ॥ **एकाश्रमेण वा तिष्ठेदिति** ॥ सर्वत्र फलं तुल्यं समनंतरं ब्रह्मचर्यस्य गार्हस्थ्यम् । एवमुत्तरत्र ॥ १९६ ॥ **आयुर्भागक्रमेणेति** ॥ तृतीयः पक्षः ॥ अव्यवस्थायां प्रव्राजो वैराग्यस्तावकः ॥ सर्वथा वैराग्यमंगमिति ज्ञापनार्थः ॥ **गृहाद्व्रजेद्वनाद्व्रजेदिति** ॥ अन्यथायं पक्षोमन्वादिभिरुक्तः स्यात् ॥ तस्मात्त्रय एव पक्षाः संन्यासे सांप्रतं नानाभावा वर्त्तंत इति तन्निषेधार्थमाह ॥ **त्रिदंडं परिगृह्णीतेति** ॥ पाक्षिकोऽपि दोषः परिहरणीय इति सर्वशास्त्रसारोद्धारत्वाद्भागवतस्य यद्यन्यपक्षो भवेत्तत्र भगवान्वदेत् ॥ आश्रमाणां साचाराणां ज्ञानशेषत्वमिति सिद्धज्ञानस्य तत्परित्यागमाशंक्याह ॥ **प्रतिपत्तिरियं सर्वेति** ॥ ज्ञानिनो देहस्य तत्तदाश्रमस्थितिः प्रतिपत्तिरवश्यं कार्या तदभावे पुनर्ज्जन्म भवेत् दाहाभाववत् ॥ १९७ ॥ १९८ ॥

आवरणभंगः ।

एवमत्र प्रमेयप्रकरणे स्वतंत्रप्रमेयनिरूपणेन 'ब्रह्मतनुः पर' इत्यादि पादोनश्लोकद्वयोक्तं विचारितम् । अतःपरं 'भजनं सर्वरूपेषु फलसिद्ध्या' इत्यादिनोक्तं पुराणावान्तरप्रमेयभूतसाधनफलतारतम्यं विचारणीयं किंचोपोद्घातप्रकरणे कर्ममार्गविचारो जघन्याधिकारकत्वात्पूर्वंन कृत इति मोक्षसाधनीभूतस्मृतिविचारोऽपि फलतो नकृत इति सोऽपि करणीय इति तदुक्तं फलप्रकरणमारभंते ॥ ॥एवं प्रमेयेत्यादि ॥ एवं प्रमेयविचारे सर्वस्य भगवदभिन्नत्वेऽपि । बहुस्यां प्रजायेयेतीच्छया आधिदैविकादिभावात्तेन प्रकारेण तारतम्यबोधनपूर्वकं प्रमेयप्रकरणं

समाप्य फलं निरूपयितुं प्रमाणप्रकरणोक्तप्रमाणानुरोधिप्रमेयमध्ये पूर्वकांडोक्तप्रमेयस्य धर्मस्य पूर्वतंत्रे निर्णीतत्वेऽपि अन्यथाव्याख्यातृभिस्तन्निर्णयस्य नष्टत्वेन तदुद्धारस्य प्रतिज्ञातत्वात् । नविहितसाधनेत्यादिनोक्तरीत्या निर्णयोद्धारं च वक्तुं बहिरङ्गानि स्मृतिपुराणोक्तानि तत्साधनानि निरूपयतीत्यर्थः॥ मूले--वर्णाश्रमवतामिति ॥ ॥ तत्र वर्णानाम "मुखतोऽवर्त्तत ब्रह्म पुरुषस्य कुरूद्वह" इत्यादिषु भगवतो मुखबाहूरुपादेभ्यो जातत्वेनोक्ता ब्रह्मक्षत्रविट्शूद्राः । ते च देवताविशेषा उपनयनादिना देहे समायांति निषिद्धाचरणादिना चापयांतीति द्वितीयस्कन्धद्वितीयाध्यायसुबोधिन्यां "ब्रह्माननः क्षत्रभुजो महात्मा" इत्यत्र स्थितम् । तन्मया ब्राह्मणत्वादिजातिवादे प्रपंचितम् ॥ आश्रमा अपि "गृहाश्रमो जघनत" इत्यादिषु जघनहृद्वक्षःस्थलशीर्षभ्य उत्पन्ना गार्हस्थ्यब्रह्मचर्यवनवाससंन्यासाख्या देवताविशेषा एवेति समानन्यायादवसीयते । तत्र वर्णज्ञानमाचारेण एकादशे वर्णान् प्रकृत्य "य आत्माचारलक्षणा" इति भगवद्वाक्यात् ॥ भारत आजगरेऽपि तथा प्रतिपादनाच्च ॥ आचारस्तु स्वभावजं कर्म "शमो दमस्तपःशौचम्" इत्यादिभिरेकादशे गीतायां चोक्तम् ॥ एवमाश्रमज्ञानमप्याचारादेव "गृहस्थस्य क्रियात्यागो व्रतत्यागो बटोरपि । तपस्विनो ग्रामवासो भिक्षोरिंद्रियलौल्यता ॥ आश्रमाय सदा ह्येते खल्वाश्रमविडंबकाः" इति सप्तमस्कन्धवाक्ये विडंबकत्वकथनेनाचारादेव तज्ज्ञानसिद्धेः । तद्वतां धर्मस्तु -इज्याध्ययनदानप्रतिग्रहाध्यापनयाजनानीति षट् ब्राह्मणस्य, इज्यादित्रयः क्षत्रियविशोः, शूद्रस्य द्विजातिशुश्रूषेति सोयं श्रुतिस्मृपुराणेषु यथोदितमुख्ये कल्पे येन प्रकारेणोक्तस्तथैव कार्य इत्यर्थः ॥ तदेतद्व्याकुर्वंति ॥ ॥ उक्तेनेत्यादि ॥ ॥ कर्त्तव्यमिति पाठे धर्माख्यं कर्मेति शेषो बोध्यः ॥ नन्वनुकल्पानामपि तत्रतत्रोक्तत्वान्मुख्यकल्पे किमित्याग्रहः क्रियत इत्यत आहुः ॥ ॥ तथासतीत्यादि ॥ ॥ अन्यथा मुख्यफलनिरूपणं वृथैव स्यादिति भावः । नच देशकालाद्यपेक्षयानुकल्पानां विधानात्तदनुसारेण करणेऽपि मुख्यफलभवनं शक्यं तथापि कलादीनामंगानामयथात्वे तु कल्पैर्मुख्यफलसिद्धेर्दूरत्वात् । एतेनानुकल्पैरपीदानीं मुख्यं फलमंगीकुर्वंतो निरस्ताः स्मृतिपादे वेदाविरुद्धस्मृतेः प्रामाण्यस्य निर्णीतत्वात्तदुक्ता जीविकापि धर्म उपकरोतीत्यन्तरभूतां तामाहुः ॥ ॥ तथास्ववृत्त्येत्यादि ॥ ॥ तत्र वर्णवृत्तयस्तृतीयस्कंधस्य षष्ठे—"यस्तून्मुखत्वाद्वर्णानां मुख्योऽभूद्ब्राह्मणो गुरुः" इत्यादिभिर्गुरुत्वक्षतत्राणवार्ताशुश्रूषारूपा उक्ताः । यज्जाता सह वृत्तिभिरित्युपसंहारात् । एवमन्या अपि शास्त्रांतरादवगंतव्याः ॥ आश्रमवृत्तीस्त्वेकादशानुसारेणाग्रे स्वयमेव वक्ष्यंति ॥ १९० ॥ वृत्त्यन्यावश्यकत्वे किंचिदाशंकंते ॥ ॥ नन्वित्यादि ॥ ॥ सर्वनाशे-

नेति ॥ ॥ धर्मवैगुण्यकृतसर्वफलनाशेन ॥ आचार इति ॥ आचारे वर्णाश्रमयोः स्वाभाविको धर्मः॥ वृत्तिश्च तेषां स्वाभाविकी तत्तद्धर्मपोषकत्वेन तदंगभूता च । अन्यथा तस्य तस्य सा नोक्ता स्यात् । एवं च वृत्त्यभावे स्वाभाविकधर्मव्यंग्यतायां तस्य कौंठ्ये वर्णाश्रमलक्षणमहान्यायवर्णादिव्यपायेनाधिकारस्य कौंठ्यादर्द्धं फलतीति तदभावार्थं सा आवश्यकीत्यर्थः ॥ वस्तुत इत्यादि ॥ ॥ तथा च स्ववृत्त्यन्नाभावेऽनभ्यासादिदोषचतुष्टयान्मृत्युरुपैति स चात्यंतविस्मरणरूप इति शरीरं पातयन् स्मृतिभ्रंशात् बुद्धिं नाशयति बुद्धिं नाशयन्नाचारं फलितुं ददाति यदि दोषचतुष्टयं कथंकारं त्यजति तदा तावन्मात्रवैगुण्येऽर्द्धं फलति । तथापि कालस्य दुष्टत्वेनापत्त्यभावेऽप्यनभ्यासादिसंभवात्फलाभाव एवेत्यर्थः ॥ ॥ तर्हीत्यादि ॥ यद्यपि कालवशाद्दोषसंभवस्तथापि "यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्त्तते । संन्यासं चाग्निहोत्रं च तावत्कुर्यात्कलौयुगे" इत्यादिवाक्यबलात्फलस्यावश्यवाच्यत्वे कथं फलतीत्याकांक्षायां चतुर्भिरुत्तरमाहेत्यर्थः ॥ ॥ तदपि व्यर्थमिति ॥ 'शिलोञ्छवृत्त्या परितुष्टचित्तः' इति । "पंडिता बहवो राजन्बहुज्ञाः संशयच्छिदः । सदसस्पतयोऽप्येक असंतोषात्पतंत्यधः" इत्यादिवाक्यात्तथेत्यर्थः ॥ अत्र शिलोञ्छवृत्तिपदं स्वस्ववर्णादिमुख्यवृत्त्युपलक्षकं मर्यादायां ब्राह्मणदेहं विना मुक्त्यभावस्य मुचुकुंदप्रसंगे साधितत्वाद्ब्राह्मणवृत्तिमात्रपरं वा । मूले तपःस्वाध्यायनिरतपदं 'धर्मं महांतं विरजं जुषाण' इत्यादिविशेषणार्थसंग्राहकम् । अग्निहोत्रादिपंचकपदं च कारिकास्थाखिलपदार्थसंकोचकं ज्ञेयम् । तेन नित्यकर्मैव चरेदिति सिद्ध्यति तथा चेद्वर्णेति वाक्यमपि न वृत्तिनिरपेक्षं तन्मात्रकरणं वक्ति अनापत्तौ कलावपि वृत्तित्यागस्यानभिधानात् । अतस्तदभावेऽपि यं फलमंगीकुर्वंति त एतेन निरस्ता अत्र किंचिदाशंकते ॥ ॥ तस्येत्यादि । तस्येति ॥ ॥ यथोदितकर्तुः कृताकृतमिति । सर्वाधानपक्षस्यापि शास्त्रे सत्त्वात्तदर्थं निवृत्त्यपेक्षया तदनावश्यकमित्यर्थः ॥ एतेन तस्यावश्यकतां वदंतो निरस्ताः । एवमत्र साधनानां श्रुत्यादिपदबोधितप्रमाणप्रमेयाभ्यां स्ववृत्त्यन्नेनेत्यादिना साधनतश्च निर्णय उक्तः । अतः परं "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" "अथापरे मनीषिणः कर्मभ्योऽमृतत्वमानशुः" इत्याद्यर्थसंग्राहकेन 'सर्वं जानन् हरिम्' इत्यनेन निर्विचिकित्सशाब्दज्ञानवदधिकारिसूचनात् तादृशैः कृतानां साधनानां फलतो निर्णयं वदिष्यंतो यथाक्रमेणेत्यादिनोक्तं फलं व्याकुर्वंति ॥ ॥ एतादृशस्येत्यादि ॥ ॥ तदिदं यत्किंचिन्न्यूनतायां नेत्याशयेनाहुः ॥ ॥ श्रौतस्येत्यादि ॥ ॥ व्यंग्यत्वे फलाभावस्य पूर्वमुक्तत्वात्किंचिन्न्यूनतया तारतम्ये तदाशंक्येत्यर्थः । मूले—एतस्येति ॥ ॥ सर्वं हरिरिति ज्ञानस्य । अत्र गमकमाहुः ॥ ॥ श्रोत्रियत्वेत्यादि ॥ ॥ श्रुतौ विशेषणद्व-

यस्य सर्वत्रोक्तत्वात्फलवैजात्ये विशेषणद्वय एव तारतम्यमवश्यमभ्युपेयं तथा च यथायथा श्रोत्रियत्वाधिक्यं तथा ज्ञानाधिक्यं यथायथाज्ञानाधिक्यं तथातथा निष्कामत्वाधिक्यमिति तथेत्यर्थः ॥ एवं चाकामहतत्वस्य मोक्षलिंगत्वमंगीकृत्य मुक्तौ तारतम्यं वदन्तो माध्वा अप्येवं व्यवस्थापिता बोध्याः । तदवस्थापरित्यागरूपमोक्षस्य पुराणप्रकरणे व्यवस्थापितत्वेनात्रापि तथा वक्तुं शक्यत्वात् । ननु विश्वमायानिवृत्तिरूपायां परममुक्तौ । लीलास्थेषु तु भगवत्कृतमेव तारतम्यं नतु साधनकृतमिति पुष्टिप्रवाहमर्यादायां स्थापितमतो नकोपि शंकालेशः । ननु श्रुतौ प्रजापतिपदेन विराट् त्रैलोक्यशरीरो ब्रह्मा समष्टिव्यष्टिरूपः संसारमंडलस्थाप्युच्यते । ब्रह्मपदेन तु यत्रैते प्रजापत्यानंदा एकतां गच्छंति धर्मश्च तन्निमित्तो ज्ञानं चैतद्विषयमकामहतत्वं च निरतिशयं यत्र स एष हिरण्यगर्भ उच्यत इत्यंगीकारे अक्षरानंदपर्यंततायां किंगमकमित्याशंकायामाहुः ॥ ॥ चतुर्मुखेत्यादि ॥ ॥ तथाचाग्रे गणनाभावात्तदानंदस्यांतिमत्वांगीकारे ब्रह्ममुक्तिबोधिके वेदांतविज्ञानेति [ब्रह्मणा सहते सर्व इति] श्रुतिस्मृती विरुध्येतामतो ब्रह्मानंदपदेनाक्षरानंद एव ग्राह्य इत्यर्थः ॥ एवमत्र साधनतारतम्येन फलतारतम्यमुक्तं । तत्र साधनतारतम्यं द्वेधा प्रतिजन्मनि कर्मावृत्त्या । एकजन्मनि प्रतिवर्षं तदावृत्त्या च । तयोर्मध्ये पूर्वत्र क्रमस्य सुगमः पंथा द्वितीये तु कथमित्याकांक्षायामाहुः ॥ ॥ एकस्येत्यादि ॥ ॥ तथाचास्मिन्नपि पक्षे क्रमस्य न विरोध इत्यर्थः ॥ एवं फलतो निर्णीय विवक्षितफलसाधनयोरुत्कर्षबोधनायोपोद्घातेनास्मिन्नपकर्षं बोधयितुमुक्तयोर्द्वयोरेतदधिकारिणोर्मध्ये द्वितीयस्योत्कृष्टत्वं च बोधयितुमाहुः ॥ ॥ प्रत्येकेत्यादि ॥ तत्तद्रूपेणेति ॥ ॥ तत्तल्लोकवासिमनुष्यगंधर्वादिरूपेण । तेष्वपि तत्तद्ब्राह्मणादिरूपेण वा लोकेषु तथाविधान् भोगान् भुक्त्वा उपांत्यानंदपर्यंतं तत्तद्रूपेण ध्रुवं जन्म भवेदिति मूलान्वयः । तत्र हेतुः ॥ ॥ वृत्तीत्यादि ॥ ॥ तथाच तेन कृत्वाऽदृष्टाकृष्टभूतभेदैस्तादृशमेव शरीरं जन्यते जातं वा स्वर्गारोहणसामायिकयुधिष्ठिरादिदेहवत्संस्क्रियत इति तथेत्यर्थः ॥ अत एव (मरुतो वै देवानां विशः) इति श्रुतिः "ब्राह्मणो भगवान् रुद्रः क्षत्रियो विष्णुरुच्यते । ब्रह्मा वैश्यस्तथा प्रोक्तो वासवः शूद्र उच्यत" इति स्कांदवाक्याच्च दृश्यत इति समानन्यायाद्गंधर्वादिष्वपि तादृग्रूपत्वं न दुर्घटम् ॥ ॥ आश्रमेत्यादि ॥ ॥ एवं वैदिकं साधनं नीर्णीय तत्साधनभूताश्रमव्यवस्थामाहेत्यर्थः ॥ सर्वत्र तुल्यं फलमिति ॥ ॥ "यद्यसौ छंदसां लोकमारोक्ष्यन्ब्रह्मविष्टपम् । गुरवे विन्यसेद्देहं स्वाध्यायार्थं बृहद्व्रतः" इत्युपक्रम्य "एवं बृहद्व्रतधरो ब्राह्मणोऽग्निरिव ज्वलन् । मद्भक्तस्तीव्रतपसा दग्धकर्माशयोऽमलः ॥" इति कर्माशयस्यांतः-

करणस्य दार्ढ्योक्त्या मुक्तिफलसूचनात् । गृहिणोपसंहारश्रुतावपि "नसपुनरावर्तते" इति श्रावणात् । ऋषिलोकादुपैति मामिति वानप्रस्थविषयकवाक्यात् । वेदान्तविज्ञानेति श्रुतौ "परामृतात्परिमुच्यंति सर्वे" इति मुक्तिश्रावणाच्च तथेत्यर्थः ॥ एवमुत्तरत्रेति ॥ ॥ यद्यपि वनवासानंतर्यं संन्यासस्य तथापि कलौ वनवासस्य वर्जनात्साम्प्रतं गार्हस्थ्यानंतर्यं बोध्यम् ॥ नन्वव्यवस्थापक्षोऽपि चतुर्थः श्रूयत इति कथं त्रय एव पक्षा इत्यत आहुः ॥ अव्यवस्थयेत्यादि पक्षा इत्यन्तम् ॥ नानाभावा इति ॥ ॥ मनःकल्पिता नानाप्रकाराः । त्रिदंडावश्यकत्वे युक्तिमाहुः॥ पाक्षिक इत्यादि ॥ ॥ वाग्देहदंडयोर्मौनानीहयोरभावे विविदिषादशायां तत्कृतदोषस्य संभावितत्वात्तथेत्यर्थः ॥ ननु शास्त्रान्तरे एकदण्डपक्षोऽप्युक्त इति कथं स निषेधार्ह इत्यत आहुः ॥ ॥ सर्वेत्यादि ॥ ॥ एवं च मूले तत्पदेन श्रीभागवतं परामृष्टं ज्ञेयम् ॥ "सर्ववेदेतिहासानां सारं सारं समुद्धृतम्" इति वाक्यात् ॥ एतदेव पुष्णंति ॥ यदित्यादि ॥ तत्परित्यागमिति ॥ ॥ आश्रमपरित्यागमित्यर्थः ॥ प्रतिपत्तिरित्यादि ॥ ॥ तथाच प्रतिपत्तित्वादाश्रमावश्यकत्वं तस्य च त्रिदंडेऽपि तुल्यत्वान्नैकदंडे कोऽपि विशेष इति भगवदुक्तपक्षत्यागोऽनुचित इति भावः ॥ १९१–१९८ ॥

ब्रजभाषाटीका ।

या प्रकार प्रमेयप्रकरण समाप्तकरकें फलप्रकरणको प्रारंभ करे हैं ॥ श्रीकृष्णाय नमः ॥ अङ्गविना केवल शास्त्रविहित साधनमात्रके करलेवेसों फल नहिं होय है किंतु अङ्गसहित साधन कियोजाय तब फल होय जैसें वैद्यशास्त्रके अनुसार औषधको तो साधन करतो रहे परंतु उष्णजलपान,पथ्य अन्नको भोजन,निरोग देशमें रहनों आदि जे औषधके अङ्ग हैं उनको आचरण नहिं कियोजाय तो औषधको कछू फल नहिं होय ऐसेंही वेदशास्त्रोक्त जे अग्निहोत्रादि साधन हैं उनके बाहिरके अङ्ग वर्णधर्म आश्रमधर्म हैं इनकूँ छोडके यज्ञादि कियेजाँय तो सर्वथा फल नहिं होय तासों श्रुतिस्मृतिपुराणके अनुसारही वर्णाश्रमधर्मकूँ साधनो जैसें पथ्य अन्नको भोजनकरकेंही औषधसेवन कियोजाय ऐसें अपने वर्णधर्मके अनुसार जावर्णकी जो वृत्ति शास्त्रमें लिखी है

वा वृत्तिकरिके प्राप्तभयो जो अन्न वाहीसों देहनिर्वाह करतेभये वेदोक्त यज्ञादि धर्मनकूँ करनों, ये नहिं जाननों कि कुवृत्तिसों निर्वाह करेंगे तो कुवृत्तिकरवेको जो पाप है वोही लगेगो और अधर्म जो कियोजायगो वह तो सफल होयगो किन्तु कुवृत्तिसों निर्वाह करवेवारे पुरुषके कियेभये और धर्मनकोभी आधो फल रहजावे है ॥ वस्तुतस्तु वाको फल नहिं होयहै स्मृतिमें लिखेहै कि, अन्नके दोषसों आलस्यहोयवेसों आचारको उल्लंघन तथा वेदको अभ्यास छूटजायवेसों विप्रकी मृत्यु होय है स्मृतिकूँ अत्यन्त भूलजायवेसों मृत्यु कहे हैं, स्मृतिनाशहै सो बुद्धिको नाशकरे है, बुद्धिनाशभये पीछे धर्मकूँ नहिं फलवेदेत है, तब धर्म कैसें फलसके ताको उत्तर देत है (शिलोञ्छवृत्त्येति) जा रीतिसों शास्त्रमें जावर्णकूँ वृत्ति करना लिख्यो है वाही रीतिसों निर्वाहकरकें धर्म करें तब धर्म सफल होय जैसे ब्राह्मणकी चार वृत्ति हैं । शिलोञ्छ १ अमृत २ मृत ३ प्रमृत ४ । तहाँ (मृत) नित्य मांगनों, (प्रमृत) खेतीकरनों, (अमृत) विनामांगे कोई वस्तु देवे वाको लेनों, इनमें शिलोञ्छवृत्ति श्रेष्ठ है खेतमें अथवा हाटमें जायकै शुद्ध भूमीमें गिरेभये धान्यकणनकूँ लायकें उनसों अपनो निर्वाह करनों शिलोञ्छ वृत्ति कहावे है या रीतसों ब्राह्मण बर्त्ताव करें सदा संतोष राखे यदि संतोष नहिं होय तो शिलोञ्छवृत्तिसों निर्वाह करनो व्यर्थही जाय । श्री भागवतमें लिखे हैं (सदसस्पतयो राजन्नसंतोषात्पतन्त्यधः) शंका—केवल धान्यकण वीनकें निर्वाहकरवेवारे ब्राह्मण स्मृतिके लिखेभये होमादिकर्मनकूँ द्रव्यबिना कैसे करसकेंगो ? उत्तर—या उत्तम वृत्तिसों निर्वाह करवेवारे ब्राह्मणके लिये (स्मार्तकर्म) स्मृतिको लिख्यो होम (कृताकृतहै) इच्छा होय समृद्धि होय तो करनों मृतप्रमृतादिवृत्तिसों निर्वाह

करवेवारेकूँ तो स्मार्त होमभी करनोंचाहिये। यारीति निजवृत्तिसों निर्वाह करवेवारो ब्राह्मण सब जगतकूँ भगवद्रूप मानतोभयो ब्रह्मलोकमें जावे है। ब्रह्माके साथ वाकी मुक्ति होय है, यह क्रमसुक्ति वैदिकमार्गकी उत्तम निष्ठाको फल है। यह फल पूर्ण कर्म सिद्ध होय, पूर्ण ज्ञान सिद्ध होय, पूर्ण निष्काम होय तब होवे है अर्थात् पूर्ण ये लक्षण होयँ तब तो (ब्रह्मानन्द) अक्षरानंद प्राप्त होवे है अक्षरानन्दताईके आनंदकी गिनती है उन लक्षणोंमें कछु न्यूनता होय तो बृहस्पतिके आनन्दकी प्राप्ति होय वासों भी न्यूनता होय तो इन्द्र होय वासों न्यूनता होय तो समस्तपृथ्वीको पति होय या प्रकार साधनके तारतम्यमें फलको तारतम्य समुझनों। साधन दोप्रकारसों होय है एक वर्षमें सोमयाग चातुर्मास्य यागादिकनकी आवृत्ति वर्षके वर्ष होती रहै अथवा जन्मजन्ममें एकएक सोमचातुर्मास्यादि यज्ञ होतोरहै। तहाँ वर्षके वर्ष आवृत्ति करनों उत्तम पक्ष है दूसरे पक्षमें यज्ञसें प्रकटभयो जो अदृष्ट वासों खिचआये पञ्चभूतनसों बनेभये शरीर करकें उन उन लोकमें जावे है पुण्य क्षीणभयेसों पीछो भूमिमें आवे है फिर कर्मकरकें उत्तमसों उत्तम लोकमें जाकें भोग भोगके यहाँ आवै है (उपान्त्यानन्दपर्यन्तम्) ब्रह्मलोकके समीपको जो तपोलोकहै वहाँतकगये जीवकोभी पुनर्जन्म होतो रहे है। तपलोकसोंभी आयके जन्मलेकें यज्ञादिकनकी आवृत्तिकरें तब ब्रह्मलोकमें जायकें ब्रह्माके साथ मुक्ति होवै तासों निजवृत्तिसों उपार्जित अन्नहीं यज्ञादिके द्वारा उनउन देवलोकनके भोगभुगायवेवारो है. आश्रमधर्मकी व्यवस्था करें है (एकाश्रमेणेति) ब्रह्मचर्य १ गृहस्थ २ वानप्रस्थ ३ सन्यास ४ इन चारों आश्रमनकूँ अवस्थाके चार भाग करकें एकएक भागमें एकएक आश्रमकूँ

यथार्थ साधन करें अथवा इन चारों अश्रमोंमेंसों एक कोई आश्रमके धर्मकूँ मरणपर्यन्त यथार्थ साधनों अथवा आयुके विभागबिना ही क्रमसों आश्रमधर्मनको बर्त्ताव करनो इन तीनों पक्षनको फल समानही होवैं हैं ॥ १९०–१९६ ॥ अव्यवस्थाको जो संन्यास है वह वैराग्यकी स्तुतिकरवेकेलिये है पूरो वैराग्यभयेसों सन्यासी होनों योग्यहै । ब्रह्मचर्याश्रमसाधें विनाही सन्यासी होजानों गृहस्थाश्रमधर्ममेंसों कच्ची अवस्थामेंही सन्यासी होजानों इत्यादि अव्यवस्थाको संन्यास मनुस्मृत्यादिकनमें नहिं लिखो है तासों तीनही पक्ष हैं अभी कलियुगमें अनेकप्रकारके मनकेबनाये संन्यास चले हैं उनको स्वीकार नहिं करनों, शास्त्रोक्तत्रिदंडसंन्यासको ग्रहणकरनों (मौनानीहानिलायामा दंडा वाग्देहचेतसाम्) या श्रीभागवतके बचन अनुसार बाणीकों दंड मौन राखनों है, देहको दंड चेष्टा करबो छोडनो है, चित्तको दंड प्राणायामद्वारा प्राणवायूको रोकनों है, इन तीनों दंडनकूँ धारणकरनों (जिज्ञासादशामें) अपक्वदशामें मौनराखेबिना तथा चेष्टाकरनों छोडेबिना देह वाणीनमें दोष उत्पन्न होयजाय तासों तीनों दंडनकी संन्यासीकूँ आवश्यकता है ॥ यह पक्ष कोई शास्त्रसेभी बिरुद्ध नहिं है एक दंड धारणको पक्ष तो सर्वसंमत नहिं है यदि यह पक्ष तथा और कोई पक्ष जो होय तो सर्व शास्त्रसारभूत श्रीभागवतमें अवश्य लिखोहोय तासों और पक्ष सर्वसंमत नहिं है ॥ आचारसहित चारों आश्रमनके धर्म हैं सो ज्ञानके अङ्गभूत हैं ऐसें समुझके जाकूँ ज्ञान सिद्ध होजाय वाकूँभी आश्रमधर्म छोडनों योग्य नहिं है अवश्य संन्यासादि आश्रममेंही स्थित रहै यदि उच्छृंखल होयकें बरताव करे तो ज्ञानीकोभी फिर जन्म होय ॥ १९७ ॥ १९८ ॥

आद्यंतयोस्तु भिक्षान्नं द्वितीये तु शिलोञ्छनम् । तृतीये वन्यभेदाः स्युर्भिक्षायामपि संयमः ॥ १९९ ॥ गुरुसेवाकर्म्मकृतिस्तपः पर्यटनं क्रमात् । स्वाध्यायेन तथा कृत्या तपसा मानसा मखाः ॥ २०० ॥ अत्यावश्यकमेतद्धि चतुर्णां तत्पृथक् पृथक् । श्रेयान्स्वधर्म्मो विगुणः परधर्मात्स्वनुष्ठितात् ॥ २०१ ॥ स्वधर्मे निधनं श्रेयः परधर्मो भयावहः । उत्तरोत्तरधर्म्मेषु निष्ठायामधिकं फलम् ॥ २०२ ॥ तस्य चेत्परमा भक्तिस्तिरोधानं विनश्यति । भक्तिः स्वतन्त्रा शुद्धा च दुर्लभेति न सोच्यते ॥ २०३ ॥ अयं हि सर्वकल्पानामुत्तमः परिकीर्तितः । त्रिषु स्वाश्रमधर्मेषु प्रथमे वा प्रतिष्ठितः ॥ २०४ ॥

तत्त्वदीपप्रकाशः ।

एवमाश्रमान्निरूप्य सवृत्त्यन्नं ज्ञापयितुमाह ॥ आद्यंतयोरिति ॥ ब्रह्मचारिसंन्यासिनोर्द्वितीयो गृहस्थः ॥ चतुर्थे भिक्षायां नियमः सप्तागारानसंक्लृप्तानिति ॥ १९९ ॥ नकेवलमन्ननियम एव किंत्वन्येऽपि नियमाः संतीत्याह ॥ गुरुसेवेति ॥ क्रमेणैव चत्वारश्चतुर्णां मुख्याः । यज्ञातिरिक्तान्येव कर्माणि द्वितीयस्य विवक्षितानि आतिथ्यपरिपालनादीनि । यज्ञास्तु चतुर्णामपि कर्त्तव्याः । परं प्रकारभेदेनेति तान्प्रकारानाह ॥ स्वाध्यायेनेति ॥ यं यं क्रतुमधीते तेन तेनास्येष्टं भवतीति ब्रह्मचारिणः स्वाध्याययज्ञाः, क्रियामया द्वितीयस्य, तपोयज्ञास्तृतीयस्य, मानसाश्चतुर्थस्येति ॥ २०० ॥ ज्ञानिनस्तदकरणमाशंक्याह ॥

अत्यावश्यकमिति ॥ एतेषां हीनतामाशंक्याह ॥ श्रेयानिति॥१२१॥ आयुर्भोगक्रमेणेत्युक्तपक्षस्य वैशिष्ट्यमाह ॥ उत्तरोत्तरधर्मेष्विति ॥ एवमुत्कर्षप्रकरणे स्वाश्रमधर्मसहितज्ञानानां मध्ये चतुर्थस्योत्कर्ष उक्तो भवति ॥ २०२ ॥ ततोऽप्युत्कर्षमाह ॥ तस्य चेत्परमा भक्तिरिति ॥ तिरोधाननाशो ब्रह्मभावभक्तेरपि स्वाश्रमधर्मसहितज्ञानसहिताया एव तिरोधाननाशकत्वमुक्तं भवति । एषा भक्तिः माहात्म्यज्ञानपूर्वकपरमस्नेहरूपा । तथाभूता सती भगवत्परिचर्यायुक्ता भवेत्ततः पुरुषार्थरूपा सेवा चेत्सा भक्तिः स्वतंत्रेत्युच्यते ॥ अयमर्थः स्वाश्रमाचारसहितब्रह्मानुभवसहितमाहात्म्यज्ञानपूर्वकस्नेहो ब्रह्मभावं करोति । तादृशश्चेत्परिचर्यासहितो भवेत्तदा सा परिचर्या आनन्दरूपा सती त्रयोदशगुणा भवेत् । तदा फलरूपायां तस्यां स्वाश्रमाचारादिकरणं फलानुभवप्रतिबन्धकमिति फलत्वेनानुभवे स्वाश्रमाचारास्त्यक्तव्याः । यथा ब्रह्मभावं गतस्य । अन्यथा कर्तव्या इति निष्कर्षः । एवं फलप्रकरणे तां सामान्यतो निरूप्य विशेषतो निरूपणाभावे हेतुमाह ॥ दुर्लभेति न सोच्यत इति ॥ संति ब्रह्मभावं प्राप्ता नत्वेतादृशा भक्ता इति ॥ २०३॥ परं भगवच्छास्त्रे सर्वोत्तमत्वेन निरूपितमित्याह ॥ अयं हि सर्वकल्पानामिति ॥ यद्ययं भाव उत्पद्येत तदा कस्मिन्नाश्रम इति जिज्ञासायामाह ॥ त्रिषुस्वाश्रमधर्मेष्विति ॥ चतुर्थे इन्द्रियाणां दार्ढ्याभावात् । द्वितीयतृतीययोरपि दार्ढ्याभावमाशंक्याह ॥ प्रथमे वेति ॥ २०४ ॥

आवरणभंगः ।

स्ववृत्त्यन्नं ज्ञापयितुमिति ॥ ॥ वृत्तीनां वर्णाश्रमयुक्तानामनेकविधत्वात्तत्संपादितान्नस्यापि तथात्वात्कीदृशमन्नं शीघ्रं फलौपयिकं तज्ज्ञापयितुमित्यर्थः॥ आद्यंतयोरित्यादि ॥ ॥ इदमेकादशीयसप्तदशाष्टादशाध्याययोः स्पष्टम् ॥ ए-[illegible]शे ॥ गृहिणो भूतरक्षेज्येत्यत्रोक्तेज्या यागरूपा भविष्यतीति शंकानिरासा-[illegible] ॥ यज्ञातिरिक्तेत्यादि ॥ ॥ विवक्षितानीति कर्मकृतिपदेभिप्रेतानि । अत्र [illegible] ॥ यज्ञा इत्यादि ॥ ज्ञानिनस्तदकरणमिति ॥ सर्वं कर्माखिलं पार्थ ज्ञाने

परिसमाप्यते ॥ इति वाक्यादित्यर्थः ॥ अन्यथाजरामर्याग्निहोत्रादिकं श्रुतौ वि-दुषो नोक्तं स्यादिति भावः। अत्यावश्यकत्वे हेतुर्मूले उक्तः । योजना तु यत-स्तत् यज्ञकरणं चतुर्णामाश्रमाणां पृथक्पृथक्। अतएतदस्यावश्यकमिति ज्ञेयम् ॥ हीनतामिति ॥ ॥ ज्ञानापेक्षया हीनता ॥ आयुर्भागेत्यादि ॥ ॥ पूर्वं साधनता-रतम्येन फलतारतम्यमित्युक्तं तत्र व्यंगत्वमंतरेण कथं साधनतारतम्यमित्यपेक्षा-यां सर्वेष्वाश्रमेषु फलतौल्ये पक्षान्तराणां किं प्रयोजनमित्यपेक्षायां वा तदुपपाद-यितुमायुर्भागेत्यादिकमाहेत्यर्थः ॥ उत्तरोत्तरेत्यादि ॥ ॥ वैराग्यज्ञानयोराधिक्ये-नेति शेषः ॥ चतुर्थस्येति ॥ ॥ संन्यासाश्रमिणो ज्ञानस्य । अयं चोत्कर्षक्रमेण ब्रह्मणा सह वा क्रमेण ततः पूर्वं वा मुक्तिसंपादकत्वरूपो बोध्यः । एवं वैदिक-साधनानां क्रममुक्तिसंपादकत्वरूपो बोध्यः ॥ एवं वैदिकसाधनानां क्रममुक्तिरूपं फलमुपसंहृतम् ॥ ततोपीत्यादि ॥ एकादशस्कंधाद्युक्तरीत्या स्वाश्रमधर्मस्य भक्त्यु-त्पादकत्वेन भगवद्धर्मत्वे केवलज्ञानसहितात्तस्मादुत्कर्षमाहेत्यर्थः ॥ तस्येति मूल-स्थपदसूचितमर्थमाहुः ॥ भक्तेरपीत्यादि ॥ ॥ एवमाश्रमधर्माणां भगवद्धर्मत्वे फलमुक्तम् ॥ अतःपरमितोऽप्युत्तमां कक्षां वक्तुं भगवदुक्तमलिंगाश्रमपक्षं संगृहीतुं प्रथमं विहितभक्तेः स्वरूपं तच्छुद्धत्वस्वातंत्र्ययोः स्वरूपं चाहुः ॥ एषेत्यादि ॥ एषेति विद्यापूर्वरूपा ॥ तथाभूतेत्यादि ॥ आद्यंतयोरित्यादिकारिकाद्वयोक्तवृत्ति-चतुष्टयधर्मचतुष्टययुक्ता ॥ एवं द्वादशगुणा सा भगवत्परिचर्या युक्ता भवेत्तदा सती शुद्धा सापि स्वतः पुरुषार्थरूपा सेवा चेत्सा भक्तिः स्वतंत्रेत्यर्थः ॥ अ-त्राधिकारिणं वक्तुमुक्तार्थं संगृह्णते ॥ अयमर्थ इत्यादि ॥ ॥ त्रयोदशगुणेति ॥ उक्तद्वादशगुणब्रह्मानुभववत्त्वोत्तरमानंदरूपतया परिचर्या स्वतंत्रा सती तथेत्य-र्थः ॥ फलत्वेनानुभव इति ॥ ॥ तादृशपरिचर्याया एव फलत्वेनानुभव इत्यर्थः। निष्कर्ष इति ॥ ॥ आयुर्भागक्रमेणेति ॥ पक्षेऽयं निष्कर्ष इत्यर्थः ॥ परमि-त्यादि ॥ ॥ यद्येवं दौर्लभ्यं तदोल्लेखेऽपि किं प्रयोजनमित्याशंकायां तत्कथने हेतुमाहेत्यर्थः ॥ निरूपितमिति पाठे भजनमिति शेषः ॥ उत्पद्येतेति ॥ ॥ वर-णस्य भगवदिच्छाधीनत्वादाश्रमांतर उत्पद्येतेत्यर्थः ॥ आश्रम इति ॥ ॥ स्था-तव्यमिति शेषः ॥ चतुर्थइत्यादि ॥ ॥ भिक्षासंयमात्तथा ॥ द्वितीयेत्यादि ॥ ॥ क्रियावैयग्र्यवन्यसंग्रहणादिना तथेत्यर्थः ॥ प्रथमे चेति ॥ " अनड्वान्ब्रह्मचारी च दीक्षितश्चेति ते त्रयः ॥ अश्नंत एव सिद्ध्यंति नैषां सिद्धिरनश्नताम् ॥" इतिवाक्या-द्ब्रह्मचारिणो यथेष्टाशनेनेंद्रियसामर्थ्यात्तथेत्यर्थः ॥ एवमत्र वैदिकमार्गस्य साध-नपुरःसरं फलपर्यन्तं निरूपणे वैदिकस्य धर्मस्य भक्तिजनकत्वमेव परमोत्कर्षः ॥ वैदिक्याः भक्तेश्च धर्मसाहित्य एव तिरोधाननाशकत्वं तेनोभयोरंगांगीभाव-

सापेक्षत्वे चेत्तदसिद्धौ निरपेक्षा तु वैदिकीदानीं दुर्लभेति च । एवं प्रमाणानुरोधिनो वैदिकप्रमेयस्य बलं विचारितम् ॥ १९९--२०४ ॥

ब्रजभाषाटीका।

ऐसें आश्रमनको निरूपणकरकें वर्ण वर्णके अनुसार और एक एक आश्रमके अनुसार वृत्ति अनेक प्रकारकी है, शीघ्र फलको उपयोगी कैसो अन्न है ताको वर्णनकरे है। (आद्यन्तयोस्तु भिक्षान्नम्) ब्रह्मचारी संन्यासीनको तो भिक्षाको अन्न उत्तम है गृहस्थकूँ शिलोञ्छ अर्थात् हाट उठे पीछें विखरे भये अन्नके कण शिलोञ्छ कहावे हैं तथा खेतवाले कर्षालोगनके लिये पीछें बचीभई धान्यकी मंजरी शिल कहावे हैं यह अन्न गृहस्थीको फलको उपयोगी है संन्यासाश्रममें फिरतेभये सातघरकी भिक्षा करनों ॥ १९९ ॥ तहाँ केवल अन्नकोही नियम नहिं है किन्तु ब्रह्मचारीको गुरुसेवा करनों, गृहस्थकों अधिकारानुसार कर्म करनों, वानप्रस्थकों तपश्चर्याकरनों, संन्यासीको पृथ्वीको पर्यटनकरनों आदि और भी नियम बहुत हैं उन सबकूँ करनै, यज्ञ तो चारों आश्रममें न्यारेन्यारे प्रकारसों सबहीको करनो योग्य है गृहस्थकों अतिथिको सत्कार देवपूजन आदि धर्मनकूँभी अवश्य परिपालनकरनों योग्य है, ये धर्म और आश्रममें नहिं बनसके हैं इतनीही गृहस्थाश्रममें श्रेष्ठता है यज्ञ तो चारों आश्रमवालेनको करनों तहाँ ब्रह्मचारीकूँ (यं यं क्रतुमधीते) या वाक्यके अनुसार यज्ञविधिको करनो वेदको पढनो है यहही वाचिक यज्ञ करनों है। गृहस्थकूं क्रियाद्वारा कायिक यज्ञ करनो लिखे है, वानप्रस्थकों तपके द्वारा, मानसिक यज्ञ करनो संन्यासीकूँभी आवश्यक है याहीसों " अजरामर्याग्निहोत्र " श्रुतिमें ज्ञानीकेलिये कह्यो है। संन्यासीको जो ज्ञानधर्म है वाकी अपेक्षा और

आश्रमको धर्म हीन समुझकें उनकूँ छोडनो योग्य नहीं अपने आश्रमके धर्ममें अपनी मृत्यु होजानोही कल्याण करवेवारो है । दूसरे आश्रमके धर्मको ग्रहण करनों भय देवेवारो है ऐसो गीता-वाक्य है (उत्तरोत्तर) आगेंआगेंके धर्म में जैसेंजैसें श्रद्धा बढ-तीजाय तैसेंतैसें अधिक फल प्राप्तहोवे है । अपनेंअपनें आश्रम-धर्मसहित जे ज्ञानहै उनमें संन्यासाश्रमको ज्ञान उत्तम है वह ज्ञान ब्रह्माके साथ अथवा ब्रह्माजीसों पहलीभी क्रमकरकें मुक्ति देवेवारो है । येही वा ज्ञानकी उत्तमता है वासोंभी अधिक उत्त-मता जब होय (एवं धर्मैर्मनुष्यणाम् , मयि संजायते भक्तिः) या भागवतवाक्यके अनुसार वे वर्णाश्रमधर्म हैं ते भक्तिके उत्प-न्नकरवेवारे होयकें भगवद्धर्मरूप होजायँ अर्थात् वर्णाश्रमधर्मस-हित जो ज्ञानी है वाकी भगवान्में भक्ति सिद्ध होजाय तो जीवमें आनन्दको जो तिरोभाव होरह्यो है वाको नाश होजाय वाको नाश होतेही ब्रह्मभाव होजाय, आश्रमधर्मसहित ज्ञानसहित भ-क्तिही तिरोभावको नाशकरवेवारी है भगवान्को माहात्म्य जान-कर उनमें परम स्नेह करनों भक्ति कहावे है ऐसीही यह भक्ति भगवान्की परिचर्यासहित स्वतः पुरुषार्थरूप सेवा मानके कीनीं-जाय अर्थात् भक्तिसों और कछु फल न मांग्योजाय भक्तिकूँ ही फलरूप मानीजाय वह भक्ति स्वतन्त्र भक्ति कहावे है सारांश यहहै आश्रमधर्म सहित ब्रह्मके अनुभव सहित जो माहात्म्य ज्ञानपूर्वक स्नेह है सो ब्रह्मभावकूँ सिद्ध करेहै वैसोही स्नेह प्रभुपरिचर्यासहित होय तब वह परिचर्या आनन्दरूप होतीभई । त्रयोदशगुणवाली फलरूप होयहै । वा प्रियतम प्रभुके सेवामें आश्रम धर्मादिकनको आचरणकरनों (फलानुभवको) भजनानन्दके अनुभवको प्र-तिबन्धक मालुम पडे है । तासों जैसे ब्रह्मभावकूँ प्राप्तभयो जीव

आश्रमधर्मादिकनकूँ छोडदेहैं वैसेंही भजनानन्द अर्थात प्रियतम प्रभुकी सेवाके आनन्दको अनुभवकरवेवारे उत्तमाधिकारी भक्तकूँ आश्रमधर्मादिकनको करनो वा आनन्दको प्रतिबन्धक मालुम पडे है । तासों आश्रमधर्म वा समयमें त्यागयोग्य है तासों जहाँतक परब्रह्म पुरुषोत्तमके स्वरूपानन्दके अनुभवपूर्वक भजनानन्दको सेवाके सुखको अनुभव नाहिं होय तहाँताई तो आश्रमधर्मनकूँ सर्वथा नाहिं छोडनों । ऐसी स्वतन्त्र शुद्ध भक्ति दुर्लभ है तासों वाको संक्षेपमों ही निरूपण कियो है । बिस्तार- या ग्रन्थमें नाहिं कियो है क्योंकि ब्रह्मभावकूँ प्राप्तभये जीव जगत- में हैं परन्तु वैसे भक्त जगतमें कोडनमें एक होनोंभी दुर्लभ है श्री भागवतमें लिखे है (मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने) ॥ २००--२०३ ॥ भगवच्छास्त्रमें याप्रकारकी भक्तिकूँ सर्वोत्तम बनाई है (यमेवैष वृणुते तेन लभ्यः) या श्रुतिसों निश्चय होवे है भक्तकूँ अङ्गीकार- करकें ऐसी भक्ति देनों भगवानके आधीन है यदि भगवान इ- च्छाकरके ऐसो भाव (भक्ति) उत्पन्न करदें तो चतुर्थ संन्यासा- श्रममें नाहिं रहनों वा आश्रममें यथेष्ट भोजनबिना इन्द्रियनकी सामर्थ्य नष्ट होजाय तो प्रिय प्रभुकी सेवा नाहिं बनसकें तासों तीन आश्रममें रहनों तहाँ गृहस्थाश्रममें आह्निक कर्ममें काल व्य- तीत होजाय ऐसेंही वानप्रस्थमें वनके फलादिक संग्रह करवेमें काल व्यतीत होजाय तो प्रभुपरिचर्या नाहिं बनसकें तासों यदि स्त्रीपुत्रादि सेवाके अनुकूल होय तो गृहस्थाश्रममें रहनो परन्तु सबकी अपेक्षा इंद्रियको जय करकें ब्रह्मचारी होयकें प्रेमसेवाको अनुभव करनों सर्वोत्तम है क्योंकि ब्रह्मचारीको यथेष्ट भोजन करनो लिख्यो है अर्थात प्रथमाश्रममें रहके यथेष्ट भोजन करके

इंद्रियनकी सामर्थ्य बढायके भगवत्सेवा करनों इतने बिस्तारको यह निचोड है कि वैदिक धर्म करते करते जब भक्ति उत्पन्न हो-जाय तब जाननों उत्तम वैदिक धर्म मोसों बन आयो है, भक्ति-को उत्पन्न करदेनों यही वैदिक धर्मकी उत्तमता है यह वार्त्ता (भगवान्ब्रह्मकार्त्स्न्येन) या भागवतके श्लोकमें स्पष्ट लिखी है या प्रकार वैदिक भक्ति वैदिकधर्मकी अपेक्षा राखे है तासों धर्म अंग है वैदिक भक्ति अङ्गी है और निरपेक्ष स्वतन्त्र भक्ति तो दु-र्लभही है ॥ २०४ ॥

न्यासे सर्वपरित्यागी नष्टाहंममताभिदः ।
योगमुत्तममास्थाय लोकातीतो बहिर्दृशिः ॥
॥२०५॥ असंप्रज्ञातयोगेक्षो देहत्यागे विमुच्य-
ते । तादृशस्य बलाद्वापि देहत्यागो विमुक्ति-
दः ॥२०६॥ संप्रज्ञातसमाधिस्थः सांख्येनात्म-
विभिन्नदृक् । विकृतं प्रकृते कार्यं मायेति त्य-
क्तविग्रहः ॥ २०७॥ एवं योगं च सांख्यं च स-
मास्थापयते कृती । योगेन त्यक्तदेहश्चेत्क्रमा-
न्मुक्तिं स विंदति ॥ २०८ ॥ ब्रह्मलोकप्रवृत्तानां
या गतिस्तस्य सा भवेत् । भक्ताधिकारिणां
मुक्तिरन्यथा प्रकृतौ लयः ॥ २०९ ॥ पुनः सृ-
ष्टौ तथैश्वर्यं कर्मिणां पुनरागतिः । आसन्न्यो-
पासकानां तु ब्रह्मणा सह मुक्तता ॥ २१० ॥
अभक्ते पुनरावृत्तिर्योगनिष्ठां गतस्य तु । ऐश्व-
र्यादिहेरभक्तो भित्वाण्डं प्रविशेद्धरिम् ॥२११॥

तत्त्वदीपप्रकाशः ।

एवं वैदिकमार्गं निरूप्य सांख्ययोगावेकीकृत्य सद्योमुक्तिं क्रममुक्तिं चाह ॥ न्यास इत्यादिना ॥ प्रथमं सद्योमुक्तिः अयञ्चतुर्थाश्रम एवेति सांख्यमार्गः । अतो न्यासं कृत्वा मनसापि सर्वं परित्यज्याहंकारं ममतां च त्यक्त्वा भगवदाविर्भावार्थं उत्तमं योगमास्थाय अलौकिको भूत्वा अन्तर्निष्ठ एव सन् बहिर्दर्शनसंभावनायामसंप्रज्ञातयोगेक्षो भूत्वा तस्यामेव निष्ठायां यावद्देहपातं तिष्ठेत् । तदादेहान्ते विमुच्यते सद्य एव अत्रैव भगवदाविर्भावात् । कदाचिदाविर्भावस्य बहुकालस्थितिसंदेहे बलाद्धादेहत्यागः कर्त्तव्य इत्याह ॥ तादृशस्येति ॥ क्रममुक्तिप्रकारमाह ॥ संप्रज्ञातेति ॥ बहिः संवेदनयुक्तएव योगेन भगवंतं पश्यन ज्ञाननिष्ठोऽपि भूत्वा परमविरक्तः संन्यासी योगज्ञाने आमरणमभ्यसन योगेनैव त्यक्तदेहश्चेत् क्रममुक्तिं प्राप्नोति । तत्र ब्रह्मलोकपर्यंतं गत्वा बहुकालं स्थित्वा स्वाधिकारानुसारेण नानामार्गेण गच्छतीति वक्तुमाह॥ ब्रह्मलोकप्रवृत्तानामिति ॥ तत्र स्थितानां पंच गतयः, ता आह ॥ भक्ताधिकारिणामिति ॥ ये भक्ताः संतोऽधिकारिणो ब्रह्मादयः तेऽधिकारसमाप्तौ तत्रैव मुक्ता भवंति । तथायमपि पूर्वं तादृश एव केन चिन्निमित्तेन जन्म प्राप्तवांश्चेत्तदा दोषस्य विनिवृत्तत्वात् अयमपि विमुच्यते अन्यथा भक्त्यभावे ब्रह्मादीनां प्रकृतौ लयः ॥ तृतीयमाह ॥ आसन्योपासकानामिति ॥ आब्रह्मकल्पं तत्र स्थित्वा ब्रह्मणा सह विमुच्यंते । ब्रह्मणः स्वस्य वा अभक्तत्वे पुनरावृत्तिः पूर्ववदनुवादः । चतुर्थमाह ॥ योगनिष्ठां गतस्य त्विति॥ सिद्धश्चेद्योगमार्गः तदैश्वर्यादिकं तत्रैव प्राप्नोति । पंचममाह ॥ हरेर्भक्त इति ॥ द्वितीयस्कंधोक्तप्रकारेण अण्डं भित्वा हरिं विशेत् ॥ २०५–२११ ॥

आवरणभंगः ।

अतःपरं पूर्वप्रकरणे सांख्यो बहुविध इत्यादिना यौ सांख्ययोगावुक्तौ तयोरेव गीतादावुक्तत्वेन प्रमाणानुरोधिप्रमेयत्वात्तद्बलं विचारयितुं तयोः सापेक्षतायाः

'योगसांख्ये तु ये मुख्य' इत्यत्र पूर्वमुक्तत्वेऽपि फलपर्यंतज्ञानं विना बले इयत्ता-निश्चयाभावात्तयोरपि मिलितयोः केवलयोश्च फलतो निर्णयं वदंति ॥ एवमित्यादि ॥ ॥ एवमिति ॥ ॥ ज्ञानमिश्रभक्तरूपपरमकाष्ठाकथनपर्यंतम् ॥ प्रथमं सद्योमुक्तिप्रकारनिरूपणे बीजमाहुः ॥ ॥ प्रथमं सद्योमुक्तिरिति ॥ द्वितीयस्कंधे-"केचित्स्वदेहान्तर्हृदयावकाश" इत्यादिना संजातभक्तेरुत्तमयोगप्रकारं वदता शुकेन प्रथमं सैवोक्तेत्यतस्तथेत्यर्थः ॥ ननु योगेन सिद्धिराश्रमांतरेऽपि तुल्यास्तु किं संन्यासकथनेनेत्याकांक्षायामाहुः ॥ ॥ अथमित्यादि ॥ अलौकिको भूत्वेति ॥ ॥ त्यक्तलोकव्यवहारत्वादात्मानं लोकाभिन्नं भावयित्वा अंतर्निष्ठयाप्युपायस्तु । नहि द्रष्टुर्दृष्टेर्विपरिलोपो वियत इत्युक्तरीत्या अबहिर्दर्शनं तत्राप्युपायो बहिरित्यादिनोक्तः। यावद्देहपातं तिष्ठेदिति कथनं"लब्धोपशांतिर्विरमेत कृत्यात्" इत्यस्यार्थः । एवमेकः सद्योमुक्तिप्रकार उक्तः । उक्ताधिकारान्न्यूनेऽधिकारे "मुनिस्तु परमेव्यवस्थित"इत्यादिना बलाद्देहत्यागः सद्योमुक्त्यर्थमुक्तस्तत्र बीजमुद्घाटयंति ॥ ॥ कदाचिदिति ॥ तादृशस्येति ॥ कथासादृश्यार्थकथनान्मूले पूर्वोक्तसजातीयोऽधिकारः परामृष्टो ज्ञेयः ॥ एवं सद्योमुक्तेः प्रकारद्वयमुक्तम् ॥ क्रमेत्यादि॥"यदि प्रयास्यन्नृपपारमेष्ठ्यम्"इत्यादिना द्वितीयस्कंधे क्रममुक्तिरेवोक्ता । तत्र साधनादिकं तु नस्फुटमतस्तत्प्रकारमाहेत्यर्थः॥ 'संप्रज्ञातसमाधिस्थ' इत्यस्य व्याख्यानं बहिरित्यादिपश्यन्नित्यन्तम् । 'सांख्येनात्मविभिन्नदृग्' इत्यादेर्व्याख्यानं ज्ञाननिष्ठ इत्यादिविरक्तइत्यंतं विकृतमित्यादेर्व्याख्यानं योगज्ञाने आमरणमभ्यसन्निति । एतादृशाधिकारे विग्रहत्यागाय वैराग्योपायत्वेन जगतो मायिकत्वज्ञानं नत्वन्यस्येत्येतदत्र ज्ञापितम् । तेन पुराणेषु मायामात्रत्वकथनमेतादृशाधिकारिणोऽर्थ इति ज्ञेयम् ॥ क्रममुक्तिं प्राप्नोतीति ॥ अर्चिरादिना तत्प्रथितेरित्यत्र विचारितेन देवयानमार्गेण प्रजापतिलोकं प्राप्य ततोऽग्रे परब्रह्म प्राप्नोतीत्यर्थः ॥ अस्य मार्गस्य पूर्वोक्तान्न्यूनत्वज्ञानायास्मिन्मार्गे सर्वेषां न मुक्तिरिति बोधयंति ॥ ॥ तत्र ब्रह्मलोकेत्यादि ॥ ये भक्ता इत्यादि ॥ ॥ अयं प्रकारस्तृतीये द्वात्रिंशे "येस्वधर्मान्न दुह्यंति" इत्यारभ्य "परस्य परिचिंतका" इत्यंतैश्चतुर्भिरुक्तः स एव यावदधिकारमवस्थितिराधिकारिकाणामिति निर्णीतो ज्ञेयः॥ एवं पंचसु गतिष्वेका उक्ता। द्वितीयामाहुः॥ ॥अन्यथेत्यादिना॥ तृतीयस्कन्ध इति॥ द्वात्रिंशे पूर्वोक्तामुक्त्वा क्ष्मांभोनिलेतिद्वाभ्यां 'आद्यः स्थिरचराणां य' इत्यादि चतुर्भिश्च तथानिरूपणादित्यर्थः ॥ इयं गतिः सहस्राश्वमेधयाजिनोऽपि भवतीत्याहुः ॥ अश्वमेधेनेत्यादि ॥ आवृत्तितौल्याद्द्वितीय एव निवेश इत्यर्थः ॥ पूर्ववदिति॥ स्थलद्वये भक्तस्यैव मुक्तिरुक्तेति तदभावेऽत्रापि पुनरावृत्तिरिति बोधनायेत्यर्थः ॥

चतुर्थमिति ॥ एकादशे सिद्धीर्वदता भगवता प्राकाश्यं पारमेष्ठ्यं वेत्यादिनोक्तमित्यर्थः ॥ पंचमः प्रसिद्ध एव । अत्रांडभेदनं आद्यात्पक्षाद्विशेषः ॥ आद्यस्यांडमध्य एव प्राप्तेः ॥ २०५–२११ ॥

व्रजभाषाटीका ।

गीताभागवतस्थ योग सांख्य शास्त्रनकूँ एक ममुक्षके सद्योमुक्ति तथा क्रममुक्तिको वर्णन करें हैं ॥ प्रथम सद्योमुक्तिको बर्णन करें हैं । संन्यासकरकें मनसों भी सब पदार्थनकूँ छोडकें अहंकार तथा ममताकूँ छोडकें भगवानके प्रकट होयवेकेलिये उत्तम योग धारणकरकें (केचित्स्वदेहान्तर्हृदयावकाशे) इत्यादिवाक्यानुसार प्रादेशमात्र चतुर्भुजाकार भगवान् विराजे हैं उनको धारणाकरकें स्मरणकरैं लोकव्यवहारको त्यागकरें आत्माकूँ लोकसों भिन्न समुझे अन्तर्निष्ठ रहे । बाहिर दर्शनकी संभावना होय तो असंप्रज्ञात योगमें दृष्टि लगायकें बाहिरके पदार्थनके ज्ञानकों छोडकें वैसी निष्ठामें ही देहपात होय तहाँतक स्थित रहै तो देहपात होतेही सद्य मुक्ति होजाय, क्योंकि वा अवस्थामें भगवानको तो आविर्भाव हृदयमें होयही रह्यो है । या अधिकारीसों जो हीन अधिकारवालो है वाके हृदयमें संदेह रहे है जब मेरो देहपात होय इतने बहुतकालतक भगवानको आविर्भाव स्थित रह्यो आवैगो या नहिं वा अधिकारीकूँ भगवानको आविर्भाव हृदयमें होय वाही समयमें प्राणवायुसों ब्रह्मांड फोडकें देहत्याग करनों योग्य है वाकीभी देहत्याग होतेही सद्य मुक्ति होवे है ॥ २०५–२०७ ॥ क्रममुक्तिको प्रकार बतावें हैं (संप्रज्ञातेनेति) बहिःसंवेदन अर्थात् बाहिरके पदार्थके ज्ञानसहितही योगकरकें भगवान्के दर्शनकरतोभयो । ज्ञाननिष्ठ होयकें भी परम विरक्त दशामें रहतोभयो मरणपर्यंत ज्ञानयोगको अभ्यास यो योगकरके ही यदि देहको त्याग करे है वंह क्रम-

मुक्तिकूँ प्राप्तहोवे है तहाँ ब्रह्मलोकपर्यन्त जायकें बहुतकाल वहाँ स्थित रहकै अधिकारानुसार अनेक मार्गनकरके जावे है ॥२०८॥ अर्थात् ब्रह्मलोकमें स्थित जीवनकी पांच प्रकारकी गति है जे अधिकारी होयकेंभी भक्तहैं वे ब्रह्मादिक अधिकार समाप्तभये सों मुक्त होवे हैं। तैसेंही यह भी ब्रह्मलोकगत जीव अधिकारी भक्त होय कोई निमित्तसों जन्मकूँ प्राप्त होयगयो होय तो यह जीवभी मुक्त होजाय, भक्तिविना अधिकारी ब्रह्मादिकनको भी प्रकृतिमेंही लय होय है। यह बात तृतीय स्कन्धमें (क्ष्मांभोनलानिल) इत्यादि दोय श्लोकमें तथा (आद्यं स्थिरचराणां यः) इत्यादि चार श्लोकनमें लिखी है फिर सृष्टि होय जब वे ब्रह्मादिक फिर वैसें ही ऐश्वर्यवाले होजाँय यह गति सहस्र अश्वमेध करे है वाको भी होयहै वहभी ब्रह्मलोकमें जावेहै। परन्तु फिर आवै है तृतीय मार्ग कहे है, आसन्यप्राणकी जे वेदोक्त प्रकारसों उपासना करवे-वारे हैं वे कल्प पर्यन्त ब्रह्मलोकमें रहके ब्रह्माके साथ मुक्त होवेहैं ॥ २०९ ॥ २१० ॥ ब्रह्मा अथवा आसन्योपासक यादि इनमेंसों कोई भक्त नहिं होय तो कल्पादिमें फिर आवृत्ति होय अर्थात फिर जन्मलेनों पडेहै चतुर्थगतिको वर्णन करेहै जो योगी है अर्थात जाके योगमार्ग सिद्ध होयगयो है वाकूँ तो वहाँही ईश्वरता अणिमा महिमा आदि सिद्धि प्राप्त होयजावेहैं या अधिकारी-कोंही एकादशमें सिद्धिके प्रकरणमें भगवानूनें वर्णन कियोहै. पञ्चम मार्गको वर्णन करेहै (योगिनामपि सर्वेषां मद्गतेनान्तरात्मना) इत्यादि गीतावाक्यानुसार जो योगी हरिको भक्तहै वह तो द्विती-यस्कंधोक्त प्रकार करकें ब्रह्माण्डको भेदकरकें श्रीहरिके स्वरूपमें प्रवेश करेहै आद्य मार्गवालो वहाँही मुक्त होय है पंचममार्गवालो अंडको भेदकरकें मुक्त होये यह ही आद्यसों यामें विशेषताहै २११

केवलेन हि सांख्येन विविक्ताध्यात्मसंस्थि-
तिः । नैव किंचित्करोमीति दृढबुद्धिरसक्तधीः
॥ २१२ ॥ अन्तेऽप्येवं सदा ध्यायन्नविद्यातो
विमुच्यते । केवलेनापि योगेन दग्धकर्म्ममम-
लाशयः ॥ २१३ ॥ योगवीर्येण जितदृक् लिंगं
भित्वा तथा भवेत् । योगसांख्ये धर्महीने वि-
मार्गे परिपोषिते ॥ २१४ ॥ नरकायैव भवतः
पश्चात्किंचित्सुखं भवेत् । ज्ञानांगे चित्तरो-
धे च तौ प्रमाणं न सर्वथा ॥२१५॥ पदार्थतत्व-
निर्द्धारे न प्रमाणं कथंचन । फलांशे तु प्रमत्त
स्य शास्त्रमात्रपरस्य हि ॥ २१६ ॥ नरकंस्त्व-
न्यथा भावात्तेन मूले विनिन्दितौ । फलांशे तु
स्तुतौ कृष्णवाक्ये भागवतेऽपि च ॥२१७॥ त-
दन्येषां मतानां तु सर्वथा व्यर्थता मता । न
तैरिष्टेन युज्यंते मिथ्यार्थाभिनिवेशतः॥२१८॥
तस्माद्वेदोक्तमार्गेषु न स्वल्पोऽपि पतेद्बुधः ।
अतःस एव सद्धर्म्मैःसेव्यो वर्णिभिरादरात्२१९
धर्ममार्गं परित्यज्य च्छलेनाधर्मवर्तिनः । प-
तंति नरके घोरे पाषंडमतवर्त्तनात् ॥ २२० ॥

तत्त्वदीपप्रकाशः ।

एवं सांख्ययोगभक्तीनां मेलने फलमुक्त्वा केवलानां फलमाह॥केवल-
नेति॥केवले सांख्ये द्वयमंगम् । संघातात्भिन्नतया आत्मज्ञानम् । अहंका-

राभावश्च। एतयोर्निर्वाहो नैव किंचित्करोमीति बुद्धिर्वैराग्यं च । एवं यावज्जीवमेकधारणया स्थितौ अविद्यातो विमुच्यते। जन्मांतरे ज्ञानी सन्नुत्पद्यत इत्यर्थः ॥ केवलयोगफलमाह ॥ **केवलेनापि योगेनेति** ॥ यावज्जीवं योगाभ्यासे ज्ञानोदये योगबलेनैव देहं त्यक्त्वा अविद्यातो विमुच्यते। भक्तिसहितश्चेत्पूर्वमेवोक्तः । एवं सांख्ययोगयोः सहितयोः केवलयोश्च फलमुक्त्वा निषिद्धयोः फलमाह॥**योगसांख्ये इति**॥धर्म्ममार्गाद्भ्रष्टे तत्सिद्ध्यर्थं कादचिन्निषिद्धमपि कुरुतः। अपेयपानेन नाडी शुद्धा भवतीति विमार्गपरिपोषिते पश्चाज्जन्मांतरे। ननु"यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यत" इति।"अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः। सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि"इत्यादिवाक्यैः सांख्ययोगयोस्तुतत्वात्कथं विकर्म्ममात्रेण नरकः। 'योगेनैव दहेदंह' इति वाक्याच्चेत्याशंक्याह ॥ **ज्ञानांग इति** ॥ सांख्ययोगशास्त्रद्वयं पुराणमूलकमंगत्वेन निरूपितं तदपि परंपरया नित्यानित्यवस्तुविवेकस्य ज्ञानांगत्वम् । तथा चित्तनिरोधस्य ज्ञानस्थापकत्वम् । अन्यथा ज्ञानं स्तुतं भवतीति तयोरंगे सांख्ययोगौ नतु सर्वथा तत्प्रमाणम् ॥ अप्रमाणांशं स्पष्टयति ॥ **पदार्थतत्वनिर्द्धार इति** ॥ फलितमाह ॥ **फलांशे त्विति** ॥ " योऽन्यथासंतमात्मानमन्यथा प्रतिपद्यते। किं तेन न कृतं पापं चौरेणात्मापहारिणा॥"इति भगवतोऽन्यथाचिन्तनान्नरकः, तत्र विकर्मसहायभूतम्। अतएव सूत्रकारेण शिष्टापरिग्रह उक्तः । भगवद्वाक्यस्य गतिमाह ॥ **फलांशे तु स्तुताविति** ॥ नित्यानित्यवस्तुविवेके चित्तनिरोधे च स्तुतौ तदन्येषां मायावादिनां सांख्योपजीवकानां सर्वथा व्यर्थता, सत्फलं न किञ्चित् । विकर्मणा अन्यथाभावनाच्च नरकः। तस्माद्वेदातिरिक्तमार्गाः स्वतंत्रा न फलसाधकाः किंत्वंगभावमेव प्राप्य यादृशं प्रमेयं वेदोक्तं तादृशमेव साधयंतः फलाय भवंतीति निष्कर्षः। तदभावेऽपि वेदोक्तमार्गेण केवलेनापि निस्तार

इत्याह ॥ अतः स एव सद्धर्मैरिति ॥ वेदविरोधे नरक इत्याह ॥ धर्ममार्गं परित्यज्येति ॥ अत्र हेतुः ॥ पाषंड-मतवर्तनात् ॥ पाषंड-वेषस्वीकारात् ॥ २१२—२२० ॥

आवरणभंगः ।

केवलानामित्यादि ॥ ॥ पूर्वोक्तेभ्यो जघन्याधिकारे केवलयोः सांख्ययोगयोरुपयोग इति फलद्वारा तयोर्निर्णयं वक्तुं केवलानां फलमाहेत्यर्थः ॥ संघाताद्भिन्नतया आत्मज्ञानमिति ॥ एतेन विविक्ते अध्यात्मनि संस्थितिर्यस्येति मूले समासो ज्ञापितः ॥ शेषमतिरोहितार्थम् ॥ ॥ भक्तिसहित इति ॥ ॥ योग इति शेषः । एवमेव सांख्यमपि ज्ञेयम् । एवं सांख्ययोगयोर्विद्यापूर्वरूपभक्तिसाहित्ये पूर्वोक्तरीत्या मुक्तिजनकत्वं तदभावे त्वविद्याविमोचकत्वमिति बलं निर्णीतम् ॥ ॥ निषिद्धयोरित्यादि ॥ ॥ "एतद्विरुद्धं यत्सर्वं न तन्मानं कथंचन" इति पूर्वमुक्तत्वेन प्रसङ्गात् तादृशयोः फलमाहेत्यर्थः ॥ एते वामागमोक्ते ज्ञेये "छलयोगस्तथा सांख्यं शाक्तो मार्ग" इत्यग्रे वक्ष्यमाणत्वात् ॥ कपिलसांख्यप्रवचने पातंजले योगे च निषिद्धाचरणोक्त्यभावात् । एवं तद्बलं निर्णीतम् ॥ अतःपरं पुराणादिषु सांख्ययोगयोर्निन्दादेः प्रशंसायाश्च दर्शनात्पूर्वोक्तं बलं निश्चेतुं न शक्यत इति तन्निश्चयार्थं निंदादेर्व्यवस्थां वदन्ति ॥ नन्वित्यादिना ॥ ॥ अङ्गत्वेनेति ॥ ॥ मोक्षसाधनांगत्वेन ॥ तयोरिति ॥ नित्यानित्यविवेकचित्तनिरोधयोः ॥ तदिति । योगादिशास्त्रम् । मूले—फलांशे तु प्रमत्तस्येत्यादि पूर्वोक्तं फलांशमननुसंधानस्य मुक्तिशास्त्रत्वप्रसिद्ध्या तन्मात्रनिष्ठस्येत्यर्थः ॥ अन्यथा भावोऽन्यथाभावनम् ॥ णिजन्ताद्धञ् । एतद्विवृण्वंति ॥ ॥ योऽन्यथेत्यादि ॥ मूल इति ॥ ॥ श्रीभागवते—"येऽन्येरविंदाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः । आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यधोऽनादृतयुष्मदंघ्रयः ॥ विदूरकाष्ठाय मुहुः कुयोगिनाम्"इत्यादौ । नारसिंहे च— "विषधरकणभक्षशंकरोक्तौ दशबलपंचशिखाक्षपादवादात् ॥ महदपि सुविचार्य लोकतंत्रं भगवदुपास्तिमृते न सिद्धिरस्ति ॥" इत्यत्र इयं च निंदा नहि निंदान्यायेन नविधेयस्तुत्यर्था किंतु वास्तवेति बोधनायाहुः॥ ॥ अत एवेत्यादि ॥ ननु कापिले पातंजले च विकर्मोक्त्यभावाद्व्यासपादैर्योगभाष्यकरणाद्भगवद्वाक्येषु पूर्वोक्तेषु स्तुतत्वाच्च नैवं वक्तुं युक्तमित्याकांक्षायां तन्मूलभूतभगवद्वाक्यस्याभिप्रायमाहेत्यर्थः ॥ ॥ नित्यानित्येत्यादि ॥ ॥ तथा चैतदंशे स्तुतत्वादेव भाष्यकरणं तत्रापीश्वरवादित्वात् । अतः एव न सांख्यस्य । अनीश्वरवादित्वात् । अन्यथा आनुमानिकादिसूत्रेषु न सांख्यं दूषयेत् । एतेन योगः प्रत्युक्त इत्यपि न सूत्रयेत् । अतः फलाजनकत्वान्निंदादि ।

एकांशेनोपयोगाच्च स्तुत्यादीत्युभयमप्युपपन्नमिति भावः ॥ एवं सर्वेषां सन्मार्गाणां निर्णय उक्तः ॥ अतः परं तदाभासानाहुः ॥ ॥ तदन्येषामित्यादि । सर्वथेति ॥ ॥ "प्रमाणाभासमूलत्वात्प्रमेयरहितत्वतः । साधनादिविरोधाच्च वैय्यर्थ्यं तेषु बुध्यताम् ॥"इत्यर्थः ॥ २१२-२१८ ॥ एवं प्रासंगिकनिरूपणेन यत्तेषां बलं सिद्धं तदाहुः ॥ ॥ तस्मादित्यादि ॥ ॥ मूले-न स्वल्पोऽपि पतेदिति । सुतरां अल्पः साधनकरणे अशक्तोऽपि बुधः उक्तरीतिकज्ञानवांश्चेत् तदा नपतेत् "नहि कल्याणकृत् कश्चिद् दुर्गतिं तात गच्छति" इति भगवदुक्तन्यायस्य तत्रापि समानत्वान्न पतेदित्यर्थः ॥ ॥ तदभाव इत्यादि ॥ ॥ ननु योगाद्यभावे चित्तैकाग्र्याभावाद्व्यंगतायां वैदिकेनापि मार्गेण नफलसिद्धिरिति शंकायां पूर्वार्द्धयुक्तेरुक्तत्वात्केवलेन वैदिकेन फलसिद्धिमाहेत्यर्थः ॥ ॥ वेदविरोध इत्यादि ॥ ॥ ननु वैदिकाभासमार्गे इष्टप्राप्त्यभावेऽपि नहि कल्याणेति गीतोक्तन्यायेनानिष्टनिवृत्तिस्तु भवित्रीति शंकायां तन्निवृत्त्यर्थं युक्तिपूर्वकं ततो महदनिष्टमाहेत्यर्थः ॥ ॥ पापवेशस्वीकारादि ॥ ॥ एतेन ये मूर्खा अनापद्यपि म्लेच्छादिवेशभाषादिकं रोचयंते स्वीकुर्वंति च तेऽपि तथेति बोधितम् ॥ २१९-२२० ॥

व्रजभाषाटीका ।

मिश्रितसांख्ययोगभक्तिको वर्णनकरकें इन जीवनकी अपेक्षा जो हीनाधिकारी हैं उनकेलिये केवल सांख्य केवल योगको उपयोगहै तासों फलद्वारा सांख्ययोगको निर्णयकरतेभये केवल जे सांख्ययोगभक्ति है तिनके फलको वर्णन करें हैं (केवलेनेति) केवल सांख्यके दो अङ्गहैं । संघातसों भिन्न मानकें आत्माको ज्ञान होनों और अहंकार नहिं होनों इन दोनोंको निर्बाह । मैं कोई कर्म नहिं करूंहूँ ऐसी बुद्धिकरवेसों तथा वैराग्य राखवेसों होयहै याप्रकार जीवनपर्यन्त एक धारणासों स्थित रहै तब अविद्यासों छूटें अर्थात् दूसरे जन्ममें ज्ञानीहोयकें उत्पन्नहोय ऐसेंही केवल योगाभ्यासकरकें ज्ञानको उदय होयजावै तब योगबलकरकें देहकूं छोडदे तो अविद्यासों छूटजावेहै अर्थात् पंचपर्वाविद्यामें जो भक्तिहै वा भक्तिसहित जो सांख्ययोगहै वे तो मुक्तिके देवेवारेहैं और केवल जे सांख्ययोगहैं वे अविद्यामात्रसों छुडायवेवारेहैं

यह सिद्धान्तभयो। निषिद्ध योग सांख्यको फल कहे हैं—धर्ममार्गरहित जे वाममार्गके तंत्रोक्त योग सांख्यहैं उनमें अपेयपानादिकनकरकें नाडीकूँ शुद्धकरनों लिख्योहै। वे सांख्ययोग नरकके देवेवारेहैं क्योंकि उनको विपरीतमार्गकरकें पोषण होवे है (यत्सांख्यैः प्राप्यते स्थानम्, योगेनैव दहेदंहः) इत्यादिकनमें जो सांख्ययोगकी स्तुति करीहै सो पुराणमें लिखे सांख्ययोगकी ही करीहै। ये दोनों परंपराकरकें ज्ञानद्वारा मोक्षके अङ्गहैं। सांख्योक्त नित्य अनित्य वस्तुको विचारहै सो ज्ञानको अङ्गहै योगशास्त्रोक्त चित्तको रोकनों है सो ज्ञानको स्थिरकरवेवारो है । अन्यथा ज्ञान खवजावे तासों नित्य अनित्यवस्तुविचार, तथा चित्तनिरोध इन दोनोंके सांख्ययोग शास्त्र अङ्ग हैं, पदार्थनके स्वरूपनिर्धारकरवेमें ये दोनों शास्त्रप्रमाण नहिं हैं । क्योंकि (योऽन्यथासन्तमात्मानम्) या श्रुतिमें विपरीतज्ञानसों पाप होनों लिख्यो है। तासोंही आनुमानिकादि सूत्रनमें सांख्यको (अनेन योगः प्रत्युक्तः) यामें योगकों व्यासजीनें दूषित कियो है तासों सांख्योपजीवक जे मायावादी हैं उनकी व्यर्थता है सत्फल कछु नहिं है, तासों यह सिद्धान्त भयो कि नित्यानित्यवस्तुविचाररूप सांख्यके एक अंशको उपयोग है और चित्तनिरोधरूप एक योगके अंशको उपयोग है; तासों योग सांख्यकी स्तुति गीताआदिमें क्वचित है। स्वतंत्र होयकें मोक्षफलकूँ नहिं देसकें हैं, तासों व्याससूत्रनमें तथा (येऽन्येऽरविन्दाक्षविमुक्तमानिनः) इत्यादिश्लोकनमें निन्दा लिखी है। तासों वेदातिरिक्त जितनें मार्ग हैं वे स्वतन्त्र फलसाधक नहिं हैं वेदके ही अङ्ग होयकें वेदोक्त प्रमेय जैसो है वैसेंकूँ ही सिद्धकरतेभये सफल होवें हैं ॥ २१२--२१८ ॥ तासों वेदोक्तमार्गनके अनुसार बर्त्ताव करवेसों

पुरुषको अल्पभी पात नहिं होय अतः त्रिवर्णी—ब्राह्मण, क्षत्री, वैश्यनकूँ वेदोक्त सद्धर्मकोही आदरपूर्वक आचरणकरनों चाहिये ॥ २१९॥ वेदमार्गकूँ छोडकें छलकरकें अधर्मके बर्त्ताव करवेवाले हैं वे पाखंडवेषके स्वीकारकरवेके कारण घोर नरकमें पडें हैं तासों आपत्कालविनाही जे पुरुष म्लेच्छनके वेष भाषा आचरणकों धारणकरलें हैं उनकीभी सद्गति नहिं होय यह बातभी जताई॥२२०॥

अधुना तु कलौ सर्वे विरुद्धाचारतत्पराः । स्वाध्यायादिक्रियाहीनास्तथाचारपराङ्मुखाः ॥ ॥२२१॥ क्रियमाणं तथाचारं विधिहीनं प्रकुर्वते । विक्षिप्तमनसोद्भ्रान्ता जिह्वोपस्थपरायणाः ॥ २२२ ॥ व्रात्यप्रायाः स्वतो दुष्टास्तत्र धर्मः कथं भवेत् । षड्भिः संपद्यते धर्मस्ते दुर्लभतराः कलौ ॥ २२३ ॥ अथापि धर्ममार्गेण स्थित्वा कृष्णं भजेत्सदा । श्रीभागवतमार्गेण स कथं चित्तरिष्यति ॥२२४॥ अत्रापि वेदनिंदाया- मधर्मकरणात्तथा । नरके न भवेत्पातः किंतु हीनेषु जायते ॥ २२५ ॥ पूर्वसंस्कारतस्तत्र भजन्मुच्येत जन्मभिः । अत्यंताभिनिवेशश्चेत्संसारे न भवेत्तदा ॥ २२६ ॥

तत्त्वदीपप्रकाशः ।

एवं सांख्ययोगद्वारा सर्वाणि मतानि दूषयित्वा वेदविरोधाभावेऽपि भक्तिमार्गे ब्राह्मणविरुद्धवेषाभावेऽपि प्रकारभेदोऽस्तीति कस्य चिच्छंका स्यात् । पांषंडमार्गोऽयमपीति तन्निराकरणार्थं प्रकारांतरे हेतुं वदन्

भक्तिमार्गं प्रपंचयति ॥ अधुना त्विति त्रिभिः ॥ कालदोषाच्छक्तिह्रासे वेदाभावात् सर्वधर्माभावः ॥ २२१--२२३ ॥ तर्हि किंविधेय मित्याकांक्षायामाह ॥ अथापीति ॥ पाखंडमतस्वीकारमकृत्वा यथाशक्त्याग्निहोत्रादिकं कुर्वन् सदा कृष्णं भजन् भवति । भगवदुक्तेनैव मार्गेण ततोमुख्यधर्माभावान्न फलं भगवद्भजनाच्च नपातः । किंतु । कथंचित् कलिं तरिष्यति कलिदोषाभिभूतो न भविष्यतीत्यर्थः ॥२२४॥-अत्र बाधकद्वयं त्यागार्थमाह ॥ अत्रापि वेदनिंदायामिति ॥ भगवन्मार्गे स्थित्वा यदि वेदानामप्रामाण्यं वदेत् कथंचिदपि तथा भगवन्नाम्नो नरकविरोधित्वान्न नरके पातः । किंतु । तृतीयमार्गसाधनत्वात् हीनेषु जायते शूद्रादिषु संभवति । अतो दृश्यते नीचयोनिषु भगवद्भक्ताना जन्म । तस्मादेतद्द्वयमकृत्वा भगवान्सेव्यः ॥ २२५ ॥ शूद्रादियोनौ जातस्य किंफलमित्याकांक्षायामाह ॥ पूर्वसंस्कारेण इति । संस्कारवशाद्भगवद्भजने जायमाने तस्मिन्देहे वेदादीनां स्मरणाभावान्निन्दाभावेन तुष्टः सन् भगवान्मोचयेदित्यर्थः ॥ तत्राप्येकंबाधकमित्याह ॥ अत्यंताभिनिवेशश्चेदिति ॥ संस्कारस्य दुर्बलत्वे ज्ञानाभावात्संसारेऽभिनिवेशो भवति । ततो दृढभजनाभावान्नमुच्यत इत्यर्थः । अनेन वेदनिंदया पुनरावृत्तिरुक्ता पुनः शुद्धसाधनेन जायमानां मुक्तिं न निवारयति ॥ अतो वेदनिन्दाभावे भक्तिमार्गः समीचीनः ॥२२६॥

आवरणभंगः ।

अतःपरमिदानीं वैदिकमार्गस्योत्तमत्वकल्पत्वं वक्तुं गीताशुक्तस्य प्रमाणानुरोधिप्रमेयस्य कालादिसाधनापेक्षारहित इत्यत्रोक्तं यद्बलं तद्विचारयन्ति । एवं सांख्येत्यादिना ॥ प्रकारभेद इति ॥ ॥ वैदिकविलक्षणः शंखचक्रादिधारणादिरूपः ॥ प्रपञ्चयतीति ॥ ॥ उत्कर्षबोधनमुखेन विस्तारयति । मार्गस्य बुद्धिस्थत्वाद्वर्त्तमानप्रयोगः । त्रिभिरिति पदेहेतुं वदन्नित्यनेन संबध्यते ॥ तत्राचारप्रभवो धर्म इति "शौचाचारविहीनानां समस्ता निष्फलाः क्रियाः" इत्यादिवाक्याद्यथाकारी यथाचारी तथा भवतीति श्रुतेः श्रौतधर्मस्य स्मार्त्ताचारसापेक्षत्वाद्विरुद्धाचरणेन पापसंभवाच्चेदानीं क्रियमाणस्य तस्याभासतैव नतु धर्मत्वमिति मूले

प्रपञ्चयित्वा तत्र सिद्धमर्थं हेतुपूर्वकमाहुः ॥ कालदोषेत्यादि ॥ ॥ तथा च यत एवमधुनाऽतो वेदोक्तप्रकारस्येदानीं व्यंगत्वात्स न सिद्ध्यतीति नेदानीं स बलिष्ठ इति भावः । एतेन प्रकारांतरादरणे हेतुरुक्तः ॥ तर्हीत्यादि ॥ ॥ नन्वेवं सति स त्याज्य इत्यायाति तथासति सर्वथैव पाषंडत्वसंभव इति किंविधेयमित्याकांक्षायामेकादशे यो धर्मेण भगवद्भजनप्रकारो भगवतोक्तस्तस्येदानीमशक्यत्वात्तदनुकल्परूपं यथाशक्तिकरणपक्षमादृत्य भगवदुक्तं कर्त्तव्यमित्याहेत्यर्थः ॥ पाषंडेत्यादि ॥ ॥ मायावादादिमतस्य पाषंडरूपतायाः पूर्वमुपपादितत्वादग्रे वक्ष्यमाणत्वाच्च तन्मतस्वीकारमकृत्वा यथाशक्ति स्वधर्मकरणपक्षस्याग्रे स्थाप्यत्वात्स्ववर्णाश्रमप्राप्तमग्निहोत्रादिकं भक्तिमार्गांगत्वेन कुर्वन् "यद्यनीशो धारयितुं मनो ब्रह्मणि निश्चलम् ॥ मयि सर्वाणि कर्माणि निरपेक्षः समाचर ॥ " इत्यादिसार्द्धद्वये भगतोक्तेन भगवदाश्रितस्य निरपेक्षतया सर्वकर्माचरणश्रद्धापूर्वकभगवत्कथाश्रवणतद्गानलीलास्मरणजन्माभिनयमुहुर्भगवदर्थधर्मकामार्थाचरणरूपेण मार्गेण यो भगवन्तं सदाऽविच्छेदेन भजति स उक्तरीत्याऽधर्मफलस्य पातस्य चाभावे ततो भगवदुक्तकरणात्तथा भविष्यतीत्येत्कर्तव्यमिति भावः ॥एतेन कालादिसाधनापेक्षाराहितत्वं विचारितम् ॥ एवं च कलिदोषानभिभवे कलेः स्वल्पसाधनेन महाफलप्रदत्वस्वाभाव्यादानुगुण्ये एतादृशस्य फलं जीवन्मुक्तिः प्रतिभाति । तृतीयस्कंधे पञ्चविंशे "इमं लोकं तथैवामुमिति" श्लोकद्वयस्य प्रथमाधिकारिणस्तथाभावप्रतिपादनात् ॥ इतोऽधिकाधिकारेतु तत्रैव "अथो विभूतिं मम" इत्यादिश्लोकद्वयोक्तो वैकुण्ठे भोगः यः सेवाफलविवरणे सेवोपयिकदेहो वा वैकुण्ठादिष्वित्यनेनोक्त इति पर्यवसानं ज्ञेयम् ॥ अत्रेत्यादि ॥ ॥ ननु यद्येवं तर्हि सर्वथा तरिष्यत्येवेति वक्तव्यं नतु कथंचित्तरिष्यतीत्याशंकायां बाधकद्वयस्यात्रापि सत्वादेवमुच्यते इत्याशयेन श्रीभागवतोक्तमार्गे बाधकद्वयमाहेत्यर्थः ॥ भगवन्मार्ग इत्यादि ॥ ॥ वेदनिंदया नरक इति चतुर्थस्कंधे भृगुशापे सिद्धम् ॥ भगवन्नाम्नो नरकविरोधित्वं च षष्ठेऽजामिलोपाख्याने एवं शास्त्रद्वयविरोधे त्रिशंकुन्यायो भवतीत्यर्थः ॥ कथंचिदिति ॥ ॥ स्वरूपार्थसाधनफलेषु ॥ तृतीयमार्गसाधनत्वादिति ॥ ॥ यमलोकगमनानुकूलो यो जायस्वेत्यादिश्रुत्युक्तोमार्गस्तत्साधनत्वादित्यर्थः ॥ २२१–२२५ ॥ शूद्रेत्यादि ॥ ॥ ननु यदि कदाचिदेवं स्यात्तदा किं मग्नश्चेत्पातालं प्रविशेदुत नेति शंकां हृदि कृत्वा तादृशस्याहेत्यर्थः ॥ मूले जन्मभिरिति बहुकालमंतरा यो भवतीत्युक्तम् ॥ जातेऽप्यंतराये पुनः फलाप्तौ किं बीजमत आहुः ॥ ॥ संस्कारेत्यादि ॥ ॥ तत्रापीत्यादि ॥ ॥ तर्हि परिणामसुखदत्वे विलंबोऽप्यदुष्ट एवेति शूद्रादियोनावपि किंबाधकमिति शंकायां शूद्रादि-

योनौ संस्कारेण भजनेऽपि बाधकमाहेत्यर्थः ॥ कारिकाद्वयसिद्धमर्थमाहुः ॥ अनेनेत्यादि ॥ ॥ न निवारयतीति ॥ ॥ पूर्वजन्मीना वेदनिंदेति शेषः । यद्यपि मूले वासिष्ठलिंगोक्तशांडिल्योपाख्यानं हृदि कृत्वाऽधर्मस्याप्यावर्तकत्वमुक्तं तथापि "अपिचेत्सुदुराचार" इति वाक्यात्तस्य दौर्बल्यम् । "स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः । विकर्म यच्चोत्पतितं कथंचिद्धुनोति सर्वं हृदि संनिविष्ट" इति वाक्याच्च बुद्धिपूर्वकमेव तत्करणे पुनरजुगुप्सायां च तस्य तथात्वं नत्वन्यथापीति ज्ञापनाय विवृतौ तदनुल्लेख इति ज्ञेयम् । एवं समीचीनत्वे किंचिदाशंक्य परिहरंति ॥ २२६ ॥

ब्रजभाषाटीका ।

एवं सांख्ययोगद्वारा वेदविरोधि सब मतनकूँ दूषितकिये अब भक्तिमार्गमें यद्यपि ब्राह्मणके वेषसों विरुद्ध वेषको धारण नहिं है तथापि कोई पुरुष शंखचक्रादिकनके धारणादि वेदविलक्षणप्रकारकूँ देखकें यहभी पाखंडमार्ग है ऐसी शङ्का करें ताको निराकरण करवेकेलिये भक्तिमार्गकी वैदिकप्रकारसों जो विलक्षणताहै तामें हेतु कहते भये अन्यमार्गकी अपेक्षा उत्तमता दिखातेभये भक्तिमार्गको विस्तारदिखावै है (अधुना त्विति) अभीके समयमें तो कलिकालके दोषसों सबनकी शक्ति घटगई वेदकी यथार्थ स्थित नहिं है सब पुरुष विरुद्धाचरणमें तत्पर हैं वैदिक क्रियाकरकें हीन हैं आचारसों रहित हैं (शौचाचारविहीनानां समस्ता निष्फलाः क्रियाः) तासों करेभये कर्मभी सब निष्फल होवैहैं ॥ २२१ ॥ यदि कोई पुरुष वैदिक कर्मकूँ करें है तो विधिरहित करें है मन एकाग्र नहिं राखें सदा सर्वदा भ्रममेंही डूबे रहे आवे है ॥२२२॥ जिह्वा उपस्थके सुखमें परायण रहे आवेहै व्रात्यप्राय वर्णधर्मकरकें हीन हैं स्वभावकरकेंही दुष्ट हैं ऐसे मनुष्यनमें धर्म कैसे रहसकें है क्योंकि देश, काल, द्रव्य, कर्ता, कर्म, मन्त्र, इन छ पदार्थनसों धर्म बने हैं या कलिकालमें इन शुद्धदेशादि छ पमिलनों दुर्लभ है ॥ २२३ ॥ कलिकालके दोषकरकें

शक्तिह्रास होयगयो तासों वेदको अभाव है अतः एव सब धर्म-नकोभी अभाव है तब अनेकप्रकारकें संतापनसों दुःखी जीवनकूँ परम सुखप्राप्तिकेलिये कहाँ साधनकरनों योग्य है तहाँ उत्तर आज्ञाकरे है (अथापि धर्ममार्गेणेति) पाखंडमतको त्यागकरकें भक्तिके अङ्ग समुझकें यथाशक्ति अग्निहोत्रादिकनकूँ करतोभयो सदा श्रीकृष्णकी भक्तिमें परायण रहें तो कलियुगको तरजावे हैं अर्थात् या कलियुगमें मुख्य वैदिक धर्म नहिं बनसके तासों वेदोक्त फलभी नहिं होय । भगवद्भजन करतो रहै तो पातभी नहिं होय किन्तु कलिके दोष वा भक्तकूँ दबाय नहिं सके हैं, अल्पसाधनकरिके बडे भारी फलकों देवेको कलियुगको स्वभाव वा भक्तके आगे प्रगट होयजावै है तब तो भगवदुक्त प्रकारकरकें श्रद्धापूर्वक भगवत्कथाको श्रवण भगवद्गुणनको गान स्मरण जन्मोत्सवादिक कर्तोभयो धर्म अर्थ कामको भगवान्के अर्थ ही आचरणकरतोभयो सदा भजन करे है तब (इमं लोकं तथैवामुम्) इत्यादि तृतीयस्कन्ध पञ्चविंशाध्यायोक्त जीवन्मुक्तिकूँ प्राप्त होवै है यासों भी अधिकारी होय तो (परस्वमेतेऽश्नुवते तु लोके) इति श्लोकोक्तवैकुण्ठमें अलौकिक भोगकूँ प्राप्त होवै है अर्थात् सेवाफलकी टीकामें जो प्रकार लिख्यो है वाके अनुसार वैकुण्ठादिकनमें सेवोपयोगी देहकूँ प्राप्तहोवे है मूलकारिकामें जो कथंचित्पद कहके भक्तिमार्गकरके भी कलियुगके तरवेमें संदेह दिखायो ताको कारण कहें है (अत्रापि वेदनिंदायामिति) भक्तिमें भी दो बाधक हैं भक्तिमार्गमें स्थितहोयके वेदकूँ अप्रमाण कहे तथा अधर्मको आचरण करे तो यद्यपि नरकपात होनों योग्य है परन्तु भगवान्को नाम नरकको विरोधी है तासों नरकमें तो वह पुरुष नहिं गिरसकें है·परन्तु जन्ममरणात्मक तृतीय मार्गकूँ

प्राप्तहोयकें हीन शूद्रादियोनिमें उत्पन्न होवे है याहीसों नीच योनिमें (कबीर, सदन, रैदास) आदि भगवद्भक्तनके जन्म दीखवेमें आवे हैं तासों वेदनिंदा तथा अधर्मको त्यागकरकें भगवानकी सेवा करनों योग्य है ॥ २२४ ॥ २२५ ॥ शंका—वेदनिंदा तथा अधर्मकरकें शूद्रयोनिमें गयेभये भक्तकी फेर कहाँ गतिहोय ? उत्तर—(पूर्वसंस्कारत इति) शूद्रयोनि प्राप्तभयो भक्त पूर्वजन्मके संस्कारकरकें वा शूद्रयोनिमें भी भगवान्को भजन करें है और वा देहमें वेदकी याद नहिं रहे है तासों वेदनिंदाभी नहीं करे है तब प्रसन्नहोयकरकें भगवान् वा भक्तकूँ मुक्तकरे हैं परन्तु वा जन्ममेंभी एक बाधक है पूर्वजन्मको भक्तिको संस्कार दुर्बल होयजाय तो संसारमें अभिनिवेश होयवेसों दृढभजन नहिं बनसकें तो मुक्तभी नहिं होय इतनें कथनकरकें वेदनिंदाकरकें (पुनरावृत्तिः) जन्ममरण होवे है परन्तु शुद्ध भजनकरकें होयवेवारी मुक्तिकूँ पूर्वजन्मकी करीभई वेदनिंदा नहिं रोकसकें है, तासों वेदनिंदा नहिं करकें भगवद्भजन कियोजाय तो भक्तिमार्ग अति श्रेष्ठ हैं ॥ २२६ ॥

एतावन्मात्रताप्यस्ति मार्गेऽस्मिन्मुरवैरिणः।
सर्वत्यागेनन्यभावे कृष्णमात्रैकमानसे।२२७।
सायुज्यं कृष्णदेवेन शीघ्रमेव ध्रुवं फलम् । ए-
तादृशस्तु पुरुषः कोटिष्वपि सुदुर्लभः॥२२८॥
यो दारागारपुत्राप्तान् प्राणान् वित्तमिमं परम्।
हित्वा कृष्णे परं भावं गतः प्रेमप्लुतः सदा २२९

रूपं वेदार्थः फलं प्रेम च साधनम् ।

तत्साधनं नवविधा भक्तिस्तत्प्रतिपादिका ॥ २३० ॥ गीतासंक्षेपतस्तस्या वक्ता स्वयमभूद्धरिः । तद्विस्तारे भागवतं सर्वनिर्णयपूर्वकम् ॥ २३१ ॥ व्यासः समाधिना सर्वमाह कृष्णोक्तमादितः । मार्गोऽयं सर्वमार्गाणामुत्तमः परिकीर्तितः ॥२३२॥ यस्मिन्पातभयं नास्ति मोचकः सर्वथा यतः । वर्णाश्रमवतां धर्म्मे मुख्ये नष्टे छलेन तु॥२३३॥क्रियमाणेन धर्म्मःस्यादतस्तस्मान्न मोचनम् । बुद्धिमानादरं तस्मिन् छले साध्येऽपि दुःखतः॥२३४॥

तत्त्वदीपप्रकाशः ।

ननूत्कर्षासहनेन कथं वेदं न निन्देदतः सापाय एवायं मार्ग इत्याशंक्याह ॥ एतावन्मात्रताप्यस्तीति ॥ अनिंदायां मोक्षः, निंदायामपि न नरकादिः, वेदातिरिक्तमतेषु भगवन्मार्गे एतावदपि फलमस्ति नतु सांख्यादाविति तेभ्य उत्कर्षः ॥ भक्तिमार्गे मुख्यानां फलमाह ॥ सर्वत्याग इति ॥ अन्तर्बहिः सर्वत्यागः । स्वामित्वेन कृष्णे एव सर्वदा मनोनिवेशनम् ॥ अभ्यासेन तद्भवति अन्येषां देवानां तद्विभूतित्वेन तदंशत्वेन तत्सेवकत्वेन वा सम्माननं यदि स्फुरति । एवं देहपातपर्यंतं कृष्णैकमानसस्य सायुज्यं शीघ्रमेव भवति । कायवाग्विनियोगाभावेऽपि स्नेहाभावेऽपि मनोमात्रस्थितौ फलमेतदित्यर्थः ॥ ततो विशेषमाह ॥ एतादृशस्त्विति ॥ पूर्वोक्तो लोके संभवत्यपि एतादृशस्तु दुर्लभोयोऽग्रे वक्ष्यते भागवते नारायणपरः प्रशांतात्मैव लोके दुर्लभ उक्तः। ज्ञानमिश्रो भक्तः प्रेमयुक्तस्तु ततोऽपि दुर्लभः । तत्रापि सदा

प्रेमप्लुतः । तस्य भगवत्सायुज्यं भवतीति किं वक्तव्यमित्यर्थः ॥ एवं भक्तिमार्गे फलमुपपाद्य सर्वमेव मार्गमुपपादयति विशिष्टरूपमित्यादिना । एतन्मार्गद्वयं प्रोक्तमित्यनेन । अत्र प्रमेयं विशिष्टरूपम् । यस्यैकैकोंशः काण्डद्वयेन प्रतिपाद्यते । स ज्ञानक्रियोभययुतः । स एव च फलम् । तत्रापि साधनं च प्रेमैव तत्साधनं नवविधा भक्तिः । श्रवणादिव्यतिरेकेण संस्कारवशात्फलकामनया वा जायमाना प्रीतिर्गौणी स्यात् । श्रवणादीनां साधनत्वे प्रमाणं गीता । 'भक्त्या त्वनन्यया शक्य' इति साधनसाध्यरूपामेकीकृत्याह । गीताया अपि प्रामाण्यं फलवाक्यात्कृष्णस्य फलरूपत्वं परमानंदरूपत्वात् पुरुषोत्तमत्वाच्च । गीतार्थे संदिग्धं मत्वा विस्तरेण कथनार्थं भागवतं तेनैव रूपांतरेण कृतम् । प्रमाणादीनां चतुर्णामप्येकरूपत्वात्सर्वमार्गापेक्षया अयमुत्तमो मार्गः । तथाहि । प्रमाणं भगवद्वाक्यम् । वाक्येन प्रवृत्तः साधनमसाधयन्नपि भगवता कृतार्थीक्रियते । प्रमेयपरिज्ञानं च फलानुभवरूपं साधनं च फलादप्यधिकं फलं च ज्ञानकर्मादिसाध्येभ्योऽप्यधिकमिति ॥ २३०—२३२ ॥ अतएवास्मिन्मार्गे पातभयं नास्ति प्रमाणप्रवृत्तिमारभ्य भगवतो रक्षकत्वात् । तत्र हेतुः ॥ मोचकः सर्वथायत इति ॥ स हि सर्वानेव येनकेन चिदुक्तप्रकारेणापि प्रवर्त्तमानान्मोचयति मोचकस्वभावत्वात्तत्र स्ववाक्यानुगतान्कथं नमोचयेत् । किंच । यदा वेदादीनां कालवशादसाधकत्वं ज्ञातं तदायं मार्गो भगवता कथितः तेनेदानीं नान्यो मार्गः फलाय । एवं मार्गस्योत्तमत्वं प्रतिपाद्य सात्विकानुपदिशति ॥ बुद्धिमानिति ॥ परमादरो बहुषु न संभवति । अत एकस्मिन्कर्तव्यः ॥ २३३ ॥ २३४ ॥

आवरणभंगः ।

ननूत्कर्षेत्यादि ॥ उत्कर्षासहनेति ॥ ॥ भगवन्मार्गापेक्षया वेदमार्गोत्कर्षमसहनेन ॥ आहेति॥ मार्गांतरेभ्य उत्कर्षमाहेत्यर्थः ॥ तेभ्य उत्कर्ष इति ॥ रैपोषिता नरकायैव भवन्तु तथात्वेऽपि न तथेति प्रारंभदशाया-

मस्य सापायत्वेऽपि तेभ्योऽस्य उत्कर्ष इत्यर्थः । प्रारंभदशा चात्र यथनीश इत्यनेनानुकल्पतया कथनेऽपि " लभते निश्चलां भक्तिमिति " फलोक्त्या ततः पूर्वभावित्वेन तदानीं भक्त्यभावाच्च ज्ञेया गीतायामभ्यासेऽप्यसमर्थोसीति वाक्यद्वयेऽनुकल्पताबोधनादपि तथा ॥ भक्तीत्यादि ॥ एवं जघन्याधिकार उत्कर्षं फलत उक्त्वा "ये तु सर्वाणि कर्माणि मयि संन्यस्य" इत्यादिवाक्यचतुष्टयोक्तमध्यमाधिकारे भगवता नचिरादुद्धारस्योक्तत्वेनापायशंकाभावात्फलतो वेदमार्गसाम्यरूपमित उत्कर्षं वक्तुं भक्तिमार्गे अमुख्यानां मध्यमाधिकारिणां फलमाहेत्यर्थः॥ येत्वित्यादिगीतावाक्यतात्पर्यमाहुः ॥ अंतर्बहिरित्यादिना । गीतायामनन्येनैव योगेनेत्यस्यार्थो नस्फुट इति तमाहुः ॥ स्वामित्वेनेत्यादि ॥ अभ्यासयोगप्रकारमाहुः ॥ अन्येषामित्यतआहुः ॥ कार्येत्यादि ॥ तथा च मार्गोत्कर्षबोधनायैवं फलं भगवता प्रतिज्ञापूर्वकमवधारणार्थमुच्यते । न तत्वताऽधिकारस्योत्तमत्वं भक्तिपदस्याभावादिति भावः । ततोपीत्यादि ॥ ॥ एतद्गमकं वक्तुमिति शेषः । तथा च यतो वक्ष्यमाणस्य दौर्लभ्यं नास्येत्यतोऽयं मध्यम एवेति भावः ॥ दौर्लभ्यमेव विशदीकुर्वंति ॥ भागवत इत्यादि ॥ ॥ षष्ठस्कन्धे चतुर्दशाध्याये "देवानां शुद्धसत्वानामृषीणां चामलात्मनाम् । भक्तिर्मुकुंदचरणे न प्रायेणोपजायते ॥ रजोभिः सह संख्याताः पार्थिवैरिह जंतवः । तेषां ये केचनेहंते श्रेयो वै मनुजादयः ॥ प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तमाः । मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिद्धयति ॥ मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशांतात्मा कोटिष्वपि महामुने ॥ " इति ॥ इतोऽप्यधिकमाहुः ॥ प्रेमयुक्तस्ततोऽपि दुर्लभ इति ॥ ॥ तृतीये पञ्चविंशे देवानां गुणलिंगानामिति द्वयेन या भक्तिर्लक्षिता संकल्पविकल्परहितं देवरूपं मनो यस्य तादृशस्य पुरुषस्य सर्वेंद्रियाणां गुणातीते भगवति स्वाभाविकी वृत्तिस्तन्निष्ठता या सा भक्तिरिति तत्र सिद्धांतितम् । ततस्तद्वानप्यग्रे मुख्यो लक्षितः । "नैकात्मतां मे स्पृहयंति केचित्" इत्यादिश्लोकत्रये तत्र केचिदिति दुर्लभाधिकारसूचनाच्च तथात्वम् । एवंसति यया स्वयं भगवद्वशो भवति तादृश्या भक्त्यवस्थायाः प्रेमशब्दवाच्यत्वात्पूर्वापेक्षयाऽस्योत्तमत्वमिति तथा । इयमेव च निर्गुणाभक्तिरित्युच्यते । तत्रैवोनत्रिंशे मद्गुणश्रुतीति सार्द्धेन लक्षितत्वात् । एतादृशभक्तिमतः फलं पूर्वमेवोक्तम् । " अनिच्छतो गतिमण्वीं प्रयुंक्त " इति । एतदेव सेवाफलत्वेनोक्तं सायुज्यमिति । इतोऽप्युत्तमाधिकारमाहुः ॥ तत्रापीत्यादि ॥ ॥ नवमेंबरीषोपाख्याने " अहं भक्तपराधीन " इत्यादिवाक्यैस्तादृशस्यालौकिकसामर्थ्यरूपमुख्यफलस्यैव भगवद्दानेन सिद्धेर्मुक्त्यनपेक्षत्वाच्चद्भवने कैमुतिकमेवेति मध्यमाधिकारेऽपि यत्र नापायशंका तत्रोत्तमे क्व तद्गंधोपीति नायं

मार्गः सापाय इति भावः । मुख्यभक्तेर्लक्षणं च तृतीये एकोनत्रिंशे " अहैतुक्यव्यवहितेति " सार्द्धद्वयेनोक्तम् । तत्र च " दीयमानं न गृह्णन्ति " इति मुक्त्यनादरणाद्भजनानंदाधिकाररूपमलौकिकसामर्थ्यमेव फलं स्फुटति । तदेत्र च पुष्टिप्रवाहमर्यादापुष्टिभक्तेषु विवेच्यत इति दिक् । एतेन फलतः सर्वतोऽधिकत्वं विचारितम् ॥ २२७–२२९ ॥ अतः परमुत्तमत्वं वक्तव्यम् । तत्र प्रमाणप्रमेयसाधनफलैर्भक्तिमार्गोत्कर्षं दर्शयितुं त्रिशिष्टरूपमित्यादिसार्द्धत्रयं विवृण्वंति ॥ अत्र प्रमेयमित्यादि ॥ ॥ अत्र प्रमाणापेक्षया प्रमेयस्यैव जीवानुकूलत्वाच्चेन फलाभिन्नेनोत्कर्षमुक्त्वा साधनत आहुः ॥ प्रमेयेति ॥ ॥ रसपूर्वावस्थात्मकमानंदसूक्ष्मरूपं यत्तदित्यर्थः ॥ ननु तस्य नित्यत्वेन नांतरीयकात्संस्कारादेव तदभिव्यक्तिसौकर्ये विहितभक्तीनां नकोऽप्युपयोग इत्यत आहुः ॥ श्रवणादीनामित्यादि ॥ ॥ श्रुत्यपेक्षया तन्नैर्बल्यमाशंक्याहुः ॥ गीताया अपीत्यादि ॥ ॥ फलवाक्यादिति भावप्रधानो निर्देशः । फलवाक्यत्वादित्यर्थः ॥ गीताविस्तारात्मके श्रीभागवते किमुक्तमित्यपेक्षायां "मार्गोऽयं सर्वमार्गाणाम्" इत्यस्यार्थमाहुः ॥ प्रमाणादीनामित्यादि ॥ ॥ कथमित्यपेक्षायां तदुपपादयंति ॥ तथाहीत्यादि ॥ फलादप्यधिकमिति ॥ ॥ फलवशीकारकत्वादनुभवाच्च तथेत्यर्थः ॥ अत्रैतद्धृदयम् ॥ गीतायां प्रश्ने " शाधि मां त्वां प्रपन्नमिति " वाक्यादात्मनिवेदिनेऽर्जुनाय कर्मयोगं सांख्ययोगादिकं च सपरिकरं द्वितीयादिभिः सप्तभिरुक्त्वा नवमाध्याये "इदं तु ते गुह्यतमं प्रवक्ष्यामीति" प्रतिज्ञाय तादृशं भक्तिमार्गमुक्त्वा "मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः" इत्युपसंहृत्य तत्रापि गौणधर्मसांकर्यात्पुनर्भक्तेर्मुख्यत्वबोधनाय दशमे भूय एवेत्यनेन परमं वचः प्रतिज्ञाय भास्वतेत्यन्तेन भजनस्यैव फलपर्यवसायित्वमुक्त्वा विभूतिविश्वरूपाभ्यां प्रासङ्गिकं परिहृत्य द्वादशेऽक्षरोपासनादपि स्वोपासनाया उत्कर्षं भक्त्यनुकल्पान् भक्तोत्कर्षं च प्रतिपाद्य पुनरग्रिमाभ्यां प्रासंगिकं बोधयित्वा पञ्चदशे स्वस्य सर्ववेदवेद्यत्वं पुरुषोत्तमत्वं तच्छास्त्रस्य गुह्यतमत्वं तज्ज्ञाने कृतकृत्यत्वं चोक्त्वा तदग्रेऽधिकारिणं स्वरूपतो निर्णीय प्रासंगिकं पुनर्बोधयित्वाऽष्टादशे " समासेनैव कौंतेयेति " संदर्भेण ज्ञानादप्युत्कर्षं भक्तेर्बोधयित्वा पुनः सर्वगुह्यतमं प्रतिज्ञाय मन्मनाभवेत्यनेन पूर्वोक्तां भक्तिं द्वितीयेन प्रपत्तिंच तथात्वेनोक्त्वोपसंजहार । तेन गीतायामुत्कर्षो भक्तिमार्गस्यैव सिद्धः ॥ एवमेव श्रीभागवतेऽपि "यस्यां वै श्रूयमाणायामिति" वा श्रीभागवतस्य भक्त्युत्पादकत्वकथनाद्व्यासेन समाधौ भक्तेरेवानर्थोपशामकत्वानुभवात् एकादशे भगवदुद्धवसंवादे भक्तिसाधनान्युक्त्वा "प्रायेण भक्तियोगेन सत्सङ्गेन विनोद्धव ।
र । नोपायो विद्यते सम्यक् प्रायणं हि सतामहम् " इति चोक्त्वा

'सुगोप्यमपि वक्ष्यामीति' प्रतिज्ञाय द्वादशाध्याये सत्संगस्य स्वप्रापकत्वमुक्त्वा केवलेन हि भावेनेत्यादिना मुख्यभक्तेः स्वरूपमुक्त्वा तस्मात्त्वमुद्धवेत्यादिना प्रपत्तेश्च कथनेन "भक्तिस्त्वय्युपयुज्येत कीदृशी सद्भिरादृता" इत्यस्योत्तरमाह॥ ततः श्रीमदुद्धवसंशयावनपगमे वेदस्वरूपं प्रतीयमानं वेदार्थं योगं चोक्त्वा प्रासंगिकं च परिहृत्य चतुर्दशे पुनर्भक्तिं प्रशस्य "तस्मादसदभिध्यानं यथा स्वप्नमनोरथम् । हित्वा मयि समाधत्स्व मनो मद्भावभावितम्" इति सिद्धांतमुक्त्वा पुनः प्रश्नानुरोधेन योगं तत्सिद्धीर्विभूतीर्भक्तिजनकं वर्णाश्रमधर्मं चोक्त्वा ऊनविंशे ज्ञानिनं ज्ञानं च प्रशस्य तस्यापि भक्त्यंगत्वं बोधयन् "तस्मात् ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव । ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावित" इति सिद्धान्तमाह । पुनर्ज्ञानभक्त्योः प्रश्ने ज्ञानोत्तरत्वेन मोक्षधर्मानुक्त्वा 'भक्तियोगः पुरैवोक्त' इति तेन प्रश्नं पूरयित्वा पुनर्भक्तिकारणानि वदन् "एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम् । मयि संजायते भक्तिः कोऽन्योर्थोऽस्यावशिष्यत ॥" इत्याह । पुनः प्रासंगिकं परिहृत्य विंशैकविंशाभ्यां स्वस्ववेदार्थरूपत्वमुक्त्वा पुनः प्रासंगिकं प्रश्नानुरोधि चान्यदपि बहूक्त्वांजसा सिद्धयर्थं पूर्वोक्तस्य सुगोप्यस्य साधनभूतान् स्वधर्मानुक्त्वोनत्रिंश उपसंजहार सुगोप्यतमं तु पूर्वमेवोक्तमिति मुख्याधिकारित्वात्पुनस्तन्नोवाच तेनात्रापि भक्तिमार्गस्यैवोत्कर्षः सिद्धः । एवमेव स्कन्धान्तरेऽपि ज्ञायत इति व्यासचरणानामप्ययमेवाशयोऽतो नात्रापायशंका । वेदसंदेहवारकत्वाच्च न प्रमाणस्यापि दौर्बल्यमतोऽयमेव मार्गः प्रमाणप्रमेयसाधनफलैरुत्तम इति निष्कर्षः । एवं चास्य मद्गुणश्रुतिमात्रेणेत्युक्तलक्षणकत्वेन निर्गुणभक्तिमार्गत्वं फलिष्यति ॥ अथ प्रस्तुतमुच्यते ॥ ननु मोचकस्वाभाव्ये वेदादिमार्गेभ्योऽपि मोचयिष्यतीति को विशेषो भक्तिमार्गे इत्याकांक्षायां वर्णाश्रमवतामिति कारिकां विवृण्वंत आहुः ॥ किंचेत्यादि ॥ ॥ अयमर्थः । यथावदुपनयनेन ब्राह्मण्यादिदेवतासंसर्गे देहस्य ब्राह्मणादिरूपता यद्यपि शूद्रत्वरूपदेवतासंसर्गस्य नोपनयनसापेक्षत्वं तथापि वृत्ततो ब्राह्मणत्वस्याजगरे व्यवस्थापनात्समानन्यायेन शूद्रत्वस्यापि तद्गम्यत्वनिश्चयाद्वृत्ताभावेऽसच्छूद्रत्वस्य सर्वसंमतत्वाच्च सर्वेषां वर्णानां वृत्तादेवावगतिः । नोचेद्वर्णाभासतैव । तथा तत्तदाश्रमोदिताचारकरण एवाश्रमसिद्धिः । अन्यथा तु "गृहस्थस्य क्रियात्यागो व्रतत्यागो बटोरपि । तपस्विनो ग्रामसेवा भिक्षोरिंद्रियलौल्यता । आश्रमापसदा ह्येते खल्वाश्रमविडंबकाः॥" इति वाक्यादाश्रमाभासतैव । एवं सति वैदिकधर्मशेषेऽधिकारे नष्टेऽताद्दशक्रियमाणस्य मुख्यत्वाभावात्फलाभाव इति पूर्वमुपपादितम् । तथासतीदानीं क्रियमाणस्य धर्मस्य नाममात्रधारकत्वाच्छलत्वं 'शब्दभृच्छल' इति तल्लक्षणात् । तथा च नाम-

मात्रेण कृत्वा क्रियमाणे कर्मण्यपूर्वाभावाच्चतो मुक्त्यभाव इति यदैवं ज्ञातं तदायं कथित इति नेदानीं मार्गांतरेण मोचयतीत्ययमेवेदानीमुत्कृष्ट इत्यर्थः । एवं सुगमत्वं सर्वथाफलसाधकत्वं च विमृष्टम् ॥ उपदिशतीति ॥ ॥ ननु भवत्विदानीमस्योत्कर्षो नतु सर्वदा । तथासति कदाचिद्यथोक्तरीतिकधर्मसंपत्ताविदानामपि वेदमार्गोत्फलसिद्धिरिति शंकायां "गहना कर्मणो गतिरिति" "शिलोञ्छवृत्त्या परितुष्टचित्त" इति "क्लेशोऽधिकतरस्तेषाम्" इत्यादिवाक्याचस्य दुःखसाध्यत्वं तु सार्वदिक्त्वं नत्वस्येति नास्य कदाप्युत्कर्षहानिरित्याशयेनोपदिशतीत्यर्थः ॥ तत्र पूर्वमधिकारोऽपेक्षित इति प्रथमतः सामान्यं तमाहुः ॥ बुद्धिमानिति बुद्धेरधिकारिविशेषणत्वं द्वितीयस्कन्धारंभे श्रोतव्यादीनीत्यत्र साधितम् । तादृशाय कर्तव्यं तदाहुः परमादरेत्यादि ॥ २३०–२३४ ॥

व्रजभाषाटीका ।

तहाँ भगवन्मार्गकी अपेक्षा वेदके उत्कर्षकूँ नहीं सहतो भक्त वेदनिंदा क्यों नहिं करेंगो और निंदा करेंगो तो वाको हीन योनिमें जन्मभी होयगो तब तो भक्तिमार्ग नाशवालोही भयो ऐसी शंका नहिं करनी क्योंकि वेदनिन्दा नहिं करे तो मोक्षहो. यदि वेनिन्दा करवेमें आयजाय तोभी नरकादिक नहिं होय यह सामर्थभी भक्तिमार्गमेंही है वेदातिरिक्त सांख्यादिमार्गमें यदि वेदनिंदा होय तो अवश्य नरकपात होय इतने कथनकरके प्रारम्भदशामें सापायभी भक्तिमार्ग और मार्गनकी अपेक्षा उत्तम है यह बात जताई. जहाँतक निश्चल भक्ति नहिं सिद्ध होय तहाँ तक भक्तिमार्गकी प्रारंभदशा समुझी जावे है ॥ याप्रकार (यद्यनीशो धारयितुम् । अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव) इत्यादिगीतावाक्योक्त हीनाधिकारीनकी भी फलद्वारा उत्कर्षता वर्णन करके (ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः) इति गीतावाक्योक्तभक्तिमार्गीयमध्यमाधिकारी जे भक्तहैं वैदिकमार्गके फलके समान जिनकूँ फलमिले है। जिनकूँ नाशको भय नहिं है जिनकेलिये शीघ्र उद्धार करवेकी

भगवाननें प्रतिज्ञा कीनी है उन मध्यमाधिकारीनके फलको वर्णन करें है (सर्वत्याग इति) बाहिरसों देहवाणीकरकें सर्व त्याग होय, भीतरसों मनकरकें सर्वत्याग होय, सर्वदा अपने स्वामी मानकें श्रीकृष्णचन्द्रमेंही मनको निवेशहोय अन्यदेवतानकूं श्रीकृष्णकी विभूति मानके उनके अंश मानकें अथवा भगवत्सेवक मानकें सन्मान करनों हृदयमें स्फुरणहोय याप्रकार देहपात पर्यन्त कृष्णैकमानस रहै, अर्थात् मृत्युहोय जहाँतक कृष्णके विषेही चित्त लगायो राखे तो श्रीकृष्णचन्द्रके साथ शीघ्रही सायुज्यफलकूँ प्राप्तहोय; देह तथा वाणीको श्रीकृष्णमें विनियोग नहिं होय प्रेमभी नहिं होय केवल अभ्यासकरके भगवान्में मनकी सर्वदा स्थिति करीजाय तथापि यह फल होय यहां (अनन्येनैव योगेन मां ध्यायन्त उपासते) या श्लोकको स्पष्टार्थ कियो है। उत्तमाधिकारीको वर्णन करे हैं—ऐसो पुरुष क्रोडपुरुषनमेंभी दुर्लभ है जो पुरुष स्त्री, घर, पुत्र, प्राण, वित्त, यह लोक, परलोककूँ छोडकरकें कृष्णचन्द्रमें परम भावकूं प्राप्तहोय वैसे भक्तकी प्रशंसा कीनी है (मुक्तानामपि सिद्धानां नारा॰णपरायणः। सुदुर्लभः प्रशांतात्मा कोटिष्वपि महामुने) अर्थ—साधनकरवेवारे क्रोड पुरुषनमें एक मुक्त होयहै वैसें क्रोडन मुक्तपुरुषनमें भी नारायणमें परायण पुरुष होनो दुर्लभ है। ज्ञानमिश्र भक्त जो प्रेमयुक्त होय वह वासों भी दुर्लभ है। या भक्तिको (देवानां गुणलिङ्गानाम्) या तृतीयकन्धके श्लोकमें वर्णन है। संकल्पविकल्परहित देवरूप जाको मन होयजाय जो पुरुषके इन्द्रियनकी गुणातीत भगवान्में स्वभावकरकें निष्ठा होय वाकूँ भक्ति कहें हैं (नैकात्मतां मे स्पृहयन्ति केचित्) ऐसे भक्त मुक्तिकूँ नहिं चाहे हैं। ऐसे भक्त कितनेक ही हैं, यासों दुर्लभता दिखाई जा भक्तिकरकें भगवान्

भक्तके वश होयजावे वा भक्तिकी अवस्थाको नाम प्रेम कह्योजावे है वा भक्तिकोभी सायुज्यही फलहै याको (अनिच्छतो मे गतिमण्वीं प्रयुंक्ते) या श्लोकमें बर्णन है । यासों भी उत्तमाधिकारीको वर्णन करेहैं (तत्रापि सदा प्रेमप्लुतः) जो सर्वदा प्रेममें निमग्न रह्यो आवै वह सबसों उत्तमाधिकारीहै *। वैसे भक्तकूँ भगवान् अलौकिक सामर्थ्यरूप परम फलकूँ दे हैं, वाके द्वारा भक्तहै सो भगवानके भजनानन्दको अर्थात् सेवाके आनन्दको अनुभव करे है । या मुख्य भक्तिके लक्षण श्रीभागवतके तृतीय स्कंधमें (अहैतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे) या श्लोकमें लिखेहै वहाँ ही (दीयमानं न गृह्णाति विना मत्सेवनं जनः) या श्लोकमें भगवत्सेवाके आनन्दमें निमग्न वह भक्त सेवाविना दीनी भई चारप्रकारकी मुक्तिकूँ भी नहिं ग्रहण करें है । यह बात लिखीहै ऐसे भक्तके आधीन भगवान् होयजावेहैं (अहं भक्तपराधीनः) ऐसे भक्तकूँ ही अलौकिक सामर्थ्यरूप फल मिलैहै । यह फल सेवाफल ग्रन्थमें स्पष्ट लिख्योहै या प्रकार फलको वर्णनकरकें सर्वही मार्गको वर्णन करे है ॥ २२७॥ २२८॥ २२९ ॥

* या प्रसंगपें दृष्टान्तको वर्णन करेंहै—एक श्रीविठ्ठलनाथजी गुसाँईजीकी सेवकनी (डोकरी) वृद्धा स्त्री हती श्रीबालकृष्णजीकी सेवा करती हती और वैष्णवनने वा डोकरीकी श्रीगुसांईजीके आगे निन्दा करी कि ये ठाकुरजीकूँ बाजरीके दाणा भोग धरै है और कछु सेवा नहिं करैहै यह सुनके श्रीगुसांईजी अचानक वाके घर पधारआये वा समय प्रभुके आगे दरिद्रताके कारणसों दीनताकरकें भीजें बाजरीके कण भोग धरकें डोकरी मंदिरके बाहिर आय बैठी हती आप भीतर पधारकें प्रभुनके दर्शनकरतेभये आपनें प्रभुनसों प्रार्थना करी आप मेरे साथ पधारो यहाँ डोकरी आपकूँ बडो परिश्रम देतहै यह सुनकें ठाकुरजीनें आज्ञा करी ये डोकरी दीनताकरकें प्रेममें निमग्न होयके बाजरीके कण भोग धैरहै ये एक एक कण मोकूँ त्रिलोकीके व्यंजनसोंभी अति प्रिय लगेंहैं मैं या डोकरीकूँ सर्वथा नहिं छोडूँगो यह सुनकें श्रीगुसांईजी बहुत प्रसन्न भये और वा डोकरीके भाग्यकी बडी प्रशंसा करी तासों सदा प्रेमानिमग्नही उत्तमाधिकारीहै ॥

या भक्तिमार्गमें प्रमेय अर्थात् जानवेयोग्य पदार्थ भगवान्हैं अर्थात् जिनको क्रियारूप अंश वेदके पूर्वकांडकरके वर्णन कियो है, जिनको ज्ञानरूप अंश उत्तरकाण्डकरकें विवरण कियो है । भक्तिमार्गमें तो दोनों अंश सहित अर्थात् पूर्ण ज्ञानक्रिया-वाले भगवान्ही (प्रमेयहैं) जानवे योग्य हैं और भगवान्ही फलहै, भगवानकी प्राप्तिमें प्रेमही साधनहै । प्रेमको साधन नव-धा भक्ति है, श्रवणादिक नवधा भक्ति किये विना संस्कार वश-सों फलकामनाकरकें अथवा उत्पन्न भई जो प्रीति वह गौण प्रेम कहावे है. श्रवणादिभक्ति भगवत्प्राप्तिके साधन हैं यामें (भक्त्या त्वनन्यया शक्यः) इत्यादि गीतावाक्य प्रमाण है, या वाक्यमें साध्यरूप प्रेमभक्ति, साधनरूप श्रवणादि भक्ति इन दोनों भक्ति-नकूँ एक समुझकें मैं एक भक्तिकरकें ही जानों जाऊँ हूँ । तथा दर्शन देऊँ हूं या प्रकार आज्ञा कीनीहै, जिन श्रीकृष्णकी प्राप्ति भक्त चाहेहैं उन फलरूप कृष्णके बचन श्री गीताजी है तासों परम प्रमाण श्रीगीताजी मानेंजावैं हैं । परमानन्दरूप तथा पुरु-षोत्तम श्रीकृष्णहैं तासों कृष्णही फलरूपहै ॥ २३० ॥ संक्षेपसों कहेभये गीताजीके अर्थकूँ संदेह सहित मानकरकें विस्तारपूर्वक वर्णन करवेकेलिये उनही श्रीकृष्णचन्द्रने कृष्णद्वैपायननाम वेद-व्यासजीको रूप धारणकरकें श्रीभागवतमहापुराण आज्ञा कियो प्रमाण, प्रमेय, साधन, फल, ये चारों या मार्गमें एकरूप हैं तासों ये मार्ग सर्वमार्गकी अपेक्षा उत्तमहैं । तथाहि या भक्तिमार्गमें भगवानको वाक्यही प्रमाणहै प्रभुके वाक्यमें विश्वास राखकें प्रवृत्तभयो जो भक्तहै वासों कदाचित कोई बाधक आयवेके कारणसों साधन ठीक ठीक नहीं बनसके तथापि भगवान् प्रमे-यबलकरकें भक्तकूँ कृतार्थ करै हैं क्योंकि आप परम दयालुहैं

स्वयं जानेहैं कि मेरे वाक्यपें विश्वास राखकें भक्तिमार्गमें प्रवृत्त भये भक्तकी जो दुर्गति होय जायगी तो (न मे भक्तः प्रणश्यति) मेरे भक्तको नाश नहिं होयहै ऐसी मेरी प्रतिज्ञा वृथा होयगी तथा या मार्गमें (प्रमेय) अर्थात् जानवे योग्य वस्तु भगवान् है और फलभी भगवान् है तासों प्रमेयको जो ज्ञान होजानोहै वह ही फलको अनुभव करनोहै साधन जो भक्ति है वह फल-सोंभी अधिकहै। याहीसों भक्त फलरूप भगवान्में लीन होनों नहिं चाहेहै किन्तु सर्वदा भक्ति करनों ही चाहेहै, फल है सोभी या मार्गमें ज्ञानकर्मादिकनकरकें साध्य जे पदार्थ उनसों अधिक है तासों या मार्गमें दुर्गतिको भय नहिं है क्योंकि भगवान्के गीताभागवतादिकनकें प्रमाण वाक्यनकों सुनकरकें जादिनसों भक्तिमार्गमें जीव प्रवृत्त होयहै वादिनसों वा भक्तकी श्रीभगवान् रक्षा करे हैं। क्योंकि ऋषि आदिकनके कहेभये प्रकारकरकें भी प्रवृत्तभये मनुष्यनकूँ भगवान् मुक्त करदेहै, मुक्तकरवेको आपको स्वभावही है। तहाँ श्रीमुखकें वाक्य गीताआदिकें अनुसार बर्त्ताव करवेवाले भक्तनको क्यों नहिं उद्धार करेंगे ? यदि भग-वान्को मुक्त करवेकोही स्वभावहै तो वेदोक्त यज्ञादिद्वारा ही क्यों नहिं मुक्त करेहै ? ऐसी शंका तो नहिं करनी- कलिकालके दोषसों वेदादिक मुक्तिके साधक नहिं होय सकेहैं यथावत् यज्ञो-पवीतादिक संस्कार भयेबिना ब्राह्मण्यादिदेवतानको प्रवेश देहमें नहिं होवेहै तथा आश्रमनमें जैसें आचार कहे हैं वे आचारभी नहिं बनसकेहैं तासों कलियुगमें कियोभयो धर्म नाममात्रको धर्म है ऐसें धर्मसों अपूर्व नहिं होय अपूर्वविना मुक्त्यादिक फल भी नहिं होय जब भगवान्नें याप्रकार जान्यो तब भक्तिमार्गको कथन कियो तासों अभी कलिकालमें और मार्ग फलदायक

नहिंहै । याप्रकार भक्तिमार्गकी उत्तमता बर्णन करके श्रीवल्लभाचार्यजी महाप्रभुजी सात्विकजीवकूं उपदेश देतहैं (बुद्धिमानादरमिति)॥ २३१—२३४ ॥

त्यक्त्वा मार्गे ध्रुवफले भक्तिमार्गे समाविशेत्।
विरुद्धकरणं नास्ति प्रक्रिया न विरुध्यते२३५
कल्पितैरेव बाधः स्यादवोचामः प्रमाणताम्।
सर्वथा चेद्धरिकृपा न भविष्यति यस्य हि२३६
तस्य सर्वमशक्यं स्यान्मार्गेस्मिन्सुतरामपि।
कृपायुक्तस्य तु यथा सिद्ध्येत्कारणमुच्यते
।२३७।कृष्णसेवापरं वीक्ष्य दंभादिरहितं नरम्।
श्रीभागवततत्वज्ञं भजेज्जिज्ञासुरादरात् ।२३८।
तदभावे स्वयं चापि मूर्तिं कृत्वा हरेः क्वचित्।
परिचर्यां सदा कुर्यात्तद्रूपं तत्र च स्थितम् २३९
साकारव्यापकत्वाच्च मंत्रस्यापि विधानतः।
श्रीकृष्णं पूजयेद्भक्त्या यथालब्धोपचारकैः
॥२४०॥यथा सुन्दरतां याति वस्त्रैराभरणैरपि।
अलंकुर्वीत सप्रेमं तथा स्थानपुरःसरम्॥२४१॥

तत्त्वदीपप्रकाशः ।

तत्र वेदमार्गापेक्षयापि भक्तिमार्गस्योत्तमत्वप्रतिपादनात् सांप्रतमन्यस्याभावात् । आदरेण भक्तिमार्गे प्रविशेत् । मार्गप्रवेशमात्रेणैव कृतार्थत्वात् ॥ नन्वेवं पार्षंडानामपि वचनानि संभवंतीत्याशंक्याह ॥ विरुद्धकरणं नास्तीति॥नात्र श्रुतिस्मृतिविरुद्धाचारः, नापि प्रमेयं वेदविरुद्धम् । अतो नात्र विरुद्धसंभावनापि॥२३५॥ननु पराश्रया मुक्तिः

मायावादादिभिर्निराकृतेति कथं न प्रमेयविरोधस्तत्राह ॥ क
बाधःस्यादिति॥ ते हि स्वमात्रं फलत्वेन कल्पयंति तत्त्वप्राम
आत्मशब्दस्य भगवद्वाचकत्वात् । नतु जीवपरत्वं वेदान्ताना
जीवस्य फलरूपत्वम्।अतः परमानंदोऽधिको भवतीति न कदा
स्वाधीना । अतस्तत्र स्नेह एव तत्प्राप्तिहेतुः ॥ अतो युक्त्या
न्मार्गस्य प्रामाण्यं साधितमित्यर्थः॥ परमत्र न सर्वेषां फलमुख
रः। किन्तु। येषु भगवत्कृपा,परिज्ञानं च मार्गरुच्या निश्चीयते॥
॥२३७॥ तत्रादितः साधनान्याह॥ कृष्णसेवापरमिति ॥ यो
सेवामुपदेक्ष्यति स स्वयं चेत्तामुत्तमां जानीयात्तदा कथं न स्व
यादिति सेवापर एव गुरुः। तत्रापि निमित्तानि वारयति ॥ द
हितामिति ॥ सेवा च प्रमाणमूलैव पुरुषार्थपर्यवसायिनी ।
मनस्यन्यद्विधायान्यथाकरणेन फलसिद्धिरित्यभिप्रायेणाह ॥
गवततत्वज्ञमिति ॥ जिज्ञासुर्नतु कौतुकाद्याविष्टः। भजनं सर्व
तदा तदुक्तप्रकारेण भगवत्सेवा कर्तव्या ॥ २३८ ॥ सच दुर्ल
तेनापि वक्तव्यं प्रकारमाह॥ तदभाव इति॥ क्वचिद्देशविशेषे स
थिनामभावयुक्ते हरेर्मूर्तिं कृत्वा भजेत् । अयमेवास्य प्रकार
यन्मूर्तौ कृतं सर्वं भगवतीकृतं भवति। तत्र मूर्तेर्भगवत्त्वं त्रेधा वि
ति ॥ तद्रूपमिति ॥ वस्तुविचारेण सर्वस्य भगवद्रूपत्वाद्विशे
एनमुद्धरिष्यामीति तदा मृदादेः प्रादुर्भूतः । भक्तिमार्गानुसा
तत्र च स्थितमिति ॥ मूर्तौ स्थितम् ॥ २३९ ॥ परं यत्र ह
हस्तस्तत्तदवयवेषु तत्तदयवा इति तत्र हेतुः ॥ व्यापकं साक
ति ॥ अतः सर्वे कटकाद्युपचाराः भगवदवयवेष्वेव साक्षात्कृत
न्ति । उपासनामार्गानुसारेणापि मूर्तावेव भगवद्भजनं भवतीत
मंत्रस्यापि विधानत इति । न्यासादिपूर्वकं सर्वपूजामूर्तौ विशे
श्रीकृष्णमिति ॥ मूर्त्यन्तरेष्वन्तरितत्वं यथावन्मुख्यतया प्रा

रुपचाराः कर्त्तव्याः ॥ २४० ॥ तत्रापि भक्तिमार्गानुसारेणोपचारा मुख्या इत्याह ॥ यथा सुन्दरतां यातीति । सप्रेमेत्यनुद्वेगार्थम् ॥ स्थानं मंदिरं तदलंकारपूर्वकमेव भवदलंकरणं कर्तव्यमित्यर्थः ॥ २४१ ॥

आवरणभंगः ।

मार्गप्रवेशेत्यादि ॥ ॥ "अपि चेत्सुदुराचार" इति वाक्यात्तथेत्यर्थः ॥ मूले प्रक्रियापदेन परिपाटी बोध्यते तां विशदयन्ति ॥ नापि प्रमेयमित्यादि ॥ तथा च पाषंडवैलक्षण्यस्यात्रस्फुटत्वाद्बुद्धिमतस्तज्ज्ञानं सुखेन भविष्यतीति नैष दोष इत्यर्थः ॥ २३५ ॥ ॥ मूले कल्पितैरित्यादि ॥ ॥ वाक्यत्वेन कल्पितैर्वाक्याभासैरेवात्र बाधबुद्धिर्नतु वास्तविको बाधः ॥ अहं सर्वस्य प्रभव इत्यादि ॥ प्रायेण भक्तियोगेनेत्यादिप्रमाणानामुक्तत्वादित्यर्थः ॥ ननु भवत्वस्य प्रामाणिकत्वम् ॥ तथापि स्वाश्रयमुक्तिपक्षस्य कल्पितत्वमत आहुः ॥ तेहीत्यादि । आत्मशब्दस्येति ॥ ॥ आत्मलाभान्नपरं निर्विद्यते तरति शोकमात्मविदित्यादिफलवाक्यगतस्य तस्येत्यर्थः ॥ ननु मैत्रेयीब्राह्मणे आत्मशब्दः शारीरपर एव सिद्ध इति जीवपरत्वमेव वेदान्तानामिति कथं तथेत्यत आहुः ॥ नत्वित्यादि ॥ ॥ यद्येवंस्यात् । व्यासः शारीरजिज्ञासामेव प्रतिजानीयान्न ब्रह्मजिज्ञासाम् । अनुपपत्तेस्तु न शारीर इति च नवदेत् । अतो मैत्रेयीब्राह्मणेऽप्युपसंहारप्राबल्यं निश्चित्यात्मशब्दो ब्रह्मपर एवानुसंधेय इति भावः । तदिदं विस्तरतो ब्रह्मभाष्यादवगंतव्यम् ॥ ननु विविक्तात्मना तदपि यावद्दुःखनिवृत्तेः "आत्मानं चेद्विजानीयादयमस्मीतिपुरुषः । किमिच्छन्कस्य वा हेतोः शरीरमनुसंज्वरेत्" इति सिद्धत्वात्कथं न स्वस्य फलत्वमत आहुः ॥ नापीत्यादि ॥ ॥ जीवो ह्यंशः प्रदेशो वा ब्रह्म तु ततोऽधिकमधिकं तु भेदनिर्देशादित्यादिभ्यः ॥ अतः प्राप्तिर्मृग्यैवेति न यावद्दुःखनिवृत्तिमात्रस्य फलत्वमुक्तवाक्ये जीवलिंगस्यादर्शनाच्च न जीवस्य फलत्वमतस्तथेत्यर्थः ॥ एवं स्वाश्रयमुक्तिपक्षदूषणेन तस्य कल्पितत्वं प्रतिपाद्य पराश्रयमुक्तिपक्षे यत्साधनं पूर्वत्र सिद्धं तदाहुः ॥ अत इत्यादि ॥ ॥ अस्य प्रमेयस्य पूर्वमुक्तत्वेऽपि पुनःस्मारणस्य प्रयोजनमाहुः ॥ अतो युक्त्येत्यादि ॥ ॥ ननु यद्येवं तर्हि प्रेक्षावतां सर्वेषामेव कुतो नात्र प्रवृत्तिरित्याकांक्षायां दोषाभावस्याप्यधिकारिविशेषणत्वं हृदि कृत्वा तत्साधनं सूचयंत आहुः ॥ परमित्यादि ॥ ॥ आनुमानिकमप्येकेषामिति सूत्रे विषयवाक्यविवेचने अव्यक्तपदेन भगवत्कृपा प्रतिपादिता । सा च भगवदधीनाऽतस्तथेति नायं दोष इत्यर्थः ॥ ननु तस्या अव्यक्तत्वे कथमधिकारनिश्चय

इत्याकांक्षायामाहुः ॥ कृपापरीत्यादि ॥ ॥ अत्रोदाहरणमाहुः ॥ निश्चीयत इति ॥ अस्माभिरिति शेषः । अन्येषां तु मार्गरुचिपरिज्ञानं वेषवचनाचारैः ॥ अथ भागवतं ब्रूतेत्यत्र तथासिद्धेः ॥ तत्रेत्यादि ॥ ननु यद्येवं तदा कृपयैव फलसिद्धेः । साधनवैयर्थ्यमित्याकांक्षायां साधनशास्त्रार्थवैयर्थ्यात्तद्वारैव प्राप्य इति निश्चित्य कृपाया अनुग्रहाख्यधर्मांतररूपत्वात्तस्य भक्तिकारणतया भक्तिहेतुनिर्णये विवेचितत्वादनुग्रहेण भक्तेः सिद्धावपि तदावस्थारूपस्य प्रेम्णः साधनसापेक्षत्वात्स यथासिद्ध्येत्तथा साधनान्याहेत्यर्थः ॥ तत्र "अजिज्ञासितमद्धर्मो गुरुं मुनिमुपाव्रजेत्" इति भगवद्वाक्येषु "निरालंबो यथालोके स्थानभ्रष्टो निगद्यते । हरेः कृपाविशिष्टोऽपि गुरुहीनस्तथैव च ॥ यथा भक्तिः स्वतंत्रोक्ता गुरुसेवापि तादृशी । जिज्ञासा शेषभावत्वं तथापि विनिगद्यते ॥" इत्येकादशे सुबोधिन्यां प्रबुद्धवाक्येषु सिद्धेः प्राथमिकं तदेवेति गुरुलक्षणपूर्वकं तां वदंत आहुः ॥ कृष्णेत्यादि ॥ ॥ अत्र प्रथमतृतीये गुरुविशेषणे "शाब्दे परे च निष्णातम्" इत्यनेन सिद्ध्यतः । द्वितीयं चोपरमाश्रयपदेन । यद्यपि संदेहवारणाय वैधदीक्षावद्धृदयप्रवेशाय चोभयनिष्णातत्वं तत्र व्याख्यातं तथापि हृदि भगवत्प्रवेश एव साधनेषु निष्ठा वर्द्धत इति भगवत्सेवापरत्वं तस्यैव लक्षणम् ॥ तदेवात्राभिप्रेत्याहुः ॥ यो हि गुरुरित्यादि द्वितीयस्य तात्पर्यमाहुः ॥ ॥ तत्रापीत्यादि ॥ मूले दंभादीत्यादिपदेन कामलोभपूजाः संगृह्यन्ते ॥ सेवाचेत्यादि ॥ तथा च श्रीभागवतस्य सर्वप्रमाणसाररूपतायाः "सर्ववेदेतिहासानां सारं सारं समुद्धृतम्" इति द्वादशीयवाक्ये सिद्धत्वाच्छाब्दनिष्णातत्वं श्रीभागवततत्त्वज्ञस्वरूपमेव बोध्यम् ॥ वीक्ष्येत्यनेन मार्गान्तरादत्र वैलक्षण्यं ज्ञापितम् । ईक्षदर्शनांकनयोर्विना च सम्यक्त्वं परीक्षणे द्योत्यते ॥ तथा च तत्रैव । "गुरुः परीक्षयेच्छिष्यमिति" वाक्याच्छिष्यो यथा परीक्ष्यते तथात्र गुरुः । नोचेदतादृशस्य लोकानुगतपशुरूपत्वात्तादृशोनुसरणेंधानुगांधवदुभावपि पतेताम् । एतदर्थमेव जलभेदग्रंथकरणं ज्ञेयम् ॥ अयमप्यर्थः शाब्दे परेचेत्यादिविशेषणानां ज्ञातानामेव प्रतिपत्तिप्रयोजकत्वात्सिद्ध्यति । एवं गुरुस्वरूपं निश्चित्य शिष्यस्याहुः ॥ जिज्ञासुरित्यादि ॥ यद्यप्यत्र जिज्ञासायां कर्म न निर्दिष्टं तथाप्युत्तमं श्रेय एव ससाधनं प्रकरणाद्बोध्यम् । तच्च भगवत्सायुज्यं तत्सायुज्यं च । एताज्जिज्ञासा च "सात्विका भगवद्भक्ता" इत्यनेनारंभदशायामुक्तस्यैव संभवति । तत्राप्युत्कटगुरुभक्त्यादरजनिका सुतरां तादृशस्यैवेति स एवाधिकारी तेन ब्रह्मसंबंधोऽपि फलमुखस्तस्यैवेति सिद्ध्यति । एवमधिकारसूचनेऽनधिकार्यपि व्यावर्त्तितः । गुरुश्चापृष्टो न वक्ष्यतीति प्रश्न आवगरौ प्रसन्नस्यैव फलवानिति भजमं विशिषन्ति ॥ सर्वभावेनेति ॥

एतेनात्रापेक्षितादरस्य स्वरूपं विवृतम्। सर्वभावश्च निकटतया आत्मनिवेदनं तच्चैहिकपारलौकिकयोरात्मना सहार्पणम्। तस्य निदर्शनं च शक्त्यनुसारेण सावधानैः सादरं तदाज्ञाकरणम्। तदपि मात्सर्यं विनेति तत्स्वरूपं तृतीयस्कंधे त्रयोदशे मनुंप्रति ब्रह्मवाक्ये "प्रीतस्तुभ्यमहं तात" इत्यादि सुबोधिन्यां स्फुटम्। चतुर्विंशे कर्दमं प्रति ब्रह्मवाक्ये "त्वया मेऽपचितिस्तात" इत्यस्य सुबोधिन्यां चैतदुदाहरणमप्युक्तमिति ततो ज्ञेयम्। यद्वा देहमारभ्य ईश्वरपर्यन्तं यावंतो भजनीयास्ते सर्वे भगवानिति वा सर्वभावो बोध्यः। तथा प्रपन्नस्याग्रिमं सिद्ध्यतीति। एवं च सर्वोत्तमादिपाठोऽपि गुरुभजनस्यैव शेष इति ज्ञेयम्। इदं च फलोपकार्यंगम्। "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः॥" इतिश्रुतेः। एवं चात्र जिज्ञासया गुरुपरीक्षणं तथैव तद्भजनं चेति साधनद्वयं क्रमिकमुपदिष्टं प्रथमकारिकायां कृपापरिज्ञानस्यात्र जिज्ञासायाश्च कथनादेतदुभयं गुरुणापि परीक्ष्यमित्यपि सूचितम्। अन्यथा "इदं ते नातपस्काय" इति वाक्यादतादृशाय कथने गुरोरप्याज्ञाभंगः प्रसज्जेत। एवमेकं सपरिकरमाद्यं साधनमुपदिष्टम्। तदग्रिमं साधनमाहुः॥ तदेत्यादि॥ ॥ तदेति तादृशभजनतः प्रसन्नस्य गुरोरुपदेशोत्तरम्। इदं द्वितीयं साधनम्॥ २३६–२३८॥ नन्वत्र मूल एव कुठारापात इत्याकांक्षायां कलेर्बलिष्ठत्वेनाग्रिमेषु गुरुलक्षणाभावमालोच्य स्वस्मिन्नेवैतन्मार्गीयगुरुत्वं नियच्छंत आहुः॥ सचेत्यादि॥ तदभाव इत्याद्याज्ञापनादिदं ज्ञात्वा करणे "यस्त्विच्छयाकृतः पुंभिराभासो ह्याश्रमात्पृथक्" इत्याभासत्वाभावः। सेवायास्तृतीयस्कंधोक्तनोद्याभावश्च सेवाकर्तुः साधितः। स्वयमेवं सेवाकरणेऽपि प्रकारविशेषसंदेहे तादृशा यदि मिलंति तदा प्रकारांशे प्रष्टव्या इत्यपि सूचितम्। सत्परिपंथिनामभावयुक्त इति॥ एकादशे "देशान्पुण्यानाश्रयेत मद्भक्तैः साधुभिः श्रितान्" इति। सप्तमेपि "यत्रयत्र हरेरर्चा स देशः श्रेयसां पदम्" इति कथनात् यथा "भ्रमतो धर्मचक्रस्य यत्र नेमिरशीर्यतेति" निरुक्त्या फलबलान्नैमिशस्योत्तमत्वं तथात्रापीति भावः। तेनापत्तौ वंगादयोऽपि संगृहीता ज्ञेयाः। हरेर्मूर्त्तिं कृत्वा भजेदिति॥ ॥ भगवत्स्वरूपं स्वामित्वेन भावयित्वा आत्मानं दासं भावयन् दासकार्यं कुर्यादित्यर्थः॥ ननु पूर्वमस्य मार्गस्य भगवदुक्तत्वप्रतिपादनादस्मिन्भागवतधर्मत्वमुक्तं भवति। तल्लक्षणं चैकादशे योगेश्वरवाक्ये "ये वै भगवता प्रोक्ता उपाया ह्यात्मलब्धये॥ अंजः पुंसामविदुषां विद्धि भागवतान्हितान्" इत्युक्तम्। तत्र ये धर्मा वै निश्चयेन भगवत्फलाः पुरा भगवतैव च प्रोक्ताः। यथा मन्मनाभवेत्यादौ ते भागवता इति तत्र स्थितम्। एवं सति योगेश्वरवाक्येषु आत्यंतिकक्षेमप्रश्ने। मन्ये कुतश्चिदित्यनेन प्रतिपत्तिमार्गे तथात्वेनोक्ता-

न्धर्मान् भागवतान् ब्रूतेति प्रश्ने ये वै इति लक्षणमुखेन तानेवोक्त्वा द्वितीयेन तदुत्कर्षं चोक्त्वा तदग्रे त्रिभिः प्रथमाधिकारिकार्यान् तान् पंचभिस्तदनुकल्परूपांश्चाह ॥ ततः स्थूलबुद्धिनामपि भगवत्प्राप्त्यर्थं तानेवादितः पुनराह । ऐहिकामुष्मिकफलभोगविरागपूर्वकगुरुशरणगमनं ततस्तत्सेवनं सर्वभावेन । ततः कर्मज्ञानमार्गप्रवेशस्ततः सप्तभिर्भक्तिमार्गस्ततस्तस्य फलपर्यवसायित्वमिति क्रमेण भगवानप्येकादशाध्याये "श्रद्धालुर्मे कथाः शृण्वन्" इत्यादिना भगवदाश्रितस्य कथाश्रवणगानस्मरणजन्माभिनयभगवदर्थधर्मकामार्थाचरणानि भक्तिलाभकारणत्वेनाहेति तं क्रमं विहाय किमिति मूर्तिभजनमेव प्रथमत उच्यत इत्याकांक्षायामाहुः ॥ अयमित्यादि ॥ ॥ तथा च साक्षादुपयोगादेतस्या एव मुख्यतयोपदेश इति भावः ॥ सर्वमिति ॥ ॥ एवं च समानन्यायेन मूर्ताविपराधोपि भगवदपराध इति ज्ञापितम् ॥ तत्रेत्यादि ॥ ॥ ननु तथापि "सूर्योऽग्निर्ब्राह्मणा गाव" इति भगवताऽन्येषामपि पूजास्थानानां कथनाच्छालग्रामे भगवत्सांनिध्यस्य शास्त्रसिद्धत्वाच्च तानि विहाय किमिति मूर्त्ताविव भजनमुपदिश्यत इत्याकांक्षायां सात्विकानां ज्ञानभक्त्युपासनाप्रधानभेदेन त्रैविध्यात्तत्तद्रीत्या कथमेतस्य तस्य बोधो भवतीति तत्तदर्थं त्रेधा निरूपयतीत्यर्थः ॥ तत्र पूर्वं ज्ञानप्रधानं प्रति भगवत्त्वे हेतुमाहुः॥ वस्त्वित्यादि ॥ ॥ यद्येवं तर्हि मूर्तौ को विशेष इत्यत आहुः ॥ विशेषस्त्वित्यादि ॥ तथा च यथा प्रह्लादाद्यर्थं स्तंभादिभ्यः प्रादुर्भावस्तथात्राप्येतस्यैवोद्धाराय प्रादुर्भावो नतु साधारणतयेति सूर्यादिभ्यः शालग्रामाच्चात्रायं विशेष इत्यर्थः । एवं चेंद्रद्युम्नोद्धाराय दारुब्रह्माविर्भाव इवात्रापि लौकिकी जीवक्रियाभिव्यक्तौ व्यापृतापि सती इच्छा शरीर एव प्रविशतीति न कश्चिच्छंकालेशः ॥ भक्तीत्यादि ॥ द्वितीयं प्रति तथाहेत्यर्थः॥२३९॥ नन्वेवं मूर्तौ भगवत्स्थितिज्ञापनेपि भक्तिमार्गीयाणां सर्वतत्वनिर्धारानावश्यकत्वस्य द्वितीयस्कंधे संजातभक्तिधारणायां व्यवस्थापितत्वान्मूर्त्तौ भेदबुद्ध्यनपगमेनारंभदशायां साक्षात्काराभावेन च तत्र भगवद्बुद्धिदौर्घट्यात्कथमेवं निश्चय इत्याकांक्षायां तेषां तथा तत्र बुद्धये हेतुमाहुः ॥ तत्र हेतुरित्यादि ॥ ॥ वैश्वानराधिकरणादिषु दामोदरलीलादिषु च साकारस्यैव व्यापकत्वसिद्धेरंतर्यामिब्राह्मणे चांतःस्थस्यैव सर्वांतरकर्तृत्वसिद्धेः । प्रकृते च व्यापकतया प्रवेशानपेक्षणात्तथैव तत्सिद्धेः सर्वतः पाणिपादंतमित्यत्रावयवानां परिच्छिन्नत्वसिद्धेश्च तथास्थितिरुपपद्यत एवेतिना भेदबुद्धिदौर्घट्यमित्यर्थः ॥ मूलस्थेन चकारेणात्रापि पूर्वोक्तो विशेषः समुच्चीयते तेनासाधारण्यमपि तादृशबुद्धिसहकारीति हेत्वोः साधारणत्वमप्येतेन निवारितं ज्ञेयम् ॥ तृतीयं प्रत्याहुः ॥ उपापनेत्यादि ॥ ॥ भवतीति ॥ श्रेष्ठं भवतीत्यर्थः । हेतुं विवृण्वन्ति ॥ न्यासा-

दीत्यादि ॥ ॥ एकादशीयसप्तविंशाध्याये "शैली दारुमयी" इत्यादिना प्रतिमा उक्त्वा कृतन्यासो मदर्चां चेत्यादिना न्यासादिपूर्वकं सुदर्शनादिपार्षदादीनां सर्वेषां पूजा महता संरंभेण भगवतोक्ता तथैव शिवादीभिश्चेति तथेत्यर्थः ॥ एवमेवैकादशाध्याये ज्ञानिनमुपक्रम्य स्वास्मिन्विरजमनोर्पणमुक्त्वा तत्रासामर्थ्ये यद्यनीश इत्यादिचतुर्भिस्तदर्थं साधनानि तैर्भक्तिलाभं ततस्तयोपासने फलं स्वपदप्राप्तिरूपमुक्त्वा तत्कथनेन तस्य ज्ञानमिश्रभक्तत्वं च बोधयित्वा प्रश्नानुरोधेन साधुलक्षणं चोक्त्वाऽग्रे भक्तिं कथयितुं मल्लिंगमद्भक्तजनेत्यादिना तं प्रत्यपि मूर्तिभजनमेव महता संदर्भेण भक्तिलाभायोक्तम् । तथैवैकोनविंशे "पुनश्च कथयिष्यामि मद्भक्तेः कारणं परम्" इति प्रतिज्ञाय "श्रद्धामृतकथायांम" इत्युपक्रम्य "एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनाम्" इत्यंतैर्भक्तिमिश्रभक्तं प्रत्यपि पूर्वोक्तान्येव साधनानि मूर्ति परिचर्या च प्रत्याहारेण बोध्यत इत्येव बोधयितुं ज्ञानभक्त्युपासनाक्रमेणाचार्यैर्मूर्त्तर्भगवत्त्वबोधनाय हेतव उक्ता इति । सर्वेषां मूर्त्तिपरिचरणमेव भगवदाशयगोचर इति तस्यैवोपदेश इति दिक् । अत एव परिचर्यां चोभयत्रेति योगेश्वरवाक्यम् ॥ परिचर्यास्तुतिप्रह्वेति ॥ ममार्चास्थापने श्रद्धेति आदरः ॥ परिचर्यायामित्यादि भगवद्वाक्यानि च ॥ एवं मूर्तौ परिचरणमेवास्तु मुख्यमिति स्थापितम् ॥ मूर्तावित्यादि ॥ एवं सर्वासु मूर्तिषु तुल्यतया भजनप्राप्तौ कस्यां कार्यमित्यपेक्षायां कस्यां चिन्मूर्त्तौ विशेषमाहेत्यर्थः ॥ मूर्तौ भगवत्स्थितिर्वह्नेरयसीवावेशरूपा भवति ॥ एवं सति मूर्त्यंतरे य आवेशः सोऽवताररूपस्य । तच्चैतन्नानावताराणां निधानं बीजमव्ययमिति भगवदंशपुरुषांशभूतामिति ह्यंतरितत्वं बोध्यम् । अत्र च श्रीकृष्णपदेन युगलसेवापि सूचिता ज्ञेया, समानन्यायाच्च; तत्स्वरूपे तथास्थितिरिति च । अत्रत्यो विशेषो मत्कृतमूर्तिपूजनवादादनुसंधेयः ॥ एवं मूर्तिं निश्चित्य "परिनिष्ठा तु पूजायामिति" वाक्यात् । पूजनमावश्यकमिति तत्प्रकारमाहुः ॥ ॥ यथावदिति ॥ ॥ एतस्यैव विवरणं मुख्यतयेति । महाराजोपचारैरित्यर्थः ॥ लब्धोपचारकैरित्यस्य विवरणं प्राप्तैर्द्रव्यैरुपचाराः कर्तव्या इति ॥ पूजनं च समीपे स्थित्या यथायोग्यं सेवनं, परिचर्या तु विप्रकर्षेऽपि स्थित्वेति शेषः । उचितः सत्कार उपचारः । उपचाराश्च शक्त्यनुसारेण सहस्रशतषोडशपञ्चान्यतमाः ॥ तत्रोद्वासावाहने नस्त एव । मूर्त्तौ स्थितेरुपपादितत्वात् । पाद्यं तु स्नानसमय एव सांप्रदायिकैः क्रियते । दंतधावनं तु बालभावादेव नेह ॥ अभ्यंगोन्मर्दनादर्शाभिषेचनानि तु यथासंभवं उत्सवादौ प्रत्यहं विच्छिद्य च क्रियंत एव । एवमन्येऽपि संप्रदायाद्बोध्याः । आश्रयेतेत्यनुवृत्तौ "देवासुरमनुष्येषु मद्भ-

काचरितानि च" इति वाक्यात् ॥ ॥ अनुद्वेगार्थमिति ॥ ॥ उद्वेगो द्वेधा । चित्तस्य चांचल्येन खेदेन च । खेदोपि देहरोगादिकृतो भगवति दुरूपचारकृतश्च तत्प्रेम्णाक्रियमाणे शीतोष्मवर्षादिषु जलवसनादीनां यथोचितसमर्पणमेव भवति चांचल्यादिकं च निवर्तत इति तदर्थं नतु पुष्टिरूपताज्ञापनार्थं साधनावस्थात इत्यर्थः ॥ स्थानं मंदिरमित्यादि " संमार्जनोपलेपाभ्यां सेकमंडलवर्तनैः । गृहशुश्रूषणं मह्यं दासवद्यदमाययेति " भगवद्वाक्यादित्यर्थः ॥ उपलक्षणमेतत् । तेन वितानशयनासनाद्यलंकरणमपि तत्तदुपयोगावसरात्पूर्वं बोध्यम् ॥ २४०॥२४१ ॥

ब्रजभाषाटीका ।

कलियुगमें तो कर्मादिक सर्वथाही नहिं बनसकें परन्तु सत्ययुगादिकनमेंभी (कर्मणो गहना गतिः) इत्यादि गीतावाक्यानुसार दुःखकरकें सिद्धहोयसकें ऐसें कर्मादिक मार्गनमें आदरको त्याग करनों अर्थात् बहुत मार्गनमें परम आदर नहिं बन सकेहै तासों एकमार्गके विषेंही आदर करनों वेदमार्गकी अपेक्षा भक्तिमार्ग उत्तमहै । तथा अभी अन्य मार्ग विद्यमान भी नहिं हैं तासों आदरपूर्वक बुद्धिमान् पुरुष भक्तिमार्गमें ही प्रवेशकरै (अपि चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः) इत्यादि गीतावाक्यमें स्पष्ट यह बात लिखीहै कि दुराचारीभी पुरुष अनन्य होयकरके भगवत्सेवा करतो होय तो वाकूँ सत्पुरुष समुझनो । तासों भक्तिमार्गमें प्रवेशहोतेही जीव कृतार्थ होयजावेहै ॥ श्रीमहाप्रभूजी आज्ञा करेहैं जैसे पाषंडी लोग अपने मार्गनमें जीवनकू फँसायवेके लिये अपने मार्गकूँ सब मार्गनसों उत्तम बतावेहैं । तासों या प्रकार पाखंडीनके भी बचन होवै हैं वैसें हमारे बचनकूँ मत मानियो क्योंकि पाषंडीनके मतनमें श्रुतिस्मृतिसों विरुद्ध आचरण होवैहै ऐसें या भक्तिमार्गमें श्रुतिस्मृतिनसों विरुद्ध आचरण नहिं है । वेदमें जो परमात्मा परब्रह्मरूप प्रमेयको प्रतिपादनहै । वाहीकूँ भंक्तिमार्गमें प्रमेय मानो है

...चरितादि च" इति वाक्यात् ॥ ॥ अनुद्वेगार्थमिति ॥ ॥ उद्वेगो द्वेधा । चित्तस्य चांचल्येन खेदेन च । खेदोपि देहरोगादिकृतो भगवति दुरूपचारकृतश्च तत्प्रेम्णाऽक्रियमाणे शीतोष्मवर्षादिषु जलवसनादीनां यथोचितसमर्पणमेव भवति चांचल्यादिकं च निवर्तत इति तदर्थं नतु पुष्टिरूपताज्ञापनार्थं साधनावस्थात इत्यर्थः ॥ स्थानं मंदिरमित्यादि "संमार्जनोपलेपाभ्यां सेकमंडलवर्तनैः । गृहशुश्रूषणं मह्यं दासवद्यदमाययेति" भगवद्वाक्यादित्यर्थः ॥ उपलक्षणमेतत् । तेन वितानशयनासनाद्यलंकरणमपि तत्तदुपयोगावसरात्पूर्वं बोध्यम् ॥ २४०॥२४१ ॥

ब्रजभाषाटीका ।

कलियुगमें तो कर्मादिक सर्वथाही नहिं बनसकें परन्तु सत्ययुगादिकनमेंभी (कर्मणो गहना गतिः) इत्यादि गीतावाक्यानुसार दुःखकरकें सिद्धहोयसकें ऐसें कर्मादिक मार्गनमें आदरको त्याग करनों अर्थात् बहुत मार्गनमें परम आदर नहिं बन सकेहै तासों एकमार्गके विषेंही आदर करनों वेदमार्गकी अपेक्षा भक्तिमार्ग उत्तमहै । तथा अभी अन्य मार्ग विद्यमान भी नहिं हैं तासों आदरपूर्वक बुद्धिमान् पुरुष भक्तिमार्गमें ही प्रवेशकरै (अपि चेत्सुदुराचारो भजते मामनन्यभाक् । साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः) इत्यादि गीतावाक्यमें स्पष्ट यह बात लिखीहै कि दुराचारीभी पुरुष अनन्य होयकरके भगवत्सेवा करतो होय तो वाकूँ सत्पुरुष समुझनो । तासों भक्तिमार्गमें प्रवेशहोतेही जीव कृतार्थ होयजावेहै ॥ श्रीमहाप्रभूजी आज्ञा करेहैं जैसे पाषंडी लोग अपने मार्गनमें जीवनकूँ फँसायवेके लिये अपने मार्गकूँ सब मार्गनसों उत्तम बतावेहैं । तासों या प्रकार पाखंडीनके भी बचन होवै हैं वैसें हमारे बचनकूँ मत मानियो क्योंकि पाषंडीनके मतनमें श्रुतिस्मृतिसों विरुद्ध आचरण होवैहै ऐसें या भक्तिमार्गमें श्रुतिस्मृतिनसों विरुद्ध आचरण नहिं है । वेदमें जो परमात्मा परब्रह्मरूप प्रमेयको प्रतिपादनहै । वाहीकूँ भक्तिमार्गमें प्रमेय मानो है

तासों भक्तिमार्गमें वेदविरुद्धताकी संभावना नहिं करनी ॥ ॥२३५॥ शंका–मायावादीने वेदमें जो आत्मा शब्दहै वाकूँ जीवको नाम मानोहै तब शरीर संबंधी जीवात्मा वेदको प्रमेय भयो और वाही जीवात्माके आधीन मुक्ति होनों माने है, तब उनके मतानुसार स्वाधीन मुक्ति भई और भक्तिमार्गमें तो परमात्माकूँ प्रमेय मानो है और मुक्तिभी उनहीके आधीन मानीहै तब वेदको तथा भक्तिमार्गको एक प्रमेय कैसे भयो ? उत्तर— (कल्पितैरिति) मनःकल्पित वाक्यनकरकें उन वादीननें (तरति शोकमात्मवित, आत्मलाभान्नपरं विद्यते) आत्माकूँ जानवेवारो शोककूँ तरजावेहै। इत्यादि वाक्यनमें आत्माकूँ शब्दको अर्थ शरीर संबंधी जीवात्मापर लगाय लीनोहै याहीसों वेदार्थके संदेह दूर करवेवारे व्यासजीनें (अनुपपत्तेस्तु न शारीरः) या सूत्रमें वेदमें ब्रह्मप्रकरणपठित आत्मशब्द परब्रह्मवाचकहै जीववाचक नहिंहै यह निर्णय कियोहै, तासों वे वादी अपने जीवकूँ फलरूप माने हैं यह बात प्रमाण विरुद्धहै वेदमें आत्म शब्द भगवान्को वाचकहै वेदान्तभाग जीवपर नहिं होय सके है, जीव फलरूप भी नहिं होय सकेहै। क्योंकि जीवमें सत्ता चैतन्य दोही गुण हैं भगवान्में सत्ता चैतन्य आनन्द तीन पदार्थ हैं। आनन्द भगवान्में अधिक है जीवमें नहिं है जीव तो अंशहै भगवान् तो जीवसों अधिकहै तामें (अंशो नानाव्यपदेशात्। अधिकन्तु भेदनिर्देशात्) इत्यादिव्याससूत्र प्रमाणहै तासों भक्तिमार्ग तथा वेद दोनोंके प्रमेय भगवान् एकहीहैं तासों मुक्तिभी दोनों भगवान्के आधीनहैं जीवके आधीन नहिं है तासों भगवान्की प्राप्तिको कारण स्नेहहीहै याप्रकार युक्तिकरकें भी भक्तिमार्गकूँ प्रामाणिक बतायो यदि सर्वोत्तम यह मार्ग है तो सबही बुद्धिवाले

पुरुष यामें क्यों नहिं प्रवृत्त होवेहैं ? उत्तर—सबही पुरुषकूँ या भक्तिमार्गमें फलदायक अधिकार नहिं है जापैं भगवान्की कृपा है वाहीकूँ भक्तिके मुख्य फलकी प्राप्ति होयहै पापनाश तो (देवोऽसुरो मनुष्यो वा) इत्यादिवाक्यानुसार दैव आसुर कोई जीव हो भक्ति-करवेसों मुक्त होजावेही है भगवान्की कृपा तो भक्तिमार्गरुचिसों जाननों भगवान्की कृपाबिना या मार्गमें रुचि नहिं होयहै तहाँ या जीवकी भक्तिमार्गमें रुचिहै याकी नहिं है यह कैसें मालुम पडे यह शंका तो नहिं करनीं वेष भाषा आचरणकरकें मार्गकी रुचि मालुम पडेहै । अर्थात जो पुरुष सदा तिलक कंठी आदि भक्तनके वेशकों धारण करे रहैं, दृढताके बचन बोलतोरहै, एकान्तमें सबके सन्मुख-भी भगवान्के नामकूँ जपतो रहै भक्तिमार्गके आचार अनुसार सदा बर्ताव करतोरहै तब जाननों या पुरुषकी भक्तिमार्गमें रुचि है ॥ ॥ २३६ ॥ २३७ ॥ शंका—भगवत्कृपासोंही उद्धार होयजावेंगो साधन करवेको कहाँ कामहै ? उत्तर—भगवान्की अनुग्रहसों तो भक्ति प्रकट होयहै प्रकटभई प्रेम भक्तिकूँ साधनकी अपेक्षा है तहाँ गुरुकी उपासना प्रथम साधनहै (निरालम्बो यथा लोके स्थान-भ्रष्टो निगद्यते । हरेः कृपाविशिष्टोऽपि गुरुहीनस्तथैव च) अर्थ—जा पुरुषके कोई आलंबन नहिं होय वाकूँ लोकमें स्थानभ्रष्ट कहें-है । ऐसेंही भगवत्कृपासहितभी पुरुष गुरुहीन होय तो वाकूँ स्था-नभ्रष्टके समान समुझनों तासों प्रथम कृष्णसेवामें परायण होय वाकूँ गुरु करनों जो गुरु औरनकूँ सेवाकरवेको उपदेश देहै वह गुरु स्वयं भगवत्सेवाकूँ उत्तम जानेंगो तो क्यों नहिं करेंगो तासों सेवापरायण होय वह ही गुरुहै तहाँभी कोई निमित्तसों सेवा नहिं करतो होय काम लोभ प्रतिष्ठाकेलिये कपटसों सेवा नहिं करतो होय तथा सर्व प्रमाण सारभूत श्रीभागवतके अनुसारही कीनी-

भई सेवा पुरुषार्थ सिद्धकरवेवारीहै, अन्यथा मनके अनुसार विपरीत सेवासों फलसिद्धि नहिं है। तासों श्रीभागवतके तत्वकूँ जानवेवारो होय वाकूँ गुरु करनों और शिष्यकूँ गुरुके समीप जिज्ञासू होयके जानों चाहिये कौतुकाविष्ट होयकें नहिं जानों योग्यहै आदरपूर्वक सर्वभावकरकें ऐहिक पारलौकिक सहित आत्माको निवेदन करकें आदरपूर्वक गुरुकी आज्ञा सदाँ करतो रहै, तापीछे गुरु जा प्रकार भगवत्सेवा करनों सिखावे ताके अनुसार भगवत्सेवा करनों योग्यहै ॥ २३८ ॥ तहाँ श्रीवल्लभाचार्यजी कलियुगकूँ बलिष्ठ देखके आगें होयवेवारे मनुष्यनमें गुरुपणेके लक्षणको अभाव विचारके अपनेही स्वरूपमें (पुष्टिमार्ग) अर्थात (पोषणं तदनुग्रहः) या वाक्यानुसार अनुग्रह विशिष्ट भक्तिमार्गके गुरुत्वको स्थापन करतेभये सेवाको प्रकार दिखावैं हैं (तद्भाव इति) जा देशमें भक्तिमार्गके विरोधी नहिं रहते होयँ ऐसे कोई देशमें स्थित होयकें भगवानकी मूर्तिकी सेवा करें अर्थात् भगवान्की स्वरूपमें ये मेरे स्वामीहैं। याप्रकारको भाव राखकें आपुनकूँ भगवान्को सहज दास समुझकें दासके कार्यकूँ करतोरहै यहाँ कथाश्रवण भगवान्के प्रसन्नताकेलिये धर्म अर्थ आदिकनको आचरण आदि धर्मनको पहली वर्णन नहिं करकें प्रथम मूर्तिसेवाको प्रकार दिखायोहै ताको कारण यह है कि, ये सब साधननमें मुख्य साधनहै क्योंकि मूर्तिमें कियोभयो वस्त्र भूषण नैवेद्यादिक उपचार साक्षात् भगवानकूँ अङ्गीकार करायो समुझो जावे हैं तहाँ तीनप्रकारकरकें मूर्त्तिमें भगवत्त्वको निरूपण करेहैं। प्रथम तो सर्व पदार्थ भगवद्रूपहैं तो मूर्तिभी भगवद्रूपहै विशेषता इतनी अधिकहै जैसे प्रल्हादजी आदि भक्तनकेलिये स्तंभादिकनमेंसों आप प्रकट भयेहैं ऐसेंही सेवाकरवेवारे भक्तके उद्धारार्थ आप मृत्तिका आदिकनसों

मूर्त्तिरूपकरकें प्रकट होवे हैं जैसें इन्द्रद्युम्नके उद्धारकरवेकेलिये दारुब्रह्मरूप श्रीजगन्नाथरायजी प्रकट भये तक्षकद्वारा भी जैसी इच्छा हती वैसोही आकार भगवदाविष्ट चन्दनके काष्ठको प्रकट भयो यह बात जगन्नाथ माहात्म्यमें प्रसिद्धहै ऐसेंही मूर्त्ति सिद्ध होयवेमें जीवकी कृतिद्वारा भी जैसें स्वरूपसों प्रकट होयवेकी इच्छाहोयहै वैसेंही स्वरूपको प्रादुर्भाव होयहै भक्तिमार्गानुसारसों तो भगवान्का स्वरूप मूर्त्तिमें स्थितहै यह निश्चय राखनों ॥ २३९ ॥ जहाँ मूर्त्तिके श्रीहस्तचरणारविन्दहैं वहाँही भगवान्के भी हस्तचरणादिकहैं मूर्तिके सब अवयवनमें भगवदवयव हैं क्योंकि भगवान्है सो साकर व्यापक ब्रह्मरूपहै तासों कडा किरीट कुंडलादिक उपचार भगवान्के अवयवनमें ही साक्षात् अङ्गीकृत होवे हैं उपासनामार्गके अनुसार मंत्रसहित न्यासपूर्वक पूजाभी मूर्त्तिमेंही श्रेष्ठ होय सकेहै तासों ज्ञानी भक्त तथा उपासना मार्गीय इन तीनोकूँ ही मूर्त्तिपूजन करनों योग्यहै और देवतानकी मूर्त्तिमें भी पूजन होयसकेहै परन्तु वहाँ दो व्यवधान होवेहैं भगवान्को अंश अक्षर पुरुष वाके अंश अवतार तथा अन्य देवता उनको आवेश लोहके गोलामें जैसें अग्निको आवेश होय तैसें मूर्त्तिमें आवेश होय, श्रीकृष्णकी मूर्तिमें अंशी मूलरूप परब्रह्म पुरुषोत्तमको ही आवेश होय है, तासों श्रीकृष्णकीही प्रेमसहित सेवा करनो राजाधिराजका जाप्रकार उपचार कियोजाय तारीतिसों सेवा करनीं, जितनें पदार्थ प्राप्त होयँ उनसों (उपचार) उचित सत्कार करतो रहै ॥ २४० ॥ भक्तिमार्गके अनुसारही भगवत्सत्कार करनों योग्यहै । जैसें अत्यन्त सुंदरता प्रकट होय ऐसी रीतिसों प्रेम करके वस्त्र आभूषण धारण करावनों प्रेमसहित सेवा करवेसों चित्तको उद्वेग मिटेहै प्रथम मन्दिरकी सोहनी मन्दिर वस्त्र छिड-

काव माँडना आदिकनसों सेवा करनी याप्रकार चंदवा पिछवाई सिंहासन शैय्याजी आदि पदार्थनकी सेवाभी प्रथमही कर राखनी तासों समयपें बिलम्ब नहिं होय ॥ २४१ ॥

भार्यादिरनुकूलश्चेत् कारयेत भगवत्क्रियाम्। उदासीने स्वयं कार्यं प्रतिकूले गृहं त्यजेत् ॥ ॥ २४२ ॥ तत्त्यागे दूषणं नास्ति यतो विष्णुपराङ्मुखाः। सर्वथा वृत्तिहीनश्चेदेकं यामं हरौ नयेत॥ २४३ ॥ पठेच्च नियमं कृत्वा श्रीभागवतमादरात्। सर्वं सहेत पुरुषं सर्वेषां कृष्णभावनात्॥ २४४॥ वैराग्यं परितोषं च सर्वथा न परित्यजेत् । एतद्देहावसाने तु कृतार्थः स्यान्न संशयः ॥ २४५ ॥ इति निश्चित्य मनसा कृष्णं परिचरेत्सदा। सर्वापेक्षां परित्यज्य दृढं कृत्वा मनःस्थिरम् ॥ २४६ ॥ दृढविश्वासतो युक्तया यथा सिद्धयेत्तथाचरेत। वृथालापक्रियाध्यानं सर्वथैव परित्यजेत॥२४७॥ यद्यदिष्टतमं लोके यच्चातिप्रियमात्मनः। येन स्यान्निर्वृत्तिश्चित्ते तत्कृष्णे साधयेद्ध्रुवम् ॥ २४८॥

तत्त्वदीपप्रकाशः।

एवं प्रवृत्तस्य भार्यादीनां विनियोगमाह ॥ भार्यादिरनुकूलश्चेदिति ॥ गृहं भार्यादिकं विष्णुपराङ्मुखा भार्यादयः। अन्यथा परित्यागे

दोष एव। अनेनावैष्णवैः सहास्मिन्मार्गे नस्थातव्यमित्युक्तं भवति। जीवने प्रकारमाह ॥ **सर्वथा वृत्तिहीनश्चेदिति** ॥ याममात्रं भगवत्सेवां विधाय पश्चादनिषिद्धेनोपायेन जीवनं संपादयेत् । पारंपर्यजीवनमपि निषिद्धं चेत्तदा त्यक्तव्यं "अचौराणामपापानामिति" वचनात् ॥२४२॥२४३॥ जीविकायां चित्तं व्यापृतं पुनर्भगवति योजनार्थमुपायमाह ॥ **पठेच्च नियमं कृत्वेति** ॥ अनेनाल्पबहिर्मुखतायामपि भागवतमनुसंधेयमित्युपायः कथितः ॥ एतद्भजनमांतरं मुख्यम् । तत्र यथा बहिर्भजने प्रतिकूलपरित्यागस्तथांतरभजनेऽपि प्रतिकूलपरित्यागमाह ॥ **सर्वं सहेतेति** ॥ यथा गृहमव्याकुलं बहिः पूजायां कर्तव्यं तथैव हृदयमव्याकुलं विधेयम् । " तथारिभिर्न व्यथते शिलीमुखैरिति" वाक्यात् । दुष्टानां वचनेन क्षोभो भवति । तत्र तानि वचनानि हि तत्वेन ग्राह्याणि। अत्यन्तं विरुद्धानि चेत्प्रकारभेदेन तत्रोपपत्तिमाह ॥ **कृष्णभावनादिति** ॥ कृष्णएवास्मानुपदिशति बहिर्मुखतया नस्थातव्यमित्यर्थः ॥ ॥ २४४ ॥ उत्तमगुरुहृद्याशिक्षा चानुसंधेयेत्याह ॥ **वैराग्यमिति** ॥ एवं सहने हेतुभूतं विचारमाह ॥ **एतदिति** ॥ भृतकः समयमिव देहावसानमेव चिंतयेत् । एकापि परिचर्या सकृत् कृता परमपुरुषार्थदेति परं विद्यमानदेहस्य निष्कृत्यर्थं सदा परिचरेत् । ननु क्व देशः कथं वा परिचरेदित्याकांक्षायामाह ॥ **सर्वापेक्षामिति** ॥ सापेक्षमसमर्थं भवतीतिमूलं भगवदर्थं स्थापयित्वा साधनाभावाद्वैकल्यं जातमपि निवार्य चित्तं भगवत्येव स्थिरीकृत्य यथा पुत्रः पितरि मातरि विश्वासं करोति तथा दृढविश्वासो लौकिकयुक्त्या यथैव पूजा सिद्ध्यति तथैव कर्तव्यमिति लौकिकयुक्तिरेवोपदिष्टा । तद्युक्तिसिद्ध्यर्थं वृथालापादिकं प्राप्तं निषेधति ॥ **वृथालापेति** ॥ कायवाङ्मनसां स्वभावतः प्रवृत्तां क्रियां त्यजेत् । भगवत्सेवायामपि क्लिष्टं न समर्पयेत् । तत् क्लिष्टं त्रिविधं लोकक्लिष्टं, आत्मक्लिष्टं, चित्तक्लिष्टं चेति । अतोऽक्लिष्टं निरूप्यते । लोके यद्यदिष्ट-

तमम्, आम्रद्राक्षादि आत्मनोऽत्यन्तं प्रियं दुग्धादि सन्मार्गोपार्जितं नान्येषां भागरूपम् । चिरकालमनोरथचिंतितम्, अंतःकरणाप्रियम् । तेनैव चित्तनिर्वृतिः । इतरनिषेधार्थमेतदुक्तम् ॥ २४५–२४८ ॥

आवरणभंगः ।

एवं प्रवृत्तस्येत्यादि ॥ ॥ इदं च सहायसापेक्षमिति ते यादृशा अपेक्षितास्तान् वक्तुं भार्यादिविनियोगमाहेत्यर्थः ॥ एतेन दारादीनां निवेदनोत्तरं विनियोगः प्रदर्शितः । निवेदनाभावेऽपि प्रातिकूल्यस्य संभवादिति । तथा मदर्थे धर्मकामार्थानाचरन्निति ।"मदर्थेऽर्थपरित्यागो भोगस्य च सुखस्यच" इति वाक्यं च समर्थितं ज्ञेयं, ते चेदनुकूलास्तदा भगवत्येव विनियोज्या न स्वार्थमिति । औदासीन्ये तु निर्बंधेन तेषां क्लेशसंभवात्क्लिष्टस्य च भगवतानंगीकारात् स्वयमेव कुर्यात् । प्रातिकूल्ये तु त एव त्याज्या नतु स्वयं गच्छेदिति बोधयितुं गृहपदार्थमाहुः॥भार्यादिकमिति ॥तथा च " नानिर्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिद " इति मध्यमाधिकारात्तथेति भावः । ननु"वृद्धौ च मातापितरौ साध्वीभार्या शिशुः सुतः । अप्यन्यायशतं कृत्वा भर्तव्या मनुरब्रवीत्"इति स्मृतेस्तत्त्यागोऽनुचितः । मध्यमाधिकारे दोषस्यापि संभवानादिति शंकायां तत्त्यागे दूषणं नास्तीत्यर्द्धं विवृण्वन्त आहुः ॥ विष्णुपराङ्मुखा इत्यादि ॥ ततो दुःसंगमुत्सृज्येत्यादौ दुःसंगत्यागस्यांगत्वेनोपदेशात् स्मृतेरबुद्धिपरत्वात्साध्यादिपदयोगेनाबहिर्मुखत्यागपरत्वाद्वा तथेति भावः । एतदेवाहुः ॥ अन्यथेत्यादिना ॥ ॥"एवं कृष्णात्मनाथेषु मनुष्येषु च सौहृदम्"इतिवाक्यात् तथात्वेपि त्यागे तथेतिभावः ॥ एवं द्रव्यवतां सदा भजनप्रकार उक्तः । अन्येषां सर्वदा निर्वाहः कथं स्यादित्याकांक्षायामाहुः॥ जीवन इत्यादि ॥ ॥ याममात्रेत्यादि ॥ तथाच योऽर्चकः स एवं कुर्यात् । शेषास्तु पूर्ववदेव कुर्युः । अयमर्थः ।"देवोऽसुरो मनुष्यो वेति, सर्वेऽधिकारिणो ह्यत्र विष्णुभक्तौ यथा नृपेति"वाक्याभ्यां किरातहूणेति वाक्याच्च भगवद्भजनादौ सर्वेषामधिकारेऽप्याहारे शुद्धौ सत्वशुद्धिरिति श्रुत्याहारशुद्धये स्ववृत्त्यान्नसंपादनस्यावश्यकतया वृत्तिरपि संकोच्य " प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदम् । अन्याभ्यामेव जीवेत " इत्यादिषु तथादर्शनात् । सप्तमस्कंधे सर्वेषां वृत्तिं वदता नारदेन "वृत्तिः संकरजातीनां तत्तत्कुलकृता भवेत् । अचौराणामपापानामंत्यजातेऽवसायिनाम् " इत्युक्त्वाग्रे नैर्गुण्यकथनादिति भावः । इदं यथातथा वृत्तिवादे व्युत्पादितमस्माभिः । नन्वेवं जीवनोपाये क्रियमाणे पुनर्बाहिर्मुख्यापत्तिरिति किंकार्यमित्यत आहुः ॥ जीविके-त्यादि । व्यापृत इति ॥ ॥ तस्येति शेषः । श्रीभागवतपाठस्यैव सहकारियमुना-

सेवामें प्रीति नहिं होय तो उनसों सेवा नहीं करवावे आप स्वयंही सब सेवा करै क्योंकि आग्रह करकें स्त्रीपुत्रादिकनसों सेवा करवायवेमें उनकूँ क्लेश होयँ तो क्लेशसहित सेवाको भगवान् अङ्गीकार नहिं करेंहै यदि स्त्रीपुत्रादिक (प्रतिकूल) अर्थात् सेवाके विरोधी होयँ आपुनकों भी सेवा नहिं करवे देतेहोयँ तो उनकूँ छोडदेनें सेवासों प्रतिकूलभये विना स्त्रीपुत्रादिकनके त्यागमें दोषहै स्त्रीपुत्रादिकनको ही नाम यहाँ गृहहै (गृहिणी गृहमुच्यते) उनहीको त्यागहै घरको त्याग नहिंहै घर छोडेसों सेवा नहिं बनसके है ॥ २४२ ॥ (ततो दुःसङ्गमुत्सृज्य सत्सु सज्जेत बुद्धिमान्) इयादिप्रमाणानुसार भगवानसों बहिर्मुख स्त्रीपुत्रादिकनके त्यागमें दोष नहिं है, याकरके अवैष्णवके साथ नहिं बैठनो यह बातभी जताई; जीवननिर्वाहको प्रकार दिखावैहै सर्वथा कोई प्रकारकी जीविका नहिं होय तो पहरभर भगवत्सेवाकरके पीछे अनिषिद्ध उपाय करके जीवन करै, परंपरा करके भी जो निषिद्ध वृत्ति चली आती होय तो वाकूँ भी छोडदेनो योग्य है, यद्यपि भक्तिमें सब जीवनकूँही अधिकारहै परन्तु आहारकी शुद्धिभयेसों सत्वशुद्धिनाम अन्तःकरणशुद्धि होयहै तासों शुद्धवृत्तिसों जीविका करनी ॥ २४३ ॥ जिविकाके कार्यमें लगेभये चित्तको पीछो भगवान्में लगायवेकेलिये उपाय बतावै है (पठेच्चेति) नियमपूर्वक श्रीभागवतको पाठकरनो थोडीभी बहिर्मुखता मालुम होय तो श्रीभागवतको पाठ करनो यह ही भगवान्में चित्त लगायवेको उपायहै, यह सेवा (आन्तरीय) मुख्य है अर्थात् जैसे श्रीगंगाजीको प्रवाह समुद्रमें सर्वदा अविच्छिन्न मिल्योरहेहै या प्रकार प्रेमप्लुत होयकें सर्वदा श्रीकृष्णमें मनकी अविच्छिन्नगति राखनों मानसी

सेवाहै यह मुख्यहै, * जैसे बाहिर देहसों सेवाकरवेमें सेवाविरोधी पदार्थको त्यागहै ऐसे भीतर हृदयमें सेवा करवेमें भी जो विरोधी होय उनके त्यागको वर्णन करेहै (सर्वं सहेतेति) जैसे बाहिर सेवाकरवेमें गृहकी व्याकुलता दूरकरनी ऐसेंही भीतर सेवा करवेकेलिये हृदयकी व्याकुलता दूरकरनी । जैसो कष्ट शत्रुके बाण लागवेसों नाहिं होयहै ऐसो दुष्टनके बचनकरकें हृदयमें क्षोभ होयहै । यदि उनके बचनसों व्याकुलहृदय होय तो भीतरकी सेवा नाहिं बनसके तासों दुष्टबचनको अपने हितकारी समुझकें सुनलेने यदि वे बचन अत्यन्त विरुद्ध होयँ तो श्रीकृष्णही मोसों आज्ञाकरे हैं कि बहिर्मुखहोयके नाहिं रहनो ऐसें समुझलेनो परन्तु हृदयमें क्षोभ नाहिं होयवेदेनों ॥ २४४ ॥ उत्तम गुरुकी जे दोय शिक्षा उनकूँ याद राखनों वैराग्य और संतोष कभी नाहिं छोडने आसक्ति राखवेसों कपोत जैसे स्त्रीपुत्रादिसहित जालमें फँसगयो ऐसे आसक्ति राखवेसों गृहस्थी फँसजावे है । तासों वैराग्य राखनों सन्तोष राखवेसों पिंगला वेश्या कान्ताशा छोडकें सुखपूर्वक सोयगई तासों संतोष राखनों कभी नहीं छोडनो ऐसे सहनकरवेको कारण यहहै कि जैसें लोकमें सेवक स्वामीकी सेवा करतेसमय यह दृढ विश्वास राखेहै कि सेवाके अन्तमें फल अवश्य मिलेगो तासों

---

* या प्रसंगपें दृष्टान्तको वर्णन करे हैं एक वैष्णव ब्राह्मण सकुटुंब सेवा करतो हतो अपने पुत्रकी बहूकूँ उन्मत्त समुझकें वाकूँ आयेगये भक्तनकी सेवाकरवे धरदीनीं भीतरकी सेवा कछु वासों करवावे नहिं थोडे दिनमें भक्तनकी सेवासों वाके ऊपर भगवान्की कृपा होयगई एकदिन वह ब्राह्मण ठाकुरजीके शृंगारकरते मनमें विचार करवेलग्यो अभी शीघ्र राजभोगकरकें जूतीं पहरवे जाऊँगो वाही समय एक वैष्णवनें आयकें वा ब्राह्मण वैष्णवकूं हेला दियो तब वह पुत्रकी बहू बोली कि श्वशुर यहाँ नाहिं हैं जूतीपहरवे गये हैं यह सुनकें ब्राह्मण वैष्णव पुत्रकी बहूकूं धन्यवाद देवेलग्यो और वाके ऊपर अधिक भगवत्कृपा जानकें सब सेवा वासों करवायवेलग्यो आपभी, भगवान्में एकाग्र चित्त राखकें सेवा करतो भयो ॥

कब सेवा पूरी होय कब फल मिलै ऐसेही (कालं प्रतीक्षन्विमदो विमत्सरः) इत्यादिवाक्यानुसार नारदजी अपनी मृत्युकी बाट देखते भगवत्स्मरण कीर्तनपरायण रहे आये हते. देहान्तभये पीछे भगवत्पार्षद होयगये याप्रकारही देहके अन्तमें अवश्य मैं- कृतार्थ होऊँगो ऐसो दृढनिश्चय राखकें जहाँतक बनसकें तहाँतां- ई बाह्य सेवा तनुजा वित्तजा तथा आन्तर सेवा मानसीकूँ करतो रहै यह सब ऊपर कह्यो उपदेश हीनाधिकारी तथा मध्यमाधिका- रीकेलिये है, उत्तमाधिकारीकों तो भगवत्साक्षात्कार होयवेसों सेवामें आनन्द प्रकट होजावैहै फिर वह (विनामत्सेवनं जनाः) मुक्तिकूँ नहिं चाहै है सेवाकूं स्वतः पुरुषार्थरूप मानकें वाके आन- न्दमें निमग्नभयो सर्वदा सेवाही करतो रहैहै तहाँ मन्द मध्यमाधि- कारी यह शंका करे कि सर्वदा हमसों सेवा नहिं बनसके ताकों यह उत्तरहै कि एकवक्त करीभई प्रेम सहित एकभी सेवा परमपुरु- षार्थ देवेवारी है श्रीभागवतमें लिखेहै (सकृदिष्ट्वादिपुरुषं पुरुषो याति साम्यताम्) अर्थ—एकबेर पूजनकरकें पुरुष भगवान्‌के स- मानताकूँ प्राप्तहोजावै है। तहाँ एक सेवाकरकेही कृतार्थता होय- जावैगी सर्वदा सेवा क्यों करनो ऐसी शंका तो नहिं करनी क्यों- कि बाहिरकी सेवामें देहको जीवके ऊपर बडो उपकारहै तासों वाके बदलेमें जीवकूँ भी देहसों सेवा करायके देहकूँ कृतार्थ कर- नों योग्यहै नित्यप्रलयपक्षके अनुसार देह क्षणक्षणमें और होतीच- लीजावैहै उन क्षणक्षणमें उत्पन्न होयवेवारे देहनकूँ कृतार्थकरवेके लिये कोई क्षण सेवाविना नहिं रहनोंचाहिये तथा एक दंडादिधा- रण करनों जैसें ज्ञानी देहके निश्चय करायवेवारेहै तैसें भक्तदेह- की निश्चयकरायवेवारी सेवाहै (अथवा वैधोपयोगोर्वैरितस्य भूयो वैधोपयोगः प्रतिपत्तिरुच्यते) तहाँ कोन देशमें कैसे परिचर्या

करनों ऐसी आकांक्षा भई तहाँ आज्ञाकरै है (सर्वापेक्षामिति)सब अपेक्षानकूँ छोडकरके अर्थात् भगवान्के अर्थ स्थापनकरके मन-कूँ भगवान्के अर्थ अर्पणकरके सेवाके साहित्यमें अशक्यतासों कोई पदार्थकी हीनता देखकरके हृदयमें उत्पन्नभई जो विकलता वाकूँ निवारणकरकें अर्थात् मातापिता पुत्रको हितही करेहै ऐसे भगवान् मेरो हितही करेंगे ऐसो दृढ बिश्वासकरके चित्तकूँ भगवान्-मेंही स्थिरकरकें जैसी रीतिसों सेवा सिद्ध होय वैसेही बरताव कर-नों (मदर्थेष्वङ्गचेष्टा च) या वाक्यमें मेरेही अर्थ भक्तनकूँ अङ्ग-नकी चेष्टा करनींचाहिये यह जो भगवान्नें आज्ञाकीनीहै यासों सेवाको ही श्रीमुखसों उपदेश दीनो है चित्तकों एकाग्र राखें बिना कीनी भई सेवा आधिदैविकी नहिं होय तासों चित्तकूँ एकाग्र राखनो जितनेमें सेवा साधन सिद्ध होय उतनोही उपाय-चातुर्य करनो अधिक नहिं करनो, सेवार्थ लौकिक उपाय करवेमें बहिर्मुखताभी नहिं होय है । लौकिक उपायादि युक्तिसिद्ध्यर्थ देह वाणी मन इनकी वृथा चेष्टा नहिं करनी, अर्थात् वाणीसों वृथा भाषण नहिं करनो, शरीरसों वृथा चेष्टा नहिं करनी, मनमें वृथा लौकिक पदार्थनको ध्यान नहिं करनों क्लेशरहित सन्मार्गकरके उपार्जित साधनसों सेवा करनी अन्याय करकें क्लेशपूर्वक उपार्जित पदार्थकूँ भगवान्के अर्थ अर्पण नहिं करनों क्लिष्ट पदार्थ तीन प्रकारको होवै है । लोक जामें क्लेश पावें, आत्मा जामें क्लेश पावें, चित्त जामें क्लेश पावें ऐसो पदार्थ भगवा-न्के अर्थ अर्पण नहिं करनों ॥ २४५–२४७ ॥ आगें अक्लिष्ट पदार्थको निरूण करे हैं (यद्यदिष्टतमं लोके यच्चाति प्रियमात्मनः) यह आधो श्लोक श्रीभागवत एकादशस्कन्धोक्त भगवद्वाक्य है, अर्थ–लोकमें जो इष्टतम अर्थात् अत्यन्त अभिलाषाके योग्य

जो वस्तु होय जैसें दाख आम्रफल केला आदि तथा जो वस्तु आत्माकों अत्यन्त प्यारी होय जैसें दुग्ध नवनीत आदिक ये वस्तु भी सन्मार्गकरकें उपार्जित करेगये होयँ अन्याय चोरी आदि-करकें नहिं लायेगये होंय तथा कोईको उन वस्तुनमें हिस्सा नाहिं होय तथा जा पदार्थको बहुनकालमों मनोरथ होयरहो होय जापदार्थके प्राप्तहोयवेसों चित्तमें आनन्द आवे ऐसें पदार्थनकूँ भगवानके अर्पण करनों इनमों इतर पदार्थनको निषेध करवे-केलिये यह कथन कियो है ॥ २४८ ॥

स्वयं परिचरेद्भक्त्या वस्त्रप्रक्षालनादिभिः । एककालं द्विकालं वा त्रिकालं वापि पूजयेत ॥ २४९ ॥ स्वधर्म्माचरणं शक्त्या विधर्माच्च निवर्त्तनम । इन्द्रियाश्वविनिग्राहः सर्वथा न त्यजेत्त्रयम् ॥ २५० ॥

तत्त्वदीपप्रकाशः ।

सेवा मुख्या न पूजेति मंत्रमात्रपूजापरो न भवेदित्याशयेनाह ॥ **स्वयम्परिचरेदिति** ॥ धर्मार्थतां व्यावर्तयति ॥ **भक्त्येति** ॥ वस्त्रप्र-क्षालनमतिबहिरङ्गमिति तद्ग्रहणम् । प्रधानावृत्ताविंगान्यावर्तन्त इति प्रधानावृत्तिमाह ॥ **एककालमिति** ॥ अनेन बहुकालमपि पूजनं नि-रूपितम् ॥ २४९ ॥ अत्र नित्यकर्मादीनामंगत्वमाह ॥ **स्वधर्माचर-णमिति** ॥ स्वधर्म्मा अग्निहोत्रादयो, विधर्मा निषिद्धाः ॥ **नात्र शक्त्ये-ति** ॥ सर्वथा निषिद्धं न कर्तव्यं इन्द्रियाण्येवाश्वा एतन्निग्रह इष्टदे-शप्रापकः । एतत्त्रयं क्रीडार्थमपि न त्यजेत् ॥ २५० ॥

आवरणभंगः ।

ननु किमर्थमेतावान्प्रयासः समंत्रेण मानसपूजाकरणे सुखेन सिद्धिरिति चे-त्तत्राहुः ॥ सेवेत्यादि ॥ आदरः परिचर्यायामित्यादि ॥ पृथगादरोपदेशात् "विनाम-

त्सेवनं ...जना " इति भक्तिलक्षणवाक्येऽप्युपदेशात् ।"सेवानुरक्तमनसामभवोपि फल्गुरिति " फलाविक्रयोपदेशाच्च सेवैव मुख्येत्यर्थः ॥ एवं चात्र साधनेषूपदिश्यमाना पूजापि समीपे स्थित्वा यथायोग्यकरणरूपत्वात्प्रधानसेवात्वेनैव विवक्षिता नतु वेदतंत्राद्युक्तपूजा प्रकारभेदात्फलभेदाच्च पूजाया भक्तित्वाभावादिति भक्तिहंसे निर्णयात् । नच प्रकारभेदादप्रामाणिकत्वं शंक्यम् ॥ एकादशोनविंशे द्वादशाध्यायोक्तां भक्तिं हृदि कृत्य"श्रद्धामृतकथायां मे" इत्यादिना भक्तिपरमकारणकथने"एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनामिति" साधनदशायामपि आत्मनिवेदनपूर्वकत्वकथनात् ।"यदात्मन्यर्पितं शांतं चित्तं सत्योपबृंहितम् । धर्मं ज्ञानं सवैराग्यमैश्वर्यं चाभिपद्यते ॥ यदर्पितं तद्विकल्प इन्द्रियैः परिधावति । रजस्वलं चासन्निष्ठं चित्तं विद्धि विपर्ययम् ॥ " इति द्वाभ्यां मनस आत्मनि भगवत्यर्पणे गुणस्यात्मविकल्पेष्वर्पणे दोषस्य" धर्मो मद्भक्तिकृत्प्रोक्त" इति तृतीये धर्मादिचतुष्कस्वरूपस्य च कथनेन प्रकारांतराणां विक्षेपकतायाश्चैकाग्र्यस्यैवं सेवोपयोग्यवांतरफलोपधायकतायाश्च सूचनात्सल्लक्षणे " आज्ञायैवं गुणान्दोषान्मयादिष्टानपि स्वकान् । धर्मान्संसत्ज्य यः सर्वान्मां भजेत स सत्तमः ॥ " इति सर्वधर्मत्यागपूर्वकभजनकर्तुः सत्तमत्वोक्तेश्च वैधप्रकारातिरिक्तप्रकारस्यैव विवक्षितत्वेनाप्रामाणिकत्वाभावात् । आश्रयेतेत्यनुवृत्तौ"देवासुरमनुष्येषु मद्भक्ताचरितानि च "इति भक्ताचरणश्रवणस्याज्ञापनात्तथाकृतेरत्युत्कृष्टत्वात्तस्मात्त्वमुद्धवोत्सृज्यनोदनामिति जिज्ञासायां संप्रवृत्तौ नाद्रियेत्कर्मचोदनामिति वाक्याच्च तस्यैव प्रत्युतानादरणीयत्वाच्च नच भक्त्या संजातया भक्त्येत्यत्र नवविधाया अपि भक्तिकारणताबोधनात्तन्मध्यपातिनार्चनस्य मंत्रन्यासादिपूर्वकत्वेऽपि तथात्वानपायात्पञ्चरात्रादिभगवच्छास्त्रसिद्धत्त्वाज्जगन्नाथादिषु तदादरदर्शनाच्च तत्प्रकारत्यागोनुचित इति शंक्यं " भक्तियोगःपुरैवोक्त " इत्यत्र व्रजस्थभक्तेरेव मुख्यतयाभि ।हितत्वात्तस्याश्चावैधत्वाद्भगवतापि तस्मात्त्वमुद्धवोत्सृज्येति श्लोकद्वयोक्तविर ।रत्वस्यात्र बोधनायैव पुनश्च कथयिष्यामीति प्रतिज्ञायां पुनः पदकथनात् । क्रियायोगांतर्गतार्चनप्रशंसकस्यैतद्धि सर्ववर्णानामिति वाक्यस्योत्तरतया नह्यंतोनंतपारस्येति कथनेनादरसूचनाच्च भगवतैवोपेक्षितत्वेनानुचितत्वात् । नच तर्हि वैदिकप्रकार एव ग्राह्य इति शंक्यम् । "नाहं वेदैरिति " गीतावाक्ये तप आदीनां पृथगुक्त्या वेदैरिति बहुवचनेन तदितरयावत्साधनसंग्रहात्तेषां सर्वेषां निवृत्तावर्चनस्यापि तथात्वात्तत्प्रकारत्यागस्यापि प्राप्तेः । तस्मादेतत्प्रकारकभजनातिरिक्त एव स्थले तस्यावश्यकत्वं नात्र ॥ ये तु घंटाशंखनादाधिवासनादयस्तेऽपि भक्ताचरितत्वादेव नतु तंत्राद्युक्तत्वेनेति न कोपि शंकालेश इति दिक् ।

अत्रैतद्बोध्यम् । शुद्धं कृष्णं भजेदिति सिद्धान्तात्शुद्धिः स्वस्याऽन्येषां चापेक्षिता सा च लोके दुर्घटेति भगवता आत्मनिवेदनं पूर्वमुक्तम् । तत्र "इष्टं दत्तं तपो जप्तं वित्तं यच्चात्मनः प्रियम् । दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनम्" इति विधिपूर्वकमेव सिद्धं योगेश्वरवाक्येषु । एतदेव साक्षाद्भगवतोक्तं सिद्धान्तरहस्ये ब्रह्मसंबन्धकरणादित्यादिना, तेन समर्पणोत्तरं सर्वत्र दोषाभावात्प्रतीयमानानां चाभासमात्रत्वात् गंगाजलन्यायेन न्यग्भावाच्चाद्दृष्टेर्वार्थैः सहायैश्च सेवा कार्येति तादृश्यैवात्र मुख्यतयोपदिश्यत इति । एवं च पूर्वोक्तरीतिभिरांतरशोधनमपि मंदिरसंमार्जनरूपमेव । एवमेवात्रत्यमन्यदप्यवगंतव्यमिति दिक् । एवं सेवामुपदिश्य तदेकदेशभूतायाः पूजाया अपि 'परिनिष्ठा तु पूजायामिति' वाक्यादावश्यकत्वमिति तस्याः कानिचित्साधनान्युपदेष्टुं प्रधानाङ्गान्याह ॥ ॥ अंगानीति ॥ वैशेषिकानि शंखचक्रधारणादीनि ॥ अनेनेत्यादि ॥ एवं च बहुकालपूजने सकृत्कृतेनांगेनैवोपकार इत्यपि सिद्ध्यति ॥२४१॥ अत्रेत्यादि ॥ ॥ नन्वेवं सर्वदाकरणे वैदिकादिधर्माणां कालबाधस्तथा च प्रत्यवाय इत्याकांक्षायां तदभावाय तेषामंगत्वमाहेत्यर्थः ॥ तथाच इष्टं दत्तं हुतमिति । "सन्ध्योपास्त्यादिकर्माणि विधिना नोदितानि मे ॥ पूजान्तैः कल्पयेत्सम्यक् संकल्पः कर्मपावन" इति 'धर्मः स्वनुष्ठित' इति । "धर्मो मद्भक्तिकृत्प्रोक्त" इत्यादिवाक्यैस्तेषामंगत्वात्तत्कर्मकुर्वतामिति वाक्यात्प्रत्यवायासंभवः । मंमंत्रेप्यहं त्वां सर्वपापेभ्यो मोक्षयिष्यामीति भगवद्वाक्याच्च भगवानेव रक्षितेति न काचिच्चिंतेति भावः । स्वधर्मान् व्याकुर्न्ति ॥ स्वधर्मा अग्निहोत्रादय इति ॥ ॥ आदिपदेन तत्तद्वर्णाश्रमधर्मा विवक्षिताः एकादशस्कन्धे तत्तद्वर्णाश्रमधर्मानुक्त्वा "एतत्तेऽभिहितं साधो भवान्पृच्छति यच्च माम् । यथा स्वधर्मसंयुक्तो भक्तो मां समियात्परम्" इति भगवद्वाक्यात् । अत्र शुश्रूषणं द्विजगवां देवानां चाप्यमाययेत्युक्तः शूद्रस्य वर्णधर्मो द्विगुणीभूयोपयुज्यते । यदि गुर्वादिसेवात्मको भवतीति बोध्यं विष्णुपुराणे शूद्रस्य धन्यतोपदेशात् । एवमनिषिद्धः स्त्रीधर्मोऽपि तथात्वाद्बोध्यः । तत्करणे विशेषो मूल उक्तः स्वधर्माचरणं शक्त्येति । इदमर्द्धं तृतीयस्कन्धाष्टाविंशाध्यायस्थम् । तत्रैवं सुबोधिन्यां व्याख्यातं स्वधर्माणां देहधर्माणां वर्णाश्रमाधिकारसिद्धानामाचरणं यथाशक्त्या कर्तव्यम् । नतु शक्तावपि संकोचः । शास्त्रमपि "यच्छक्नुयात्तत्कुर्यादिति" । तेन ते तथा कर्तव्या इत्यर्थः । एवमेकमंगं निरूप्य विहिताकरण इव निषिद्धकरणेऽपि भगवानेव रक्षक इति तत्करणे को दोष इति शंकानिवृत्त्यर्थं विधर्माच्च निवर्तनमिति द्वितीयं निरूपयंतो विधर्माणां स्वरूपमाहुः ॥ विधर्मा निषिद्धा इति ॥ ॥ तेऽपि तत्रैव विवृताः । 'धर्मबाधो विधर्मः स्यात' यस्मिन् क्रियमाणे

स्वस्य धर्मस्य बाधो भवति स यथाधिकारमवसेयः । यावद्देहे अहन्ता तावद्वर्णाश्रमधर्मा एव स्वधर्माः भगवद्धर्मादयोऽपि विधर्माः परधर्मा वा यदा पुनरात्मानं जीवं भिन्नं मन्यते संघातव्यतिरिक्तं तदा दास्यं स्वधर्म अन्ये वर्णाश्रमादयोऽपि परधर्माः । यदा पुनर्भगवद्भावं प्राप्तस्तदा अलौकिकधर्मा ऋषभादिषु गोचर्यादयः स्वधर्मा अन्ये परधर्मा इति । एवं च निषिद्धा इत्यनेन धर्मबाधरूपाः श्रुत्यादिनिषिद्धाः दास्यविरुद्धाः श्रुत्याद्युक्ताश्च परिगृहीताः । विधर्माश्चेति चकारेण परधर्मादयश्चत्वारः संगृहीताः । ते च सप्तमस्कन्ध उक्ताः "विधर्मः परधर्मश्च आभास उपमाच्छलः । अधर्मशाखाः पञ्चेमा धर्मज्ञोऽधर्मवत्त्यजेत्" इति । एतल्लक्षणमपि तत्रैव । " धर्मबाधो विधर्मः स्यात्परधर्मोऽन्यचोदितः । उपधर्मस्तु पाषंडो दंभो वा शब्दभिच्छलः । यस्त्विच्छया कृतः पुंभिराभासो ह्याश्रमात्पृथक् ॥ " इति । ते च विवृताः श्रीधरीये । धर्मबुद्ध्यापि यस्मिन् क्रियमाणे स्वधर्मो बाध्येत स विधर्मः, अन्यस्य चोदितोऽन्यस्य परधर्मः, यथा ब्राह्मणस्य धर्मः क्षत्रियादेः परधर्मः । उपमेति व्याचष्टे ॥ उपधर्म इति ॥ स च पाषंडः दंभो वा । शब्दस्य भित् भेदोऽन्यथाव्याख्यानं यस्मिन् स छलः, यथा दशावरान् भोजयेदित्युक्ते दशभ्योअवरानिति । शब्दभृदिति पाठे धर्मशब्दमात्रं बिभर्तीति तथा यथा गांदद्यादित्युक्ते मरिष्यंत्या गोदानमिति । स्वरूपमेवं निरूप्य तेभ्यो निवर्तनमानुषंगेन शक्त्या प्राप्तं निषेधंति ॥ नात्र शक्त्येति ॥ ॥ अधर्मकरणे हीनजन्मनः पूर्वमुक्तत्वेन तत्करणे तत्संभवादिति भगवद्वाक्ये दुराचारस्यापि साधुत्वकथनाद्यथाकारी यथाचारी तथा भवतीति श्रुतौ कर्माचारयोर्भेदकथनेनाचारपदस्य स्वाभाविकेंद्रियप्रवृत्तौ पर्यवसानात्तस्य दुष्टत्वेऽप्यनन्यभक्तस्यादुष्टत्वात्तस्मान्मद्भक्तियुक्तस्येति वाक्ये वैराग्यस्याश्रेयस्त्वकथनेन वैराग्यस्यैव प्रत्युत दुष्टत्वाच्चात्रेंद्रियविनिग्रहः किमित्युपदिश्यत इत्यत आहुः ॥ इन्द्रियाणीत्यादि ॥ ॥ अयमर्थः । पूर्वं स्वशक्त्यनुसारेण महाराजोपचारैर्भगवत्पूजाव्यवस्थापनात्ततो भगवत्प्रसादस्य नानाविधस्य भक्तेभ्यो दानं विधाय स्वस्य भोगाय प्राप्तः सोपि नेंद्रियप्रियत्वेन कर्त्तव्यः । किंतु । भगवत्प्रसादत्वेन । तत्रापि सामग्रीपरीक्षार्थं यथाऽग्रे भोगसामग्री न दुष्येत्॥ तथा भगवान् रसात्मकः । स्त्रीणां च विशेषत उद्धारकः । किं बहुना लौकिका अपि गायकास्तदीयामेव कामलीलां विशेषतो गायंतीति तादृशाङ्गनादिसदृशानां संगवशेन स्वस्य कामोत्कर्षे तदिन्द्रियं निग्राह्यं योऽप्यनिषिद्धो भोगः सोऽपि सेवाबाधकीभूतकामनिवर्त्तकत्वेनैव करणीयो नेंद्रियप्रियत्वेनेति । अत्र मूले विनिग्राह इति विशब्देन विवेकधैर्याश्रये " अशूरेणापि कर्त्तव्यं स्वस्यासामर्थ्यभावनात् " इति यदुक्तं तत् स्मार्यते । अ-

र्थस्तु यदि स्वयमिंद्रियकार्याणां त्यागे असमर्थः ॥ स्वभावविजयः शौर्यमित्येकादशे शौर्यलक्षणात्ताद्दशेन तदभावेनाशूरस्तदा तेन स्वस्यासामर्थ्यभावनं विधायेन्द्रियासज्जनं कर्तव्यमिति । तत्प्रकारस्तु ये समृद्धा महाभोगवन्तः सुरतादिशौंडास्तद्वन्नाहं कियन्मे सामर्थ्यं को वा मे भोगः किं म उपकरणं नायिका वापि न तत्रासज्ज्य स्वकं पुरुषार्थं नाशयामीत्येकः सोऽप्येकादशे भगवतोक्तः । " रजस्तमोभ्यां यदपि विद्वान् विक्षिप्तधीः पुनः । अतंद्रितो मनो युंजन् दोषदृष्टिर्न सज्जत " इति यश्चैवं कर्तुमप्यशक्तः । स तु " जुषमाणश्च तान् कामान् दुःखोदर्कांश्च गर्हयन् " इत्येकादशोक्तरीत्या स्वस्य तत्त्यागासामर्थ्यं भावयेदित्यपरः । नच पूर्वोक्तगीतावाक्यविरोधः शंक्यः । तत्र दुराचारपदस्य पूर्वावस्थाबोधकत्वेन भजनोत्तरं तथात्वस्यालाभात् । "क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छती" त्युत्तरवाक्येन तथानिश्चयात् । "धर्मो मद्भक्तिकृत्प्रोक्त " इति लक्षणकस्यैव तस्य तत्र विवक्षितत्वात् । नापि तस्मान्मद्भक्तियुक्तस्येति वाक्यविरोधः । ततः पूर्वस्मिन्संदर्भे जातश्रद्धो मत्कथास्वित्यादिना असमर्थाधिकारमेव प्रस्तुत्य तादृशस्य भजनमेव कर्तव्यत्वेन विधाय ज्ञानवैराग्ययोरभावे कथं फलसिद्धिरिति शंकानिवृत्त्यर्थं प्रोक्तेन भक्तियोगेनेति द्वाभ्यां तयोः कार्यं भक्त्यैव भविष्यतीति बोधनेन उक्तवाक्येऽपि योगिमदात्मपदाभ्यां निरुद्धचित्तवृत्तिकत्वभगवदेकतानत्वयोर्बोधनेन च सेवापरिकरात्मकविषयवैराग्यस्यैव श्रेयस्त्वेन दुष्टत्वसिद्ध्या तदतिरिक्तवैराग्यस्यादुष्टत्वासिद्धेः ॥ नच फलप्रकरणे भगवता मिथो भजनं विनिंद्य 'भजंत्यभजतो ये वा' इत्यादि श्लोकद्वये संभावितापवादस्याभजद्भजनस्य निरपवादधर्मत्वेन कथनाद्वितीये भजदभजनकर्तॄणां केषां चिदकृतज्ञत्वगुरुध्रुक्त्वकथनाच्च यथा च्छांदोग्ये वामदेव्यसामोपासकस्य न कांचनं परिहरेदिति श्रुत्या सर्वाभिगामित्वमनुज्ञातं तथात्र भक्तविशेषस्य तदनुज्ञैव प्रतीयत इति नात्र दोषसंभव इति वाच्यम् । तत्रापि पूर्वत्र करुणाः पितरौ यथेत्यनेन करुणारूपस्य वैदिकस्य स्नेहरूपस्य लौकिकस्य बोधनेन धर्मार्थे तस्मिन् प्रत्युपकारसंभावनाराहित्य एव धर्मो निरनुबंध इति कामसूत्रे वैशेषिके वात्स्यायनेनापि कथनाच्च भारतानुशासनिके सुदर्शनोपाख्यानेऽपि "प्राणाश्च मम दाराश्च यच्चान्यद्विद्यते वसु । अतिथिभ्यो मया देयमिति मे व्रतमाहितम् " इति कथनात् । तादृशाभिसन्धिनिर्वाह एव सुदर्शनौघवत्योर्दम्पत्योस्सदेहयोः स्वर्गकथनात् "कूटमुद्गरहस्तस्तु मृत्युस्तं हन्तुमभ्ययात् । हीनप्रतिज्ञ इत्येवं वधिष्यामीति चिंतयन्निति" व्रतभंगे मृत्युदंडस्योक्तत्वाच्च । तथाऽतिथिपूजानिर्वाह एव तस्य धर्मत्वात् । सांप्रतं मृत्युप्राप्ताभिसंध्यनिर्वाहयोर्दर्शनेन तस्य दोषत्वस्य वज्रलेपायितत्वात् । सुबोधिन्या-

मपि धर्मार्थे तस्मिन् भजदर्थं प्रतियोगिना प्रायश्चित्तं विधेयमित्युक्तत्वात्। टिप्पण्यामपि प्रतियोगिकृतप्रायश्चित्तस्य भजतिफलसाधकताया उपपादनाच्च। स्नेहनिमित्तके तस्मिन् पितृदृष्टान्तेन निरुपधित्वपूर्वजन्मीनसंबंधयोः सूचनात्प्रत्युपकारसंभावनाराहित्ये क्रियमाणप्रत्युपकारानंगीकारे च सौहृदानुषंगेन धर्मस्य गौणतया भवनांगीकाराच्च। तत्रापि निर्वाह एव कथंचनादुष्टत्वमिति तस्य दुरवगमत्वेन श्रोत्रियस्य ब्रह्मचारिणो व्रतिनो लिंगिनो वा मां दृष्ट्वा जातरागस्य मुमूर्षोर्मित्रवाक्यादानृशंस्याच्च गमनं धर्मोऽधर्मोवेति संशय इति वैशिकवात्स्यायनसूत्रोक्तस्थलवत्संदिग्धतयादुष्टत्वात्। अत्र समाप्तौ "तेषां स्वच्छंदचरितं बुद्धिमान्न तदाचरेत्॥ नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः। विनश्यत्याचरन्मौढ्याद्यथा रुद्रोऽब्धिजं विषम्" इति वाक्याभ्यां निषेधनाशयोर्बोधनेन सुबोधिन्यामनीश्वरकृतस्यास्यानिष्टजनकत्वमिति व्याख्यानेन यथैश्वर्यकामनायामनीश्वरो वधमर्हति यथा महाराज्यानधिकारी तदिच्छां कुर्वन्निति मनसापि करणे दंडव्याख्यानेन ऐश्वर्यज्ञानवैराग्यैर्यत्करोति तत्स्वच्छन्दचरितमित्युच्यते। बुद्धिमांस्तन्नाचरेदिति च व्याख्यानेन तथात्वावगमाच्च। न च निषेधादिकं रासकरणविषयकमिति वाच्यम्। राजप्रश्नोत्तरत्वात्। प्रश्नेपरदाराभिमर्शनस्यैवोक्तत्वात्। नच- 'यत्पादपङ्कजपरागनिषेवतृप्ता' इत्यत्र भक्तयोगिज्ञानिनां स्वैराचरणस्याबंधकत्वेनानुवादाद्भक्तानां नतद्दोषावहमिति शंक्यम्॥ तत्र पूर्णकाष्ठां प्राप्तानामनुवादेनारंभदशापन्नेषु तस्योदाहर्त्तुमशक्यत्वात्। निषेवतृप्ता इति कथनात् कालापरिच्छेद्यस्यैव प्रियस्य सेवा कर्तव्येत्युक्तम्॥ अन्यथा जारसेवापि धर्मः स्यादिति च विमोहितोऽयं जन इत्यत्र मुचुकुंदस्तुतौ च पुन्नाम्नोनरकात्त्रायत इति वाक्यात्। पुरुषशब्देन नरक उच्यते योषिच्छब्देन च सुतरां नरकः।"शालावृकाणां हृदयान्येता" इति। ससोमोनातिष्ठतेत्यादिश्रुतिभिः स्त्रीणां निंदाश्रवणादित्युक्तम्। सुखानुभवस्तु भ्रान्तानुभवतुल्यः। युक्तिबाधितत्वात्। अग्रे बाधस्य प्रत्यक्षसिद्धत्वात्। अन्योऽन्यसापेक्षतया तत्र प्रवृत्तेरन्यतरस्य तदपूर्त्तौ सुखाभावस्यापि दर्शनाच्च। नच प्रजातिरमृतमानंद इत्युपस्थे इति श्रुत्या वैषयिकानंदस्य मोक्षदृष्टांतत्वेनोक्तेर्नेदं साधीय इति वाच्यं इति मानुषीः समाज्ञा इति मानुषप्रकरणानंतरं अथ दैवीरित्युपक्रमस्य भेदनात्तत्र मानुषसुखस्यानभिप्रेतत्वेन तस्य दृष्टांततताया अशक्यवचनत्वात्। परप्रसिद्ध्या परो बोधनीय इति लौकिकानामर्थे दृष्टांतत्वेन कीर्तिनेऽपि वस्तुतस्तदभवात्। तस्या उपासनार्थत्वेनाप्युपपत्तेश्च॥ ननु तत्प्रतिष्ठेत्युपासीतेत्यादिनोपासनाया अग्रे वाच्यत्वान्नेदं युक्तमिति चेत्१ ॐ तथा सत्याविर्भूते रसे देवेषु तदस्तु। रसाविर्भावस्तु न सर्वात्मभाव-

व्यतिरेकेण । तत्र च भगवानानन्दमयोऽनपेक्ष इति जीवानां ततः सुखलाभः ॥ लोके तु परस्परापेक्षत्वान्न तथेत्युक्तम् । नन्वयं रसमार्गो भगवान् रसात्मा चात्र फलति । ततः स्त्रीभावो न दुष्ट इति स्वस्मिन् स्त्रीत्वानुसंधानेन भगवंतं भजतां परस्परं सापत्न्यभावं च बोधयतां परस्परं तथाकृतौ को दोष इति चेत् । भगवद्रससंबंधाभाव एवेति वदामः । तथाहि वेणुगीतारंभे " आसक्तिः प्रेमपूर्वैव प्रेमापि हरिणा कृतम् । उद्बोधकं च हरिणा कृतं नान्येन केनचित् " इति कारिकया अन्यकृतोद्बोधकस्य भगवद्भावानुत्पादकत्वं प्रतिपादितम् । यत्र लीलास्थेष्वपि तथा तत्र दूरापास्ता इदानींतनानां वार्ता । किंच भगवान् भजतां मुकुंदो मुक्तिं ददाति कर्हिचित्स्म न भक्तियोगमिति वाक्याददेयैव परमभक्तिः सा 'श्रद्धामृतकथायां मे' इति सन्दर्भोक्तभगवद्धर्मसमाचरणे प्रसन्नाद्भगवत एवेति भक्तिहंसादौ निर्णीतं तेषु धर्मेषु । अस्यानुक्तत्वादनेन तदभाव एवेति । किंच दोषाभावप्रयोजकं स्त्रीभावानुसंधानं तेषामुत्कटमनुत्कटं वा नाद्यः पेशस्कृद्गृहकीटस्येवास्यापि तादृग्देहापत्तिप्रसंगात् । नरसिंहमहत्तराणां तथावचनदर्शनात् । ननु तदुत्कटमप्यग्रिमजन्मनि तथात्वोत्पादकं यथाग्निकुमाराणां " अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे । भर्तारं स्वं जगद्योनिं वासुदेवमजं विभुम् ॥ " इति टिप्पण्यां पुराणवाक्यात् । अतो नरसिंहमहतामपि भाविदेहज्ञानादेः तथा वचनमतो नदोष इति चेत् । नहि तदौत्कट्ये तदर्थं तप एव विधेयमग्निकुमारवत् । नत्विंद्रियतर्पणम् । दृष्टांताभावात् नरसिंहमहतामपि तथैव बोध्यत्वात् । अत एव न द्वितीयः, कैमुतिकन्यायात् । भावांतरोपसृज्यमानत्वेनातिकदर्यत्वाच्च । अतएव सेवाफले तद्विवरणे च " उद्वेगः प्रतिबंधो वा भोगो वा स्यात्तु बाधकम् । स विघ्नोऽल्पो घातकः स्यादिति " ।सविघ्नत्वादल्पत्वाद्भोगस्त्याज्य इति चोक्तम् । तच्च स्त्रीणां पुंसाञ्च समानम् । अतो भगवल्लीलादृष्टान्तेन लौकिके प्रवर्तकान्प्रवर्तमानांश्च विमुखान्निश्चित्य तत्संगं परिहृत्य सर्वेन्द्रियनिग्रहः कार्यः । तदेतदुक्तम् ॥ इंद्रियाण्येवाश्वा इत्यादि ॥ २५० ॥

व्रजभाषाटीका ।

सेवा मुख्य है पूजा मुख्य नहिं है नामों सेवायोग्य पदार्थनके संचयकरवेमें परिश्रम पडतो समुझके सेवा छोडके केवल मंत्रनमों मनमें पूजाकरवेमें परायण नहिं होयजानों (आदरः परिचर्यायाम् । विनामत्सेवनं जनाः । सेवानुरक्तमनसामभवोपि फल्गु) इत्यादिक वाक्यनमें सेवाही मुख्य राखी है । आगे साधनमें

पूजाकरवेको उपदेश कियोहै तहाँ भी भगवान्के समीप स्थित होयके वस्त्र अलङ्कार आदि धारणकरायवेकी जो प्रधान सेवाहै वाको पूजाशब्दसों ग्रहण करनों वेदोक्त तथा तंत्रोक्त पूजाको वहाँ ग्रहण नहिंहै वा पूजाको प्रकार तथा फलसेवाके प्रकार फलसों भिन्नहैं। क्षर अक्षरसों उत्तम जो परब्रह्म पुरुषोत्तम श्रीकृष्णहै सो केवल भक्तिसों ही प्राप्त होवैहै॥ (नायमात्मा प्रवचनेन लभ्यो न मेधया। नाहं वेदैर्न तपसा न दानेन न चेज्यया। नरोधयति मां योगो न सांख्यं धर्म उद्धव। न स्वाध्यायस्तपस्त्यागः) इति श्रुतिस्मृतिपुराणनके वाक्यनसों यज्ञ, दान, पूजा, तप, योग आदि जितनें साधन हैं उनसों परब्रह्मकी प्राप्ति नहिं होयहै। यह बात सिद्ध होवेहै (भक्त्याहमेकया ग्राह्यः। भक्त्यैव तुष्टिमभ्येति। धर्मान्संत्यज्य यः सर्वान्मां भजेत स सत्तमः। तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम्) इत्यादिभगवान्के वाक्यनसों भक्तिकरकेंही पुरुषोत्तम परब्रह्मकी प्राप्ति होयहै यह सिद्धान्तहै तहाँ भक्तिशब्द (भजसेवायाम्) धातुसों सिद्ध होयहै तासों भक्तिनाम सेवाको है श्रुतिस्मृतितन्त्रनमें वा सेवाको प्रकार दिखायोहै। ऐसे मान्योजाय तो श्रुतिस्मृतिके कहेभये और साधननसों परब्रह्मप्राप्तिको निषेध है तैंसे भक्तिद्वारा भी परब्रह्मप्राप्तिको निषेध सिद्ध होयगो जो ऐसे ही माने तो (भक्त्याहमेकया ग्राह्यः) इत्यादिवाक्यनमें एक भक्तिकरके ही मेरी प्राप्ति होयहै यह लिखीहै तासों विरोध आवै है तासों श्रुतिस्मृति तन्त्रनमें मुख्य भक्तिको विधान नहिंहै श्रीकृष्णनेंभी (भक्तियोगः पुरैवोक्तः। तानाविदन्मय्यनुसंगबद्धधियः स्वमात्मानमदस्तथेदम्॥ केवलेनहि भावेन गोप्यो गावः खगा मृगाः) इत्यादिवाक्यनकरके वेदमंत्रादिविधिरहित ब्रजवासीनकी भक्तिकूँ मुख्य राखीहै जैसें एक स्वामीके दो सेवक

हैं एक सेवक मासिक द्रव्यलेवेके लिये जाकार्यकी स्वामी आज्ञा करतो जावैहै वा कार्यकूँ वह करतोजावे है दूसरो सेवक सब कामना छोडके स्वामीकी सेवाकूँही परम फल मानकें आज्ञाकी अपेक्षा नराखके स्वामीकी अभिलाखाके अनुसार आगेसूं आगें प्रेमपूर्वक सर्व सेवा करेहै । पहले सेवकके समान वैदिक तान्त्रिकभक्तिवारेकूँ समुझनो अर्थात् जैसे जैसे वेद तथा तन्त्रमें भगवान् पूजाकरवेकी आज्ञा करें है वाके अनुसार वह सेवक स्वर्गादि अथवा मुक्तिआदि पदार्थके लिये पूजाकरतो जावे है । दूसरे सेवकके समान अविहित प्रेमलक्षणा भक्तिकरवेवारेकूँ समुझनो जैसे यशोदाजी आदि गोपगोपी वेदतन्त्रादिकमें पूजाकरवेकी जैसी आज्ञा है वाकी अपेक्षा न राखके श्रीकृष्णचन्द्रकी अभिलाषाके अनुसार स्नेहकरके सेवाकरतेहते शुक देवजीनेंभी (नायं सुखापो भगवान् । नेमं विरिञ्चो न भवो) इत्यादि श्लोकनमें विहित भक्ति करवेवारे ब्राह्मादिकनकी अपेक्षा प्रेमलक्षणा भक्तिकरवेवारी यशोदाकी प्रशंसा करी है परन्तु यह भक्ति जहाँ तक प्रेम नहिं होय और प्रभुनके अभिप्राय नहिं जानों जाय तहां तक नहिं बनसके है तहाँताई वेदतन्त्रानुसार पूजा अवश्यकरते रहनो या मुख्य भक्तिमार्गमें आये जीवनकूँ जहाँ ताई प्रेमद्वारा प्रभुको अभिप्राय विदित नहिं होय तहाँ ताई जिन भक्तनकूँ प्रभुनको अभिप्राय विदितहै जिनके आधीन प्रभु होय रहे हैं उनके आचरणनके अनुसार आचरणकरनों चाहिये (देवासुरमनुष्येषु मद्भक्ताचरितानि च) जैसे वे सेवा करें वैसेंही सेवाकरनोचाहिये तहाँ स्वयं शुद्ध होयकरके तथा सेवाके साधन गृह द्रव्यादिकनकूँ शुद्धकरके कृष्णसेवा करनो (इष्टं दत्तं तपो जप्तं वित्तं यच्चात्मनः प्रियम् । दारान्सुतान् गृहान् प्राणान् यत्परस्मै निवेदनम् । मयि संजायते भक्तिरुद्ध-

वात्मनिवेदिनाम्) इत्यादि भागवतवाक्यानुसार स्त्री पुत्र द्रव्य देहादिसहित आत्माकूँ भगवान्के आगें निवेदनकरवेसों ये सब पदार्थ शुद्ध होयजावैं हैं यह ही आत्मनिवेदनको प्रकार श्रीवल्लभाचार्यजीके प्रति साक्षात् भगवानने पवित्रा एकादशीके दिन रात्रिमें आज्ञा कियोहै वह वल्लभाचार्यजीने सिद्धान्तरहस्यमें वर्णन कियोहै। या निवेदनकरवेसों सब पदार्थमेंसों अपनों संबन्ध दूर होय जावै है ब्रह्मसंबन्धी अर्थात् सब पदार्थ भगवान्केहैं ऐसी बुद्धि होयजाय तब सेवाकी योग्यता होयहै। तापीछे पूर्ण भक्तननें जैसे प्रभुनकी इच्छानुसार सेवाके क्रम बाँधे हैं उनके अनुसार घंटा शंखनाद आदिसों लेकर शयनपर्यन्त सेवा करनों तहाँ घंटाशंखनादादिक वेदतन्त्रानुसार या मार्गमें क्यों होवे हैं ऐसी शंका नहिं करनी भगवतइच्छानुसारही शंखनादादि क्रम आचार्यनने बाँधेहैं तन्त्रानुसार नहिं हैं; प्रसंग—प्रथम श्रीनाथजीके यहाँ शंखनाद नहीं होतेहते एक दिन श्रीगोस्वामी श्रीविठ्ठलनाथजीनें साँझकी सेवा करवेकेलिये मंदिरके किंवाड खोले वा समय श्रीनाथजीको बागा फटरह्यो हतो वह देखकें बिचारकरवेलगे इतनेमें गोविंददासनें आयकें कही महाराज ! श्रीनाथजी श्यामढाकपेंसों कूदकें पधारे वा समय बागा फटगयो है कछु टूक श्यामढाकपें लटक रह्योहै ताकूँ लायोहूँ वा दिनसों शंखनाद तीनबेर करनों तापीछे १० पल ठहरके मंदिरके किंवाड खोलनो सुरूभयोहै ॥ याप्रकार जितनों सेवाक्रम है सब भगवान्के अभिलाषाके अनुसार बँध्यो भयोहै उत्तमाधिकारी जीवकूँ रहस्यग्रन्थ देखवेसों स्फुट होयजावै है तासों स्नेहपूर्वक स्वयं अपने हाथनसों श्रीप्रभुनके वस्त्र जलाशयपें जायके धोने, उपवनमेंसों फलपुष्पादिक ल्यावनें, सेवाके अति बहिरंगसाधनकूँ भी अपने हाथनसूँ करनों जैसें कृच्छ्रादिकनके

उपवास कष्टपायके भी धर्मप्राप्तिकेलिये करनेंपडे हैं याप्रकार धर्म सिद्धिरूप प्रयोजनविचारके सेवा नहिं करनी जैसें स्त्री प्रियपतिकी सेवा स्नेहसों करे है ऐसी प्रीतिपूर्वक अपने अहोभाग्य समुझके प्राणप्रिय प्रभुनकी सेवा करनीं साधनावस्थामें अभी प्रभुकूँ अमुक वस्तु अङ्गीकार करानी या बात हमकूँ कैसें मालुम पडे यह शंका तो नहिं करनी क्योंकि सिद्धावस्थाभयेपीछे तो प्रभु स्वयं अनुभव जतावेंगे जहाँतक वैसो अधिकार नहिं है जहाँताई (यच्चातिप्रियमात्मनः । तत्तन्निवेदयेन्मह्यम्) इत्यादि वाक्यानुसार जा पदार्थमें अपनी प्रिय समुझके इच्छा होय वा पदार्थकूँ प्रभुकों अङ्गीकार करावनो अर्थात् जहाँतक साक्षात् अनुभव नहिं होय तहाँताई भक्तके हृदयमें स्थित होयके अपनें अङ्गीकार करवेकेलिये उनउन पदार्थनमें भक्तकी इच्छा करावे है प्रधानकी आवृत्ति होयवेसों वाके अङ्गनकी भी आवृत्तिहोयहै तहाँ प्रधान सेवा जो वस्त्रालङ्कार नैवेद्यादि समर्पणरूप पूजाहै वाकी आवृत्ति करनों एककाल अथवा दोनों काल अथवा प्रातः मध्याह्न सायं या प्रकार त्रिकाल पूजन करनो अधिक स्नेह होय तो बहु कालभी पूजन करें अर्थात् समयानुसार नानाभांतिके व्यञ्जननकों अनेकबार अङ्गीकार करावे जैसें जा माताको पुत्रपें स्नेह होयहै वह पुत्रके लालन पोषणमें दिनकूँ व्यतीत करें है क्षणभरमें दूर होनो दुखःरूप समुझैहै याप्रकार प्रेमप्लुत भक्त प्रभुसेवाके वियोगको दुःखरूप समुझैहै नित्यकर्मादिक स्वधर्मनकूँ सेवाके अङ्ग समुझके सेवाके अवकाशमें करनो (धर्मो मद्भक्तिकृत्प्रोक्तः । श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते) इत्यादिवाक्यनमें वर्णाश्रमादि सब धर्मनकूँ श्रीकृष्णचन्द्रमें भक्ति सिद्ध होयवेके लियें करने यह बात स्पष्ट लिखीहै देहद्रव्यके सामर्थ्यके अनुसार

अग्निहोत्रादिक धर्म करनें सामर्थ्य होते जीव नहिं छुपावनो (विधर्म) निषिद्ध धर्मको आचरण कभी नहिं करनों सर्वथा निषिद्ध कार्यकूँ नहिं करनों इन्द्रियरूप घोडानकूँ रोके रहनों जैसे घोडाकूँ और तर्फसों रोकके एकमार्गमेंही चलायो जाय तब अभिलषित देशमें लेजावैहैं अर्थात् महाराजोपचारसों भगवत्सेवाकरे पीछैं भगवान्के प्रसादी नानाव्यञ्जननकूँ भक्तनकूँ देकें अपनें भोजन करनों उन व्यञ्जननकूँ (अद्यादात्मविशुद्ध्यर्थम्) इत्यादि भागवत वचनानुसार यह आत्मशुद्धिकरवेवारो महाप्रसाद है यह बुद्धि राखनो जीभके प्रसन्नताकेलिये भोजनकरूँहूँ ऐसी बुद्धि नराखनी तथा आगेंसों आछी सामग्री प्रभुनके अर्पणकरवेकेलिये अच्छे बुरे व्यञ्जनकी परीक्षाके लिये सब सामग्रीनको स्वाद लेनो अपनी धर्मपत्नीके साथ भी इन्द्रियकी प्रसन्नताके लिये कभी संग नहिं करनो किन्तु सेवामें चित्तके उद्वेगकरवेवारे कामकी निवृत्तिकेलिये संगकरनों ये तीनों कर्म क्रीडाकेलिये कभी नहिं छोडनों आसक्ति इन तीनोंकी बाध करवेवारीहै । जो कछु इन तीनोंको विरोधी होय वाकूँ शीघ्र छोडदेनों सामान्य वचन धर्मादिकनको उपलक्षणहै अर्थात् धर्मादिकके लिये भी स्वधर्माचरण १, विधर्मसों निवर्तन २, इन्द्रियविनिग्रह ३, इन तीनोंको नहिं छोडनों अन्यथा परोपकारार्थ इन्द्रियनिग्रहके त्यागको संभव होयगो ॥ २४९ ॥ २५० ॥

एतद्विरोधि यत्किंचित् तत्तु शीघ्रं परित्यजेत्। धर्मादीनां तथा चास्य तारतम्यं विचारयन् ॥ २५१ ॥ यथा यथा हरिः कृष्णो मनस्याविशते निजे। तथा तथा साधनेषु परि-

निष्ठा विवर्द्धते ॥ २५२ ॥ कृष्णे सर्वात्मके नित्यं सर्वथा दीनभावना । अहंकारं न कुर्वीत मानापेक्षां विवर्जयेत ॥ २५३ ॥ सर्वथा तद्गुणालापं नामोच्चारणमेव वा । सभायामपि कुर्वीत निर्भयो निस्पृहस्ततः ॥ २५४ ॥ साधनं परमेतद्धि श्रीभागवतमादरात् । पठनीयं प्रयत्नेन निर्हेतुकमदंभतः ॥ २५५ ॥ शंखचक्रादिकं धार्यं मृदा पूजाङ्गमेव तत् । तुलसीकाष्ठजा माला तिलकं लिङ्गमेव तत् ॥ २५६ ॥ एकादश्युपवासादि कर्तव्यं वेधवर्जितम् । तथा कृष्णाष्टमी वापि सप्तमी वेधवर्जिता ॥ २५७ ॥ अन्यान्यपि तथा कुर्यादुत्सवो यत्र वै हरेः । एतत्सर्वं प्रयत्नेन गृहस्थस्य प्रकीर्तितम् ॥ २५८ ॥

तत्त्वदीपप्रकाशः ।

सङ्गस्त्रयाणां बाधकः तत्परित्यजेदित्याह ॥ **एतद्विरोधीति** ॥ सामान्यवचनं धर्मादीनामुपलक्षणम् ॥ परार्थमपींद्रियनिग्रहाभावसंभवात् । पूजाविरोधि धर्मादिकं तु त्यक्तव्यमेवेत्यत्र विचारमाह ॥ **धर्मादीनामिति** ॥ भगवद्भजनस्य मोक्षः फलं परोपकारादिसर्वधर्माणामपि क्षयिष्ण्वेव फलम् । अतः उभयोरंतरं ज्ञात्वा परोपकारादिधर्मा नकर्त्तव्या यदि पूजाविरोधिनो भवन्ति ॥ २५१ ॥ अत्र मार्गे पूजासाधनानामनुवृत्तौ कारणमाह ॥ **यथायथेति** ॥ श्रवणकीर्तनादिना हरिर्मनसि निविशते तदा पूजा सर्वदा निर्वहतीत्यर्थः ॥ २५२ ॥ अत्र । **कृष्णे सर्वात्मक इति** ॥ मनसि स्वस्य दीनता

भावनीया सर्वाधिष्ठानेषु सर्वलोकेषु च यत्र भगवद्बुद्धिर्भवति। बुद्धिश्च कर्त्तव्या। अन्यकर्तृकापमानेऽपि नाहंकारं कुर्यात्। भगवतः सकाशान्मानापेक्षां च वर्जयेत्॥ २५३ ॥ एतत्सिद्ध्यर्थमुपायमाह ॥ **सर्वथा-तद्गुणालापमिति॥** सर्वथा सर्वत्र भगवदुत्कर्षवर्णने पूर्वोक्तं सिद्ध्यति दैत्यानां संनिधानेऽपि निर्भयः फलाभावाय ॥ **निस्पृहस्तत इति** ॥ ॥ २५४ ॥ केवलनामोच्चारणादेः कदाचिदसाधकत्वमपि भवेदिति मुख्यं साधनमाह॥ **साधनं परमेतद्धीति** ॥ सर्वदा श्रीभागवतकीर्त्तने पूर्वोक्तं सिद्ध्यति ॥ २५५ ॥ अत्र वैष्णवमार्गे वेदमार्गविरोधो यत्र तत्र कर्त्तव्यं यद्यनित्यो धर्मो भवेत्। नित्येऽपि वेदविरोधः सोढव्य इत्याह॥ **शंखचक्रादिकं धार्यमिति** ॥ " वह्निनैव तु संयुक्तं चक्रमादाय वैष्णवः। धारयेत्सर्ववर्णानां हरिसालोक्यकाम्यया॥ इति तप्तमुद्राधारणं काम्यम्। " शंखं चक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा। स शूद्रवद्बहिः कार्यः सर्वस्माद्द्विजकर्म्मणः॥ " इति स्मृतिविरोधश्च॥ " शंखादिचिह्नरहितः पूजां यस्तु समाचरेत्। निष्फलं पूजनं तस्य हरिश्चापि न तुष्यति॥ " अतो मृदा शंखचक्रादिधारणं पूजाङ्गत्वादवश्यं कर्त्तव्यं निषेधस्तु केवल एव न पाखंडत्वसंपादकः। मृदादिनिषेधमुपक्रम्य तप्तायसे पर्यवसानवचनाच्च किंच ब्राह्मणस्य धारणं निषिद्धम्। वैष्णवस्य च विहितम्। तत्र ब्राह्मणश्चेद्वैष्णवो भवेत् तत्र पूर्वात्परबलीयस्त्वन्यायेन वचनमिति वैष्णवधर्मानुसरणं कर्त्तव्यम्। नच पाषंडत्वसंभवः " किं पुनर्ब्राह्मणाः पुण्या " इति वाक्यात्। प्रमाणप्रमेययोः प्रमेयं बलिष्ठमिति च। वेदनिषिद्धदेवतापरत्व एव पाषंडत्वमिति स्थितिः। धर्मविरोधो नात्र बाधकः। तत उक्तं शंखचक्रादिकं मृदा पूजांगत्वेन धार्यमिति। तथा तुलसीकाष्ठजा मालापि धार्या तस्या यद्यपि न नित्यत्वं तथापि वैष्णवत्वख्यापिका परंपरासिद्धा तदुल्लंघने पारंपर्यं बाध्येतेति नित्यतुल्या माला। किंच। " धारयन्ति नये मालां

हेतुकाः पापबुद्धयः । नरकान्न निवर्तंते दग्धाः क्रोधाग्निना हरेः ” इति वचनान्नित्यमपि तिलकं माला च यज्ञोपवीतवद्वैष्णवत्वबोधकम् । एकादशीव्रतं च षट्पंचाशद्वेधरहितं कर्तव्यं पूर्वमन्यथाकरणेऽपि भगवन्मार्गप्रवेशानंतरं पंचपञ्चाशद्घटिका दशमी चेत्तदैकादशी त्याज्या । जन्माष्टमी तु सूर्योदयानंतरं सप्तमी चेत्तदा त्याज्या “ उदयादुदया प्रोक्ता हरिवासवर्जिता । ” इति वाक्यात् । अन्यान्यपि रामनवमीप्रभृतिव्रतानि भगवन्मार्गे कर्त्तव्यानि । नृसिंहजयन्तीव्रतमुत्सवश्चेत्कर्तव्यम् । तथा वामनजयन्त्युत्सवकरणे एकादश्यामुपोषणमकृत्वापि द्वादश्यामुपोषणं कर्त्तव्यम् । किंबहुनोत्सवः प्रधानभूतः । भुक्त्वाचोत्सवो निषिद्धः । भगवदावेशाभावात् । एवं पूजामार्गे उत्सवयात्रासहिता पूजा कर्तव्येति निरूपितमुपसंहरति ॥ एतत्सर्वमिति ॥ गृहस्थस्यैतन्मुख्यम् । एवं कुर्वन्सकुटुंबो भगवत्सायुज्यमश्नुते ॥ २५६ ॥ २५७ ॥

आवरणभंगः ।

संग इत्यादि ॥ ॥ संग आसक्तिस्तस्मिन्सति निर्बन्धेन नित्यकर्मकरणप्रयासात्सेवानुरोधेन यथाशक्त्येति नभवति तथैवाधनानां बाधक इति तथेत्यर्थः ॥ नन्वेवं सति संगत्याग एवोपदेष्टव्यः । सामान्यवचनस्य किंप्रयोजनं विधर्मान्निवर्त्तनमिंद्रियनिग्रहश्च नभवतीत्येषामेव त्रयाणामन्येषां च ज्ञानभक्त्युपासनासाधनानां बाधक इति तथेत्यर्थः ॥ नन्वेवं सति संगत्याग एवोपदेष्टव्यः समान्यवचनस्य किंप्रयोजनमत आहुः ॥ सामान्येत्यादि ॥ ॥ तत्रहेतुः ॥ परार्थमपीत्यादि ॥ ॥ यथा कश्यपस्य स्त्रीणां वरमनुस्मरान्निति च ॥ पूजाविरोधीत्यादि ॥ ॥ ननु भवत्वेवं तथापि “ एतावज्जन्मसाफल्यं देहिनामिह देहिषु । प्राणैरर्थैर्धिया वाचा श्रेय आचरणं सदा ॥ ” इत्यादिभगवद्वाक्येषु परोपकारस्य स्तुतत्वात्तस्य तादृशामन्येषां वा पूजाविरोधित्वेऽपि कुतस्त्याग इत्याकांक्षायां फलतो जघन्यत्वात्त्याग इति वक्तुं तद्धेतुभूतं विचारमाहेत्यर्थः ॥ भगवद्भजनेत्यादि ॥ ॥ एतदुक्तमेकादशे “ धर्ममेके यशश्चान्ये ” इत्यारभ्य “ मद्भक्तियोगेन भजता यो मामि ” त्यंतेन संदर्भेण ॥ २५१ ॥ अत्र मार्ग इत्यादि ॥ ननु युक्तमिदं सर्वमुपदिष्टं तथापि फलं पूजानिर्वाहे सच साधनानुवृत्तौ सा तु कालादेर्बाधकत्वाद्दुर्घटेत्याकांक्षायां दृष्टं साधनमाहेत्यर्थः ॥ स एव कथं निविशत इत्याकांक्षायां त-

वदंतस्तात्पर्यमाहुः ॥ श्रवणेत्यादि ॥ ॥ "श्रद्धामृतकथायां मे शश्वन्म-
नम्। परिनिष्ठा तु पूजायामिति" भगवता क्रमेण निर्देशात्तथेत्यर्थः ॥
॥ अत्रेत्यादि ॥ ॥ नन्विदमपि युक्तं तथापि श्रवणादिकर्तॄणामपि
ां प्रायो भगवन्निवेशो नानुभूयत इत्यत्रापि किंचित्साधनं वक्तव्यमित्या-
ां तत्र बाधकत्यागरूपं साधनमाहेत्यर्थः ॥ सर्वात्मकपदतात्पर्यमाहुः ॥
ानेष्वित्यादि ॥ ॥ तथाचाहंकारादिः सर्वथैव बाधक इति तन्निवृत्तयेऽत्र
भगवतोपदिश्यते नतु पृथक्साधनत्वेनेति भावः। एतेन "स्तुतिभिः स्तवनं
ङ्गैरभिवन्दनम्। मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिरिति" साधनचतु-
र्थमेव भगवतोक्तमिति ज्ञापितम् ॥ सर्वथेत्यादिना ॥ ॥ "वचसा मद्गुणे-
मदर्थेर्थपरित्यागो भोगस्य च सुखस्य चेति" द्वयं संगृहीतं ज्ञेयम्।
कंचिद्विशेषमाहुः ॥ दैत्येत्यादि ॥ ॥ तथाच दैत्यानामपि सन्निधाने त-
यदि तेऽन्यथा वदन्ति तदा कर्णौ पिधाय निरयादिति वाक्योक्तेषु ततो-
गतज्जिह्वाच्छेदस्वहननेष्वन्यतमं कार्यम्। तत्राप्यशक्तौ तदानुकल्पभूतं
दिविधेयमित्याशयेनाहुः ॥ फलाभावायेत्यादि ॥ ॥ एवं करणेपि निर्वा-
ायिकत्वादन्यद्वक्तुमाहुः ॥ केवलेत्यादि ॥ ॥ इदंच "श्रद्धां भागवते शा-
ते योगेश्वरवाक्ये सिद्ध्यति। तेन यथासंभवमेकादशोक्तं सर्वत्रानुसंधेयम् ॥
३—२५५ ॥ एवं सेवानिर्वाहोपायमुपदिश्य रामानुजमाध्वादिमार्गादत्रबहिः-
पि वैलक्षण्यं वक्तुमाहुः ॥ अत्र वैष्णवेत्यादि ॥ अनित्य इति ॥ नित्य-
काम्य इति यावत्। अपि वेदविरोध इति। वेदविरोधोपीत्यर्थः ॥ कैमुति-
कमेतत्। एतस्यापि प्रयोजनकालातिक्रमेऽविहितभक्तौ च दोषप्रसंगः।
उपपत्तिर्मूले उक्ता पूजांगमेव तदिति यतस्तथा। अतः पूजायां व्यंगत्व-
ाय तदावश्यकमेव तदेतदुपपादयितुमाहुः ॥ वह्निनैवेत्यादि अत इति ॥ ॥
वानिषिद्धत्वाभ्यामपि नित्यत्वानपायात्। ननु तप्तशंखाद्यनङ्गीकारे भवतु
त्वाभावस्तथापि निषेधस्य का गतिरित्यत आहुः ॥ निषेधस्त्वित्यादि ॥ ॥
। निंदास्मृतौ पूजानुल्लेखात्। तद्रहिते संक्रामन्निषेधः पूजाङ्गत्वेन धारकेषु
डत्वाधायक इत्यर्थः। एतद्दाढ्यार्थं श्रुतिसिद्धं युक्त्यंतरमाहुः ॥ मृदेत्या-
॥ तथाच यथा श्रुतौ निर्यासस्य "नाश्यं ब्रह्महत्यायै ह्येषवर्णं" इत्यु-
ाग्रे "यो लोहितो यो वाव्रश्चनान्निर्येषति तस्यानाश्यम्" इति पर्यवसा-
। तेन तस्यैव निषेधस्तथात्रापि तप्तायस एव पर्यवसानवचनात्। वाशब्द
रार्थताया अपि शक्यवचनत्वाच्च तत्रैव निषेधसंक्रमो नतु मृदाधारणेपी-
॥ ननु भवत्वेवं यदि पूजीवाक्ये ब्राह्मणपदं भवेत्। तत्र तु य इति सामा-

न्यवचनं तच्च शूद्रादिपरतयापि नेतुं शक्यमतो नेयं युक्तिः साधीयसीत्याशंकायां पूर्वोक्तमर्थं न्यायेलोपोद्बलयंति ॥ ब्राह्मणस्येत्यादि ॥ ॥ तथा च सिद्ध्यति पूर्वस्मात्कार्ये परविधानवैयर्थ्यापत्तिरिति पूर्वात्परं बलीय एवं तथामति स्मृतौ द्विजपदात्संस्कारमात्रशालिनो वैष्णवत्वरहिता ये तान्प्रति स्मृतिः सार्थिकेति न वैष्णवधर्मत्वेन शंखचक्रधर्तुर्निंदिकेति तथेति भावः । इममेवार्थं द्रढयंति॥ नचेत्यादि ॥ ॥ तुष्यतु दुर्जन इति न्यायेन वैष्णवं प्रत्यपि निषेधमंगीकृत्य पूर्वोक्तं समर्थयन्ति ॥ प्रमाणेत्यादि ॥ ॥ तथाच यथा वेदं कृत्वा वेदिं करोतीत्यत्र वेदकरणोत्तरं कृते आचमने न श्रौतोऽपि वैदिकक्रमो बाध्यते शुद्धिरूपस्य प्रायस्य बलिष्ठत्वात्तथा प्रकृतेऽपि वचनापेक्षया पूजाया बलिष्ठत्वात्सर्वपापेभ्यो मोक्षयिष्यामीति भगवद्वाक्याच्च जातेऽपि दोषे निवृत्तिसंभव इत्यर्थः॥ नन्वेवं सति पाखंडत्वस्य संभव इत्यत आहुः ॥ वेदेत्यादि ॥ ॥ वेदविरुद्धदेवताहंकुद्धादिरूपा ज्ञेया ॥ अत्रेति ॥ ॥ ब्राह्मणत्वे । तथा च यदि धर्मविरोधो बाधकः स्याद्दत्तदुर्वासःप्रभृतीनामपि पाखंडता स्यात् । यदि तत्र योगजधर्मेण समाधेयं तर्ह्यत्र भगवद्धर्मेणेति तुल्यम् । वचनानामुभयत्र तौल्यादित्यर्थः ॥ एतेन तप्तशंखचक्रधारणे श्रुतिमुदाहरंतो माध्वादयोऽपि प्रत्युक्ता बोध्याः,तदुदाहृतश्रुतिषु नित्यलिंगस्याभावात् । फलकथनेन काम्यताप्रतीतेश्च । पुराणस्थश्रुतिमालंब्य यथाकथंचिन्नित्यनामसमर्थनेऽपि तप्तताबोधकश्रुतिविरोधस्य कामाधिकारबोधकश्रुतिविरोधवत्सोढव्यत्वात् । एतान्यपि तु कर्माणीतिवत्, तप्तनिषेधवचनस्यापि दर्शनात् । एतदेवोक्तं धर्मविरोधो नात्र बाधक इति । माध्वादिलिखितश्रुतिस्थः शंखादीनां तप्तत्वरूपो यो धर्मः सोऽत्र मृदाधारणे बाधको नेत्यर्थः ॥ एवं समर्थयित्वा सिद्धमाहुः ॥ तत इत्यादि ॥ एतदखिलं शंखचक्रादिधारणवादे मया सम्यक् प्रपंचितमिति विशेषजिज्ञासायां ततोऽवधेयम् । एवं शंखचक्रादिधारणस्य नित्यत्वं स्थापयित्वा तुलसीमालायां तदतिदिशन्ति ॥ तथेत्यादि ॥ ॥ तस्यानित्यत्वं न बहुवाक्यसिद्धमिति तथात्वाय प्रकारमाहुः ॥ तस्या इत्यादि ॥ ॥ तथा च " साधूनां समयश्चापि प्रमाणं वेदवद्भवेत् " इति ब्रह्माण्डात्तथेति भावः । एवं च " देवासुरमनुष्येषु मद्भक्ताचरितानिच " इति वाक्यमप्यनुगुणी भवतीति ज्ञेयम् । अत्रापि विशेषो मालाधारणवादाद्बोध्यः । मार्गांतरात्तिलके विशेषं वक्तुं प्रकारमाहुः ॥ तिलकं चेत्यादि ॥ ॥ तिलकमाल्योर्बहिरङ्गत्वबोधनाय तत्स्वरूपमाहुः ॥ तिलकमित्यादि ॥ ॥ तेनांतरस्यान्तरङ्गानां चाभावे तदकिंचित्करमेवेत्यर्थः ॥ अत्रत्योऽपि

ष ऊर्ध्वपुंड्रवादादवगंतव्यः ॥ एवं बहिरङ्गान् भगवता साक्षादनुक्तानपि सू-

भगवता भक्तिकारणेषु मदीयव्रतधारणमित्युक्तत्वाद्यानि विव-

क्षितानि तानि बोधयितुं "यात्रा बलिविधानं च सर्ववार्षिकपर्वसु । मम पर्वानुमोदनम् । पृथक् सत्रेण वा मह्यं पर्वयात्रामहोत्सवान् । कारयेन्नृत्यगीताद्यैर्महाराजविभूतिभिः ॥" इत्यादिभगवद्वाक्यैरुत्सवादीनामप्युक्तत्वात्तेषामपि दिङ्मात्रेण निर्णयं बोधयितुमाहुः ॥ एकादशीत्यादि ॥ ॥ अत्रापि मार्गान्तरेभ्यो विशेषमाहुः ॥ पूर्वमित्यादि ॥ ॥ इदं यथा तथा मया संवत्सरोत्सवनिर्णयप्रताने सम्यगुपपादितमिति तत एव विभावनीयम् । अत्र नृसिंहजयन्त्यादौ चेत्तथापदाभ्यां तयोः प्रायिकत्वं बोधितम् । तत्र बीजमिदं प्रतिभाति श्रीभागवते एतयोरवतारत्वेन निरूपणान्नृसिंहतापनीये विष्णोर्नुकमिति श्रुतौ च पूर्णतानिरूपणादुपासकबाहुल्यात्पुराणेषु व्रतविधायकानेकवचोदर्शनाच्च यस्य पुरुषोत्तमत्वस्फूर्तिस्तेन कार्यम् । मदीयव्रतधारणमिति भगवताऽऽज्ञापनात् । यस्य तु न तथा स्फूर्तिस्तेन न कार्यम् ॥ साक्षाद्भगवद्भतत्वस्य तं प्रत्यभावेन तद्व्रताज्ञाया अप्यभावात् । अत एव "सर्वासां तु जयंतीनां श्रेष्ठा कृष्णाष्टमी मता । यस्मात्संन्निहितात्यंतं तत्रैवोपवसेन्नरः ॥ सर्वास्वपि जयंतीषु पूजा कार्या विशेषतः । सान्निध्य एव कर्तव्य उपावासो न दूरगः ॥" इति भारद्वाजसंहितावचनं स्मृत्यर्थसागराख्ये माध्वग्रंथे दृश्यते ॥ सान्निध्य इति ॥ मूलरूपसन्निधाने ॥ दूरग इति ॥ अंशकलागामी ॥ तथासति तत्तदुपासकान्प्रत्येव नित्यत्वं तयोर्नत्वन्यान्प्रत्यपीति । अविकारिविशेषमादाय कृताकृतत्वबोधनार्थयमुक्तिरिति दिक् । एवं सर्वं निरूप्येदमुपसंहरंति ॥ एवं पूजेत्यादि ॥ पूजामार्ग इति ॥ ॥ पूजाप्रधाने सेवामार्गे उत्सवा जन्माष्टम्यादयः । यात्रा दोलायात्रादयः । पर्वाणि दीपावलीनवरात्रादीनि बोध्यानि ॥ यद्यपि पर्वाण्यत्र नोक्तानि तथापि साहचर्यात्संप्रदायाच्च बोध्यानि । गृहस्थस्यैतन्मुख्यत्वे बीजमाहुः ॥ एवं कुर्वन्नित्यादि ॥ ॥ यथाचश्रुतौ " ये देवा यज्ञहनः पृथिव्यामध्यासते ये अन्तरिक्षे ये दिवीत्याहेमानेव लोकान्स्तीर्त्वा सगृहः सपशुः सुवर्गं लोकमेतीति" यजमानेन मंत्रमात्रकथने सपरिकरस्य स्वर्गलोक उक्तस्तथा भगवता सपरिकरस्य परिचर्यासूचनादत्रापि सायुज्यरूपं मध्यमं सेवाफलं परिकरस्य भवतीत्यर्थः ॥ २५६ ॥ २५७ ॥

व्रजभाषाटीका ।

तथा पूजाविरोधि धर्मादिकभी त्यागकरनो या विषयमें बिचार वर्णन करेहै । भगवद्भजनको फल अचल मोक्षहै । परोपकारादि सर्व धर्मनको फल क्षयवाले स्वर्गादिक हैं तासों पूजा तथा सर्वधर्मनको अन्तर जानके जो पूजाके विरोधि परोपकारादि धर्म

होयँ तो उनकों भी छोडदेनें सेवाकूँ छोडके नहिं करने अवकाशमें करने ॥२५१॥ यामार्गमें पूजाके साधननकी अनुवृत्ति होयवेमें कारण बतावें हैं (यथायथेति) जैसें जैसें श्रवणकीर्तनादिकनकरकें हृदयमें भगवान्को आवेश होवे है तैसें तैसें प्रधान सेवाके साधननमें श्रद्धा बढती चलीजावे है, अर्थात् भगवान्को पूर्ण आवेश होय जावे है, तब सर्वदा सब कालमें प्रधान सेवाको निर्वाह होवै है ॥ २५२ ॥ अभी प्रायः श्रवण कीर्तनादिक करवेवालेनके हृदयमें भी भगवान्को आवेश नहिं होय है यही कारण है कि श्रवणकीर्तनादिक पूरे बन नहिं सकें है तासों श्रवणकीर्तनादिके बाधकनको त्याग वर्णन करै है (कृष्णे सर्वात्मक इति) मनमें सदा दीनता राखनी सब ठिकानें जड वस्तुनमें तथा सब लोकनमें सब जीवनमें भगवद्बुद्धि करनी और कोई आपनो अपमान करें तथापि अहङ्कार नहिं करनो भगवान्सों अपने मानकी अपेक्षा नहिं राखनी ॥२५३॥ यह सिद्ध होयवेको उपाय वर्णन करे हैं (सर्वथा) सदा भगवान्के गुणनको गान अथवा भगवान्के नामनको उच्चारण सभामें भी निर्भय निस्पृह होयकें करतेरहनो अर्थात् सब ठिकानें भगवान्को उत्कर्ष वर्णन करवेसों पूर्वोक्त सिद्ध होवे है तासों आसुर जीवनके समीप भी फलकी इच्छा छोडकें भगवान्को उत्कर्ष वर्णन करतो रहे ॥ २५४ ॥ केवल नामोच्चारणादिक कदाचित् साधक नहिं होय तो मुख्य साधनको वर्णन करै है (साधनं परमिति) सर्वदा श्रीभागवतको कीर्तनकरवेसूँ पूर्वोक्त सिद्ध होय है तासों, येहि परम साधन है । कि कपट छोडकें कामना छोडकें आदरपूर्वक प्रयत्न करकें श्रीमद्भागवतजीको पाठ सर्वदा करतेरहनों । इतने कथनकरकें (श्र-
-ने शास्त्रे निन्दामन्यत्र चापि हि । सर्वभूतेषु मन्मतिः ।

वचसा मद्गुणेरणम्) इत्यादि एकादशस्कंधके वाक्यनको सिद्धान्त वर्णन कियो ॥ २५५ ॥ या वैष्णवमार्गमें नित्य भिन्न सकाम धर्मनमें जहाँ वेदविरोध होय वह धर्म नहिं करनों भक्तिमार्गके नित्य धर्मनमें तो वेदविरोधभी सह लेनो जैसें वस्त्र भूषणधारण तथा नैवेद्यादिक समर्पण आदि मुख्य सेवाकरवेमें संध्याग्निहोत्र आदिकको काल नहिं सधसके तो ऐसो वेदविरोध सहलेनों जब अवकाश होय तब संध्याग्निहोत्रादि कर्म करनें ताको वर्णन करें है (शंखचक्रादिकमिति) रामानुजमाध्वादिकनके मार्गसों यामार्गमें बाहिरके प्रकारविषयमें विलक्षणता दिखावेंहै (वह्निनैव तु संयुक्तम्) या श्लोकको अर्थ अग्निसहित चक्रकूँ लेकें वैष्णव धारण करे सब बर्णनकों भगवान्के सालोक्यकी कामनाकेलिये या श्लोकमें तप्तमुद्राधारण काम्य बतायोहै (शंखचक्र इति) या श्लोकका अर्थ शंखचक्रनकूँ मृत्तिकाकरकें अथवा तातेलोहकरकें जो करेहैं वह शूद्रके तुल्य संपूर्ण द्विजकर्मसों बाहिर निकासवे योग्यहै । या स्मृतिको विरोधभी है (शंखादिचिह्नरहितः) या वाक्यको अर्थ शंखचक्रादिकनसों रहित जो पूजा करेहै । वाको पूजननिष्फल है । भगवान्भी नहिं तुष्ट होयहै । प्रथम श्लोकमें काम्यत्व तथा द्वितीयश्लोकमें निषिद्धत्व लिख्योहै तिनसूँ तृतीयश्लोककरकें प्राप्तनित्यत्वको बाध नहिं होयहै तासों पूजाके अङ्गसमुझकेंमृत्तिकाकरकेंशंखचक्रादिकनको धारण अवश्य करनों निषेधहै सो तो पूजाविना केवल शंखचक्रादिधारणको है पूजाङ्ग समुझकें धारणकरवेवालेनकूँ पाखण्डित्व संपादक नहिं है । मृत्तिकादिकके निषेधको उपक्रमकरकें तप्त लोहकरकें चक्रादिधारणकरवेमें पर्यवसानवचनहै , तासों तप्तमुद्राधारणमेंही निषेधकी प्राप्तिहै सेवाङ्ग समुझके मृत्तिकाकरके चक्रादिधारणको निषेध

नहिं है । किञ्च द्वितीय श्लोक करकें ब्राह्मणकूँ शंखादिधारण निषिद्धहै (शंखादिचिह्नरहितः) या तृतीय श्लोककरकें वैष्णवकूँ शंखादिधारणको विधान है तहाँ ब्राह्मण जो वैष्णव होय वाकूँ पूर्वसों पर बलवान् है अन्यथा परविधान व्यर्थ होयगो या न्यायके अनुकूल वैष्णव धर्मनके अनुसार बर्ताव करनो योग्यहै । निषेधक स्मृति तो वैष्णव धर्मरहित केवल संस्कार मात्रवाले ब्राह्मणमें चरितार्थ है, शङ्का—ब्राह्मणकों वैष्णवधर्माचरण करवेमें पाखण्डित्वको संभव होयगो ? उत्तर—(किं पुनर्ब्राह्मणाः पुण्याः) या गीतावाक्यमें ब्राह्मणकों वैष्णव धर्मकरके निःसंदेह उद्धार होनों लिख्योहै । प्रमाण और प्रमेय इनमें प्रमेय बलवान्है पाखण्डिपणो तो वेदनिषिद्ध अर्हत् बुद्ध आदि देवतानकी उपासनासों होयहै । तासों कितनेक वैदिक धर्म तथा वैष्णव धर्मनको परस्पर विरोध बाधक नहिं है जैसे दत्तात्रेय दुर्वासा आदिकनकूँ पाषण्डि नहिं माने हैं किन्तु वैदिकधर्मनसों योगके धर्मनकूँ विलक्षण मानके समाधानकरेहै तैसे भक्तनमें भी पाखण्डिताकी संभावाना नहिं करनी वैदिकधर्मनसों भगवद्धर्मनकूँ विलक्षण मानकें समाधान करनो अतः मृत्तिकाकरकें सेवाङ्ग समुझकें शंखचक्रादिक मुद्रा धारण करनों तथा तुलसीकाष्ठकी मालाभी सर्वदा धारण करनों यद्यपि कितनेक बचनसों नित्यता नहिं है तथापि वैष्णवताकी जतायवेवारी है और (साधूनां समयश्चापि प्रमाणं वेदवद्भवेत्) या ब्रह्माण्ड पुराणके वचनसों महात्माको आचरणभी वेद जैसो ही प्रमाणहै । तुलसीकाष्ठमालाकों सर्वदा धारण करनों परंपरासोंभी सिद्ध है याके उलंघन करवेमें परंपराको बाध होय तासों मालाभी नित्यकर्मके तुल्यहै किञ्च (धारयन्ति न ये मालां हैतुकाः पापबुद्धयः । नरकान्न निवर्तन्ते दग्धाः क्रोधाग्निनाहरेः)

अर्थ--मालाकूँ जे नास्तिक पापबुद्धिवारे नहिं धारण करे हैं वे मनुष्य भगवान्के क्रोधाग्निकरकें जलेभये नरकसों पीछे नहिं आवेहैं, या वचनसों माला धारण नित्य है तिलक भी दण्डके आकारको ललाटपें करनों कमलके आकारको वक्षस्थलपें करनों वंशके पत्रके आकार दोनों बाहूनपें करनो और तिलक दीपकी ज्योतिके आकारवाले करने जैसें यज्ञोपवीत द्विजत्वको जतायवेवारो है ऐसे तिलक माला वैष्णवताके जतायवेवारे हैं ॥ २५६ ॥ एकादशीको व्रतभी छप्पन घडीके दशमीको वेधरहित करनों योग्य है पहली और प्रकारसों भी व्रतकरतो होय परन्तु भगवन्मार्गमें प्रवेशभयेपीछे पचपनघडी दशमी होय तो वा एकादशीको त्यागकरनों दूसरे दिन व्रतकरनों सूर्योदयभयेपीछे सप्तमी होय तो वा जन्माष्टमीको त्याग करनों अर्थात् द्वितीय दिन व्रत करनो तामें (उदयादुदया प्रोक्ता हरिवासरवर्जिता) इत्यादि वाक्य प्रमाणहै भगवन्मार्गमें और भी रामनवमी आदि व्रत करने । नृसिंहजयन्ती व्रत उत्सव होय तो करनो तैसेंही वामनजयन्ती व्रतभी करनों अर्थात् वामनद्वादशीके दिन क्रमानुसार वामनप्रादुर्भावोत्सव करनों वा दिन उपवास करनों वाके पहले एकादशीके दिन उपवासकी सामर्थ्य नहिं होय तो नहिं करनों बहुत विस्तारपूर्वक कथनसों कहा प्रयोजनहै उत्सव मुख्यहै भोजन करकै उत्सव करनों निषेध कियोहै भोजनकिये पीछैं भगवान्को आवेश नहिं होवेहै तात्पर्य यह है जन्माष्टमीको उपवास तो आवश्यक है। और तीनों जयन्तीके उपवास तो देहसों तथा द्रव्यसों वा दिन सेव्यस्वरूपको उत्सव करवेकी सामर्थ्य होय तो उत्सवके अङ्ग समुझकें करनें क्योंकि भोजनकरे पीछे भगवदावेश नहिं होयहै तथा जिनकूँ पुराणनवाक्यनसों राम वामन नृसिंहादिकनमें पूर्ण-

पुरुषोत्तमकी स्फूर्ति होय उनकूँ तो उनकी जयन्ती अवश्य करनी । ऐसें दिवाली आदि पर्व रथयात्रा स्नानयात्रा आदि यात्रा तथा जन्माष्टमी आदि महोत्सवनकूँ एकाकी द्रव्यदेहसों करवेकी सामर्थ्य होय तो एकाकी करने अपनी एककी सामर्थ्य नहिं होय तो और धनिक कुटुम्बीनके साथ होयकें महाराजाधिराजकी जाप्रकार परिचर्या होयहै वाप्रकार श्रीकृष्णकी सेवा करतेभये पर्वयात्रामहोत्सवनकूँ करनो । सांख्य योग ज्ञान कर्म आदिकनको उपदेश देके अंतमें उद्धवजी के प्रति श्रीकृष्णनें (पृथक् सत्रेण वा मह्यं पर्वयात्रामहोत्सवान्) या श्लोकमें यह ही उपदेश दियो है ऐसो पूजामार्ग अर्थात् पूजाप्रधान सेवामार्गमें उत्सवयात्रा पर्वसहित सेवा करनों निरूपण कियो ताको उपसंहार करेहै गृहस्थकूँ यह सेवा मुख्यहै जैसें(सगृहः सपशुः सुवर्गं लोकमेति) इत्यादिश्रुतिनमैं वैदिक कर्म करवेवाले यजमानको स्त्रीपुत्रपशुसहित स्वर्गमें प्राप्त होनों लिख्योहै तैसें पूर्वोक्तरीतिसों सेवाकरवेवालो भक्तभी कुटुम्बसहित भगवानके सायुज्यकूँ प्राप्त होवे है ॥२५७॥२५८॥

अन्येषां संभवे तु स्याद्यतेः पर्यटनं वरम् ।
विक्षेपादथवा शक्त्या प्रतिबंधादपि क्वचित्
॥२५९॥ अत्याग्रहप्रवेशे वा परपीडादिसंभवे ।
तीर्थपर्यटनं श्रेष्ठं सर्वेषां वर्णिनां तथा ॥ २६० ॥
यज्ञास्तीर्थानि च पुनः समानि हरिणा कृताः ।
अतस्तेष्वप्रतिग्राही तद्दिनान्नाधिकस्य हि
॥ २६१ ॥ हतत्रपः पठन्नित्यं नामानि च
कृतानि च । एकाकी निस्पृहः शान्तः पर्यटेत्
कृष्णतत्परः ॥ २६२ ॥ देहपातनपर्यन्तम-

व्यग्रात्मा सदा गतिः । उत्तमोत्तममेतद्धि पूर्वमुत्तममीरितम् ॥ २६३ ॥ गृहं सर्वात्मना त्याज्यं तच्चेत्त्यक्तुं न शक्यते । कृष्णार्थं तत्प्रयुंजीत कृष्णः संसारमोचकः ॥ २६४ ॥ धनं सर्वात्मना त्याज्यं तच्चेत्त्यक्तुं न शक्यते । कृष्णार्थं तत्प्रयुंजीत कृष्णोऽनर्थस्य वारकः ॥ २६५ ॥

तत्त्वदीपप्रकाशः ।

ब्रह्मचारिप्रभृतीनामपि सेवकसाधनसंपत्तावेतत्कर्तव्यम् । अन्यथान्य एवोपायः कर्तव्यः । तमग्रे वक्ष्यति संन्यासिनस्तु पूर्वापेक्षयाप्यग्रिम एवोत्तम इत्याह ॥ **यतेः पर्यटनमिति** ॥ गृहस्थानामपि पूजायां पञ्चदोषसंभवे पर्यटनमेव श्रेष्ठमित्याह ॥ **विक्षेपादिति** ॥ स्वतःप्रवृत्तिरहितानींद्रियाणि बलाद्भगवति योज्यमानानि विक्षेपं जनयन्ति विग्रहकर्शितानि । जरया व्याधिभिर्वा यदा शक्त्यभावः । लोका वा प्रतिबन्धं कुर्वन्ति । स्वस्य वा परम आग्रह उत्पद्यते येन तमसि प्रविष्टो भगवंतं न स्मरति लोकानां वा पीडां कुर्यात्तत्र पूजा त्यक्तव्या तदा अन्यत्रापि तथात्वेन परदेशे शून्यदेवालये पूजा विधेया । तत्रापि दोषसंभवे तीर्थपर्यटनं कर्तव्यम् । पापानां प्रतिबन्धकरूपाणां नाशाय । तदा यत्रैव गत्वा सेवा संपत्स्यते तत्रैव सेवा कर्तव्या । स्वतंत्रतया तीर्थाटनप्रकारमाह ॥ **सर्वेषामिति** ॥ विष्णुभक्तिप्रकारत्वात्सर्वाधिकारः । वर्णाश्रमयुक्तानामपि वर्णाश्रमधर्मैस्तीर्थानि विकल्प्यन्त इत्याह ॥ **यज्ञादिति** ॥ भारते हि यज्ञानां तीर्थानां च तुल्यता निरूपिता । तत्राटनप्रकारमाह ॥ **अतस्तेष्वप्रतिग्राहीति** ॥ तीर्थप्रवेशादिवसे तूपवासः, अग्रिमदिवसे यद्यन्नमात्रमपि नास्ति तदा तावन्मात्रं ग्राह्यं नतु ततोधिकम् । अटनस्य नित्यत्वाच्चिरकालं न स्थितिः । उच्चैर्नामसंकीर्तनं तत्राङ्गम् ॥ अन्तर्भगवत्स्मरणञ्च । एकाकी पर्यटेन्नात्र

'नैकः प्रपद्यतेऽध्वानमिति' स्मृतिदोषः। पथि भोगाद्यर्थं स्पृहा न कर्तव्या। शान्तश्च चित्ते भवेत्। एवमधिकाराभावे भिन्नमुपायं वक्ष्यति। कृष्ण एव तात्पर्यन्नतु तीर्थादौ देहपातनपर्यन्तं च पर्यटनं देहान्ते कृतार्थो भविष्यामीति। सदा शुद्धश्च भवेत्। संध्यावन्दनवत्प्रत्यहं तस्य गमनम्। अस्मिन् पक्षे अंतः कृष्णः सर्वदा स्फुरतीत्युत्तमोत्तममत्र संमत्यर्थं भगवदुक्तश्लोकद्वयमाह॥गृहंधनमिति॥२५९–२६५॥

आवरणभंगः।

गृहस्थस्योक्त्वाऽन्येषामाहुः॥ ब्रह्मचारीत्यादि॥ ॥ अत्र बहुवचनं विधुरविधवावीतरागिप्रभृतिसंग्रहार्थम्। अन्यथा गृहस्थस्योक्तत्वेन यतेर्वक्तव्यत्वेन चाश्रमद्वयस्यैवावशिष्टतया तदसंगत्यापत्तेः। अथ गृहस्थानामपि किंचिद्विशेषं वक्तुमाहुः॥ गृहस्थानामित्यादि॥ ॥स्वस्य चेत्यादि॥ ॥यथास्मदादीनां झकटकाद्यावेशात्तथेत्यर्थः। एवं दोषनिवृत्त्युपायत्वेन तीर्थाटनमुक्त्वास्य गौणत्वमात्रतापरिहारायास्य प्रकारं वक्तुमाहुः॥ स्वतंत्रतयेत्यादि॥ ॥ विष्णुभक्तीत्यादि॥ ॥ सर्वेधिकारिणो ह्यत्र विष्णुभक्तौ यथा नृपेतिस्कांदात्तथेत्यर्थः। तथात्वं च विदुरतीर्थयात्रादिभ्योऽवगंतव्यम्॥ अत्र कं चिद्विशेषमाहुः॥ वर्णेत्यादि॥ ॥ उत्तानमेतत्। तुल्यतानिरूपितेति। तथा हि। तीर्थचिंतामणौ "ऋषिभिः क्रमतःप्रोक्ता वेदेष्विह यथाक्रमम्। फलं चैव यथातत्वं प्रेत्य चेह च सर्वशः॥ न ते शक्या दरिद्रेण यज्ञाः प्राप्तुं महीपते। बहूपकरणा यज्ञा नानासंभारविस्तराः॥ प्राप्यन्ते पार्थिवैरेव समृद्धैर्वानरैः क्वचित्। नार्थन्यूनैरवगणै रेकात्मभिरसंहतैः॥ यो दरिद्रैरपि विधिः शक्यः प्राप्तुं नरेश्वर। तुल्यो यज्ञफलैः पुण्यैस्तन्निबोध युधां वर॥ ऋषीणां परमं गुह्यमिदमुक्तं मया तव। तीर्थाभिगमनं पुण्यं यज्ञैरपि विशिष्यते। अनुपोष्य त्रिरात्राणि तीर्थान्यनभिगम्य च॥ अदत्वा कांचनं गाश्च दरिद्रो जायतेनरः। अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः। न तत्फलमवाप्नोति तीर्थाभिगमनेन यत्॥" इति। अपरमपि विशेषमाहुर्मूले॥ हरिणा कृता इत्यनेन भगवता यज्ञाः कृताः बलदेवरूपेण तीर्थानि च यतःकृतानि अतोपि साम्यमितिभावः॥ २५९–२६५॥

ब्रजभाषाटीका।

ब्रह्मचारी विधवा वीतरागादिकनकूँ भी साधनसंपत्ति होय तहाँतक तो सेवाही करनों चाहिये सेवाके साधन नहिं बनसकें तब तो और उपाय करनो वा उपायकूँ आगें कहैगें संन्यासीकूँ

तो आगेंको उपाय करनोंही उत्तमहै (यतेः पर्यटनमिति) सन्यासीकूँ तो पर्यटन करनों श्रेष्ठहै । गृहस्थनकूँ भी सेवामें पाँच दोषहैं वे आय जावै तब तीर्थाटन करनों श्रेष्ठहै उन दोषनकूँ बतावैंहै, स्वतः सेवामें प्रवृत्त नहिं होयवेवाले इन्द्रिय बलात्कारकरकें सेवामें लगाये जावेहैं । तब चित्तमें विक्षेपकूँ उपन्न करेहै यह प्रथम दोषहै, वृद्धावस्थाकरकें अथवा रोगकरकें सेवाकरवेकी सामर्थ्य नहिं रहनो यह द्वितीय दोषहै, कुटुम्बके अथवा और लोक सेवाकूँ नहिं करवेदे यह तृतीय दोषहै, अपने हृदयमें परम खोटो आग्रह उत्पन्न होय जाय जासों अज्ञानरूप अन्धकारमें धँस्योभयो मनुष्य भगवान्को स्मरण नहिं करेहै यह चतुर्थ दोष है, सेवा करवेवालो और जीवनकूँ पीडा देवेलगजाय यह पाँचवो दोषहै । ये पाँच दोष होयँ तहाँ सेवाको त्यागकरनों यदि जहाँ सेवा करे तहाँही—दोष आयजावे तो परदेशमें शून्यदेवमंदिरमें पूजा करनी । वहाँभी दोषको संभव होय तो सेवाप्रतिबन्धक पापनकूँ दूर करवेकेलिये तीर्थपर्यटन करनों जहाँ गयेसों सेवा बनसके वहाँ ही सेवा करनी तीर्थाटनकी गौणता दूरकरवेकेलिये स्वतन्त्रता करकें तीर्थाटनको प्रकार दिखावेंहै । जैसें बिष्णुभक्तिमें सर्व जीव अधिकारी हैं तैसेंही तीर्थाटनभी विष्णुभक्तिको प्रकारहै तासों यामें सबनकूँ अधिकारहै वर्णाश्रमधर्मवाले मनुष्यनके अर्थभी वर्णाश्रमधर्मनकें साथ तीर्थनको बिकल्प कियोहै ॥ २५९॥२६० ॥ भारतमें तीर्थनकों तथा यज्ञनकों समान लिखें हैं। भगवान्ने भी तीर्थ करेहैं तीर्थयात्राको प्रकार दिखावैंहै । तीर्थस्थलमें जा दिन प्रवेश करे ता दिन उपवास करनों दूसरे दिन अन्नमात्रभी नहिं होय तो जितनेमें उदर भरजाय उतनोंही अन्नकी याचना करनों तीर्थमें दान नहिं लेनों नित्य बिं-

चरते रहनों बहुतकाल एक स्थानमें नहिं रहनों ॥ २६१ ॥ ऊँचे स्वरसों लाज छोडकें भगवान्के नामनको कीर्त्तन करतेरहनों तीर्थाटनको अङ्ग है, भीतर भगवान्को सर्वदा स्मरण राखनों एकाकी रहनों मार्गमें इन्द्रियनके विषयभोगनके अर्थ स्पृहा नहिं करनी चित्तकूँ शान्त राखनो जो मनुष्य ऐसो अधिकारी नहिं है ताकेलिये और उपाय आगे आज्ञा करेंगे श्रीकृष्णकी प्राप्तिमें तात्पर्यहै तीर्थादिकनमें तात्पर्य नहिं है तासों श्रीकृष्ण मोकूँ कब दर्शन देंगे ऐसी उत्कण्ठा सदा तीर्थाटनकरते बनी राखनी ॥२६२॥ देहपात नहिं होय तहाँताँई विचरतोरहै देहपातभये पीछे मैं अवश्य कृतार्थ होऊँगो ऐसो निश्चय राखनों सदा शुद्ध रहनों संध्यावंदन जैसें नित्य कियोजावै है तैसें नित्यही तीर्थाटन करते रहनो या पक्षमें अन्तःकरणमें सर्वदा श्रीकृष्ण स्फुरण होवेहै तासों ये पक्ष उत्तमोत्तम है ॥ २६३ ॥ या बिषयमें संमतिकेलिये भगवान्के आज्ञाकियेभये दो श्लोकनकूँ कहेहैं ॥ अर्थ गृहकोभी सर्वात्माकरकें त्याग करनों यदि घर नहिं छोड्योजाय तो कृष्णके अर्थ घरको बिनियोग करनों कृष्ण संसारसों छुडायवेवाले हैं ॥२६४॥ (गृहं धनमिति) सर्वात्माकरके धनको त्यागकरनों जो वह धन नहिं त्यागकियोजाय तो श्रीकृष्णके अर्थ वाको विनियोगकरनों कृष्ण अनर्थके दूर करवेवालेहैं ॥ २६५ ॥

अथवा सर्वदा शास्त्रं श्रीभागवतमादरात् ।
पठनीयं प्रयत्नेन सर्वहेतुविवर्जितम् ॥ २६६ ॥
वृत्त्यर्थं नैव युंजीत प्राणैः कंठगतैरपि । तदभावे यथैव स्यात्तथा निर्वाहमाचरेत् ॥ २६७ ॥
त्रयाणां येन केनापि भजनं कृष्णमाप्नुयात् ।

जगन्नाथे विठ्ठले च श्रीरंगे वेंकटेऽथवा॥२६८॥ यत्र पूजाप्रवाहःस्यात्तत्र तिष्ठेत तत्परः। एतन्मार्गद्वयं प्रोक्तं गतिसाधनसंयुतम् ॥ २६९ ॥

तत्त्वदीपप्रकाशः।

पूर्वाधिकारद्वयाभावे तृतीयं पक्षमाह ॥ अथ चेति॥"बाह्याभ्यन्तरभेदेनरूपभेदद्वयं मतम्। नाम्नि चैकं ततस्त्रेधा भक्तिमार्गे निरूपितः॥" प्रपत्तिमार्गमाह ॥ जगन्नाथे विठ्ठलेचेति ॥ विकल्प एवैषां स्थानानाम् । प्रपत्तौ ब्रह्मास्त्रन्यायस्य बाधकत्वात्। पूजाप्रवाहो भगवत्सांनिध्यबोधकः ॥ एवं वैदिको भक्तिमार्गश्च निरूपित इत्याह ॥ एतन्मार्गद्वयं प्रोक्तमिति ॥ २६६–२६९ ॥

आवरणभंगः।

अथवेत्यादि ॥ ॥ अत्र यः पाठ उक्तः स वर्णाश्रमवतां धर्म इत्युपक्रमे वर्णानां ब्राह्मणक्षत्रियविट्शूद्राणामित्युक्तत्वाच्चतुर्णां वर्णानां वा त्रैवर्णिकानां वेति प्रसंगाद्विचार्यते। तत्र " भारतव्यपदेशेन आम्नायार्थश्च दर्शितः। दृश्यते यत्र वै धर्मः स्त्रीशूद्रादिभिरप्युत॥ " इति प्रथमस्कन्धे "विप्रोधीत्याप्नुयात्प्रज्ञां राजन्योदधिमेखलाम्॥ वैश्यो निधिपतित्वं च शूद्रः शुद्ध्येत पातकात्॥ " इति द्वादशस्कंधे च धर्मदर्शनश्रीभागवताध्ययनयोर्बोधनात्। तस्माद्भारतसर्वात्मेत्यत्राभयेच्छया सर्वसाधारण्येन कीर्तनविधानाच्च सर्वमेव भागवतं सर्वे पठेयुरिति प्राप्ते अभिधीयते। ब्रह्मज्ञानभागांशव्यतिरिक्तमेव पठनीयम्। धर्मब्रह्मणोरतींद्रियत्वेन। प्रथमवाक्ये दृशेर्मुख्यार्थस्य गृहीतुमशक्यतया धर्मादिशाब्दज्ञानमात्रार्थकत्वेन पाठाप्रापकत्वात्। द्वितीयेऽप्यधीत्येत्यस्य स्मारणाध्ययनसाधारण्यात्स्मृत्वा गुरुमुखाद्वा गृहीत्वेत्यर्थसंदेहेन तथात्वात्। नच स्वाध्यायब्राह्मणश्रुतौ प्राङ्नासीनःस्वाध्यायमधीयेतेत्यादौ केवलोच्चारणेऽपितथा प्रयोगात्तत्प्राप्तिरिति वाच्यम्। विनिगमनाविरहात्। नचेतःपूर्वं य एतान् श्रावयेदिति सर्वां संहितां पठन्नश्नन्प्रयत इति पाठं च प्रक्रम्य विप्रोधीत्येति श्लोककथनादुपक्रम एव विनिगमकोऽस्त्विति वाच्यम्। तत्र श्रावणोत्तरं पठनस्योक्ततया श्रवणानुसारिपाठप्राप्त्या सर्वपाठाप्राप्तेः। नचात्र सर्वस्यैव श्रावणमिति वक्तुं युक्तम्॥ कपिलदेवैः स्वमातृत्यौपनिषदभागवतज्ञानयोरनुक्तत्वेन स्त्रीशूद्रयोस्तदंशाश्रावणे तयोस्तच्छ्रवणान-

धिकारे च सिद्धे॥"शूद्रयोनावहं जातो नातोन्यद्वक्तुमुत्सहे। कुमारस्य तु या बुद्धिर्वेद तां शाश्वतीमहम्॥" इत्युद्योगपर्वणि सनत्सुजातीयारंभे विदुरवाक्याज्ज्ञानोत्तरमपि वदनानधिकारे च सिद्धे श्रवणपठनयोः पठन एव वा तावदंशत्यागस्यैवौचित्यात्। अत एव तृतीयस्कन्धनिबन्धे श्रीमदाचार्यैरपि "पदौपनिषदं ज्ञानं श्रीभागवतमेववा। वर्णिनामेव तद्धि स्यात् स्त्रीशूद्राणां ततोऽन्यथेति" कारिकया भागवतज्ञानमपि त्रैवर्णिकानामेव उपासनायाः प्राधान्यात्। यदेव भगवता ब्राह्मणे प्रोच्यते तत्त्रैवर्णिकानामेवेति ज्ञातव्यमिति तत्प्रकाशग्रंथेन च तथैव निर्णीतत्वात्॥ न चैकादशस्कंधेऽपि"एषतेऽभिहितः कृत्स्नो ब्रह्मवादस्य संग्रह" इति कथनाच्चतुश्लोकीतुल्यतयोपदेशस्य तत्रापि सत्वात्। तत्राप्यनधिकारः शंक्यः। तदग्रे" नैतत्त्वया दांभिकाय नास्तिकाय शठाय च। अशुश्रूषोरभक्ताय दुर्विनीतायदीयताम्॥ एतैर्दोषैर्विहीनाय ब्रह्मण्याय प्रियाय च॥ साधवे शुचये ब्रूयात् भक्तिः स्यात् शूद्रयोषिताम्॥" इति कथनात्। कर्मज्ञानादिमिश्रतयोपदेशाच्च तादृशां श्रावणे बाधकाभावेन तत्र तेषां श्रावणाधिकारस्य सिद्धेः। अन्यथा तद्विरोधापत्तेश्च। यत्तु "ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः। वैश्यः पठन् विट्पतिः स्यात् शूद्रःसत्तमतामियात्" इति चतुर्थस्कंधीयम्॥ नतु पृथुचरितमुपक्रम्य पठितत्वात्। प्रकरणविरुद्धमिति न तेन सर्वपाठः प्रापयितुं शक्यते। नचाभयेच्छायां तदर्थं कीर्तनस्य विरोधः शंक्यः। तत्र भगवत एव कथनाच्छ्रीभागवतपदाभावाच्चोक्तैकदेशातिरिक्तभागवतकीर्त्तनादपि तत्परिहारसिद्धेः। न च "देवोऽसुरो मनुष्योवेति" वाक्यात्। "सर्वेऽधिकारिणो ह्यत्र विष्णुभक्तोयथेति" दृष्टान्तकथनाच्च भगवद्भक्ते सर्वाधिकारत्वमभिप्रेत्यात्र त्रेधा भक्तिमार्ग उपदिष्टः। तत्र रूपसेवायां बाह्याभ्यन्तरभेदेन द्वेधा उपदिश्य तत्रानधिकारे 'अथवा सर्वदा शास्त्रमि' त्यादिकारिकाभ्यां नामसेवाप्रकार उपदिश्यत इति तस्य सर्ववर्णसाधारणत्वात्सर्वपठनमाशंक्य ब्रह्मोपदेशभागव्यतिरिक्तपाठेऽपि तदुपपत्तेः। अन्यथा पदौपनिषदं ज्ञानमिति कारिकातद्व्याख्यानयोर्विरोधापत्तेः, पुरुषोत्तमसहस्रनामपाठादपि श्रीभागवतपाठसिद्धेस्तैरेवोक्तत्वात्तत एव सर्वपाठसिद्धेश्च। ये पुनरेतन्न्यक्कृत्य ब्राह्मणाद्युत्कर्षासहिष्णवः। स्वस्य पाठाधिकारमापादयन्ति तेषां तु मात्सर्यदोषेण श्रीभागवतोक्तधर्मेष्वनधिकाराच्चदुक्ते पाठेप्यनधिकार एवेति दिक्। नन्वत्र प्रकाराणां बहूनामुक्तत्वात्कथमेको मार्ग इत्यत आहुः॥ बाह्येत्यादि॥ प्रपत्तीत्यादि॥ ॥ अत्राप्यनधिकारे उपायांतरं तदनुकल्पभूतमाहेत्यर्थः॥ सर्वधर्मानित्यत्रैकपदादन्याश्रयः सर्वथा बाधक इति बोधयितुं तत्परपदस्य तात्पर्यमाहुः॥ ॥ प्रपत्तावित्यादि॥ तत्परास्तिष्ठेदित्यर्थः॥

स्थानांतरस्यापिसंग्रहार्थमाहुः॥पूजेत्यादि॥एतस्यैव शेषो विवेकधैर्याश्रयकृष्णाश्रयौ ज्ञेयौ। प्रपत्तिश्च शरणागतिः। आश्रय इति यावत्। तत्प्रथमतो मानसं पश्चात्कायिकं वाचनिकमित्यक्रूरस्तुतावुक्तम्॥ सुबोधिन्यां तदुपपादितं शरणागतिप्रकरण इति च। तदेव विवेकधैर्याश्रये विवेधैर्ययोर्निरूपणेन कायिकं,आश्रयनिरूपणेन मानसं वाचिकं चोक्तम्। अत्रापि कारणं भगवदनुग्रह एवेति सोऽहं तवांघ्रीत्यत्राक्रूरस्तुतौ प्रतिपादितमनुभवेन शरणागतिसिद्धिलक्षणं च तत्रैवोक्तम्। यदि संघातमनुगुणं कुर्यात्। त्याजयेद्वा तदा शरणागतिः सिद्धेति ज्ञातव्यमित्यारभ्य सत्सेवारुचिः भगवत्स्वरूपज्ञानेच्छा भगवच्छास्त्रपरत्वं चांतिमजन्मज्ञापकमित्यंतेन। एतत्सिद्धयर्थमेव कृष्णाश्रयस्तोत्रं चेति ज्ञेयम्। अनुगुणपक्षे संघातानुगुण्यं प्रसन्नचेतसा सेवाकरणानुकूल्यमेवाप्रपत्तेः। सामर्थ्यमलौकिकद्रष्टृत्वमिति सुदाम्नो मालाकारस्य स्तुतौ पुंसोत्यनुग्रह इत्यत्र स्पष्टम्। तच्च भगवदिच्छाज्ञानरूपमेव इदमेव पञ्चाध्याय्यामपि "तव पादरजःप्रपन्ना" इत्यादिषु ज्ञापितम्। एवं च भक्तिवर्द्धिनीग्रंथ एतस्यैव सेवाकरणस्य प्रपञ्चो ज्ञेयः। नवरत्नमप्यस्यैव प्रकरणस्य शेषः नवरत्नशेषोऽन्तःकरणप्रबोधः सिद्धान्तरहस्यसेवाफलनिरोधलक्षणान्यपि तथा। एवमन्येऽपि ज्ञेयाः। अथवेत्यादिनोक्तप्रकारे यदानधिकारस्तदा सहस्रनामस्तोत्रं नामावली च सिद्धान्तमुक्तावली तु शास्त्रस्य संग्रहरूपा पुष्टिप्रवाहमर्यादाग्रन्थो भक्तिहंसश्च मार्गस्वरूपादिविवेचकतयास्यैव प्रकरणस्य शेषौ। बालबोधोऽपि तथा संन्यासनिर्णयस्तु त्यागशेषः स्फुट एवेति सर्वाण्येव प्रकरणान्येवं बोध्यानि। अत्रायं क्रमः प्रतिभाति॥ पूर्वं भगवत्कृपांकुरस्य स्वतः संस्कारेण भगवन्मार्गस्य संगादिना वा उद्बोधे मार्गेऽस्मिन् रुचिस्ततोऽस्मिन्प्रवेशेच्छा। तत्राप्यंकुरस्य दृढत्वेऽस्मिन् मार्गे पूर्वोक्तरीत्या दृढं सर्वोत्तमत्वभानं प्रवेशश्च द्वारभूतगुरुद्वारा शरणागतिः, ततः सतां द्वारभूतगुरोर्वा संगेन शिक्षया वा श्रीमदाचार्यचरणेषु भगवदभेदबुद्धिः सर्वोत्तमादिभिस्तद्भजनम्। तत एतन्मार्गीयसङ्गेपूर्वोक्तरीत्या भगवद्भजनं ग्रन्थावलोकनश्रवणादिना च तत्तत्प्रतिबन्धनिवृत्तौ दोषनिवृत्तिःसेवोपयोगिगुणोपचयश्च तत एतदावर्तने सकुटुंबस्य भगवत्प्राप्तिस्तत्राप्युदासीनप्रतिकूलयोर्नचर्षणीशब्दवाच्यानां तु यत्किञ्चित्फलं परं परिभ्रमणमेव। पंचदोषसंभवे तु तीर्थाटनं दोषनिवृत्तौ पुनः सेवायाः पूर्वोक्तरीतिकं फलं सेवानधिकारे तु श्रीभागवताश्रय उक्तरीत्या तत्राप्यनधिकारे सहस्रनामनामावल्योर्यथोक्तरीतिक आश्रयः। उत्तमाधिकारे तु पर्यटनम्। अत्राप्यनधिकारे भगवत्प्रपन्नतया अदूरे विप्रकर्षे वा स्थितिः सहस्रनामाद्यावर्तनसहायस्य। एवं करणे एतन्मार्गीयफलोन्मुखत्वं फलं चा? आरंभदशायां पापादिना पुनरावृत्तिः पाकदशायां यथाकथंचित् पापे तु पापस्यैव

नाश इति सिद्धयति । वेदस्तु कालेन निर्बल इति तन्मार्ग इदानीमसिद्धयन्न फलायालमिति भगवन्मार्गाङ्गतयाऽत्रैव प्रविशतीति। गुरुणावेशादिना मार्गरुचिं परीक्ष्य जिज्ञासां चावगत्य प्रश्नानंतरं सेवादिकमुपदेष्टव्यमिति । यस्तु नामाद्युपदेशाधिकाराभावेऽपीदानींतनैः क्रियते सोऽपि जानता कृतः स्वगृह्यमाणद्रव्यशुद्धौ तेन बंधाभावे च पर्यवस्यति । अजानता कृतस्तु स्वस्मिन् दोषादोषयोः संदेहे पर्यवस्यतीति । इदं यथा तथा उपदेशवादे वृत्तिवादे च विवेचितमिति ततोऽवधेयमिति दिक् ॥२६६–२६८॥ प्रकृतमनुसरामः । मूले–एतन्मार्गद्वयमित्यत्र द्वित्वं मुख्यापेक्षया बोध्यम् । प्रपत्तिमार्गस्य भक्तिमार्गानुकल्पत्वादिति गतिसाधनसंयुतमित्यत्र गतिशब्दः फलवाची सा काष्ठा सा परागतिरिति श्रुतौ तथासिद्धेः ॥ २६९ ॥

ब्रजभाषाटीका ।

पहली कहे दोनों अधिकार जिनमैं नहिं हैं उनकेलिये तृतीय पक्ष कहे हैं (अथवेति) सब कामना छोडकें आदरपूर्वक प्रयत्नकरकें सदा श्रीभागवतको पाठकरनों ॥ २६६ ॥ श्रीभागवतकरकें अपनी वृत्ति प्राण कण्ठमें चलेजावें तथापि नहिं करनी वृत्तिके अभावमें जैसें निर्वाह बनसके तैसें निर्वाह करनों परन्तु श्रीभागवतकों वृत्तिके अर्थ विनियोग नहिं करनों ॥२६७॥ (स बाह्याभ्यन्तरो ह्यजः) इत्यादिश्रुत्यनुसार भगवानको एक बाह्य रूपहै। वह सब पदार्थनके बाहिर रहैहै। दूसरो आन्तररूपहै वहै सब पदार्थनके भीतर रहैहै। तीसरो आपको रूप शब्दनमें रहैहै तासों तीनप्रकारके भक्तिमार्गको वर्णन कियो है (प्रपत्तिमार्ग) अर्थात शरणमार्गको वर्णनकरै है (जगन्नाथ इति। सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज) अर्थ–या गीताके श्लोकमें सर्वधर्मनकूं छोडके एक भगवानकेंही शरण जानो लिख्योहै वाहीके अनुसार गुरुके द्वारा भगवानके शरण जानो फिर अन्याश्रय छोडके श्रीभगवानको ही दृढ विश्वास राखनों जैसें हनुमानजीकूँ ब्रह्मास्त्रसों राक्षसननें बाँधदीनें पीछे संदेहभयो वानर बहुत प्रबल है ब्रह्मा-

गो तासों और अस्त्रनसों भी बाँधनों ऐसें बिचारक-

कें जब ब्रह्मास्त्रको विश्वास छोडके और अस्त्रनसों बाँधवेलगे तब
हनुमानजी ब्रह्मास्त्रसों छूटगये ऐसेंही भगवानके आश्रयमें संदेह
करकें जब अन्यदेवको आश्रय कियोजायहै । तब वह भक्त शर-
णमार्गसों पतित होजावेंहै । याहीसों (मामेकं शरणं व्रज) या-
वाक्यमें (एकम्) ऐसो पद कह्यो है । अर्थात् एक मेरेही शरण
आव दूसरेको आश्रय मत कर भगवान् देहादिसंघातकों सेवाके
अनुकूल करें अथवा अत्यन्त आसुरसंघातहोय तो संघातकों
छुडायदे तब जाननो शरणागति सिद्ध भई, तापीछें सेवामें जाकी
रुचि होय,भगवान्के स्वरूपजानवेकी इच्छा होय, भगवच्छास्त्रनमें
परायण रहै तब जाननों याको ये अन्तिम जन्महै अर्थात् फिर
याको जन्म नहिं होयगो शरणधर्म सिद्धहोयवेकेलिये ही कृष्णा-
श्रयस्तोत्र श्रीआचार्यचरणननें प्रकट कियोहै शरणागत मनुष्यकूँ
श्रीजगन्नाथजी श्रीपुण्डरीक विठ्ठलनाथजी श्रीरङ्गनाथजी श्रीवें-
कटेशजी इत्यादिस्वरूपनकें समीप रहनोंचहिये औरभी कोई
भगवद्धाम होय जहाँ सदा पूजाको प्रवाह होय तो वहाँ रहनों
चाहिये पूजाप्रवाह है सो भगवान्के सन्निधानको जतायवेवारो है ॥
या श्लोकके आवरणभङ्गमें श्रीपुरुषोत्तमजी महाराजनें ऐसो क्रम
लख्यो है पहिली भगवान्की कृपाके अङ्कुरको स्वतः अथवा
वैष्णवके संगकरकें उद्बोध होय तब या मार्गमें रुचि होय तापीछें
या मार्गमें प्रवेशकी इच्छा होय फिर कृपाको अङ्कुर दृढ होय तब
यह मार्ग सब मार्गसों उत्तम दीखें, फिर द्वारभूत गुरुके द्वारा
भगवान्के शरण आवें फिर सत्सङ्गकरकें श्रीआचार्यचरणनमें
यह भगवान्हें ऐसी अभेदबुद्धि होय तदनन्तर सर्वोत्तम स्तोत्रा-
दिकनकें पढनसों गुरुकी सेवा करता रहै । तापीछें भगवदीयनके

संग करके पूर्वरीतिके अनुसार भगवान्‌की सेवा करतोरहै स्वमार्गीय ग्रन्थनकूँ सुनवेदेखवेसों प्रतिबन्धक निवृत्ति होय तब दोषनिवृत्ति तथा सेवाके उपयोगी गुणनकी प्राप्ति होय तापीछे बारम्बार भगवत्सेवाकी आवृत्ति करतो रहै तो सकुटुम्बकूँ भगवत्प्राप्ति होय उन कुटुम्बवारेनमें भी जो सेवामें उदासीन रहै अथवा सेवाको (प्रतीकूल) विरोधी होय वाकूँ भगवत्प्राप्ति नहोय पहली कहेभये पञ्चदोषनको जो सम्भव होय तो तीर्थाटन करके दोषनिवृत्ति करनों दोषनिवृत्तिभयेसों सेवा करी जाय तो भगवत्प्राप्ति होय, सेवाको अनधिकार होय तो श्रीभागवताश्रय करनों वामें भी अधिकार नहिं होय तो पुरुषोत्तमसहस्रनाम त्रिविधनामावलीको आश्रय करनों उत्तमाधिकारमें तो तीर्थपर्यटन श्रेष्ठ है वामें भी अनधिकार होय तो शरणागत होयके सहस्रनामादिकनको पाठ करतोभयो जहाँ पूजाप्रवाह होय तहाँ समीप अथवा दूरस्थित रहनों कहेभये प्रकारनके अनुसार बर्ताव करवेसों साधक भक्त फलोन्मुख होवेहै तथा फलकी प्राप्ति होवे है (प्रपत्तिमार्ग) अर्थात् शरणमार्ग भक्तिमार्गको अनुकल्पहै तासों भक्तिमार्गमें ही याको प्रवेश है । यहाँताईं फलसाधनसहित वैदिक मार्ग तथा भक्तिमार्गको निरूपण कियो है ॥ २६८ ॥ २६९ ॥

कर्ममार्गे प्रवक्ष्यामि भ्रांतानां बहुशः फलम् । अयथाज्ञानतः कर्म्म कुर्वाणास्त्रिविधामताः ॥ ॥ २७० ॥ सात्विकादिविभेदेन कर्म चापि त्रिधा भवेत् । सात्विकः सात्विकं कर्म्म यथाश्रुतिपरः कृती ॥२७१॥ स्वर्गलोकस्तस्य सिध्येद्विमानस्त्रीभिरावृतः । पुण्यस्य तु तिरोधा-

ने पतत्यर्वाक्शिरास्ततः ॥ २७२ ॥ पुण्यशेषं समादाय समीचीनेषु जायते। राजसं कर्मकुर्वाणो मेर्वादिसुखभाग्भवेत् ॥ २७३ ॥ तामसं कर्म कुर्वाणः पाताले सुखभाक् तथा। राजसः सात्विकं कुर्वन् दैत्यस्वर्गेषु जायते ॥ २७४ ॥ राजसं कर्म कुर्वाणश्चंद्रलोके सुखी भवेत् । वृष्टिद्वारान्नरूपः सन् रेतोयोनिषु जायते ॥ ॥ २७५ ॥ तामसं कर्म कुर्वाणो यक्षलोके सुखी भवेत् । तामसः सात्विकं कुर्वन्पितृलोके महीयते ॥ २७६ ॥ राजसं कर्म कुर्वाणो भूतादिसुखमाप्नुयात्। तामसं कर्म्म कुर्वाणः सर्पादिसुखभाग्भवेत् ॥ २७७॥ सर्वेषां पुनरावृत्तिस्तथा कर्म पुनर्भवः । एवं त्रयीधर्मपरा गतागतमवाप्नुयुः ॥ २७८ ॥

तत्त्वदीपप्रकाशः ।

सर्वत्रैव जगति फलं वर्तत इति सर्वत्र फलं साधनं चाह ॥ कर्ममार्ग इति ॥ कर्म्मणो नानात्वं स्वभावगुणभेदात् । तामसः कदापि नसात्विकं कर्म्म करोति कुर्वन्वा तामसप्रकारेण करोति । अतो नव भेदा गीतायां निरूपिताः । "कर्ता सात्विक उच्यते । यत्तत्सात्विकमुच्यत"इत्यादिना 'उर्ध्वं गच्छन्ति सत्वस्था' इति वाक्यात्। कर्म्मणस्त्रैविध्ये सात्विक एवोर्ध्वादिषु गच्छति । तथा राजसोऽपि दक्षिणमार्गेषु चन्द्रलोके च सुखमनुभवति' सर्वेषां संग्रहार्थं सत्वादितारतम्येन फल-

कल्पना। पितृलोकेभूतलोकः सर्पलोकश्चेति तामसानां फलं नवविधं निरूप्य भगवद्वाक्येनोपसंहरति। एवं त्रयीधर्मपरा इति॥२७०--२७८॥

आवरणभंगः ।

एवं फलप्रकरणे प्रमाणानुरोधिनः समुख्यप्रमेयस्य बलं विचारितम्। अतः परं गुणभूतस्य तस्य बलवैराग्यार्थं विचारयंति । धूमादिमार्गस्य तृतीयमार्गस्य "को हि तद्वेद यदमुष्मिन् लोकेऽस्ति नवेति" "यामिमां पुष्पितां वाचमिति" "कर्मण्यनाश्वास" इति यथायथं श्रुतिगीताश्रीभागवतेषु निंदितत्वेऽपि प्रमाणानुरोधितायां सत्वेन तद्बलविचारस्यावश्यकत्वात्॥ सर्व त्रैवेत्यादि॥ ॥ "एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति" श्रुतेः सदृशःसंभिन्नस्तद्धर्मभूत आनंदः फलं तत्सर्वत्र जगति वर्तत इति सर्वेषु सदंशभूतेषु लोकेषु सुखरूपं फलं तत्साधनभूतं वैदिकं कर्म च तद्वांछानिवृत्त्यर्थं पूर्वोक्ताज्जघन्यरूपतया स्फुटीकरोतीत्यर्थः॥ ननु ज्ञानं विना कर्मासंभवाज्ज्ञाने सति कर्मणां कथं भ्रान्तत्वमित्याशंकायामयथाज्ञानत इत्यादिव्याकुर्वन्त आहुः॥ कर्मणो नानात्वमित्यादि॥ गीतायां 'ज्ञानं ज्ञेयं परिज्ञानं' तत्र ज्ञानपदेन करणमुच्यते। तद्विमर्शे येनेति वेतीत्यादिनिर्देशात्। ज्ञेयपदेन तादृक्करणैर्ज्ञायमानं लौकिकं वस्तूच्यते तच्चैकविधमेव। "यस्तु यस्यादिरंतश्च स वै मध्यश्च तस्य तदि"त्याद्येकादशे वाक्ये तस्यैकरूपताभिधानात्सात्विकानां तथानुभवादत्र त्रैविध्यानुक्तेश्च॥ परिज्ञाता त्वंतःकरणमेव वृत्त्यधिकरणत्वात्करणकर्मपदाभ्यां च कर्मेन्द्रियचेष्टे उच्येते कर्तृपदेन चोपाधितो भिन्नमन्तःकरणमेवोच्यते । गुणा अपि नोदासीना बन्धकाः किंतु तत्तच्चित्तजा एव। तथा "सत्वं रजस्तम इति गुणाजीवस्य नैव मे। चित्तजा यैस्तु भूतानां सज्जमानो निबध्यत"इत्येकादशे भगवद्वाक्यात्। सात्विककरणैश्च जायमानमपि ज्ञानं प्रकृतिकैवल्यमेवावगाहते नतु ब्रह्मकैवल्यम्। यस्तु यस्यादिरिति पूर्वोक्तवाक्यात्। अतस्तदप्ययथाज्ञानमेव। एवं सति तादृशज्ञानेन तादृशैर्द्विविधकरणैस्तादृशांतःकरणाभिमंतारो यत्कुर्वन्ति तस्य कर्मणो यज्ञदानजपादेर्यन्नानात्वं तत् चित्तस्वभावभूतानां जीवनानाविधत्वापादकानां गुणानां भेदादित्यर्थः। तर्ह्ययथाज्ञानादेव कर्मनानात्वसिद्धेः कर्तृकर्मणोः किमिति त्रैविध्यमुक्तमित्याकांक्षायां तत्तात्पर्य्यमेव विशदयंति॥ तामस इत्यादि॥ ॥ एवं सिद्धे तेषां भ्रांतत्वे यदर्थमेवं नवधा निरूपणं तदाहुः॥ उर्ध्वमित्यादि॥ गच्छतीति॥ उत्तरमार्गेण गच्छतीत्यर्थः॥ तावतापि न तस्योत्तमत्वमिति ज्ञापयन्ति। मूले सात्विक इत्यादिना। इदं चैकादशस्कंधीयदशमाध्याये "अन्तरायैरविहतो य

धर्म" इत्यादिपञ्चश्लोकेषु स्फुटम् । शेषं च न्यायादेव सिद्ध्यति । एवं सात्वि-
योक्त्वा राजसस्येतो हीनत्वं बोधयितुं लोकावृत्त्यादिकमतिदिशंति ॥ तथे-
ादि ॥ ॥ एवं कल्पनायां बीजेन स्वसजातीयकर्मान्तरोत्पत्तिः पुनः पुनः
ञतारतम्यायोच्यते । अतः श्रुत्युक्तोऽपि मार्ग एवंभूतश्चेत्फलतो जघन्य एवेति
गमयंतीत्यर्थः ॥ २७०–२७८ ॥

व्रजभाषाटीका ।

सर्वत्र हि जगत्में सर्वलोकनमें सुखरूप फलहै । तहाँ
एकस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति) या श्रु-
ासों जहाँ अल्पभी सुखकूँ भगवद्धर्मानन्दांशरूप समुझनों उन
;खनकेलिये साधनभी कहेहैं (कर्ममार्ग इति) स्वभावगुणभे-
करके नानाप्रकारके जो कर्म हैं वेही नानालोकमें जायवेके उ-
ायहैं तात्पर्य यह है (गुणा जीवस्य नैव मे । चित्तजा यैस्तु भू-
ानां सज्जमनो निबध्यते) इत्यादिवचननसों अन्तःकरणमें त्रि-
ेध गुण रहे हैं । उन चित्तस्वभावभूत गुणनके भेदनसों त्रिविध
र्म करवेवाले त्रिविध जीवहैं । मायिकगुणनसों व्याप्त उनके अ-
ःकरणहैं । तासों ब्रह्मको यथार्थज्ञान उनकूँ नहिं होयहै तासों
अयथार्थज्ञानसोंही वे कर्म करेहैं, तामस जीव कभी सात्विक कर्म
ाहिं करेंगो यदि सात्विक कर्म करेंगो तो वाकूँ तामसप्रकारसों
ही करेंगो । याहीसों नव भेद गीताजीमें लिखेहैं । सात्विक कर्ता
ात्विक कर्मकरके (उर्द्ध्वं गच्छन्ति सत्वस्थाः) गीतावाक्यानु-
ार उत्तरमार्गद्वारा स्वर्गलोकमें जावें है । स्त्रीजननकारिके आवृत
हे है । पुण्यको तिरोधानभयेसों अधोमुख होयकरके गिरप-
डै है ॥ २७०–२७२ ॥ शेषपुण्यकूँ लेकें वह जीव सत्कुलमें उत्पन्न
होवेहै, सात्विककर्ता राजस कर्मकरके दाक्षिणमार्गकरकें मेर्वादिक-
नके सुखको अनुभव करेहै सात्विक कर्ता ॥ २७३ ॥ तामस क-
र्म करकें पातालमें सुख भोगै है । राजस कर्ता सात्विककर्मकरिके

दैत्यस्वर्गमें जन्म लेवेहै ॥ २७४ ॥ राजस कर्ता राजसकर्मकरकें चन्द्रलोकमें सुखको अनुभव करेहैं । पुण्यको तिरोधानभयेसों शेष पुण्य लेके वृष्टिद्वारा अन्नरूप होयके फिर जीवके शरीरमें जायकरकें वीर्यरूप होके नानायोनीनमें उत्पन्न होवेहै ॥ २७५ ॥ राजस कर्ता तामस कर्मकरकें यक्षलोकमें सुखी होयहै तामस जीव सात्विक कर्म करकें पितृलोकमें जावै हैं ॥२७६॥ तामस जीव राजस कर्म करके पितृलोकमें जो भूतलोकहै वाके सुखकूँ प्राप्त होवै हैं, तामस जीव तामसकर्म करके सर्पादिकसुखको भोगी होवै हैं ॥ ॥२७७॥ याप्रकार नवविध फलको निरूपण कियोहै । इन सब कर्म वालेनकी कर्मानुसार पुनरावृत्ति तथा पुनर्जन्म होवै है यहही भगवान् गीतामें आज्ञा करेहै (एवं त्रयीधर्मपरा गतागतमवाप्नुयुः) अर्थ—ऋग्वेद, यजुर्वेद, सामवेद, इन तीनों वेदनके धर्ममें परायण मनुष्य गतागतकूँ अर्थात् जायवेआयवेकूँ प्राप्त होवे है ॥२७८॥

तत्तद्देवोपासकानामाजन्मोपासने फलम् । तत्तत्सायुज्यरूपादिवेदोक्तानामनेकधा ॥२७९॥
पौराणिकानां च तथा निषिद्धेतरभावतः। यजन्ते सात्विका देवान् यक्षरक्षांसि राजसाः २८०
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः। विहितानेककर्तॄणां देहांते यदुपासनम् ॥२८१ ॥
तत्सायुज्यादिसिद्धिः स्यात्तत्पोषोन्यस्य वै फलम् । कर्म्मणाङ्गहना रीतिर्ब्रह्मणापि न बुद्ध्यते ॥ २८२ ॥ ईश्वरत्वात्तदिच्छायाः प्रधानत्वादनेकधा । तदुद्रेकोऽवसाने स्यात्कृपाक्रोधावि-

॥ २८३ ॥ कृपयाधमतां प्राप्य भक्तं
येत्क्कचित् । अनियुक्ततपस्यानां पीड-
धतः क्कचित् ॥ २८४ ॥ हीनभावं नय-
दुष्टं वा मोचयेत्क्कचित् । कर्म्मणोह्यापि
यं बोद्धव्यञ्च विकर्म्मणः ॥ २८५ ॥ अ-
श्च बोद्धव्यं गहना कर्म्मणो गतिः । अ-
तरामेव कर्म्ममार्गो दुरत्ययः ॥ २८६ ॥

तत्त्वदीपप्रकाशः ।

फलं वक्तुं नानादेवोपासकानां फलमाह ॥ **तत्तद्देवोपासका-**
वेदोक्तानामग्न्यादीनां देवोपासनाबुद्ध्या अग्निहोत्रादिकर-
विद्यमानत्वात्तत्तद्देवतासायुज्यं पौराणिका दुर्गागणपतिप्र-
विष्णुं परित्यज्य तद्भजनं नकोऽपि करिष्यतीत्याशंक्य
माह ॥ यजंते सात्विका देवानिति ॥ एकदा बहुदेवो-
कर्मप्राधान्यात्कर्ममार्गीयमेव फलम् । नोपासनाफलं क्रमेण
तद्देवोपासनायां फलमाह ॥ **विहितानेकेति** ॥ अंतिमस्य शी-
षामभ्यनुज्ञाहेतुः ।एवमुपासनाया नियतं फलमुपपाद्य कर्ममा-
नियतत्वमाह ॥ **कर्मणामिति** ॥ कर्म्माणि विद्धचंशे निषिद्धा-
पतंति तथा निषिद्धे विहितानि तेन कस्य फलं भवेदिति
शंका । तत्र हेतुमाह ॥ **ईश्वरत्वादिति** ॥ कर्म्मस्वरूपी भ-
ः स स्वेच्छया किंरूपोऽभिव्यक्तो भवेदिति न ज्ञायते ।
व्यर्थ इति न फलं नियतम् । यतः अनेकधा तदुद्रेकः । त-
वसाने यत्कर्म्म तदेव फलदायकम् । तत्रेश्वरेच्छया किंरूपो-
भवेदिति न ज्ञायते । यदि जीवे कृपा तदा शुभरूपेण क्रोधे
णेति निर्णयः ॥ २७९--२८३ ॥ तदेवोपपादयति ॥ कृप-

येति ॥ अधमतां प्राप्य स्थितं भक्तं कृपया क्वचिन्मोचयेत् । इति निषिद्धस्यांते सद्रूपेणाविर्भावः । विहितस्यान्ते निषिद्धरूपेणाविर्भावमाह॥ **अनियुक्ततपस्यानामिति** ॥ आज्ञाव्यतिरेकेण ये तपः कुर्वन्ति तेषामंते भगवतः पीडया क्रोधो भवति । " मां चैवांतःशरीरस्थमिति " वाक्यात्तदा हीनभावं नयति नरकं श्वादियोनिं वा । भगवदिच्छया दुष्टश्चेत्तमपि क्वचिन्मोचयेत् । अत ईश्वरचर्या दुर्विभाव्या । अतएव भगवान् स्वाभिप्रायं कर्ममार्गे निरूपयतीत्याह ॥ **कर्मणो ह्यपि बोद्धव्यमिति**॥ विहितेऽपि विचारः कर्तव्यः । किं भगवदिच्छास्ति तथा सति कर्तव्यं नोचेन्न कर्तव्यमिति । तथा विकर्मणस्तूष्णींभावादपि । कलावग्निहोत्रादिकं न कर्तव्य मित्यत्रापि विचारः कर्तव्यः । किमीश्वरेच्छाकरणेऽकरणे वेति । तथा निषिद्धेऽपि विचारः कर्तव्यः । किं ब्राह्मणो हन्तव्यो न हन्तव्यो वेति । भगवदिच्छायां हननमेव हितकारि । यथा द्रोणादीनाम् । अत एव कर्मणो गतिर्गहना फलं दुर्निरूप्यमित्यर्थः ॥ **उपसंहरति** ॥ अतश्च सुतरामेवेति ॥ २८४—२८६ ॥

आवरणभंगः ।

प्रकीर्णकानामिति ॥ ॥ ज्ञानकांडैकदेशादिप्रतिपादितानामुपासनानाम् । यद्यप्युपासनानां मानसकर्मत्वेन कर्मण्येवांतर्भावस्तथापि तस्यां देवताप्राधान्येन फलेऽपि प्रकारभेदाद्भिन्नतया कथनमुपास्यानां स्वतंत्रप्रमेयात्मकत्वेन तद्बलनिरूपणार्थं ज्ञेम् ॥ तत्तद्देवेत्यादि ॥ ॥ अध्यायचतुष्टयात्मकं जैमिनिप्रणीतं संकर्षणकांडमित्युच्यते तदप्युपासनाख्यकर्मप्रतिपादकत्वात् कर्ममीमांसांतर्गतमेव । तद्रीत्या देवोपासने तदुपासकानां तथेत्यर्थः । एते च देवास्तत्वपर्यंताः कालपर्यन्ता वा ज्ञेयाः, एतदेव विशदयन्ति ॥ वेदोक्तानामित्यादि ॥ ॥ मूलेऽतिदिष्टोपासनाविषयाणां स्वरूपमाहुः ॥ पौराणिका इत्यादि ॥ पञ्चायतनरूपाविशिष्टशेषा इत्यर्थः । तदपि फलं दक्षिणरीत्यैवेति बोधयितुं मूले निषिद्धेतरभावत इत्युक्तम् ॥ विष्णुमित्यादि ॥ बहुषु पुराणेषु विष्णोरुत्कर्षप्रतिपादनादुक्तरीत्या आशंक्य अधिकारिभेदेन तत्तद्भजनोपपादकं भगवद्वाक्यमाहेत्यर्थः । प्रासंगिकमाहुः ॥ एकदेत्यादि ॥ ॥ तत्पोषोन्यस्य वै फलमिति मूलोक्तेर्थे बीजमाहुः ॥ अंतिमेत्यादि ॥ २७९ ॥ २८१ ॥ एवमुपासनाफलनिरूपणमुखेन स्वतंत्रप्रमेयभू-

तानां बलं विचारितम्। अतः परं कर्मणो बलं विचारणीयम्। तस्य स्वाविर्भावे प्रमाणानुरोधित्वेऽपि अक्षरात्मत्वेन फलदानांशे स्वतंत्रप्रमेयरूपत्वात्। तद्विचारयन्ति। एवमुपासनायामित्यादिना। ननु कथमेवं कर्मणां गहनतेत्याकांक्षायां तामुपपादयन्ति ॥ कर्माणीत्यादि ॥ ॥ स्वातंत्र्यं प्रकटयंति ॥ कर्मस्वरूपीत्यादि ॥ ॥ अक्षरस्यैव रूपांतरं कर्मेति पूर्वं साधितम्। अक्षरं चेशितृ "एतस्यैवाक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत" इत्यादिश्रुतेः। अतस्तदभिन्नत्वात्कर्मरूपी भगवानीश इत्यर्थः ॥ तदेव फलदायकमिति ॥ ॥ अन्ते या मतिः सागतिरिति तादृशमतिजनकतया तदेव तथेत्यर्थः ॥ शेषमित आरभ्य कर्ममार्गो दुरत्यय इत्यंतं स्फुटम् ॥ एवं स्वातंत्र्यमुपपादितम् ॥ २८२–२८६ ॥

ब्रजभाषाटीका।

प्रकीर्ण फलको वर्णन करवेकेलिये देवतानके उपासकनके फलको वर्णन करे हैं (तत्तद्देवोपासकानामिति) जैमिनिप्रणीत संकर्षणकाण्डानुसार वेदोक्त अग्निआदि देवतानकी देवोपासना बुद्धिकरकें अग्निहोत्रादि करवेमें भेदबुद्धि विद्यमान है तासों जादेवताकी जन्मभर उपासना करीजाय वाके सायुज्यकूं प्राप्त होवेहै ॥ २७९ ॥ ऐसेंही पौराणिक दुर्गा गणपति प्रभृति देवतानकी शुद्धिभावसों उपासना करवेवालेभी अपने अपने उपास्यदेवाताके सायुज्यकूँ प्राप्त होवे हैं बहुतसे पुराणनमें तथा वेदस्मृतिनमें भी बिष्णुकी ही महिमा अधिक है तासों विष्णुकूँ छोडके और देवताकी उपासना कोन करेगो? ऐसी शङ्का तो नहिं करनी क्योंकि तीन प्रकृतिके मनुष्य होवें हैं, सात्विक मनुष्य सात्विक देवताकी उपासना करे हैं राजस प्रकृतिवाले यक्षराक्षसनकी उपासना करे हैं॥ २८० ॥ तामस प्रकृतिवाले मनुष्य प्रेतभूतगणनकी उपासना करें हैं, तामें (यजन्ते सात्विका देवान्) इत्यादि गीताके भगवद्वाक्य प्रमाणहैं,एकसाथ बहुत देवतानकी उपासना करवेसों तो कर्ममार्गीय ही फल होवे है,क्योंकि वा उपासनामें कर्मही प्रधान है तासों उपासनाको फल नहिं

होय है । भक्तिसहित क्रमकरकें विधानपूर्वक अनेक देवतानकी उपासना करवेवालेकूँ जादेवताकी देहत्यागसमयमें उपासना होय ॥ २८१ ॥ वा देवताके सायुज्यकूँ प्राप्त होवे हैं और देवतानकी करीभई उपासना तो अन्तिम देवताके जल्दी प्रसन्न होयवेमें कारणहै ऐसें उपासनाके नियत फलको वर्णनकरकें कर्ममार्गमें फलकी अनियतताको वर्णन करे हैं (कर्मणामिति) एक विहित कर्ममें हजारन निषिद्ध कर्म आन पडे हैं ऐसेंही एक निषिद्धकर्ममें बहुत विहित शुभ कर्म भी बनजावे हैं उन कर्मनमें कोनको फल होयगो यह सबनके ही हृदयमें संदेह होवेहै ॥२८२॥ क्योंकि कर्मस्वरूपी भगवान् ईश्वरहै स्वतन्त्रहै अपनी इच्छाकरकें दुष्कर्मरूपसों प्रकट होयकें दुःखरूप फलकूँ देंगे अथवा सुकर्मरूपसों प्रकट होयकें सुखरूप फलको देंगे यह बात जानी नहिं जावैहै अतः कर्मफल नियत नहिं है अनेक प्रकारसों कर्मकी वृद्धि होवेहै । तहाँभी देहके अन्तसमयमें जो कर्म होय वहही फलदायक है तहाँ ईश्वरेच्छाकरके कैसे रूपसों कर्म प्रकट होयगो यह नहिं जानसके है यदि जो जीवपें कृपा होय तो शुभ पुण्य रूपसों प्रकटहोय, क्रोधहोय तो अशुभ पापरूपसों प्रकटहोय यह निर्णय है ॥२८३॥ वाको उपपादन करे है (कृपयेति) कर्म है सो अक्षरब्रह्मकोही रूप है यह पूर्व कहआये हैं वह कर्मरूपी भगवान् निषिद्ध कर्मकरके अधमताकूँ प्राप्तभये भक्तकूँ भी कृपाकरकें संसारसों छुडाय दे है याप्रकार निषिद्धके अन्तमें भी शुभरूप करकें प्रकट होवे है ऐसेंही विहित शुभ कर्मके अन्तमें निषिद्ध पापरूप करके भी प्रकट होजावे हैं, जैसें भगवान्‌की आज्ञा विना जे तप करे हैं उनके हृदयस्थित भगवान्‌कूँ पीडाकरकें क्रोध होवेहै ॥ २८४ ॥ तब (माञ्चैवान्तःशरीरस्थम्) इत्यादि

वाक्यानुसार ईश्वर उनकूँ हीनभावकूँ प्राप्तकरेहै अथवा नरककूँ ग्रामसिंहादियोनीकूँ प्राप्तकरेहैं कभी भगवान् इच्छाकरकें दुष्ट होय वाकूँ भी मुक्तकरदेवें हैं । तासों ईश्वरके चरित्र विचारमें नहिं आयसकेहैं याहीसों भगवान्नें अपनों अभिप्राय कर्ममार्गमें निरूपण कियोहै (कर्मणो ह्यपीति) विहितशुभकर्मके करवेमें भी बिचार करनो भगवान्की इच्छा होय तो करनों नहिं इच्छा होय तो नहिं करनों, ऐसे ही विकर्म जो कर्मसों निवृत्त है वाको भी विचार करनों जैसें कलियुगमें अग्निहोत्रादिको करनों नहिं लिख्योहै ताको भी बिचार करनों कहा ईश्वरेच्छा अग्निहोत्रादि करवेमेंहै अथवा नहिं करवेहैं ॥ २८५ ॥ तैसें ही निषिद्ध कर्ममें भी बिचारकरनों ब्राह्मणकूँ मारनों चाहिये अथवा नहिं मारनों चाहिये भगवान्की वैसीही इच्छाहोय तो ब्राह्मणकों मारनोंही हितकारीहै जैसें महाभारतमें गुरु द्रोणाचार्यजीको मारनों भगवान्की इच्छाके अनुसार हतो तासों हितकारीही भयो ताहीसों कर्मकी गहन गतिहै कर्मको फल निरूपणकरवेमें कठिनसों आवेंहै तासों सुतराम् कर्ममार्ग दुरत्ययहै ॥ २८६ ॥

अतोऽपि भजनं कार्यं भजने नहि तादृशम् । अन्योन्यनाशकत्वञ्च कर्म्मणां भवति कचित ॥ २८७ ॥ कर्म्ममार्गे फलं तस्मान्न निरूप्यं हि सर्वथा । जायस्वेति म्रियस्वेति तृतीयो य उदाहृतः ॥ २८८ ॥ प्रकीर्णकानां सर्वेषां तत्फलं परिकीर्तितम् । ईश्वरालंबनं योगो जनयित्वा तु तादृशम् ॥ २८९ ॥ बहुजन्म विपाकेन भक्तिं जनयति ध्रुवम् । सांख्येऽपि

भगवच्चिते फलमेतन्नचान्यथा ॥२९०॥ समर्प्पणात्कर्म्मणां च भक्तिर्भवति नैष्ठिकी । योगेन तु निषिद्धेन यदि देहः प्रसिद्ध्यति ॥२९१॥ तदा कल्पान्तपर्यन्तं भावनातस्तु सत्फलम् । अन्यथा नरके पातो दृढभूमौ तु संस्मृतिः ॥२९२॥

तत्त्वदीपप्रकाशः ।

तर्हि किंकर्तव्यमित्याकांक्षायामाह ॥ **अतोऽपि भजनं कार्यमिति** ॥ ननु भजनेप्येवं चेत्को विशेषः स्यादत आह ॥ **भजने नहि तादृशमिति** ॥ भगवदिच्छाभावेऽपि भजने भजनमेव परं ननिर्वहेत् नत्वनिष्टं किंचित् । न केवलमीश्वरेच्छैव कर्मफले प्रतिबंधिका किंत्वन्यदप्यस्तीत्याह ॥ **अन्योन्यनाशकत्वमिति** ॥ " अनवसरे नमस्कारादर्धं पुण्यं विनश्यति । अजारजः खररजो हन्ति पुण्यं पुराकृतमिति " बहुनाशककर्मफलस्य तथा विद्धोपवासे गांधार्याः पुत्रशतं नष्टम् । " अतिथिर्विमुखो यातः पुण्यमादाय गच्छति " उपसंहरति ॥ **कर्ममार्गे फलं तस्मादिति** ॥ इदानीमुपासनामार्गस्य फलमाह ॥ **जायस्वेति** ॥ वेद एव तृतीयो मार्गो निरूपितः । कर्म्ममार्गेपि देवताप्राधान्य इदमेव फलम् । प्रसंगाद्योगसांख्ययोः फलमाह ॥ **ईश्वरालंबनमिति** ॥ योगसांख्यकर्म्माणि भगवदिच्छया कृतानि भक्तिं जनयन्तीत्यर्थः ॥ एतन्नियतं फलम् । इदानीं निषिद्धयोगमार्गादेः स्वरूपं फलं चाह ॥ **योगेन त्विति** ॥ निषिद्धो योगः कापालिको महादेवेनोर्ध्वमुखेनोक्तः । तदुक्तप्रकारेण यदि देहः सिद्धस्तथा कल्पान्तपर्यंतं भगवद्ध्यानात्सदेव फलम् । आदावल्पं निषिद्धं ध्याने हन्यते । देहनाशे तु नरके पातः । दृढभूमौ योगारंभे सिद्धे जन्मान्तरे पुनः पूर्ववासनया योगाभ्यासान्मुच्यते ॥ २८७—२९२ ॥

आवरणभंगः ।

इति ॥ ॥ भक्तिमार्गस्यैतो वैलक्षण्यमाहेत्यर्थः ॥ अग्रे स्फुटम् । अतो
भावबलविचारं हृदि कृत्वा आहुः ॥ इदानीमुपासनेत्यादि ॥ ॥ लोके
कर्मठानां पर्यनुयोक्तृत्वात्कर्ममार्गस्य संदिग्धफलत्वे निर्बलत्वे च प्रतिपा-
नियतफलायामुपासनायां तु नायं दोष इति स्वभावतः कृतस्य " यजंते
देवान् " इत्यादिनोक्तस्य तस्य कर्ममार्गादुत्तमत्वं भविष्यतीत्याकां-
स्यापि मार्गस्य फलतो जघन्यत्वं वक्तुमाहेत्यर्थः ॥ वेद एवेत्यादि ॥ ॥
छांदोग्ये पंचाग्न्युपासनोत्तरं कर्मिज्ञानिनो धूमाद्यर्चिरादिमार्गावुक्त्वा
योः पथोर्न कतरेण च तानीमानि क्षुद्राण्यसकृदावर्तीनि भवन्ति जायस्व
स्येत्तृतीयं स्थानम् " इत्यनेन ज्ञानिकर्मिव्यतिरिक्तानां तृतीय एव मार्गो
त इति नास्य तत उत्तमत्वमित्ययमपि तथेत्यर्थः ॥ ननु पूर्वं तत्तद्देवतो-
त्तत्सायुज्यस्योक्तत्वादग्निहोत्रादीनामुपासनात्वेन करणे त्वित उत्तमत्वं
ीति शंकामपि प्रसंगाद्दूराकुर्वंति ॥ कर्ममार्ग इत्यादि ॥ ॥ वेदे " इष्टा-
मित्युपासत " इति कर्मप्राधान्य एव धूममार्गस्योक्तत्वात् । तदभावे स
थेत्यर्थः ॥ प्रसंगादित्यादि ॥ प्रसंगादिति ॥ ॥ स्वभावप्रसंगात् ।
भगवता गीतायां योगसांख्यकर्मार्पणानामप्युपदिष्टत्वात्तेषां भक्तिमार्ग-
फलतो भविष्यतीत्याकांक्षायां तेषामपि जघन्यत्वं बोधयितुमाहेत्यर्थः ॥
णन्निष्फलं वा सात्त्विकं निजकर्म तदिति " भगवद्वाक्यात्कर्मार्पणस्यापि
त्वं ज्ञेयम् । मूले तादृशमिति योग्यदेहम् ॥ २८७–२८९ ॥ योगसांख्ये-
॥ ॥ तथा च "नैवं पापमवाप्स्यसि । कर्मबंधं प्रहास्यसि । शुभाशुभफलै-
ःयसे कर्मबन्धनैरि" त्येव सांख्ययोगकर्मार्पणानां फलमुक्तं भगवता ननु
रूपम् ॥ पापाभावे च " जन्मान्तरसहस्रेषु तपोध्यानसमाधिभिः । नरा-
पापानां कृष्णे भक्तिः प्रजायत " इति भक्तिरेव फलत्वेनोक्तेति तथेति
एवं फलमुक्त्वा पूर्वोक्तकर्मोपासनाद्यपेक्षयास्योत्तमत्वं बोधयितुमाहुः ॥
तफलमिति ॥ अतोऽपि पूर्वोक्तादुत्कृष्टमित्यर्थः ॥ एवं सात्त्विकस्वभावबल-
। इदानीमित्यादि ॥ ॥ एवं प्रमाणादित्रयेणापकृष्टत्वेऽपि प्रलोभकत्वा-
शायां तत्र प्रवृत्तिर्माभूदिति तेषां त्याज्यत्वं वक्तुमाहेत्यर्थः ॥ निषिद्धो
कापालिक इत्यादि ॥ ॥ स प्रायः पाशुपताख्यतंत्रोक्त इति प्रतिभाति ।
पशुपतिना पशुपाशविमोक्षणस्य " अथातः पाशुपतं योगविधिं व्याख्या-
" इत्यादिनाध्यायपञ्चकेनोक्तः । तत्र कार्यरूपो जीवः पशुःऽकारणं पशुप-
ः । योगः पशुपतौ चित्तसमाधानम् । विधिर्भस्मना त्रिषवणादिर्निरूपितः

दुःखान्तसंज्ञो मोक्षश्च प्रयोजनम् । तत एव कार्यकारणयोगविधिदुःखांता इति तद्ध्याया आख्यायंत इति तत्स्वरूपबोधनायोक्तम् । " शैवान्पाशुपतान् दृष्ट्वा लोकायतिकनास्तिकान् । विकर्मस्थान् द्विजान्न शूद्रान्सवासा जलमाविशेत् " इति मिताक्षरादौ प्रायश्चित्तबोधनाच्च निषिद्धत्वमवगम्यते चतुर्थस्कंधस्योपाख्यानाच्च । अन्यो वा कश्चिदेवं जातीयः । एवं स्वरूपमुक्त्वा फलादिकं वदिष्यंत आहुः॥ तदुक्तेत्यादि ॥ ॥ " उमापतिर्भूतपतिः श्रीकण्ठो ब्रह्मणः सुतः । ऊचिवानिदमव्यग्रो ज्ञानं पाशुपतं शिवः " इति मोक्षधर्मवाक्यादिभिस्तस्य मोक्षमार्गताप्रतिपादनादुक्तरीत्या सापायत्वाच्च तस्य निषिद्धकल्पत्वं बोधितम् ॥ २९०-२९२॥

व्रजभाषाटीका ।

तब कहा करनों चहिये ऐसी आकांक्षा भई तहाँ आज्ञा करे हैं (अतोपि भजनमिति) यासों भी भगवान्‌की भक्तिही करनी कर्ममार्गके समान भक्तिमें भी ईश्वरेच्छा को ज्ञान होनो असंभव है । फिर कर्मसों भक्तिमें कहा अधिकताहै (भजने नहि तादृशम्) कर्ममार्गमें भगवान्‌की इच्छाबिना कर्म कियो जाय तो वाको अनिष्ट फल होय, भक्तिमार्गमें भगवान्‌की इच्छाविना भक्ति करीजाय तो भक्तिमें ही ऐसो बाधक आयजावे तासों भक्तिको निर्वाह नहिं होयसकें परन्तु भक्तिमार्गमें अनिष्ट किञ्चित् भी नहिं होय, कर्ममार्गमें कर्मके फल मिलवेमें ईश्वरेच्छा तो प्रतिबन्धक है ही परन्तु औरभी प्रतिबन्धक है जैसें गुरु पिता आदिकनकूँ (अनवसर) समयदेखेंबिना नमस्कारकरवेसों आधे पुण्यको नाश होवेहै तथा अजा खर आदिकनको रज पूर्वजन्मके पुण्यको नाश करेहै । तैसें कर्मफलके नाशकरवेवाले बहुत कर्महैं जैसें विद्धा एकादशीके उपवासकरवेसों गान्धारीके १०० सौ पुत्र नष्ट होगये तथा अभ्यागत विमुख होय करकें पीछो जावे है तो गृहस्थके पुण्यकूँ लेजावें है। इत्यादि अनेककर्म परस्पर नाशकरवेवारेहैं ॥ २८७ ॥ तासों कर्ममार्गमें सर्वथा फलको

निरूपण नहिं करसके हैं अब उपासनामार्गको फल कहे हैं (जा-
यस्वेति) छान्दोग्यमें अर्चिरादिमार्ग ज्ञानीको हैं ॥ धूमादिमार्ग
कर्ममार्गीको हैं, इनसों अन्य जीवनको तृतीय मार्ग है जामें वारं-
वार फिरनों पडेहै तथा जन्ममरणकूँ पावें है वेदमें ही तृतीयमार्ग-
को निरूपणहै कर्ममार्गमें भी देवताकी प्रधानतामें यह ही फलहै
प्रसंगसों योगसांख्यको फल लिखेहैं (ईश्वरालंबनमिति) भगवा-
नकी इच्छाके अनुसार किये सांख्य योग तथा कर्मार्पण भक्तिकूँ
उत्पन्नकरेहै क्योंकि गीताजीमें (नैवं पापमवाप्स्यसि । कर्मबन्धं
प्रहास्यसि । मोक्ष्यसे कर्मबन्धनैः) इत्यादि वाक्यनमें सांख्ययो-
गकर्मार्पणको पापनाशही फल लिख्योहै । भगवत्प्राप्ति फल नहिं
लिख्योहै (नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते) अर्थ—
पापनाशभयेसों कृष्णमें भक्ति होयहै तासों ईश्वरको आलम्बन
जामें ऐसो योग तथा भगवानमें चित्तकी एकाग्रता जामें ऐसो
सांख्य ये दोनों बहुत जन्मनकरकें पकेभये भक्तिके योग्य देहकूँ
प्रकटकरकें भक्तिकूँ प्रकट करे हैं । यह फल नियतहै ॥२८८–२९०॥
याप्रकार भगवानके अर्थ कर्मनके अर्पणकरवेसों भी निश्चय कर-
के नैष्ठिकी भक्ति होवेहै । अब निषिद्धयोगमार्गादिकको फल क-
हे हैं । कापालिकादिक जो योगहै वह निषिद्ध योगहै महादेवजीने
कह्योहै वा योगकी रीतिसों यदि देह सिद्ध होयजाय फिर कल्पा-
न्तपर्यन्त भगवानके ध्यान कियेजाय तो श्रेष्ठही फलहोय या
योगकरवेमें जो आदिमें अल्प निषिद्धताहै वाको ध्यानसों नाश
होयजावेहै यदि भगवानके ध्यानबिना ही देहको नाश होजाय
तो या योगके भस्मास्थिधारणादि निषिद्धाचरणसों नरकपात
होय । दृढ हृदयमें योगारम्भ सिद्धभयेसों देहको त्याग होयजाय
तो और जन्मनमें पूर्वजन्मकी वासना करकें योगाभ्यास करवेसों

मुक्त होय तासों योगमार्ग एकपक्षमें नाशवालोहै॥२९१॥२९२॥

छलयोगस्तथा सांख्यं शाक्तो मार्गोभिधीयते। सिद्धान्ताश्च तथा कौला लोकातीतविभेदतः ॥ २९३ ॥ सांख्ये भेदद्वयं तत्र द्वितीये तु गृहादिकम् । आद्ये लोकस्य सन्मानमंत्ये तुल्यन्तमस्तयोः ॥ २९४ ॥ लोके व्यामोहकं शास्त्रं सप्तानां बोधकः शिवः । कलौ जनिष्यमाणानामसुराणां क्षयाय हि॥२९५॥वामाः शाक्ताश्च योगे तु प्रकटाप्रकटेभिदा। प्रकृतिस्तत्र संराध्या साध्यो योगश्च तुष्टये ॥२९६॥ शैवश्च वैष्णवश्चैव उपास्ये भेदकद्वयम् । कर्मासक्तास्तु ये तत्र वैदिकाः समुदाहृताः ॥ २९७ ॥ सप्तापि सर्वथा त्याज्या भगवन्मार्गवर्तिभिः । बौद्धाश्चतुर्विधाः पूर्वमंतरानंतमार्गिणः ॥ २९८ ॥ तेषां बृहस्पतिमुखाःकर्त्तारो हरिरद्य तु। कृष्णसंगोपनार्थाय स्वयमेव जगादह ॥ २९९ ॥ वेदमार्गविरोधेन येषां करणमण्वपि । ते हि पाषंडिनो ज्ञेयाः शास्त्रार्थत्वेन वेषिणः॥३००॥ सर्वेषां नरके वासस्तमोर्वाक्प्रतिपादके । नरकात्पुनरावृत्तिर्नानायोनिषु संभवः ॥ ३०१ ॥

तत्त्वदीपप्रकाशः।

अतः पाक्षिकापायो मार्गः । शाक्तमार्गस्तु सर्वथैव निषिद्ध इत्यभिप्रायेणाह ॥ छलयोगस्तथा सांख्यमिति ॥ सांख्ययोगौ मिलितौ धर्म-

मार्गविरोधेनामेध्यभक्षणसुरापानादिपोषितौ शाक्तोमार्गः । तत्र सप्त भेदाः—वैदिकाः, वैष्णवाः, शैवाः, शाक्ताः, वामाः, सिद्धान्ताः, कौलाः, अतः परन्नेति तेषां ग्रंथः । तत्र स्वरूपं फलं चांतिमयोराह ॥ **सिद्धान्ताश्चतथा कौला इति** ॥ सिद्धान्त आसुरः । सर्वं मिथ्येति । कर्म सर्वथा त्यक्तव्यं बाधकमिति । तथा भक्तिरपि ॥ केवलं वाचःपेशैर्मोहयन्ति ये ते सांख्यास्तेषां लोकसंग्रहो नियामकः । कौलानां तु नलोकापेक्षेति भेदः । " पत्नीत्वं दीक्षया रंडाश्चंडा अपि भजंति हि । दिगंबराश्रमेचिन्हाः सुरामांसपरायणाः । पापरूपा दुराचारास्ते कौलाः परिकीर्तिताः" तेषामनुग्रहनिग्रहादिकं दृष्टं फलं भवति तन्मार्गसेवितया दुष्टतामसशक्त्या सिद्धान्तस्य लोके सन्माननं फलं ततो व्यामोहो लोकस्य भवति । सप्तानां मूलमाह ॥ **बोधकः शिव इति** ॥ प्रयोजनमाह ॥**कलाविति**॥ असुराणामेवात्र रुचिस्तेन तेषामेव क्षय इति न काप्यनुपपत्तिः ॥ चतुर्थपञ्चमावाह ॥ **वामाः शाक्ता इति** ॥ तयोरपि पूर्ववत्प्रकटाप्रकटे भिदा । तत्र त्रिपुरसुंदर्यादिशक्तयः सेव्याः योगश्च साध्य इति बुद्धिः । तत्रानधिकारे शैववैष्णवौ । तस्याः शक्तेः पादत्वेन पंचप्रेतमध्ये निरूपितौ न शब्दमात्रेण किंचिद्दुष्यति पदार्थस्त्वन्य एव । अतो भूतादेरेव विष्णुशिवादिनाम धृत्वा ततउपासत इतिनिर्णयः । तत्र वैदिकानां लक्षणमाह ॥ **कर्म्मासक्ता इति** ॥ लोकसंग्रहार्थं पूर्वोक्तानां सन्माननार्थं च । तत्सेवकास्तथा भवंति ॥ २९३–२९७ ॥ एतन्निरूपणस्य प्रयोजनमाह ॥ **सप्तापि सर्वथा त्याज्या इति** ॥ महापातकिसंसर्गेऽपि महापातकत्वश्रवणात् । एवं निषिद्धान् शाक्तान्निरूप्य बौद्धान्निरूपयति ॥ **बौद्धाश्चतुर्विधा इति** ॥ माध्यमिकाः सौत्रान्तिकाः विज्ञानवादिनश्चार्वाकाश्चेति तेषामवांतरभेदाः कोटिशः सन्ति ॥ २९८ ॥ तेषां मूलभूतानाह ॥ **तेषां तु बृहस्पतिमुखाः कर्त्तार इति** ॥ लोकायतशास्त्रं बृहस्पतिना प्रणीतम् । तथान्येऽपि शुक्रमायाविमोहिताः ।

सांप्रतं हरिरेव बुद्धरूपेणावतीर्णः वेदनिंदालक्षणं शास्त्रं कृतवान् ॥ ॥ २९९ ॥ अतः सामान्येन पाषंडमतमाह ॥ **वेदमार्गविरोधेनेति** ॥ अलौकिकवेषान् । संपाद्य लोकव्यामोहनार्थं तिष्ठंतीत्यर्थः ॥ ३०० ॥ तेषां फलमाह ॥ **सर्वेषां नरके वास इति** ॥ तत्रापि शास्त्रार्थत्वेन निरूप्य मार्गप्रवृत्तिकर्तॄणां तम एव । नरके गतानां पुनरावृत्तिः । तमसि प्रविष्टानां न । पुनरावृत्तौ च शूकरादियोनिषु संभवः ॥ ३०१ ॥

आवरणभंगः ।

शाक्तो मार्ग इत्यादि ॥ ॥ अन्येषां शिवोक्तानां स्वरूपं बोधयितुमाहेत्यर्थः ॥ ग्रंथ इति ॥ ॥ संग्रह इत्यर्थः ॥ अग्रे स्पष्टम् । प्रकृतिपदस्यात्र विवक्षितमर्थं स्फुटीकुर्वंति ॥ त्रिपुरसुंदरीत्यादि ॥ ॥ मूले तुष्टय इत्येव पदच्छेदः ॥ तासां शक्तीनां तोषार्थमित्यर्थः ॥ एतेन फलमुक्तम् ॥ पञ्चप्रेतमध्ये निरूपिताविति ॥ ॥ "ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ एते पञ्च महाप्रेताः पादमूले व्यवस्थिता" इति तत्तंत्रवाक्ये तथात्वेनोक्तावित्यर्थः ॥ तत्र समाधिमाहुः ॥ नेत्यादि॥ त्यागप्रसङ्गादेतदवांतराणि चतुःषष्टितन्त्राणि प्रतिपाद्यार्थसहितानि लिख्यन्ते । तत्र महामाया शंबरतन्त्रम् । अन्यस्मिन् पदार्थे अन्यथाप्रतिभानरूपमायाप्रपञ्चरचनोपायप्रतिपादिकमैन्द्रजालैकविद्यारूपम् १ । योगिनीजालशंबरतन्त्रं योगिनीजालदर्शनोपायप्रतिपादकम् २ । तत्वशम्बरम् इंद्रजालविद्याविशेषः । पृथिव्यादितत्वानामन्यत्रान्यबोधोपायप्रतिपादकम् ३ । सिद्धभैरवतन्त्रम् ४ । मायिकभैरवतन्त्रम् ५ । कंकालभैरवतन्त्रम् ६ । कालाग्निभैरवतन्त्रम् ७ । शक्तिभैरवतन्त्रम् ८ । योगिभैरवतन्त्रम् ९ । महाभैरवतन्त्रम् १० । भैरवनाथतन्त्रमिति भैरवाष्टकमिदं कापालिकमतप्रतिपादकम् ११ । बहुरूपा शक्तिस्तत्प्रतिपादकतंत्राणाङ्गणो बहुरूपाष्टकं यथा ब्राह्मीतन्त्रम् १२ । माहेश्वरीतन्त्रम् १३ । कौमारीतन्त्रम् १४ । वैष्णवीतन्त्रम् १५ । वाराहीतन्त्रम् १६ । इन्द्राणीतन्त्रम् १७ । चामुण्डातन्त्रम् १८ । शिवदूतीतन्त्रं चेति १९ । यामला नाम सिद्धाः वा तत्प्रतिपादकानि तन्त्राणि रुद्रयामलादीन्यष्टौ । शाक्ततन्त्रतया चतुःषष्टितन्त्राणामपि यामलतया व्यवहारः २७ । चन्द्रज्ञानतन्त्रं कामेश्वर्यादिषोडशनित्यातिथिप्रतिपादकं कापालिकमतदर्शकञ्च २८ । मालिनीतन्त्रं समुद्रयानोपायप्रतिपादकम् २९ । महासंमोहनं जाग्रतामपि निद्रितोपायप्रतिपादकम् ३० । वामजुष्टं वामकेश्वरतन्त्रं चतुःशतीत्यपि कथ्यते ३१ । महादेवतन्त्रं

बटुकादिसिद्धिकुलाचारप्रदर्शकम् ३२। वातुलम् ३३। वातुलोत्तरम् ३४। कामिकं चेति ३५ त्रीण्येतानि तन्त्राणि क्षेत्रकर्षणादिविधिप्रतिपादकानीति ॥ हृद्भेदतन्त्रं कापालिकाचारप्रदर्शकम् ३६। तन्त्रभेदाः ३७। गुह्यतन्त्रयोः ३८ प्रकाशं रहस्यं वा परकृतमन्त्रतन्त्रप्रयोगानां परावृत्त्युपायाः प्रदर्शिताः ॥ कलावादं कामशास्त्रं वात्स्यायनादिमतम् ३९। कलासारं रूपादिवृद्धयुपायप्रतिपादकम् ४०। गुटिकामतं गुटिकासिद्धिप्रदर्शकंगुटिकापानपात्रम् ४१। मतोत्तरतन्त्रं रससिद्धिप्रकाशकम् ४२। वीणातन्त्रं वीणानामयोगिनी संभोगयक्षिणीत्यस्या नामांतरं तस्याः साधनोपायप्रदर्शकम् ४३। त्रोतलतन्त्रे गुटिकांजनपादुकासिद्धिः ४४। त्रोतलोत्तरतन्त्रे चतुःषष्टिसहस्रयोगिनीनां दर्शनोपायाः ४५। पञ्चामृततन्त्रं पृथिव्यादिपञ्चभूतानां साधनेन मरणाभावप्रतिपादकं कापालिकतन्त्रम् ४६। रूपभेदादिपञ्च तन्त्राण्युच्चाटनादिप्रतिपादकानि ५१। सर्वज्ञानादितन्त्रपञ्चकं। कापालिकासिद्धान्तैकदेशिदिगम्बरमताचारप्रदर्शकम् ५६। पूर्वतन्त्रादिदेवीमतपर्यंतन्तन्त्राष्टकं दिगम्बरैकदेशिक्षपणकमताचारप्रदर्शकम् ६४॥ एवमेतानि त्यागार्थं ज्ञेयानि प्रस्तुतमुच्यते ॥ बौद्धान्निरूपयतीति ॥ ॥ त्याज्यत्वायेति शेषः ॥ माध्यमिका इति ॥ ॥ शून्यवादप्रस्थानाः ॥ सौत्रान्तिका इति ॥ ॥ ज्ञानाकारानुमेयक्षणिकबाह्यार्थवादप्रस्थानाः ॥ विज्ञानवादिन इति ॥ ॥ क्षणिकविज्ञानवादप्रस्थानाः ॥ त एव योगाचारा इत्युच्यन्ते । प्रत्यक्षस्वलक्षणक्षणिकबाह्यार्थवादप्रस्थाना वैभाषिकास्त एवार्हताः स्याद्वादिनश्चोच्यंते तेष्वेष्वेवान्तर्भवंति॥ चार्वाका इति ॥ ॥ देहात्मवादप्रस्थानाः त एव लोकायतिकाः। देहातिरिक्तदेहपरिमाणात्मवादप्रस्थाना दिगंबरास्ते चार्वाकस्यैकदेशिनः ॥ एवं षट् बाह्यप्रस्थानानि प्रसिद्धत्वाल्लिखितानि । एतेषां नामान्युक्त्वा तदप्रामाणिकत्वस्य तत्र लोकप्रवृत्तेश्चोपपादनायाहुः ॥ तेषामित्यादि ॥ ॥ कृतवानित्यन्तम्। तथा च मायामोहितकर्तृकत्वात्प्रमाणाभासत्वमृषिप्रणीतत्वात् । लोकप्रवृत्तिश्चेत्यर्थः ॥ अत इत्यादि ॥ ॥ अतः मोहार्थं मोहितैश्च प्रणीतत्वात् । सामान्येन प्रसिद्धानामप्रसिद्धानां च लक्षणतौल्येन पाषण्डमतमाह । प्रसिद्धास्त्याज्यत्वाय निरूप्याप्रसिद्धानपि त्याजयितुं पाखंडानां लक्षणबोधनाय तन्मतमाहेत्यर्थः ॥ वेदेत्यादि ॥ ॥ तथा च विहिततया वेदविरुद्धकृतिमत्त्वं तदभिमतमिति तेन लक्षणेन ते बोध्याः, तत्र दुर्वेषांस्तु त्यज्यंत एव परं ये ईदृशास्तेषां वेषान्दृष्ट्वापि न भ्रमितव्यं तत्संसर्गेण विष्णुपुराणप्रसिद्धकृतिराजशतधन्वनोरिव स्वस्यापि न तादृक्फलसंभवादिति भावः ॥ २९३-३०१ ॥

व्रजभाषाटीका ।

शाक्तमार्ग तो सर्वथाही निषिद्ध है । धर्ममार्गके विरोधकरकें अपवित्र मांसादि भक्षण सुरापानादि निषिद्ध आचरण करकें पुष्टभये मिलेभये सांख्ययोगनसों शाक्तमार्ग कहेहै । वा शाक्तमार्गमें सात भेदहैं । वैदिक १, वैष्णव २, शैव ३, शाक्त ४, वाम ५, सिद्धान्त ६, कौल ७, इनसों आगें फेर नहिं हैं यह उनको संग्रहहै तहाँ सिद्धान्त और कौल इन दोनोंको फल कहे हैं, सिद्धान्त आसुरहै सब मिथ्याहै कर्म सर्वथा त्याग करनो तथा भक्ति सर्वथा त्यागकरनी केवल बाणीकी चतुराई करकें मनुष्यनकूं मोहकरावेहै जे सांख्यवाले हैं उनके मतमें लोकसंग्रह नियामक है कौलनकों तो लोककी अपेक्षा नहिं है यह भेदहै प्रचण्ड रण्डा स्त्री भी दीक्षाकरकें पत्नी बनजावेहै चर्मके चिन्हवाले दिगम्बर सुरामांसादिभक्षणमें परायण रहेआवे पापरूपी दुराचारी कौल कहावेहैं उन कौलनकूं (अनुग्रहनिग्रह) शापवरदानादिरूप लौकिक दृढ फल होवेहै उनके मार्गमें दुष्ट तामसी शक्तिकी सेवाकरकें फलसिद्धिहै सिद्धान्तकों तो लोकमें सन्मानहोनों फल होवे है । इन दोनोंनको अन्तमें नरक फल है इन मतनसों लोकनको व्यामोह होवै है इन सात मतनके मूलबोधक शिव हैं कलियुगमें उत्पन्न होयवेवारे आसुर जीवनकें क्षयकरवेकेलिये इन मतनकूं बनाये हैं तासों आसुरनकी यामें रुचि होय तासों उनको ही क्षय होय यासों कोई अनुपपत्ति नहिं है ॥ २९३–२९५ ॥ शाक्त तथा वाम इनको वर्णन करेहैं–इनमेंसूं एक प्रकटहै और एक अप्रकट है यह भेदहै तहाँ (प्रकृति) अर्थात् त्रिपुरसुन्दरी आदिशक्तिकी सेवा करनीपड़े है, योगहै सो साध्य है यह बुद्धि उनके मतमें है इनमें अधिकार नहिं होय तो शैव वैष्णव मतमें प्रवेशकरनों

योग्यहै। उनके मतमें शिव विष्णु रुद्र ईश्वर ब्रह्मा ये पाँच प्रेत शक्तिके पादमूलमें स्थित हैं उनके मध्यमें शिव बिष्णु नामके प्रेत हैं उनके संबन्धी मत शैव, वैष्णव कहावे है उन प्रेतनके तथा इन शिव विष्णु गुणावतारनके एक नाम मिलवेसों कछुभी दोष नहिं प्राप्तहोवेहै क्योंकि पदार्थ न्यारेन्यारेहैं तासों भूतादिकनकी ही बिष्णु शिव आदि नाम धरके वा प्रकारसों उपासना करेहैं यह निर्णयहै लोकसंग्रहके लिये तथा पूर्वोक्तनके सन्मानकोलिये कर्ममें आसक्तिराखवेवारे वैदिक कहावे हैं। इनके सेवक वैसेही होवे हैं ॥ २९६ ॥२९७॥ इनके निरूपणको प्रयोजन कहें हैं (सप्तापीति) भगवन्मार्गवर्ती जीवनकूँ इन सात शाक्त मतके भेदनकूँ सर्वथा त्यागकरनों, महापातकीके संसर्गसों भी महापातक होयवेको वर्णन कियोहै; निषिद्ध शाक्तनको निरूपण करकें बौद्धनको निरूपण करेहै बौद्ध चारप्रकारके हैं माध्यमिक १, सौत्रान्तिक २, विज्ञानवादी ३, चार्वाक ४, इन चारनके हजारन भेदहैं उनके मूलभूत भेद कहे हैं ॥ २९८ ॥ उनके बृहस्पति आदि बनानेवाले हैं लोकायतशास्त्र बृहस्पतिप्रणीतहै तैसें और देवताभी शुक्रमायासों मोहित भये मोहक शास्त्रनकूँ बनावतेभये अभी तो या कलिमें कृष्णको स्वरूप गुप्त राखवेकेलिये हरिभगवानही बुद्धरूप धारण करकें अवतीर्ण होयके वेदानिंदक मोहक शास्त्र करते भये ॥ २९९ ॥ अब सामान्यरीतिसों पाषण्डमतको लक्षण कहे हैं वेदमार्गके विरोधकरकें जिनकी अणुमात्रभी क्रिया होय उनकूँ पाखण्डी कहनों वे मनुष्य अलौकिक वेषनकूँ संपादन करके लोकनकूँ मोह करायवेकेलिये स्थित रहे हैं ॥ ३०० ॥ उन मतवाले सब मनुष्यनको नरकमें वास होवेहै और उन मतनकी प्रवृत्ति करवेवालेनकूँ तम प्राप्त होवेहै नरकमें गयेभये पीछें आवे हैं फिर

वे सूकरादिकनकी योनीमें प्राप्त होवेहैं। जिनते तममें प्रवेश कियोहै उनकी तो आवृत्ति नहिं होयहै ॥ ३०१ ॥

आनन्दस्य तिरोभावः सर्वथा दुःखमुच्यते। तस्य स्थानं तु सर्वत्र यमलोके विशेषतः॥ ३०२॥ शुद्धन्तमो दुःखरूपं सहजासुरसंश्रयम्। सर्वत्र नरकश्चैव तमश्चेति त्रिधा तु तत ॥ ३०३ ॥ सर्वत्र स्वर्गलोकश्च वासुदेवस्त्रिधा सुखम्। सुखं धर्म्मस्तथेच्छा स्यात्किञ्चिदुद्गम एव सः ॥ ३०४ ॥ सर्वथा ह्युद्गमः कामो धर्म्मिणस्तु सुखं स्मृतम्। द्वेषं क्रोधस्तथा दुखं पूर्ववद्दुःखधर्म्मतः ॥ ३०५ ॥ लोभोऽपि किञ्चिदुद्भेदो धर्म्मयोः सुखदुःखयोः। मोहस्तु द्विविधः प्रोक्तो धर्मवत्सुखदुःखयोः ॥ ॥ ३०६ ॥ मदे सुखसमुद्भेदो मात्सर्यं तस्य केवलः। अन्येषां सर्वधर्म्माणां तद्धर्म्मोद्गम एव च ॥ ३०७ ॥ विपाकः कर्मणां येषां प्राग्देहविनिपाततः। प्राप्तस्तानीह भुज्यन्ते ततोन्यानि भवान्तरे ॥ ३०८ ॥ एते सर्वे विशेषेण जीवसन्निधिमात्रतः। स्फुरन्त्यन्यस्याभिमानाज्जीवो दुःखी निगद्यते ॥ ३०९ ॥

ऽतश्च कर्म्मणा स्फुरितो हरिः।

अग्रोद्गमानुद्गमनैः सुखदुःखे तनोति हि॥३१०॥
इति फलप्रकरणम् ॥

तत्त्वदीपप्रकाशः ।

एवं निषिद्धानां दुःखं फलत्वेन निरूप्य किं दुःखमित्याकांक्षायामाह ॥ **आनन्दस्य तिरोभाव इति** ॥ ईषत्तिरोभावे पदार्थान्तरत्वं तदग्रे वक्ष्यते । सर्वथा तिरोभावो दुःखम् । अनिर्वृतिरूपत्वात् । अन्यथा सच्चिदानंदरूपातिरिक्तपदार्थाभावात् किं दुःखं स्यात् । आत्मनः प्रतिकूलं भगवद्वैमुख्यमेव भवति । ईषत्तिरोभावो दुःखाभावः । सर्वथोद्भवः सुखमिति विवेकः । एवं दुःखसुखे निरूप्य तयोर्देशविशेषे नियतत्वमाह ॥ **तस्य स्थानमिति** ॥ जगति भगवानीषत्तिरोहितस्तिष्ठति अतः सर्वत्र दुःखं यमलोके सर्वथा तिरोहितः । प्राणिनामुपद्रवस्थानत्वात् । अतः सर्वात्मा परमदयालुस्तत्र सुतरां तिरोहितो भवति । शुद्धे तमसि तु दैत्यानां वासात् सर्वथा तिरोभावः । एवं त्रैविध्यमुपपाद्यानुवदति ॥ **सर्वत्रेति** ॥ सर्वत्र यत् दुःखं नरकश्च तमश्चेति दुःखत्रयम् । सर्वत्र यत्सुखं स्वर्गलोकश्च ब्रह्मानन्दश्चेति सुखत्रयं तथा सुखेप्युपादानम् । इच्छादीनां स्वरूपमाह ॥ **सुखधर्म्म इति** ॥ धर्म आकारः तावन्मात्रप्रकटने इच्छात्वम् । तत्रापि किंचित्प्राकट्येच्छात्वं बहुप्राकट्ये कामत्वमिति। एवमेव द्वेषादयोऽपि तद्दुःखस्य लोभस्तु सुखदुःखधर्मयोरुभयोरपि किंचिदुद्भेदः। मोहस्तु द्विपत्रवदेकमूलो द्विरूपः ३०२—३०६ मदमात्सर्ययोः स्पष्टम् । अधर्माभासे धर्माभासे च तानि फलानीत्येतदर्थं निरूपितानि कदा भवंतीत्याकांक्षायामाह ॥ **विपाकःकर्म्मणामिति** ॥ अल्पफलानि बहुकाले पक्वानि भवंति ॥ उपचितावयवत्वमेव पाकः ॥ ऊष्माधिक्यात् । एवं कर्म्मणामपि विपाको ज्ञेयः । इदानीमविपक्वानि कालांतरे पक्वानि भवंति स्वरूपनाशस्तु प्रायश्चित्तादिनापि भवति । कर्मक्षयस्तु भोगेनैव ॥३०७॥३०८॥ अत्र मोक्षारं

निरूपयति ॥ एते सर्वे इति ॥ अंतःकरणधर्मा एवैते जीवसान्निध्यात्स्फुरिताः स्वाश्रयाविवेकिनमंतःकरणाविवेकेन प्रवर्तमानं मिलिताः स्वव्यपदेशं प्राप्नुवन्तीत्यर्थः ॥ तदा जीवः सुखी दुःखीति वा लोके व्यवहारो भवति । नन्वेते आत्मधर्माः कुतो न भवन्ति, अन्तःकरणधर्म्मत्वे वा किं प्रमाणं तत्राह ॥ अग्रपश्चाद्भावत इति ॥ कर्म्मस्वरूपो भगवान् अंतःकरण एव प्रकटो भवति नात्मनि, अतः सुखदुःखादयोन्तःकरणस्यैव धर्मा इत्युच्यंते स च कर्मात्मा विधिनिषेधप्रकारेण स्फुरितः । पूर्वोक्तन्यायेन सुखदुःखे तनोति ॥ ३०९ ॥ ३१० ॥

आवरणभंगः ।

किं दुःखमिति स्वतन्त्रप्रमेयनिरूपणप्रस्तावे दुःखपदार्थस्यानिरूपितत्वात्किंदुःखपदार्थः । मूले सर्वथापदस्य प्रयोजनं न स्फुटमिति तद्विवेक्तुमाहुः ॥ ईषदित्यादि ॥ ॥ स्वरूपात्मकस्यानंदस्येषत्तिरोभावे पदार्थांतरत्वमित्यर्थः । ननु तर्हि सर्वथातिरोभावोऽपि पदार्थान्तरमास्त्वित्यत आहुः ॥ अन्यथेत्यादि ॥ ॥ ननु प्रतिकूलबुद्धिवेद्यत्वस्य तल्लक्षणत्वात्तदतिरिक्तमेवास्त्वित्यत आहुः ॥ आत्मन इत्यादि ॥ ॥ तथा चैवमप्यानंदतिरोभावान्न तदतिरिच्यत इत्यर्थः । एवं दुःखस्वरूपं निरूप्य वक्ष्यत इति प्रतिज्ञां पूरयितुमीषत्तिरोभावादेः स्वरूपमाहुः ॥ ॥ ईषदित्यादि ॥ ॥ अयमर्थः सच्चिदानंदा द्विविधाः स्वरूपात्मका धर्मात्मकाश्च । एवं द्विविधा अप्याधिदैविकाध्यात्मिकाधिभौतिकभेदेन त्रिविधास्तत्र स्वरूपात्मकाधिदैविकसच्चिदानन्दरूपो भगवान् पुरुषोत्तमः । आध्यात्मिकतद्रूपमक्षरं द्वितीयः पुरुषः । आधिभौतिकं तद्रूपं क्षरं प्रथमः पुरुषः । धर्मात्मकाधिदैविकसच्चिदानंदरूपो लीलापरिकरः । तादृशाध्यात्मिकसच्चिदानंदरूपो वैकुंठादिपरिकरः । तादृशाधिभौतिकसदंशात्मकानि अष्टाविंशतितत्वानि । तादृशाधिभौतिकचिदंशभूतं तत्वनिष्ठं ज्ञानं तादृशाधिभौतिकानंदरूपं तत्वनिष्ठं सुखम् ॥ एवमेव यथायथं तत्तत्तिरोभावो ज्ञेयः । एवं सति स्वरूपात्मकस्याधिदैविकाध्यात्मिकानंदस्येषत्तिरोभावो दुःखाभावः स एव मोक्ष इति लोकैरुच्यते । वैदिकसाधनस्य यज्ञादेतदेव फलम् । स्वरूपात्मकस्यानंदस्यैव सर्वथोद्भवः सुखमित्यर्थः ॥ एवं लोकेऽपि धर्मात्मकतत्वादिनिष्ठाधिभौतिकानन्दस्येषत्तिरोभावो लौकिकदुःखाभावः । सर्वथोद्गमो लौकिकसुखमित्यादि बोध्यम् । नन्वेवं सति व्यापको भगवान् सर्वत्रेति सर्वत्र सुखमेव स्यात् । तिरोभावे च दुःखमेव स्यान्नतु द्वयमि-

ायामाहुः ॥ एवमित्यादि ॥ ॥ तस्य स्थानमिति ॥ ॥ स्वरूपानन्द-
ास्य स्थानमित्यर्थः ॥ नन्वेवं सति तिरोभावस्य सुखस्य च परस्परविरोधात्
चेदुभयस्थितिरित्याकांक्षायामाहुः ॥ जगतीत्यादि ॥ तथा च धर्मरूपसु-
ग प्रकटः स्वरूपसुखाकारेणाप्रकट इतीषत्तिरोहितस्तस्माज्जगति द्वंद्वात्मकं
मलोकेषु धर्मरूपसुखाकारेणापीषदेव प्रकटो नारकी निर्वृतिरूपेण
ति तत्र दुःखबाहुल्यम् ॥ शुद्धतमसि नैकेनापि रूपेणेति तत्र तथेत्यर्थः ॥
ाया तमोंधतमसवज्ज्ञेयम् ॥ तदेवाहुः ॥ एवं त्रैविध्येत्यादि ॥ ॥ नन्वेवं
वेध्यमस्तु सुखे तु तत्कथमित्यत आहुः ॥ तथा सुखेपीत्यादि ॥ ॥ ई-
ावात्यनुपद्रवसर्वथानुपद्रवैर्धर्मरूपसुखस्याविर्भावसर्वथाविर्भावतः सुखेऽपि
मित्यर्थः ॥ इच्छादीनामित्यादि ॥ ॥ नन्वेवं सति जगति सर्वे-
दुःखं च तुल्यमेवास्तु । न तु प्रतिनियतो न्यूनाधिकभाव इत्याकांक्षायां
धानाय सर्वत्र तयोस्तौल्यमेव तदीयाकाराणामेव परं हेतुवशान्न्यूनाधि-
इत्यादिवक्तुमिच्छादीनां स्वरूपमाहेत्यर्थः ॥ धर्म आकार इत्यादि ॥ ॥
ामाकारप्राकट्ये इच्छाकामौ तयोर्धर्मिणस्तु य उद्गमस्तत्तु सुखमित्यर्थः ॥
विषयाशंसारूपेणेषदभिव्यक्तः सुखाकार इच्छा, स एवाधिकोद्गतः का-
ाशास्यविषयानुभवेऽनुकूलतयाभिव्यक्तो मानस आनंदः सुखमिति सि-
। एते त्रयोप्यनुकूलबुद्धिवेद्याः । एवं सुखस्य तद्धर्माणां च स्वरूपमुक्त्वा
य तद्धर्माणां च वदन्तोऽतिदिशंति ॥ एवमित्यादि ॥ ॥ तद्दुःखस्य तद्ध-
च तत् । उद्गमनमेव द्वेषादय इत्यर्थः ॥ एवं च विषयानाशंसारूपेणेषदभि-
दुःखाकारो द्वेषः । स एवाधिकोद्गतः क्रोधः । अनाशास्यविषयानुभवे प्रति-
याभिव्यक्तो मानससुखतिरोभावो दुःखम् । एते त्रयोऽपि प्रतिकूलबुद्धिवे-
लोभस्वरूपमाहुः ॥ लोभस्त्वित्यादि ॥ ॥ तथा च विषयात्यन्ताभि-
रूपेणाभिव्यक्तस्य सुखाकारस्य परस्मा अनाशंसारूपेणेषदभिव्यक्तदुःखा-
य चैक्यं सः कामद्वेषयोरेकीभाव इति यावत् । अयं च मेऽस्त्वन्यस्य मास्त्वि-
ारानुभवविशिष्टबुद्धिवेद्यः । मोहस्वरूपमाहुः ॥ मोहस्त्वित्यादि ॥ ॥
क्वचिद्वृक्षविशेष एकस्मादेव मूलात्पत्रद्वयमन्यान्याकारमुत्पद्यते तद्वदेकस्मा-
दुत्पद्यमानो द्विरूपः । कश्चिद्धर्मयुक्तसुखस्येषदुद्भेदरूपः । यथा पुत्रवात्स-
ौ । स च साशंसतयानुकूलबुद्धिवेद्यः । अपरस्तु धर्मयुक्तदुःखस्येषदुद्भेदरूपः।
पुत्रक्लेशादौ । सत्वनाशास्यतया प्रतिकूलबुद्धिवेद्यः॥३०२–३०६॥ अन्ययो-
॥ ॥ मदमात्सर्ययोः स्पष्टमिति । चेतःप्रसादो हर्षः । हर्षोत्कर्षो मदः । प-
ार्षासहनं मात्सर्यम् । एतयोर्यथायथमनुकूलप्रतिकूलबुद्धिवेद्यत्वात्सुखदुःखरू-

पत्व स्फुटमित्यर्थः ॥ एवं केषां चित्स्वरूपं निरूप्यानुक्तानां संग्रहार्थं मूल आहुः ॥ अन्येषामित्यादि ॥ ॥ अन्येषां रागभयह्रीप्रभृतीनां सर्वमनोधर्माणां यथासंभवं सुखदुःखोद्गम एव स्वरूपं ज्ञेयमित्यर्थः ॥ तथा च सूक्ष्मा सुखपूर्वावस्था रागः, तादृशी दुःखावस्था भयम् । तथा अकर्मसु जुगुप्सा दुःखधर्मस्याति सूक्ष्मोद्भेदरूपा ह्रीरित्येवं ज्ञेयम् । उत्साहस्तु निश्चयविशेषः । धृतिस्तु जिह्वोपस्थजयः ॥ विषयाभिलाषोपमर्दिका मानसी क्रिया । विपरीता अधृतिः । यत्नोपि यदा कदाचिच्चेष्टानुकूला मानसक्रियैवेति तु प्रसङ्गादुक्तम् । एवमन्यदप्यूह्यम् ॥ एवमेतेषां स्वरूपमुक्त्वा एतदुद्गमे हेतू आहुः ॥ अधर्माभासेत्यादि ॥ ॥ तथा च सुखदुःखयोः । प्रतिनियतन्यूनाधिकभावो धर्माधर्मतत्तदाभासैः कृत इत्यर्थः ॥ यद्यपि ज्योतिःशास्त्रे "परिणमति फलोक्तिः स्वप्रचिंतास्ववीर्यैरिति" निर्बलसबलग्रहैः सुखादिकमुक्तम् । तथापि तेषां सूचकत्वादिव्यवस्थापनाद्भिःगुगीतायां ग्रहनिमित्ततादूषणाच्च पूर्वोक्त एव निश्चय इति ज्ञेयम् । ननु यदि धर्माधर्माभ्यामेव सुखदुःखादयस्तर्हि तदव्यवहितोत्तरमेव ते स्यातां न तु विलंब्य कर्मणस्त्रिक्षणावस्थायित्वेन विरम्य व्यापारस्याशक्यवचनत्वात् । अथापूर्वेणान्यदातद्भवतीत्युच्यते कस्तर्हि तदुद्बोधसमयो यदैते भवंतीति हृदि कृत्वाऽहुः ॥ कदेत्यादि ॥ ननु कर्मणां तौल्यात्कथं केषां चिदत्र विपाकोऽन्येषां जन्मांतर इत्याकांक्षायां तेषां तारतम्यं स्फुटीकुर्वंति ॥ अल्पफलेत्यादि ॥ ॥ तथा च महाफलान्यत्र पच्यंत इत्यस्मिन्नेव तत्फलं भुज्यते शेषाणि परत्रेत्येवं ज्ञेयम् "अत्युग्रपुण्यपापानामिहैवफलमश्नुत" इत्यादिवाक्येभ्य इत्यर्थः ॥ एवं कर्मणां स्वभावो बोधितः । कोत्र पाक इत्यतो विवक्षितपाकपदार्थं विवृण्वंति ॥ उपचितेत्यादि ॥ ॥ ऊष्माधिक्येन सजातीयसंवलन उपचितावयवत्वमेव पाकः रूपरसादिविपर्यासरूपं कार्यं च फलादौ तद्गमकम् । एवं पाकपदार्थं निश्चित्यातिदिशंति ॥ एवमित्यादि ॥ त्रिक्षणावस्थायित्वपक्षेऽप्यपूर्वसमुदायस्तादृशस्थले वाच्य एव अन्यथा परमापूर्वस्यैवासिद्धेः । किंचैवं जातेऽपि परमापूर्वे तदानीं फलाभावात्कालादेर्दृष्टसामग्र्याश्च सहकारितापि वाच्या । तदैव फलसिद्धेः स एव पाकपदार्थः ॥ अस्माकं तु कर्मस्वरूपस्य भगवतः सार्वदिक्त्वाद्येन पुंसा विहितेन स्वकर्मणान्यदीयेन वा कर्मणा यादृशोऽभिव्यंजयितुमारब्धस्तं प्रति तादृशैः कर्मांतरैः संपूर्णो यदाभिव्यक्तो भवति तदा पूर्णतया भोगयोग्यो भवति । तथासति तदवयवभूतानां कर्मणां यदुपचितावयवत्वं करांगुल्यादीनां स्थूलतेवाधिकाधिकाभिव्यक्त्या पोषः । स एव विपाकपदार्थो ज्ञेय इत्यर्थः ॥ तेन सिद्धमाहुः ॥ इदानीमित्यादि ॥ ॥ तथा च यानि सूक्ष्माण्यभिव्यक्तानि तानि पोषापेक्षीणि तदानीमविपक्वानि का-

लांतर उक्तरीत्या पुष्टानि फलंतीति तारतम्यादस्त्ययं कालभेद इत्यर्थः ॥ ननु यद्येवं कर्मणामवश्यफलत्वं तदा प्रायश्चित्तादिशास्त्रवैयर्थ्यापात इत्यत आहुः ॥ स्वरूपनाश इत्यादि ॥ ॥ आदिपदेन कीर्त्तनादेः संग्रहः ॥ धर्मः क्षरति कीर्त्तिनादिति ॥ स्वरूपनाशः फलानुकूलाकारनाशः । कर्मक्षयस्तु तत्स्वरूपतिरोभावः ॥ भोगेनेत्युपलक्षणम् । तथाच "कर्मणा कर्मनिर्हारो नह्यात्यंतिक इष्यते । अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनम् ॥ केचित्केवलया भक्त्या वासुदेवपरायणाः । अघं धुन्वंति कार्त्स्न्येन नीहारमिव भास्करः ॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुनथा" इत्यादिषष्ठस्कन्धगीतादिवाक्यैरेतदन्यतमेन कर्मक्षय इत्यर्थः ॥ ३०७ ॥ ३०८ ॥ अत्र भोक्तारमित्यादि ॥ ॥ एवं कर्मणां फलं तद्भोगावसरादिकं चोक्त्वा भोगः कस्येत्याकांक्षां पूरयितुं सुखादिधर्मिणं च निर्द्धारयितुं तत्फलभोक्तारं निरूपयतीत्यर्थः ॥ मिलिताः स्वव्यपदेशं प्राप्नुवन्तीत्यर्थः ॥ इति स्वपदमात्मीयार्थकम् । तथा च उक्तविधं संसारिणं जीवं प्राप्ताः संतः स्वयं जीवधर्मत्वव्यपदेशं दधतीति यावत् । अत्र केचन वैशेषिकमतेन द्विधा शंकंते ॥ नन्वित्यादि ॥ ॥ समादधते ॥ अग्रेत्यादि ॥ ॥ उभयत्रोपपत्तिमाहुः ॥ कर्मेत्यादि ॥ ॥ अयमर्थः । कर्मणः कार्यं जन्मेति स्वभावस्य कार्यं परिणाम इति द्वितीयस्कन्धे स्थितं तथा च कर्म यत्रैव प्रकटीभवति तत्रैव जनयति तत्रान्तःकरणे प्रकटः सुखादिकं जनयति तदा स्वभावेनांतःकरणं परिणमते तस्मात्तथोच्यन्ते । अत एककर्मफलभोगे लिंगापेक्षा । आत्मधर्मत्वे अशरीरस्यापि प्रियाप्रिये स्पृशेतां ततश्च "अशरीरं वाव संतं प्रियाप्रिये नस्पृशत" इति श्रुतिर्विरुध्येत । अतो मनोमात्रात्मकलिंगशरीरेन्वयव्यतिरेकानुविधानादंतःकरणस्यैवैते धर्मा इत्यर्थः ॥ नन्वंतःकरणे प्रकटश्चेत्तर्ह्यनुभूयेतेतिचेत्तत्राहुः ॥ सर्व इत्यादि ॥ ॥ तथा चैवं स्फुरणरूप एव तस्य प्रकटीभावो नतु विशेषाकारेण वृत्तिगोचरः । स इत्यर्थः ॥ नच कर्मणां परिणामित्वादाविरंच्यादमंगलमिति । भगवतापि दुःखरूपः कर्मणां परिणाम उक्त इति तद्विरोधः शंक्यः कर्मणां पूर्वोक्तरीतिकविपाकात्मपरिणामशालित्वाद्विरंचिपर्यंतममंगलं दुःखमन्तःकरणे भवतीत्यर्थात् । अत एव द्वितीये "यच्चित्ततोदः कृपयानिदं विदामिति" चित्ततोदो दुःखमुक्तम् ॥ ३०९ ॥ ३१० ॥ इति फलप्रकरणम् ॥

ब्रजभाषाटीका ।

ऐसें निषिद्ध मतनको दुःखरूप फल बतायके दुःख कायसों कहनो ऐसी आकांक्षा भई तहाँ कहैहै (आनंदस्येति) आनन्द-

को (ईषत्तिरोभाव) अर्थात् कछुक छिपोभयो स्वरूपात्मक आनन्द (दुःखाभावरूप) पदार्थान्तरहै और सर्वथा छिपोभयो आनंदकूँ दूःख कहेहैं । अनिर्वृतिरूपहै तासों अन्यथा सच्चिदानन्दरूपसों अतिरिक्त पदार्थ तो हेईनहिं फिर दुःखको वर्णन नहिं करसकेंगे । आत्माकूँ प्रतिकूल ज्ञान जामें होय यह दुःखको लक्षण भी सर्वथा आनन्दके तिरोभावमेंही घटे हैं क्योंकि भगवान्सों विमुखताही आत्माके प्रतिकूलहै सर्वथा आनन्दके आविर्भावकूँ सुख कहेहै वा दुःखकी स्थिति तो सर्वत्रही है परन्तु यमराजके लोकमें वाको विशेषकरके निवासहै जगत्में भगवान् तिरोहित रहे है । तासों सर्वत्र दुःख रहे है । यमलोक प्राणीके उपद्रवको स्थान है तासों वह सर्वात्मा परम दयालु भगवान् सर्वथा छिपेभये रहेहैं ॥ ३०२ ॥ शुद्ध तममें भी दैत्यनको निवासहै । तासों वहाँभी सर्वथा छिपेभये रहें है । तासों ये विशेष दुःखके स्थानहैं. याप्रकार दुःख तीनप्रकारको है । सर्व जगत्को दुःख १, नरकात्मकदुःख २, तमोरूप दुःख ३, ये दुःखके तीन भेदहैं ॥ ३०३ ॥ सर्वजगत्को सुख १, स्वर्गको सुख २, ब्रह्मानन्दरूप सुख ३, ये सुखके तीन भेदहैं, सच्चिदानन्दभगवान्सों सृष्टिको क्रम आवरणभङ्गमें दिखायोहै जैसें तेज दोप्रकारको है स्वरूपात्मक दीपरूप तेज तथा धर्मात्मक वाको प्रकाशरूप तेज ऐसें सत् चित् आनन्द दोप्रकारकेहैं स्वरूपात्मक सत् चित् आनन्द तथा धर्मात्मक सत् चित् आनन्द तहाँ दोनोंप्रकारके सत् चित् आनन्द अध्यात्म आधिभौतिक आधिदैविक इन भेदनकरकै एक एक तीनप्रकारके हैं तहाँ स्वरूपात्मक आधिदैविक सच्चिदानन्दरूप भगवान् पुरुषोत्तमहैं, आध्यात्मिकस्वरूपात्मक सच्चिदानन्दरूपद्वितीयपुरुष अक्षरब्रह्महै, आधिभौतिकस्वरूपात्मक सच्चिदानन्द-

रूप प्रथमपुरुष क्षर ब्रह्महै, धर्मात्मक आधिदैविक सच्चिदानन्द-रूप गोलोकको परिकरहै, धर्मात्मक आध्यात्मिक सच्चिदानन्दरूप वैकुंठादि परिकरहै, धर्मात्मक सदंशरूप अष्टाविंशतितत्वहै, धर्मा-त्मक चिदंशरूप अठ्ठाईस (२८) तत्वमें स्थितरहवेवारो ज्ञानहै, धर्मात्मक आनंदरूपतत्वनमें स्थितरहवेवारो सुखहै ऐसेंही यथा-क्रमसों इनको तिरोभाव समुझलेनों स्वरूपात्मक आधिदैविक आध्यात्मिक आनन्दको ईषत्तिरोभावकों दुःखाभाव कहेहैं वाहीं-कूँ सब लोग मोक्ष कहेंहैं वेदोक्त यज्ञादिसाधनकों वहही फलहै स्वरूपात्मक आनन्दकों सर्वथा आविर्भाव सुख कहावे है धर्मात्मक तत्वनिष्ठ आधिभौतिक आनन्दको कछुक तिरोभाव लौकिक दुः-खाभाव कहावेहै धर्मात्मकतत्वनिष्ठ आधिभौतिक आनन्दको सर्वथा आविर्भाव लौकिक सुख कहावेहै इच्छाकामादिकनको स्वरूप वर्णन करेंहैं (सुखधर्म इति) विषयकी आशंसारूपकरके कछुक प्रकटभयें सुखके आकारकूँ इच्छा कहे है वासों अधिक प्रकटभये सुखके आकारकूँ काम कहे है आशास्यविषयके अनुभव करतेसमयमें अनुकूलताकरकें प्रकटभयो मानस आनन्द सुख कहावेंहै विषयकी अनाशंसारूपकरके कछुक प्रकटभये दुःखके आकारकों द्वेष कहे है वासों अधिक प्रकटभये दुःखके आकारको क्रोधकहेंहै (अनाशास्यविषय) अर्थात् जाके अनुभव करवेकी बिल कुल इच्छा नहिं होय वा पदार्थके अनुभव करते समयमें प्र-तिकूलताकरके प्रकटभये मानस आनन्दके तिरोभावकूँ दुःख कहेहैं पदार्थकी अत्यन्त अभिलाषारूप करके प्रकटभये सुखके आकारकी तथा अन्य जीवकेलिये (अनाशंसारूपकरके) अर्थात औरकूँ यह पदार्थ मत प्राप्त होवो ऐसी इच्छारूप करके प्रकटभये दुःखके आकारकी एकताको नाम लोभहै जैसें कोई वृक्षमें एक

लसों दो पत्र उत्पन्न होयँ और वे न्यारे न्यारे घाटके होयँ ऐसें एक (राग) प्रीतिसों उत्पन्नभयो मोह दोरूपवालो है । धर्मयुक्त सुखको कछुक उद्भेदरूप मोह पुत्रके वात्सल्यमें होवे है, धर्मरूप दुःखको किंचित् उद्भेदरूप मोह पुत्रादिकनमें क्लेश होय तब होवे है, चित्तकी प्रसन्नतासों हर्ष कहे है, हर्षके अधिकहोयवेसों मद कहेहैं, दूसरेके उत्कर्षकूँ नहिं सहनकरवेसों मात्सर्य कहे हैं,याप्रकार राग, भय, लज्जा, आदिकनकोभी सुखदुःखनको यथासंभव उद्गमही स्वरूपहै, सूक्ष्म जो सुखकी पूर्वावस्था तासों राग कहे हैं, दुःखकी सूक्ष्म पूर्वावस्था भय कहावे है, ऐसें औरनके स्वरूपभी आवरणभङ्गद्वारा समुझलेनो योग्यहै,जैसें धर्म करवेसों सुख होय और अधर्मकरवेसों दुःख होय ऐसें (आभासमात्र) अर्थात् पूर्ण धर्म नहिं करवेसों इच्छा काम आदिक होयहैं आभासमात्र अधर्म करवेसों क्रोधद्वेषादिक उत्पन्न होयहैं याहीकेलिये इनको निरूपण कियो है ॥ ३०४—३०७ ॥ ये फल धर्म अधर्मकरें पीछें कब होयहैं ऐसी आकांक्षा भई तहाँ कहे हैं (विपाकः कर्मणामिति) अल्पफलवाले सुकर्म कुकर्म बहुत कालमें पके हैं तासों पहली देहको पातभये पीछें उनको फल मिले हैं जैसें (ऊष्मा) गरमीके अधिक होयवेसों वृक्षके फलनके अवयव (उपचित) फूलजावें तब वे फल पके फल कहावेहैं ऐसेंही कर्मनको भी परिपाक जानलेनों अत्यन्त उग्र पुण्य पाप तो याही देहमें फल देवे हैं जे पुण्य पाप अत्यन्त उग्र नहिं हैं वे अभी विना पके हैं कालान्तरमें पकेंगे तबही उनको फल मिलेंगो । कर्मको स्वरूपनाश । अर्थात् फल होयवेके अनुकूल आकारको नाश प्रायशः चान्द्रायणादिक प्रायश्चित्तनसोंभी होयहै (सर्वथा क्षय तो) कर्मनको तिरोभाव तो भोगवेसों होय तथा (ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेर्जुन ।

चेत्केवलया भक्त्या) इत्यादिवाक्यप्रमाणसों भक्ति अथवा
नसों होयहै ॥ ३०८ ॥ सुखदुःखादिकनके भोक्ताको निरूप-
करें हैं (एते सर्व इति) सुखदुःखादिपदार्थ अन्तःकरणके
हैं जीवके (संनिधानसों) उनको स्फुरण होयहै अर्थात्
वके समीप रहवेसों फुरेभये सुखदुःखादिक अंतःकरणके अवि-
वाले जीवकूँ प्राप्त होयकें जीव धर्म कहावेहै तब अन्तःकरण
पो मैंही हूँ ऐसें मानवेवारो जीव अन्तःकरणके सुखदुःखादि
निकरकें यह सुखीहै यह दुःखी है याप्रकार लोकमें व्यवहार
चर होयहैं ॥ ३०९ ॥ तहाँ सुखदुःखादिक आत्माके धर्म क्यों
हीं होयसकेहैं तथा ये अन्तःकरणके ही धर्म हैं यामें कहाँ प्रमाण
ी शंकातो नहिं करनी क्योंकि अग्रपश्चाद्भावकरकै कर्मस्वरूपी
ावान् अन्तःकरणमें ही प्रकट होवैं हैं आत्मामें नहिं प्रकटहोवै हैं
सुख दुःखादिक आत्माके धर्म होंय तो शरीर रहित आत्मा-
भी सुखदुःख स्पर्श करेंगें तब तो (अशरीरं वावसन्तं प्रिया-
ये न स्पृशतः) या श्रुतिमें (प्रिय) सुख (अप्रिय) दुःख
रिरहित आत्माको स्पर्श नहिं करै है यह लिखीहै तासों विरोध
विगो याहीसों कर्मफल भोगवेमें मनोमात्र लिङ्गदेहकी अपेक्षाहै
सों सुखदुःखादिक अन्तःकरणकेही धर्म कहेजावें हैं कर्मस्वरूपी
ावान् विधिनिषेध प्रकारकरकें स्फुरित होयके पूर्वोक्तन्यायके
ुसार सुखदुःखको बिस्तार करे हैं ॥ ३१० ॥ इति फलप्रकरणम् ॥

ज्ञाने यर्हि मनोराज्यं शोकस्तेनापि नो भवे-
त् । त्रिविधं दुःखमेतद्धि भवत्येव न संशयः ॥
॥ ३११ ॥ सर्वाध्यासनिवृत्तौ हि सर्वथा न भ-
वेद्व्यथा । सा च विद्योदये सा च न शब्दात्सु-

विचारितात् ॥ ३१२ ॥ मर्यादाभंग एव स्यात्
प्रमाणानां तथा सति । गजानुमानं नैव स्या-
त्सांकर्यं वा तथा भवेत् ॥ ३१३ ॥ दशमस्त्व-
मसीत्यादौ देहादिविषयत्वतः । शब्दस्य सा-
हचर्येण चक्षुषैव भवेन्मतिः ॥ ३१४ ॥ स्मार-
कत्वमतो वाक्ये संख्याज्ञानं पुरा यतः । अ-
ध्यासस्यानिवृत्तत्त्वान्न विविक्तात्मदर्शनम् ॥
॥ ३१५ ॥ मनसा शक्यते कर्तुं नान्यथा सर्व-
था भवेत् । प्रत्यक्षेणापि विज्ञानं मायया ज्ञा-
नकाशया ॥३१६॥ स्वप्नप्रबोधरीत्या हि किमु
शाब्दं निवारयेत् । सर्वज्ञत्वं सर्वभावज्ञानं चा-
पाततः फलम् ॥ ३१७ ॥ सर्वोनब्रह्म सर्वं तु वा-
मदेवस्तथा जगौ । अवयुज्यागर्भवासी सू-
र्याद्यनुवदन् मुहुः ॥ ३१८ ॥ ज्ञानदुर्बलवाक्य-
त्वात्पाषण्डवचनं मतम् । सत्ये युगेतिमहतां
भवत्येतन्न चान्यथा ॥ ३१९ ॥ स्वप्नो जाग-
रणं चैव यथाह्यन्योन्यवैरिणौ ॥ विद्याविद्ये
तथास्यातां नतु सर्वात्मना लयः ॥ ३२० ॥

तत्त्वदीपप्रकाशः ।

एवं फलं निरूप्य साधनं निरूपयितुं भगवत्प्राप्तौ किं साधनमित्या-
कांक्षायां ज्ञानं साधनमिति लोकप्रसिद्ध्या प्राप्तं ज्ञानं वेदविचारेण
" तमेव विदित्वातिमृत्युमेतीति" दुःखातिक्रममेव फलत्वेन मन्यते पर-

मानंदानुभवस्तु भक्त्यैवेत्यग्रे वक्ष्यते । एतदेव साधनद्वयं तारतम्येन यथाफलं निरूपयति तथोच्यते । तत्र ज्ञानं दुःखं दूरीकरोतीति निश्चितम् । तदापातत एव दूरीकरोति । मूलतस्तु भक्तिरेवैतदपि करोति। 'अनर्थोपशमं साक्षादिति' वाक्यात् । अतो ज्ञाने परंपरया दुःखदूरकरणं वक्तव्यं तद्यया प्रनाड्या भवति तामाह ॥ ज्ञाने यद्वीति ॥ ज्ञानस्वरूपं शब्दाछुतं मनसा मनोराज्यवद्यदा भावयति तदापि शोको निवर्त्तते । अतो यादृशेनापि तादृशेन ज्ञानेन लोके जायमाना अंतःकरणक्लेशा निवर्तंते । व्याध्यादिक्लेशस्तु न निवर्तते ।तथा नरकदुःखम् । तथा सहजासुराणां तमोदुःखञ्च तदाह ॥ त्रिविधमिति ॥ तस्यापि निवृत्त्युपायमाह ॥ सर्वाध्यासनिवृत्तौहीति ॥ व्यथा पीडा सर्वाध्यासनिवर्तकं तु ज्ञानं नेदानींतनानां नेदानींतनशास्त्रानुसारेणेति निरूपयति ॥ साचेति ॥ अविद्यानिवृत्तिर्विद्योदये विद्या च शब्दान्न जायते । संघातस्थितो ह्यात्मा सदानुभूयते । श्रुतिः पुनः संघातव्यतिरिक्ततां बोधयन्ती अनुभूतब्रह्मात्मभावं वा बोधयन्ती पूर्वज्ञानेन बाधिता दुर्बला भवति।अतो वैराग्यादिसाधनैःसहिता मननिदिध्यासनाभ्यां युक्ता अभ्यासेन बलिष्ठा मनसि ब्रह्माहमस्मीति वृत्तिमुत्पादयति।तदानुभवपरंपरया पूर्वानुभवो बाध्यते । तत्र शब्दस्य सहकारित्वं मनसस्तादृशस्य करणत्वम् । ये तु पुनः शब्दस्य करणत्वमाहुस्ते भ्रांता एव नह्यात्मविषयकेषु ज्ञानेषु मनोतिरिक्तं करणं भवति । बहिरिंद्रियाणां ग्राहकाणां बहिर्विषय एव सामर्थ्यात् । अत आत्मनो धर्म्मः ब्रह्मत्वलक्षणो न बाह्यः । दशमत्वादिवत् । स च देहधर्मः देहेष्वेवापेक्षाबुद्ध्या जन्यते । अतो दशमोऽहमिति देहरूपमात्मानं शब्दाज्जानन्नपि न ब्रह्मरूपानुभवस्तदेति सिद्धान्तः । किंच दशमोहमिति चाक्षुषं ज्ञानं वाक्ये युष्मच्छब्दप्रयोगात् । नहि शब्दः पदस्मारितपदार्थोल्लंघनेन वाक्यार्थं

जनयति । अतो युष्मच्छब्देन नास्मच्छब्दज्ज्ञानं जनयिष्यति तथा जायमानं चक्षुषा मनसा वा जायत इत्यङ्गीकर्तव्यमित्याह ॥ **नशब्दात्सुविचारितादिति** ॥ दूषणांतराण्याह ॥ **मर्यादाभंग एवस्यादिति** ॥ ज्ञानं तु प्रमाणाधीनं न प्रमेयाधीनम् । मानाधीना मेयसिद्धिरिति । अन्यथा लोके मर्यादाभङ्गः स्यात् । तं घटमानयेत्यत्र वाक्यार्थज्ञानं प्रत्यक्षं स्यात् । चीत्कारेण गजानुमानं च न स्यात् । प्रत्यक्षत्वं जातिः परोक्षत्वं च । ज्ञानं तयोरप्यनुभवात् । अतः सांकर्यं च भवेत् ॥ ३११—३१३ ॥ दशमवाक्यमन्यथासिद्धमिति भ्रांतानां मतेन दृष्टान्त इत्याह ॥ **दशमस्त्वमसीति** ॥ दशमोहमिति देहभिन्नज्ञानं प्रकृते तदभावमाह ॥ **अध्यासस्येति** ॥ प्रतिबंधनिवृत्त्यनंतरमेव हि कार्योदयः । अतोऽध्यासस्य प्रतिबन्धकत्वान्न शब्दात् ज्ञानमप्युदेतीति भावः । अत एव महता साधनेन तज्जन्यते । अतः शब्दसाहचर्येण मनसापि तज्जनयितु शक्यं नेत्यर्थः । विपरीते बाधकमाह ॥ **अन्यथेति** ॥ शब्दश्रवणमात्रेणैव तज्ज्ञाने जाते सर्वसाधनवैयर्थ्यमिति । मुख्यज्ञानेनाप्यध्यासनिवृत्तिर्नास्तीत्याह ॥ **प्रत्यक्षेणापीति** ॥ स्वप्नप्रबोधो यथा न निद्राव्यावर्तकः । तथा जीवप्रयत्नसाध्यो न कदाप्यविद्यानिवर्तकः ॥ मायाधीनत्वात्तेषां यथा सा नानावस्थां संपादयति तथा ज्ञानावस्थामपि संपादयतीति । यैव माया निवर्त्तिका सैवाध्यासं निवर्तयति नान्येत्यर्थः । ज्ञानिनामपि चेतांसीत्यादिवाक्यानि च बाधकानि । किंच । जीवस्यात्मनो ब्रह्मत्वेन ज्ञानं ब्रह्मस्वरूपज्ञानानंतरमेव । अन्यथा रजतज्ञानरहितस्यापि शुक्तिकायां रजतभ्रमो भवेत् । अतः पूर्वं ब्रह्मज्ञानमपेक्षितं तेनैव कार्यसिद्धावात्मज्ञानं व्यर्थम् । अपरोक्षत्वाय तथात्वेप्येकदेश एव तथाभावनमनर्थमेव येत् न फलं सावयेदिति ब्रह्मज्ञानं पूर्वं जातं निष्फलं भवेत् । सर्वम् ॥ ३१४—३१७ ॥ तत्रापि केचिन्मन्दमतयः

मेव सर्वज्ञानमिति वदंति । तन्निराकरोति ॥ सर्वो न
तु पुनः सर्वमेव सर्वशब्देनोच्यते यतो वामदेवः अगर्भस्थितो-
ऽभवं सूर्यश्चेति सर्वशब्दार्थरूपान् मन्वादीननुवदति । अत-
ारो ज्ञानदुर्बलवादिन इति मन्तव्याः । ज्ञानस्य दुर्लभत्वमाह॥
इति॥३१८—३१९॥ भक्त्युत्कर्षार्थमाह॥स्वप्नइति॥३२०॥

आवरणभंगः ।

ल्पप्रकरणे ज्ञानसमुच्चितात्कर्मणो मोक्षः फलं योगसांख्यभक्तीनां मेल-
ः केवलयोगसांख्ययोरन्येषां च नरकः फलम् ॥ भ्रान्तप्रतिपन्ने धूमादि-
रूपं भौतिकं सुखं तत्तिरोभावरूपं दुःखं च द्विविधकर्मणां फलं तथैवो-
सुखं प्रकीर्णकानां प्रवाहप्रवेशो भगवदीययोगसांख्यकर्मार्पणानां का-
भक्तिः कापालिकयोगविपाके मोक्षोऽन्यथा नरकादि ॥ नानाविधशा-
नरक इत्येवं सर्वेषां फलनिरूपणेन वैदिकमुख्यमार्गभगवदुक्तभक्ति-
ऽक्तानां जघन्यता फलतः प्रतिपादिता । अतःपरं ज्ञानभक्त्योर्मध्य
ाधिक्यं वा द्वयोः साम्यं वेति विचारणीयम् । तथा " पश्चाद्वक्ष्ये तयोर्ग-
"प्रतिज्ञातत्वात्पूर्वमीमांसानिर्णयोवर्णाश्रमवतां धर्म इत्यादिना कृत इत्यु-
सानिर्णयः शिष्टत्वात्करणीयस्तथा ज्ञानेपि सात्विकी मुक्तिरिति । तत्वम-
कयस्येत्यारभ्य भजनं सर्वथामतमित्यंतं पूर्वप्रकरणोक्तं च विमर्शनीय-
र्त्क्ति प्रमाणादिप्रकरणत्रये सर्वेषां प्रमेयाणां बलमपि विचारितमतःपरं सर्व-
ऽवसरतः प्राप्त इति तदर्थं साधनप्रकणमारभंते ॥ एवं फलं निरूप्येत्यादि ॥
स्य जघन्यताप्रतिपादनद्वारा भगवत्प्राप्तिरूपं फलं मुख्यत्वेन प्रतिपाद्य
धनं भक्तिरूपं निश्चाययितुं भगवत्प्राप्तौ किं साधनं योगाख्ययोमयेति
क्योक्तेषु सभेदेषु त्रिषु लोकप्राप्तेष्वन्येषु च साधनेषु किं मुख्यं साधनमि-
ज्ञायां 'ज्ञानादेव हि कैवल्यमिति' श्रुत्या ज्ञानं साधनमिति हेतोर्लोकप्रसिद्ध्या
ानं षोडशपदार्थतत्वज्ञानान्मोक्षः, द्रव्यादिषट्पदार्थसाधर्म्यवैधर्म्यज्ञाना-
, प्रकृतिप्राकृतविविक्तात्मज्ञानान्मोक्षः, ब्रह्मत्वेनात्मज्ञानान्मोक्षः, ब्रह्म-
मोक्षः, इत्यादिरूपेण तेषुतेषु तन्त्रेषु प्रस्थानेषु च प्राप्तं ज्ञानं वेदविचारेण-
आत्मज्ञानाद्ब्रह्मज्ञानाच्च मोक्षस्योक्तत्वान्मतांतरनिरासपूर्वकं तद्विचारेण
विदित्वा अतिमृत्युमेतीति' श्रुतावतिक्रान्तो मृत्युमतिमृत्युरिति यौगिकाति-
पदेन दुःखातिक्रमस्यैवोक्तत्वादिदं वाक्योक्तं ज्ञानं दुःखातिक्रममेव फलत्वेन

मन्यतेः षड्बुद्धयः षडिन्द्रियाणि षड्विषयाः । सुखं दुःखं शरीरं चेत्येकविंशति-दुःखध्वंसस्य । अशेषविशेषगुणोच्छित्तेः आधिदैविकादित्रिविधदुःखात्यन्तानिवृत्तेः शोकतरणस्य च तेषु तेषु तंत्रेषु प्रस्थानेषु प्रतिपादनात् दुःखात्यंताभावमेव विषयीकरोति । न च नित्यनिरतिशयसुखाभिव्यक्तिर्मोक्षः' अविद्यानिवृत्तौ स्वप्रकाशाखंडानंदस्वरूपस्यात्मनः स्वरूपे णावस्थानं मोक्षः, अखंडानंदरूपे परमात्मनि जीवात्मनां लयो मोक्ष, इत्यपि बहुभिराद्रियते स चानंदानुभवो ज्ञानेनैव भवतीति कथंदुःखाभाव एव फलमिति वाच्यम् । यतः परमानन्दानुभवो भक्त्यैवेत्यग्रे वक्ष्यते । एवं चैकदुःखाभावसाधकमेकं परमानंदानुभवसाधकमुतोभयमुभयसाधकमित्यादिविचारे यथा एतस्यैव साधनद्वयस्य यथाफलनिरूपकत्वं तथोच्यत इत्यर्थः ॥ ॥ निश्चितमिति ॥ ॥ ज्ञाने सति दुःखाभावानुभवस्यानुभवसाक्षिकत्वान्निश्चितम् । तत्रापि विशेषः तदपि तत इत्यादि ॥ द्वारीकरणे आपातोऽनुभवः विषयत्वनिवृत्तिः । इति वाक्यात् । साक्षात्पदघटितादस्माद्वाक्यात् । अत इति ॥ ज्ञानवाक्ये साक्षात्पदाभावेन ततो दुःखात्यंताभावस्य साक्षाद्वक्तुमशक्यत्वात् ॥ तामाहेति ॥ ॥ ज्ञाने यर्हीत्यादिसार्द्धैकादशभिस्तामुपपाद्याहेत्यर्थः ॥ ज्ञानस्वरूपमित्यादि ॥ ॥ अयमर्थः । दुःखध्वंसंप्रति या ज्ञानस्य कारणता सा केन रूपेणेति विचारणीयम् । न तावत् ज्ञानत्वेन रूपेण । शोकज्ञानेनापि शोकनिवृत्त्यापत्तेः । नापि यथाकथंचिच्छास्त्रसिद्धेन रूपेण । नैयायिकादिशास्त्रज्ञानेन दुःखध्वंसे उदाहरणाभावात् । किंतु श्रुतिस्मृतिसिद्धेन श्रुत्यविरुद्धशास्त्रसिद्धेन वा रूपेण वाच्या सद्भिस्तदपि रूपमनाहार्यतयैव फलसाधकम् । आहार्यतायां तु न तथा । किंतु यत्किंचिदेव शोको निवर्त्तत इति । ननु "तरति शोकमात्मविदिति' श्रुतौ शोकनिवृत्तेरेव फलत्वेन श्रावणात्तावतैव सिद्धिरिति चेत्तत्राहुः ॥ अत इत्यादि ॥ ॥ अत इति भावनात् । तथा च संसारानित्यत्वदुःखादेरदृष्टाद्यधीनत्वस्य तत्तदवश्यंभावित्वादेश्च भावनया शोकनिवृत्तेः पुनर्भवनस्य च दर्शनान्नतेन यावच्छोकतरणमतः सर्वदुःखानिवृत्तेराहार्यं तदप्रयोजकमेव किंत्वनाहार्यमेव तावद्यावद्दुःखध्वंसायापेक्षितमित्यर्थः ॥ व्याध्यादीत्यादि ॥ ॥ अतएव"रयिक्वस्य यामाः सोधस्ताच्छकटस्य पामानकंषमाण इति" श्रुतेः। एवमन्यदपि ज्ञेयम् । तदेतदाहेत्यर्थः ॥ सर्वाध्यासनिवर्त्तकमित्यादि ॥ ॥ तर्हि तादृशज्ञानार्थं यतनीयमित्याकांक्षायामुक्तरीत्या तदसिद्धिं निरूपयतीत्यर्थः ॥ शब्दात्कुतो न जायत इत्याकांक्षायां तत्र शब्दस्य केवलस्य सहकारिसंपन्नस्य । चाकरणत्वं व्युत्पादयन्ति ॥ संघातेत्यादि ॥ ॥ दुर्वलाभवतीति ॥ ॥ तथा च

केवलः शब्दो न कारणमित्यर्थः ॥ तर्हि सहकारिसंपन्नः सुविचारितः । कारणमस्त्विति चेत्तदाहुः ॥ अत इत्यादि ॥ तादृशस्येति ॥ शब्दसहकृतस्य वैराग्यादिसंपन्नस्य । अत उभयथापि शब्दस्य न ब्रह्मसाक्षात्कारणत्वं सिद्धान्तमुक्तावल्यां पञ्चदशप्रकरण्यां च विद्यारण्यादिभिर्व्युत्पादितमस्तीति कथमकरणत्वमुच्यत इति चेत्तत्राहुः ॥ ये तु पुनरित्यादि ॥ ॥ कथं भ्रान्ता इत्याकांक्षायां दृष्टान्तवैधर्म्येन तेषां तथात्वं व्युत्पादयन्तस्तदुक्तमभ्युपगम्य दूषयन्ति ॥ नहीत्यादि ॥ ॥ दशमत्वादिवदिति वैधर्म्ये दृष्टान्तः ॥ न ब्रह्मरूपानुभव इति ॥ ब्रह्माकारकवृत्तिरूपोनुभवो यस्य तादृशो न । अयमर्थः ॥ दशमस्त्वमसीति वाक्यदृष्टान्तेन यः शब्दात् ब्रह्मत्वेनात्मसाक्षात्कार आपाद्यते स न संभवति, दशमत्वस्य बाह्यत्वेन शब्दतो घटादीनामिव तद्विषयाज्ञानस्यापि संभवदुक्तिकत्वात् । ब्रह्मत्वस्य त्वांतरत्वेन तद्ग्रहणे मनोतिरिक्तानां निकटवर्तिमिंद्रियाणामप्यसामर्थ्यमिति बहिरिंद्रियग्राह्यस्य शब्दस्य कुतस्तरां सामर्थ्यं स्यादिति तस्य सुदूरनिरस्तत्वात् । अथात्मनिष्ठमांतरमेव दशमत्वं शब्दाद्भासत इत्युपेयते तदाप्यसंगतमेव । दशत्वस्यापेक्षाबुद्धिजन्यत्वात्तस्यां संख्याघटकानां सजातीयानामात्मनां वाच्यस्य विषयीभावस्यैव ग्राहकाभावेन दौर्घट्यात् । परात्मनां परेणाग्रहणात् । अतो नवत्वादिवद्दशमत्वमपि तया जनितं बाह्यमेव सेत्स्यतीति तस्यांतरत्वासिद्धेः कृशोहमिति वद्दशमोहमिति प्रत्यग्वृत्त्यापि देहस्यैव वेद्यत्वाच्च । अत एवमभ्युपगमेपि दृष्टान्तवैषम्यान्नाभीष्टसिद्धिः । तदेतदुक्तमिति सिद्धान्त इति । अथानभ्युपगम्य दूषयन्ति ॥ किं चेत्यादि अस्मच्छब्दज्ञानमिति ॥ ॥ अस्मच्छब्दस्मारितार्थज्ञानम् । ननु तथाज्ञानदर्शनेन प्रत्यक्षबाधितमिदं दूषणमपि किंचित्करमित्याकांक्षायां तथात्वपरिहाराय कार्यस्यान्यथासिद्धत्वमाहुः ॥ तथेत्यादि ॥ ॥ एवमेतेन संदर्भेण केवलस्य शब्दस्याकरणत्वं शांतो दांतः । मंतव्य इत्यादिश्रुतिविरोधः । सहकारित्वादप्यकरणत्वमसामर्थ्यं दृष्टांतवैषम्यं पदस्मारितपदार्थोल्लंघनं चेति षड्दूषणान्युक्तानि मर्यादाभंग इति । अत्र शब्दादपरोक्षे सत्यन्यत्र प्रत्यक्षाच्छाब्दमेवमन्यस्मादप्यन्यत् स्यादित्यर्थः ॥ अथेदं ज्ञानं शब्दसहकृताद्विषयादेव जायते इत्यङ्गीक्रियते तदाप्यसंगतमित्याहुः ॥ ज्ञानं त्वित्यादि ॥ ॥ प्रमेयाधीनत्वे चाक्षुषं शब्दमनुमितिरिति करणनिबन्धनायाज्ञाने व्यवहारमर्यादा सा भज्येतेत्यर्थः ॥ भङ्गमप्यङ्गीकृत्य तथाङ्गीकारे शब्दांतरात्प्रत्यक्षं स्यादनुमितिश्च न स्यादित्याहुः ॥ तमिति ॥ ॥ चीत्कारेति च दूषणांतरमाहुः ॥ प्रत्यक्षत्वमित्यादि ॥ इन्द्रियकार्यतावच्छेदकतयानुमानादिकार्यतावच्छेदकतया च सिद्धे प्रत्यक्षत्वपरोक्षत्वे जाती इदं ज्ञानं प्रत्यक्षत्वेनेदं परोक्षत्वेन जानामीत्यनुव्यवसाया-

दनुभवगोचरे नापह्नोतुं शक्ये । एवं सत्यपि यदा दशमवाक्यात्प्रत्यक्षमङ्गीक्रियते तदा सांकर्यात्तयोर्जातित्वापह्नवप्रसङ्गः । यत्र प्रत्यक्षत्वाभावोऽनुमित्यादौ तत्र परोक्षत्वम् । यत्र परोक्षत्वाभावो घटादिसाक्षात्कारे तत्र प्रत्यक्षत्वम् । उभयसमावेशो दशमस्त्वमिति वाक्यजन्ये शाब्दापरोक्षे इति सांकार्यमतस्तदप्रयोजकमित्यर्थः ॥ एतावता ग्रंथेन तत्वमस्यादिवाक्यस्य शोधितस्यापि युक्तितः । न विद्याजनने शक्तिरिति पूर्वोक्तं विचारितम् । तेन अन्यार्थं तच्च कीर्तितमित्यन्यार्थत्वं यदुक्तं तद्दृढीकृतम् । अतःपरमलौकिकं तत्प्रमेयमित्यादिकं विमृशन्ति ॥ दशमवाक्यमित्यादि ॥ ॥ तथा च मास्तु तयोर्जातित्वम् । धर्मत्वेनैव तयोरनुभवेन जातित्वानवगाहात् । तथा सति भवतु सांकार्यं को दोष इत्याकांक्षायां दृष्टान्तस्यासंगतत्वमाहेत्यर्थः ॥ मूलस्थस्य प्रतिपदस्य व्याख्यानं दशमोहमित्यादि । तथा च सांकर्यं तदाङ्गीकार्यं स्याद्यदा केवलाद्दशमवाक्यादुक्तविधप्रत्यक्षं निश्चीयेत तदेव तु दुर्घटम् । दशसंख्याज्ञानस्य पूर्वं सत्वाद्विस्मृते संख्याघटकशब्देन तत्स्मारणाद्वाक्यस्य स्मारकत्वमेव तत्सहकृतस्य चक्षुष एव करणत्वमतो दशमवाक्यं स्मरणे गृहीतकारणताकत्वादन्यथासिद्धमिति व्यर्थं सांकर्याङ्गीकारप्रयासेन भ्रान्तानां दृष्टांतसमर्थनमित्यर्थः ॥ प्रकृत इत्यादि ॥ ननु मास्तु शब्दात्प्रत्यक्षं तथापि दशमवाक्यसहकृतचक्षुषेव तत्त्वमस्यादिवाक्यसहकृतमनसैवा विविक्तात्मदर्शनमस्तु को दोष इत्याकांक्षायां प्रतिबन्धकाभावस्याभावान्नैवमपीत्याहेत्यर्थः ॥ अथ नव्यनैयायिकवत्प्रतिबन्धकाभावस्य करणत्वं नोपेयते तदापि तदभावविशिष्टत्वं कारणे वाच्यमेवेत्यध्यासाभावविशिष्टमनसो विविक्तात्मदर्शनं प्रति कारणत्वं नत्वविशिष्टस्यापीति नेदानींतनमनसोपि कारणत्वमित्याहुः ॥ अतएवेत्यादि ॥ ॥ महतेति शांतोदांत इत्यादिश्रुतिबोधितेन ॥ मुख्येत्यादि ॥ ॥ ननु भवत्वेवं तथापि ससाधनमनसा जातं मुख्यज्ञानं त्वध्यासं निवारयिष्यति तदा यावद्दुःखनिवृत्तिर्भविष्यतीति शंकायां तदानीमपि सात्विकमेव ज्ञानमिति तन्निवृत्तिर्नास्तीत्याहेत्यर्थः ॥ साध्य इति ॥ ॥ मनोव्यापारो विद्यारूप एतेन ज्ञानेऽपि सात्विकी मुक्तिरित्युक्ताया मुक्तेः स्वरूपमुक्तम् ॥ यैव माया निवर्तिकेति ॥ मायायाः निवर्तिका या सामग्री सेत्यर्थः ॥ तथा च भगवत्प्रपत्तिरेवाध्यासनिवर्त्तिका नेतरदिति भावः । प्रपत्त्यभावे ज्ञानस्याप्रयोजकत्वं यदुक्तं तदुपोद्बलयंति ॥ ॥ ज्ञानिनामित्यादि ॥ ॥ तथा च साक्षात्कारस्यापि चेन्नाध्यासनिवर्त्तकत्वं तदा कुतस्तरां शाब्दस्येति भावः । अथ तुष्यतु दुर्जनन्यायेन प्रपत्त्यभावेपि चेज्ज्ञानस्य तथात्वमंगीक्रियते तदापि तद्वैयर्थ्यरूपं दूषणमाहुः ॥ ॥ किंचेत्यादि । अत इति ॥ ॥ तत्वेन ज्ञाने

तज्ज्ञानस्य प्रयोजकत्वात् ॥ कार्यसिद्धाविति ॥ ब्रह्मणः सर्वात्मकत्वादेकत्वाच्च तज्ज्ञानेनैवात्मनोपि ज्ञानसिद्धौ तथा च धनार्थं धावमानस्य संचितनाशपात इति भावः । ननु सहितत्वतो ज्ञातः स्वात्मसाक्षात्कारस्योपकरोतीतिश्रुतेर्ब्रह्मज्ञानस्य सहकारित्वमेवेति नात्मसाक्षात्कारस्य वैयर्थ्यमिति चेत्तत्राहुः ॥ अपरोक्षेत्यादि ॥ ॥ तथा चैवं ब्रह्मज्ञानस्य सहकारित्वे ब्रह्मैकदेशे शारीर एव साक्षात्त्वमिति तेनापरोक्षेण शोकनिवृत्तिरेव भवित्री नतु " ब्रह्मविदाप्नोति परमिति " श्रुत्युक्तापरप्राप्तिरपीति ब्रह्मज्ञानवैफल्याच्चुंदिलसुरतापत्तिरित्यर्थः । एतेन तस्यां मुक्तावनादरः समर्थितः । ननु ब्रह्मज्ञानस्येदमेव फलमस्त्वसो नवैफल्यमिति चेत्तत्राहुः ॥ ॥ सर्वज्ञत्वेत्यादि ॥ फले आपातत्वमवान्तरत्वमेव तथा च यस्मिन्विदिते सर्वमिदं विदितं भवतीत्यादिषु फलांतरस्यापि श्रावणान्नेदमेव फलमिति मुख्यफलाभावाद्वैफल्यं दुर्वारमित्यर्थः ॥ नच तदपि जायत इति शक्यवचनम् । तथासति सर्वभावज्ञानस्यापत्तेः । तस्याप्यंगीकारे तु प्रत्यक्षविरोधः । तथा च यत्रेदानींतनानामवान्तरफलमपि न, तदा कुत्र मुख्यफलाशेति भावः । पुनः किंचिदनूद्य परिहरंति ॥ ॥ तत्रापीत्यादि ॥ इदानींतनेष्वपि ज्ञानलक्षणीभूतं सर्वज्ञत्वं योजयितुं सर्वज्ञत्वेऽपि तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वशब्दवाच्यः प्रपंच एव नात्मेत्यर्थः ॥ तत्र हेतुः ॥ ॥ यत इत्यादि । अनुवदतीति ॥ अवयुत्यानुवदति । तथा चाहमभवमित्यात्मविध्यंशं पृथक्कृत्य सर्वशब्दार्थभूतमन्वाद्यनुवादादात्मज्ञानं न सर्वज्ञानं किंतु प्रापंचिकसर्वज्ञानमेव सर्वज्ञानमित्यर्थः ॥ ज्ञानदुर्बलेत्यर्द्धं व्याकुर्वंति ॥ ॥ अतस्तथेत्यादि ॥ तथा च सर्वज्ञत्वं ज्ञानवतो लक्षणमिति तदभावेऽपि ये आत्मानं ख्यापयंति ते पाखंडा एवेत्यर्थः ॥ ॥ ज्ञानस्येत्यादि ॥ ननु भवत्विदं लक्षणं तथापीदानींतनेषु कुतो नेदमित्याकांक्षायां 'विद्यां प्राप्नोत्युरुक्लेश' इति पूर्वोक्तं समर्थयन् विद्यायाः दुर्बलत्वमाहेत्यर्थः ॥ ॥ सत्य इत्यादि ॥ तथा च ज्ञानेन या दुःखनिवृत्तिः सा मनसि ब्रह्माहस्मीति साक्षाद्वृत्त्युत्पत्तौ सा च शमदमादिसहितमनननिदिध्यासनयुक्ताभ्यासबलिष्ठश्रुत्या भवति सत्ययुगे शांतदांतप्रजासंभवात्तत्रातिमहतां मुख्याधिकारिणां संभवात्क्वाचित्केवलश्रुत्या भवति नान्यथेति सर्वदुःखहरं ज्ञानमिदानीं दुर्लभमित्यर्थः ॥ ३११–३१९ ॥ भक्त्युत्कर्षार्थमाहेति ॥ ननु भवत्वेवं ज्ञानस्य दुर्लभत्वं तथापि जाते तादृशे विद्याचरमवृत्तिरूपे ज्ञाने दुःखं सर्वथा निवर्त्येत इति तदानीमप्यापाततो निवृत्त्यंगीकारो न युज्यत इत्याशंकायां तत्प्राप्तावपि नो मुक्तिरित्यादि पूर्वोक्तं समर्थयन् भक्तिं विना वृत्तेश्वरमत्वमेव दुर्घटमिति तदर्थमपि भक्तिरपेक्षितेत्युत्कर्षबोधनार्थं विद्याया अप्रयोजक-

॥ स्वप्नेत्यादि ॥ तथा च गौडवार्त्तिके " अनादिमायया सुप्तो
ध्यत " इति कथनाद्विद्याविद्ये स्वप्नप्रबोधवत्तव मते सिद्धे तथा च
विष्यत इति वृत्तिचारम्यमेव दुर्लभमतो भक्तिं विनाऽऽपाततो निवृ-
॥ एतेन जीवन्मुक्तिरथापि वेत्यनादरः समर्थितः ॥ ३२० ॥

ब्रजभाषाटीका।

फलको निरूपण करकें साधन को निरूपण करवेकेलिये
प्राप्तिमें कहा साधन ऐसी आकांक्षा भई तहाँ लोकप्र-
ानही भगवत्प्राप्तिको साधन प्राप्तभयो वेदके अनुसार
वेसों तो (तमेव विदित्वातिमृत्युमेति)या श्रुतिसों दुःख
ो ज्ञानको फल मानोंजायहै परमानन्दको अनुभव तो
 ही होयहै यह आगे कहेंगे इन दोनों साधननको तरत-
के जैसें ये फलके देववारे हैं वैसें निरूपण करें है, ज्ञानदुः-
रें है यह तो निश्चय है परन्तु ज्ञानभी आपातसों ही
करे है, मूलसों दुःख दूरतो भक्तिसों ही होयहै तामें (अ-
ं साक्षाद्भक्तियोगमधोक्षजे) इत्यादिभागवतादिवचन
तासों परंपराकरकें ज्ञान दुःख दूरकरे है ऐसे कहनोयोग्यहै
प्रनाडीकरकें ज्ञान दुःखकूँ दूरकरै है वा प्रनाडीकूँ कहें है
्यन्त दरिद्रीभी अपनें मनमें चक्रवर्ती राजा पणेंकी
करें हैं तब वा समय वाकी दरिद्रीपणेकी चिंता
ते है,याही प्रकार बेद पुराणादिकनकें शब्दनसों सुनेभये
अनित्यहैं, दुःख अदृष्ट तथा प्रारब्धकर्मके आधीनहै,
वश्य भावी होय वह होवेहीहै, इत्यादि ज्ञानकी जब भावना
करें हैं तब भी वाको शोक निवृत्त होयजावे है। तासों
शास्त्रोक्त ज्ञानहै तैसें भी (अनाहार्य) ज्ञानकरकें लोकमें
भये अन्तःकरणके क्लेश निवृत्त होयजावें हैं। परन्तु रोगा-
नके क्लेशनसों निवृत्त नाहिं होयहै तथा नरकको दुःखभी नाहिं

छूटे है। सहज आसुर जीवनको तमोदुःखभी नहिं दूरहोवैं है सोही कहे हैं शास्त्रके लिखे ज्ञानकी भावनाकरवेवालेकूँ भी त्रिविध दुःख तो होवेही हैं ॥ ३११ ॥ त्रिविध दुःखकी निवृत्तिको उपाय कहे हैं (सर्वाध्यासेति) जब ब्रह्मज्ञानकरके सब अध्यासकी निवृत्ति होय जायहैं अर्थात् देह इन्द्रिय अन्तःकरण प्राणहै सो मैंही हूं ऐसो अध्यास जब छूटजावे है तब भौतिक देहकूँ भये रोगादिककरकेभी आत्माकूँ व्यथा नहिं होयहै तथा यातना देहकूँ भयें जे नरकादिक उनकरके भी पीडा आत्माकूँ नहिं होयहै परन्तु अभीके शास्त्रनके अनुसार अभीके जीवनकूँ सब अध्यासके निवृत्तकरवेवालो ज्ञान नहिं होयहै या बातको निरूपण करैं है (साचेति) देह इन्द्रिय अन्तःकरण प्राण इनके अध्यास तथा स्वरूपविस्मृति ये अविद्याके पाँच पर्व हैं या पञ्चपर्वारूपा अविद्याकी (विद्या) ज्ञानको उदय होय तब निवृत्ति होयहै ज्ञानहै सो शब्दसों नहिं होयहै लोकमें सब मनुष्यनकूँ देहादिसंघातमें स्थित आत्माको सदा अनुभव होयहै वेदहै सो देहादिकनसो आत्मा न्यारोहै या बातकूँ जतावें हैं तथा जाको अनुभव नहिं कियो ऐसे ब्रह्मात्मभावकूँ अर्थात् ब्रह्मही सबनको आत्माहै या बातकों जतावै हैं परन्तु सदा अनुभवमें आयेभये लौकिकज्ञान करकै बाधितकरीभई श्रुति दुर्बल हो जावै है तासों वैराग्यादिसाधनसहित मनन निदिध्यासनसहित अभ्यासकरकैं बलवाली भई श्रुति (ब्रह्माहमस्मि) ब्रह्म मैं हूँ ऐसी वृत्तिकों उत्पन्न करै है तब अनुभव परंपराकरके संघातसहित आत्मज्ञानको बाध होयहै। वा ब्रह्मात्मज्ञानमें वेदादिक शब्द सहकारी हैं तथा वैराग्य मनन निदिध्यासन सहित मन इन्द्रिय करण हैं कितनेक विद्यारण्यस्वामी आदि आत्माके साक्षात्कारकरवेमें शब्दकूँ शब्दकरण बतावै हैं

त्वमाहेत्यर्थः ॥ ॥ स्वप्नेत्यादि ॥ तथा च गौडवार्त्तिके " अनादिमायया सुप्तो यदा जीवः प्रबुध्यत " इति कथनाद्विद्याविद्ये स्वप्नप्रबोधवत्तव मते सिद्धे तथा च तान्निवैतेऽपि भविष्यत इति वृत्तिचारम्यमेव दुर्लभमतो भक्तिं विनाऽऽपाततो निवृत्तिर्युक्तैवेत्यर्थः ॥ एतेन जीवन्मुक्तिरथापि वेत्यनादरः समर्थितः ॥ ३२० ॥

ब्रजभाषाटीका।

याप्रकार फलको निरूपणकरकें साधनको निरूपण करवेके लिये भगवान्की प्राप्तिमें कहा साधन ऐसी आकांक्षा भई तहाँ लोकप्रसिद्धिसों ज्ञानही भगवत्प्राप्तिको साधन प्राप्तभयो वेदके अनुसार विचारकरवेसों तो (तमेव विदित्वातिमृत्युमेति)या श्रुतिसों दुःख दूर होनोंही ज्ञानको फल मानोंजायहै परमानन्दको अनुभव तो भक्तिकरके ही होयहै यह आगे कहैंगे इन दोनों साधननको तरतमभावकरके जैसें ये फलके देवेवारे हैं वैसें निरूपण करें है, ज्ञानदुःखकूँ दूरकरें है यह तो निश्चय है परन्तु ज्ञानभी आपातसों ही दुःख दूर करे है, मूलसों दुःख दूरतो भक्तिसों ही होयहै तामें (अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे) इत्यादिभागवतादिवचन प्रमाणहैं तासों परंपराकरकें ज्ञान दुःख दूरकरे है ऐसै कहनो योग्यहै अब जा प्रनाडीकरकें ज्ञान दुःखकूँ दूरकरै है वा प्रनाडीकूँ कहें है जैसें अत्यन्त दरिद्रीभी अपनें मनमें चक्रवर्ती राजा पणेंकी भावना करें हैं तब वा समय वाकी दरिद्रीपणेकी चिंता मिटजावे है,याही प्रकार बेद पुराणादिकनकें शब्दनसों सुनेभये संसार अनित्यहैं, दुःख अदृष्ट तथा प्रारब्धकर्मके आधीनहै, जो अवश्य भावी होय वह होवेहीहै, इत्यादि ज्ञानकी जब भावना मनुष्यकरें हैं तब भी वाको शोक निवृत्त होयजावे है । तासों जैसो शास्त्रोक्त ज्ञानहै तैसें भी (अनाहार्य) ज्ञानकरकें लोकमें उत्पन्नभये अन्तःकरणके क्लेश निवृत्त होयजावें हैं। परन्तु रोगादिकनके क्लेशनसों निवृत्त नहिं होयहै तथा नरकको दुःखभी नहिं

टे है। सहज आसुर जीवनको तमोदुःखभी नहिं दूरहोवैं है
ाही कहैं हैं शास्त्रके लिखे ज्ञानकी भावनाकरवेवालेकूँ भी त्रिविध
:ख तो होवेही हैं ॥ ३११ ॥ त्रिविध दुःखकी निवृत्तिको उपाय
हे हैं (सर्वाध्यासेति) जब ब्रह्मज्ञानकरके सब अध्यासकी
नेवृत्ति होय जायहैं अर्थात् देह इन्द्रिय अन्तःकरण प्राणहै सो
ही हूं ऐसो अध्यास जब छूटजावे है तब भौतिक देहकूँ भये
ोगादिककरकेभी आत्माकूँ व्यथा नहिं होयहै तथा यातना देहकूँ
भयें जे नरकादिक उनकरके भी पीडा आत्माकूँ नहिं होयहै परन्तु
अभीके शास्त्रनके अनुसार अभीके जीवनकूँ सब अध्यासके नि-
वृत्तकरवेवालो ज्ञान नहिं होयहै या बातको निरूपण करैं है
(साचेति) देह इन्द्रिय अन्तःकरण प्राण इनके अध्यास तथा
स्वरूपविस्मृति ये अविद्याके पाँच पर्व हैं या पञ्चपर्वारूपा अवि-
द्याकी (विद्या) ज्ञानको उदय होय तब निवृत्ति होयहै ज्ञानहै सो
शब्दसों नहिं होयहै लोकमें सब मनुष्यनकूँ देहादिसंघातमें
स्थित आत्माको सदा अनुभव होयहै वेदहै सो देहादिकनसो
आत्मा न्यारोहै या बातकूँ जतावें हैं तथा जाको अनुभव नहिं
कियो ऐसे ब्रह्मात्मभावकूँ अर्थात् ब्रह्महीं सबनको आत्माहै या
बातकों जतावैं हैं परन्तु सदा अनुभवमें आयेभये लौकिकज्ञान
करकै बाधितकरीभई श्रुति दुर्बल हो जावै है तासों वैराग्यादिसा-
धनसहित मनन निदिध्यासनसहित अभ्यासकरकैं बलवाली
भई श्रुति (ब्रह्माहमस्मि) ब्रह्म मैं हूँ ऐसी वृत्तिकों उत्पन्न करै है
तब अनुभव परंपराकरके संघातसहित आत्मज्ञानको बाध होयहै।
वा ब्रह्मात्मज्ञानमें वेदादिक शब्द सहकारी हैं तथा वैराग्य मनन
निदिध्यासन सहित मन इन्द्रिय करण हैं कितनेक विद्यारण्यस्वा-
मी आदि आत्माके साक्षात्कारकरवेमें शब्दकूँ शब्दकरण बतावैं हैं

(व्यापारवाले असाधारण कारणकूँ करण कहे हैं) जैसें नेत्र रूपादिपदार्थ देखवेमें करणहै पदार्थको तथा नेत्रको संयोगरूप व्यापार सहकारीहै ऐसें आत्माके ज्ञानहोयवेमें शब्दकूँ करण कहे हैं उनकूँ भ्रमवाले समुझनें क्यूंकि आत्माके स्वरूपज्ञानमें मनकूँ छोडके और इन्द्रिय करण नहिं होयसकेहैं बाहिरकी नेत्र कर्ण आदि इन्द्रियनकी बाहिरके रूप शब्द आदि ग्रहणकरवेमें ही सामर्थ्य है । आत्माको ब्रह्मत्वलक्षण जो धर्म है सो बाहिरको नहिं है । जैसें दशमत्वादिक बाहिरके धर्म हैं तहाँ यह शंका होवे है कोई पुरुषने और नौ पुरुषनको गिणके कोई पुरुषसों कही तू दशम है तब वह शब्द सुनकें मैं दशम हूं ऐसो वाकूँ ज्ञानभयो या वाक्यमें जैसें शब्दसों मैं दशमहूं ऐसो ज्ञान होयहै ऐसें (तत्त्वमसि) तूँ ब्रह्महै या शब्दसोंभी मैं ब्रह्महूं यह ज्ञान होयजायगो ? उत्तर दशमत्व देहधर्म है अपेक्षा बुद्धिसों देहमें उत्पन्नहोयहै देहमें अध्यास राखवेवारो पुरुष अपने आत्माकूँ देहरूप मानके जैसें मैं दुबलोहूं मैं मोटोहूं ऐसें कहे हैं तैसें तू दशम है या शब्दसों देहरूप आत्माकोही मैं दशमहूं ऐसें जानतोभयो भी ब्रह्माकारवृत्तिके अनुभवकरवेवालो नहिंहोय है यहाँ यह सिद्धान्तहै क्यों कि ब्रह्मत्व भीतरको धर्म है तासों ब्रह्मरूप आत्माको साक्षात् अनुभव मनविना पास रहवेवारे और इन्द्रियनसोंभी नहिं होयहै तब बाहिरकी इन्द्रियनसों ग्रहण कियोजाय ऐसो शब्दसों ब्रह्मात्मानुभव होनों कैसें घटसकेहै (किञ्च दशमोहम्) यह जो चाक्षुष ज्ञानहै युष्मत्शब्दके प्रयोगसों भयोहै यह बातभी नहिं बनसकेहै क्योंकि शब्दहै सो पदस्मारित पदार्थको उलंघन करकें वाक्यार्थकूँ नहिं उत्पन्न करसकें हैं तासों युष्मत् शब्दकरकें अस्मत् शब्दकरकें स्मारित अर्थको ज्ञान नहिं होय सकेहै (दशमोऽहम्) इत्यादि वाक्यनमें

जो युष्मत् शब्दकरके मैं दशमहूं इत्यादि अस्मत्शब्दार्थज्ञानहै सो नेत्रकरकें अथवा मनकरकें होयहै यहही अङ्गीकार करनोंचाहिये तासों अच्छीप्रकार विचारोभयो शब्दभी अपरोक्षज्ञानकूं नहिंकरें हैं ॥३१२॥शब्दसों साक्षात् ज्ञान होयहै ऐसें मानवेमें फिर दूषण आज्ञा करेहै(मर्यदाभङ्ग इति)प्रमाणके आधीन प्रमेयकी सिद्धीहै लोकमें ऐसी मर्यादाहै।शब्दसों शाब्दज्ञान होयहै,चक्षु आदिकनसों प्रत्यक्ष ज्ञान होयहै। जो शब्दसों भी प्रत्यक्षज्ञान मानोगे तो वो मर्यादाभङ्ग होयगो यदि आग्रहकरकें शब्दसोंभी प्रत्यक्षज्ञान मानोंहो तो वा घटकूं लाव इन शब्दनसों या वाक्यार्थको प्रत्यक्षज्ञान होनोंचाहिये तथा हाथीके विनादेखे चीत्कारसुनवेसों हाथीको अनुमानभी नहिं होयगो किञ्च प्रत्यक्षत्व तथा परोक्षत्व ये दोनों जाती हैं इनको ज्ञान मानोंगे तो (दशमस्त्वमासि) या वाक्यमें प्रत्यक्षत्व परोक्षत्व इनदोनों जातीकी संकरता होयगी ॥ ३१३ ॥ तासों शब्दसों आत्माको साक्षातज्ञान होयहै। यह बात सिद्धकरवेकेलिये(दशमस्त्वमसि यह भ्रान्तनके मतनकरकें दृष्टान्तहै क्यूँकि दशम तूहै या शब्दसों जो श्रोताकूँ दशम मैंहूँ यह ज्ञान होयहै सो शब्दके साहचर्यकरकें नेत्रनसों देहसों अभिन्न आत्माको ज्ञान होयहै प्रकृतमें तो वेदके शब्दसों देहादिकनसों भिन्न आत्माको ज्ञान होयहै ये मानोंहो सो नहिं बनसकेहै क्योंकि प्रतिबन्धककी निवृत्ति होयवेसों ही कार्यको उदय होयहै आत्माकूं देहाभिन्न ब्रह्मरूप जानवेमें देह प्राणादिरूप मैंहूँ यह अध्यास प्रतिबन्धक है तासों (तत्वमसि) तू ब्रह्महै इत्यादि वेदशब्दसों मैं ब्रह्महूँ ऐसे ज्ञानको उदय नहिं होयहै केवल दम्भकरकेंही (अहं ब्रह्मास्मि) मैं ब्रह्महूँ ऐसें मानके सब साधन छोडदेवेहै॥ ३१४ ॥ ३१५ ॥ ब्रह्मज्ञान तो बडे साधनकरके होवें है वैराग्य मनन निदिध्यासन नहिं कियेजाँय

तो शाब्दसहचारी मनकरकेंभी ब्रह्मात्मज्ञान नहिं होयसकेहै जो (तत्वमसि) तू ब्रह्महै । इत्यादि गुरुमुखसों शब्दसुनवेसों ही ब्रह्मज्ञान होजातोहोय तो वेदपुराणादिकनके लिखे साधन व्यर्थही होंयगे । वस्तुतस्तु पक्षपात छोडकें बिचार कियोजाय तो बैराग्यादिसाधनसंयुक्त तथा श्रुतिसहकृत मनकरकें प्रकटभयो मुख्य ज्ञानभी अध्यासकी सर्वथा निवृत्ति नहिं करेहै जैसे जागनों (जाग्रदवस्था) निद्राकी सर्वथा निवृत्ति नहिं करेहै किन्तु निद्राकूं दबाय देहै क्योंकि जाग्रत् तथा निद्रा दोनों बुद्धिकी वृत्तिहैं सत्वगुणकी वृद्धिहोय तब पुरुष जागजावे है तमोगुणकी वृत्ति होय तब निद्रा आजावेहै, जाग्रत् वृत्ति दबजावेहै, ऐसेंही सत्वके उदयहोयवेसों विद्यासों अविद्या दबजावेहैं तमोगुण उदय होय तब अविद्यासूं बिद्या दबजावेहै सर्वथा निबृत्त नहिं होवेहै क्यूंकि ये दोनों मायाकी शक्तिहै तथा जीवप्रयत्नसाध्य ज्ञानरूप मनको व्यापार कभी बी अविद्या नहिं होय याप्रकार अविद्याकूं निवृत्तनहिं करसकेहै क्यूंकि जीवमायाके आधीनहै जैसें माया और नानाप्रकारकी अध्रुव अवस्थाकरेहै तैसें अध्रुवज्ञानावस्थाकूं भी करेहैं तासों ज्यों सामग्री मायाकों निवृत्तकरेहैं वहही अविद्याकूं सर्वथा निबृत्तकरे है (ज्ञानिनामपि चेतांसि देवी भगवती हि सा ॥ बलादाकृष्य मोहाय महामाया प्रयच्छति) यावाक्यमें ज्ञानीनकेभी चित्तको माया मोह करादेहैं यह लिखीहै तासों जाँहाँताँई माया निवृत्त नहिं होय तहाँतक अविद्याकी भी निवृत्ति नहिं होय वह माया भगवानके अधीन है तासों भगवानके शरणगयेसूं ही माया निवृत्त होय किंच ब्रह्मके स्वरूपको ज्ञान भये पीछेही आत्माकों ब्रह्मत्वकरकें जाणसकेहैं जैसे चाँदीके जानवेवारेकोंही छीपमें चाँदीको धोका होवे है । तासों आत्माको ब्रह्म-

स्वरूपकरके जानवेमें पहली ब्रह्मज्ञानकी अपेक्षाहै ब्रह्म है सो सर्वात्मकहै अरु एकहै सब जीव वाके स्वरूपमें हैं वाके ज्ञानकरके सर्वकार्य सिद्ध होजावे है फिर आत्मज्ञान व्यर्थ है जो आत्माको ज्ञानहोयवेकेलिये ब्रह्मज्ञानको सहाकरी मानो तो ब्रह्मके एकदेश शरीर जीवकोही साक्षात्कार होय वासों अनर्थकी ही निवृत्ति होय (तरति शोकमात्मवित्) इत्यादि श्रुतिके अनुसार शोकमात्र दूरहोय (ब्रह्मविदाप्नोति परम्) याश्रुतिको लिख्योभयो परब्रह्मपुरुषोत्तमकी प्राप्तिरूप मुख्य फल नहिं होय तासों पहिली भयो ब्रह्मज्ञान निष्फलही होय, सर्वज्ञ होजानो वा ब्रह्मज्ञानको आवन्तर फल है अतः सर्वज्ञता ब्रह्मज्ञानको लक्षण है यामें (यस्मिन्विदिते सर्वमिदं विदितम्भवति) इत्यादि श्रुतिप्रमाण है अभी जीवनकूँ तो भक्त्यादिसाधनरहित केवल अभीके तत्वमस्यादि उपदेशकरके सर्वज्ञतारूप अवान्तर फलभी नहिं सिद्ध होय तब परब्रह्म पुरुषोत्तम प्राप्तिरूप मुख्य फलकी कहा आशा यह भाव है ॥ २१६ ॥ २१७ ॥ कितने मन्दबुद्धिवाले आत्मज्ञानकूँही सर्वज्ञानकहेहैं वाको निराकरण करे हैं (सर्वान्न ब्रह्मेति) सब पदार्थ ब्रह्मरूप नहिं होय हैं किन्तु । ब्रह्म सब पदार्थरूप होवे हैं याहीसों (सर्वमभवत्) यह सर्वरूप हो तो भयो या श्रुतिमें सर्वशब्दकरकें जगतको ग्रहण होय है केवल शरीर आत्मा को ग्रहण नहिं होयहै । तथा अगर्भस्थित वामदेवभी (अहं मनुरभवम्) इत्यादि श्रुतिमें मनु सूर्य आदि जगत्के पदार्थनके ज्ञानसोंही सर्वज्ञान कहावैहै तासों आत्मज्ञानको नाम सर्वज्ञान नहिं है । किंतु (प्रपञ्च) जगत्के सब पदार्थनके ज्ञानको नाम सर्वज्ञान है, तासों जीवात्माके ज्ञानमात्रसों सर्वज्ञान कहवेवाले ज्ञानदुर्बलबादी समुझने. अभीके मनुष्यनकूँ ब्रह्मज्ञान नहिं होय

यह संदेह निराकरण करवेके लिये ज्ञानकी दुर्लभता बतावे हैं (सत्ययुगेति) सत्ययुगमें भी श्रेष्ठपुरुषनकूँ ब्रह्मज्ञान होवे है वैसो ज्ञानभये सो भी बिलकुल अज्ञानको लय नहिं होय है अर्थात् कोई कालमें फिर अज्ञान होजायहै जैसें स्वप्न जागरण परस्पर वैरी हैं एककूँ एक दबायदे हैं परंतु सर्वथा लय नहिं करैं है तासों फिर हेतु पायकें कालान्तरमें प्रगट होयजावें हैं ऐसेंही ज्ञान अज्ञान ये दोनों मायाके बनाये हैं परस्पर बैरीही हैं एककूँ एक दबादेवेहैं परन्तु बिलकुल लय नहिं करसकेहैं ॥३१८–३२०॥

इदमेव विनिश्चित्य कृष्णो ह्यर्जुनमब्रवीत् । मामेव ये प्रपद्यन्ते मायामेतान्तरन्ति ते ॥ ३२१ ॥ एवकारेण सर्वेषामनुपायत्वमाह हि । ज्ञानादीनां हि सर्वेषां तदधीनत्वतः सदा ॥३२२॥ विश्वासं सर्वतस्त्यक्त्वा कृष्णमेव भजेद्बुधः । न दृष्टः श्रुतपूर्वो वा भजन्कृष्णमनामयम् ॥३२३॥ नमुक्तः सर्वथा यस्मात् गोपागावस्तथाभवन् । आपाततस्तु सर्वेषामुपायत्वं मयोदितम् ॥३२४॥ विष्णुः कृपाविशिष्टानां तत्फलं नान्यथा भवेत् । यन्नयोगेन सांख्येन दानव्रततपोध्वरैः ॥ ३२५ ॥ व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद्यत्नवानपि । तस्मात्त्वमुद्धवोत्सृज्य नोदनां प्रतिनोदनाम् ॥३२६॥ प्रवृत्तिश्च निवृत्तिश्च श्रोतव्यं श्रुतमेव च । मामेकमेव शरणमात्मानं सर्वदेहिनाम् ॥ ३२७ ॥

या हि सर्वात्मभावेन यास्यते ह्यकुतोभयम् ।
इत्येकादशसर्वस्वं भगवान्स्वयमुक्तवान् ३२८
आत्मानं हि स्वयं वेद तस्मादन्यवचो मृषा ।
कर्मयोगादयः सर्वे कृष्णोद्गमनहेतवः ॥३२९॥
उदासीनतयोद्भेदान्नहि सर्वात्मना फलम् । भ-
क्तावत्यादरेणैव प्रकटो जायते हरिः॥३३०॥आ-
त्मानंच ततो दद्यात्सुखे का परिदेवना । सहनं
खननं गङ्गातीरस्थितिवदेव तत्।३३१।सांख्यो
योगस्तथा भक्तिस्तत्रप्रेमातिसौख्यदम् । पि-
ताचरेद्यथा बाले सुखं भक्ते तथा हरिः॥ ३३२ ॥
प्रेम्णैव सेवितोऽत्यर्थं गोपीनां कामदो यतः ।
अच्छिद्रसेवनाच्चैव निष्कामत्वात्स्वयोग्यतः
॥ ३३३ ॥ द्रष्टुं शक्यो हरिः सर्वैर्नान्यथा तु
कथंचन । दयया सर्वभूतेषु संतुष्ट्या येन केन
चित् ॥ ३३४ ॥ सर्वेन्द्रियोपशांत्या च तुष्य-
त्याशु जनार्दनः ।

तत्त्वदीपप्रकाशः ।

प्रमाणमाह ॥ इदमेवेति ॥ " ज्ञानी त्वात्मैव मे मत"इति ज्ञान-
प्रशंसावाक्यं भक्तेरुत्कर्षार्थमेव । तपस्विभ्योऽधिको योगीत्यत्र तथानि-
रूपणात् । 'नतथा मे प्रियतम'इत्यत्र स्पष्टमेवात्मनोऽपि माहात्म्यं भ-
क्तस्य, अन्यथा गुह्यत्वेन ज्ञानानंतरं भक्तिन्न वदेत्तदाह ॥ एवकारेण
सर्वेषामिति ॥ फलितमाह ॥ ज्ञानादीनामिति ॥ ननु भक्तस्याप्यन्ते
ज्ञानं पश्चान्मोक्ष इति कुतो नकल्प्यते । नह्यात्मनोऽन्य आत्मीयः प्रि-

यो भवितुमर्हतीत्याशंक्याह ॥ **न दृष्ट इति** ॥ श्रुतपूर्वोपि नास्ति । दृष्टोऽपि नास्ति अनामयन्तमसः परम् । भूयश्चान्ते विश्वमायानिवृत्तिरिति तादृशी मुक्तिः सर्वथापदेनोच्यते । तत्र दृष्टांतमाह ॥ **गोप्योगावस्तथाभवन्निति**॥'मत्स्वरूपाविदोबला ब्रह्म मां परमं प्रापुरिति' वचनात् । नन्वेवं सति तमेव विदित्वेति तं विदित्वैवेत्यर्थस्य विवक्षितत्वाज्जीवपक्षनिराकरणस्यानङ्गीकाराच्च कथमेवमुच्यत इत्याशंक्याह ॥ **आपातत इति** ॥ येऽस्माभिर्ज्ञानादय उपायत्वेनोक्तास्ते लोकानां प्ररोचनार्थं निरूपिताः । तथापि न बाधितार्थत्वम् । भगवत्कृपायुक्तत्वेन तेषामपि फलसाधकत्वात् । वचनं तु प्ररोचनार्थम् । वस्तुतस्तु कृपैव साधनम् । तमेव विदित्वेत्येवकारो नान्यथा व्याख्येयः । अतो नात्मज्ञानं मुख्यफलसाधनम् । " आत्मलाभान्नपरं विद्यते । तरति शोकमात्मवित् । अथ योऽन्यां देवतामुपास्त" इत्यादिवाक्येषु आत्मशब्दो भगवद्वाचको न जीववाचकः । अभेदोपासना च स्तूयते । नहि निंद्यं निंदितुं प्रवर्त्तत इतिन्यायात् । नासोमयाजी सन्नयेत् इतिवत् । "एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखमिति" भगवद्वाक्यात् । अतो मूलज्ञानं साधनं भवदपि तावता न भवतीति प्रादुर्भावप्रकरणात् प्रेमैव साधनमिति निश्चीयते । अन्येषामसाधनत्वे प्रमाणमाह ॥ **यन्नयोगेनेति** वाक्यत्रयम् । सांख्यं ज्ञानशास्त्रम् । ननु विहितनिषिद्धत्वाद्विकल्पो भवतु नत्वसाधकतेत्याशंक्याह ॥ **इत्येकादशसर्वस्वमिति** ॥ भगवानेव फलमिति स चेत् स्वोपायन्तन्नभवतीति निषेधति तदान्यवाक्यं मुधा । तुल्यबलत्वे हि विकल्पः । भगवतश्च फलत्वं भगवद्वाक्यादेवावसीयते । मत्तःपरतरं नान्यदित्यादिभिः । तस्माज्ज्ञानादीनां न साधकत्वम् । ननु वेदा अपि भगवद्वाक्यमेवेति श्रुतिस्मृतिविरोधे श्रुतिर्बलिष्ठेति कथं ज्ञानस्य न साधकत्वं तत्राह ॥ **कर्मयोगादय इति** ॥ भगवान् स्ववाक्यसत्यत्वाय कर्मयोगादिष्वपि प्रकटो भवति

परं निर्बन्धेन । यथा महान् लौकिकः । अत उदासीनतयोक्तेदात् । सर्वथा मुख्यं फलं न प्रयच्छति । भक्तौ विशेषमाह ॥ भक्ताविति ॥ सुखे स्वरूपानंदे । दृष्टांतेन तारतम्यं बोधयति ॥ सहनमिति ॥ ज्ञानमार्गे दुःखे समागते तन्निवृत्तिः सहनप्राया यथा तृषायां सहनं उपायः। योगस्तु खननप्रायः, भक्तिस्तु गंगातीरस्थितिरूपा । दुःखनिवर्त्तकस्य प्रकटत्वात् । तत्रापि प्रेमसंभवे गङ्गा स्वयमुद्यम्य पाययति । तथा भगवान् ॥ ननु हीनभावं फलात्मा महान् कथं गच्छेत्तत्राह ॥ पिता चरेदिति ॥ स्नेहमार्गे हीनभावो न दोषाय लौकिकपरमेतदिति न मंतव्यं यतो भगवान्प्रेम्णा गोपीभ्यः अदेयमपि कामं दत्तवान् । नच लौकिकन्यायस्तत्र पूर्णकामत्वात् । नहि स्वत इच्छारहितः कोप्येवं प्रयच्छति । ननु प्रेम दृष्टे भवति सर्वथा अदृष्टे कथं प्रेमेत्याशंक्य दर्शनोपायमाह ॥ अच्छिद्रसेवनादिति ॥ सेवनं स्वयोग्यानुसारेण । नत्वल्पं बहुचाप्रयोजकम् । तत्र बहिःसाधनमाह॥दययेति॥३२१-३३४॥

आवरणभंगः ।

प्रमाणमाहेति॥ननु भक्तेश्चारम्यसम्पादकत्वे किंमानमित्याकाक्षायां "ज्ञानीचेद्भजते कृष्णन्तस्मान्नास्त्यधिकःपर" इति 'भजनं सर्वथामतमिति' च पूर्वोक्तं दृढीकर्तुं प्रमाणमाहेत्यर्थः । नन्वस्मिन्वाक्ये कथं वृत्तिचारम्यसंपादकभक्त्युत्कर्षस्य लाभ इत्याकांक्षायामुपपादयन्ति ॥ ज्ञानीत्यादि ॥ तथा निरूपणादिति ॥ 'तपस्विभ्य इति' षष्ठाध्यायस्थसंदर्भौ ज्ञानिनोप्यपेक्षया योगिन उत्कर्षमुक्त्वा योगिनामपि सर्वेषामित्यनेन भक्तस्य ततोऽप्युत्कर्षकथनेन ज्ञान्यपेक्षया भक्त्युत्कर्षस्य नितरां बोधनादित्यर्थः ॥ श्रीभागवतस्य गीताविस्तारत्वादुक्तोपष्टंभाय तत्संमतिमाहुः ॥ ॥ न तथेत्यादि ॥ तथा च तत्र ज्ञानीत्वात्मा उक्तः । भक्तस्तु ततोप्यधिकोऽत्रोक्त इति माहात्म्यं स्पष्टमतः पूर्वोक्तं निर्विवादमित्यर्थः ॥ नन्विदं न युक्तम् । तथा हि । मामेवेति वाक्यं सप्तमाध्याये तत्रारंभे "ज्ञानं तेहं सविज्ञानमिदं वक्ष्यामीत्युपक्रम्य, ते विदुर्युक्तचेतस " इत्युपसंहाराच्च मध्येपि ज्ञानमेवोच्यते । अतएव' बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यत' इति प्रपत्तिमुक्त्वा तस्याकारमाह ॥ वासुदेवःसर्वमिति ॥ एवं सति ' मामेव ये प्रपद्यंत' इत्यत्रापि प्रपत्तिशब्दो ज्ञानमेव वक्ति नंतु भक्तिमिति पूर्वोक्तमयुक्तमिति चेत्तत्राहुः ॥ अन्यथा गुह्यत्वेनेत्या-

दिज्ञानानंतरं गुह्यत्वेनेति संबन्धः । तथा च यद्येवं स्यात्तदा सप्तमाष्टमाभ्यां सपरिकरं ज्ञानमुक्त्वा ततोनवमाध्याये 'इदन्तु ते गुह्यतमं प्रवक्ष्यामीति' प्रतिज्ञाय गुह्यतमे ज्ञानविज्ञाने पापमोक्षाय वदन् 'मयाततमित्यारभ्य शुभाशुभफलैरेव मोक्ष्यस' इत्यन्तेनोक्त्वा राजविद्यातोऽपि यद्राजगुह्यं बुद्धिस्थं प्रवक्ष्यामीत्यनुषङ्गेन द्वाभ्यां प्रतिज्ञातं तदाह । समोहं सर्वभूतेष्वित्यारभ्य मन्मना भवेत्यंतेन । अत एव मामेवैष्यसीति पृथक्फलसंबन्धः।राजविद्याराजगुह्ययोग इत्यध्यायानां नाम च युज्यते। अष्टादशे च ' सर्वगुह्यतमं शृणिवति' प्रतिज्ञाय मन्मनाभव सर्वधर्मान्परित्यज्येति कथितम् । अतो मामेवेत्यत्र प्रपत्तिपदेन सर्वथा भगवत्संबन्ध एवोच्यते सत्वन्यथानुपपद्यमानोऽत्र प्रकरणसहकारेण विद्यापर्वरूपां भक्तिमाक्षिपंति । सत्याश्च तस्यां वृत्तेश्वरमत्वं सिद्ध्यतीति सा सर्वत उत्कृष्टैव । यदीदं नाभिप्रेयात्तदैवं नवदेदित्यर्थः ॥ फलितमाहेति । पूर्वोक्तप्रनाड्या ज्ञाने विद्यारूपे जाते यदा तदभेदेन प्रियत्वस्य स्फूर्तिस्तदा भक्तिरूपचरमवृत्त्या साक्षात्कारस्तदा भगवता मुक्तिर्दीयते इति प्रणाडीघटकमारभ्य फलपर्यन्तानां सर्वेषां भगवदधीनत्वात्साधनांतरं त्यक्त्वा तमेव भजेदित्याहेत्यर्थः ॥ मूले तदधीनत्वत इति । भगवदधीनत्वादित्यर्थः ॥ ३२१ ॥ ३२२ ॥ अतः परमादिमूर्तिः कृष्ण एवेत्यादिनोक्तं दृढीकर्तुं किञ्चिदाशंक्य परिहरन्ति ॥ ॥ ननु भक्तस्येत्यादि ॥ वृत्तिचारम्यसिद्ध्यर्थं भक्त्यपेक्षणे । भक्त्यनन्तरं ज्ञानमायातीति तथा शंक्येत्यर्थः ॥ ॥ न दृष्ट इत्यादि ॥ तथा च प्रनाड्यंतरं दृष्टश्रुतविरोधे कल्प्यं तदत्रैकमपि नास्ति तेन कल्प्यत इत्यर्थः । ननु केषां चिद्गोपालोपासकनां संभाव्यत इत्यत आहुः ॥ ॥अनामयेत्यादि ॥ तथा च सगुणोपासकानां भवतु तथा नतु गुणातीतभक्तानामित्यर्थः॥ तत्र गमकमाहुः ॥ ॥ भूयश्चांत इत्यादि ॥ तथाचैतादृशी मुक्तिर्भगवत्संबन्धाज्जायत इति श्रूयतेऽतस्तथेत्यर्थः॥इयं श्वेताश्वतरोपनिषत्प्रथमाध्याये दशमी ऋक् "क्षरंप्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः तस्याभिध्यानाद्योजनात्तत्वभावाद्भूयश्चांतं विश्वमायानिवृत्तिरिति" तदर्थस्तु क्षरशब्दवाच्यं यत्प्रधानं प्रकृतिः, अमृतशब्दवाच्यं यदक्षरं पुरुषः तदुभयं, हरः सर्वाविद्यानिवर्त्तको भगवान् । अथवा क्षरं सर्वे जीवाः, प्रधानं प्रकृतिः, अक्षरंचेति त्रयमनूद्य तेषां हरैक्यमाह । नच हरादिपदानामुपनिषदि दर्शनाच्छिवपरत्वमुपनिषदः शंक्यम् । एवमद्वैतं निरूप्य, अन्यं विशेषमाह । क्षरात्मानौ पूर्वोक्तौ तत्प्रत्याहारेण प्रधानमपि देवः क्रीडा परस्मिन् ईशते ईष्टे नियमयति देव एकःसन् तेनाभेदेऽपि नियम्यनियामकभावःक्रीडया उपपादितः।एवं कथनस्य प्रयोजनमाह।तस्य पूर्वोक्तस्याभिध्यानात्पूर्वोक्तरीतिकाचिन्तनात् योजनात् संबन्धविशेषात् तत्वाभावात् स्वस्य तद्भावभाव-

नात्, भूयश्च पुनरपि, अंते प्रारब्धसमाप्तौ साधनपूर्णतायां वा विश्वमायानिवृत्तिः । प्रपञ्चोत्पादकमायायाः स्वसंबद्धाया निवृत्तिः संबन्धहानिः । तथाच पूर्वमध्यासनिवृत्त्या ब्रह्मभावस्ततः पुनः सायुज्यमित्यर्थः ॥ तत्रेत्यादि ॥ नन्वत्र श्रुतौ संबन्धेन मुक्तकथनं भाक्तमस्त्विति चेन्नैवम् । दृष्टान्तस्य सत्वादित्याशयेन तत्र दृष्टान्तमाहेत्यर्थः ॥ गोप्य इत्यादि ॥ तथाचात्र वाक्ये स्वरूपाज्ञानस्य मुक्तेश्च कथनेन दृष्टान्तस्य सत्वान्मुक्तिसिद्धौ भाक्तत्वकल्पनं नोचितमित्यर्थः ॥ पुनः किंचिदाशंक्य परिहरंति ॥ नन्वेवं सतीत्यादि ॥ ॥ एवं सति मामेवेत्येवकारेण प्रपत्त्यतिरिक्तानामनुपायत्वेंगीकृते सति तमेवेति श्रुतावपि तुल्यत्वान्मूलज्ञानस्य मुक्तिहेतुत्वसिद्धिस्तंविदित्वेत्यत्र ब्रह्माभिन्नं शारीरमिति व्याख्याने जीवेत्यादिनोक्तहेतोरात्मज्ञानस्य तथात्वसिद्धिश्च कारणेन ज्ञानिनस्ताभिरित्यादि । तथा च नास्माभिरनुपायत्वमुच्यतेऽपितु तेषां सापेक्षत्वात्तथाफलवचनं स्वर्गकामादिवत्प्ररोचनार्थमित्युच्यतेऽतो नास्माकं श्रुतिविरोध इत्यर्थः ॥ तथा च कामादिवज्ज्ञानमपीतिभावः ॥ तर्हि जीवपक्षव्याख्यानमप्याद्रियतामित्याकांक्षायां नान्यथाभवेदिति मूलस्थं व्याकुर्वन्ति ॥ तमेवेत्यादि ॥ अन्यथेति ॥ ॥ जीवपरत्वेन । नह्यात्मलाभादिश्रुतीनां विरोध इत्यत आहुः ॥ आत्मेत्यादि ॥ ॥ तथाच तस्य प्रकरणावरुद्धत्वात्तथेति नविरोध इत्यर्थः ॥ नन्वस्त्वात्मशब्दस्य भगवद्वाचकत्वं तथापि भेदोपासननिंदाश्रुतिबलादभेदज्ञानाभावे भक्तेरपि निर्बलत्वमायातीति न शंकानिरास इत्यत आहुः ॥ अभेदेत्यादि ॥ ॥ तथाच तस्याः श्रुतेर्भेदोपासनानिंदायां तात्पर्याभावान्न भक्तेर्नैर्बल्यमित्यर्थः ॥ एतद्धिनिगमनाय दृष्टान्तमाहुः ॥ नेत्यादि ॥ ॥ तथाच यथायं न नित्यानुवादः "नासोमयाजी संनयेत्सनायेद्वेति"सूत्रात् । किंतु विकल्पपर्यवसायी । तथा निंदापि विकल्पपर्यवसायिनीत्यर्थः ॥ ननु तत्र कल्पो यथाविकल्पगमकस्तथा नात्र गमकमिति । भ्रमप्राप्तस्येयं निंदासती प्रसज्यप्रतिषेध एव पर्यवस्यत्विति चेन्नेत्याहुः ॥ एकत्वेत्यादि ॥ तथा चैतद्वाक्यं ज्ञात्वा प्रवृत्तं प्रति तु विकल्प एव पर्यवस्यतीति नतथेत्यर्थः ॥ फलितमाहुः ॥ अत इत्यादि ॥ ॥ तथाच ज्ञानस्य या साधनता सा नाभेदज्ञानत्वेन रूपेणापि तु साक्षात्कारत्वेन रूपेण साक्षात्कारस्त्वाविर्भावाधीन आविर्भावश्च यमेवैष इति श्रुत्यावरणाधीनो आवरणं च भगवदधीनं भगवांश्च प्रेमाधीन इति प्रेमैव साधनं केवलेन हि भावेनेति वाक्यादिति भावः ॥ ॥ ३२३ ॥ ३२४ ॥ अन्येषामित्यादि ॥ ॥ ननु भवत्वेवं तथाप्यन्येषामसाधनत्वे किंमानमित्याकांक्षायां तदाहेत्यर्थः ॥ विकल्पोभवत्विति ॥ ॥ "अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णाति " इत्यादौ तथानिर्ण-

(आत्मलाभान्न परं विद्यते तरति शोकमात्मवित्) इत्यादिश्रुतिमें आत्मानाम भगवान्‌को ही समुझनों जीवको ग्रहण नहिं करनों क्योंकि जीवप्रकरणमें ये श्रुति नहिं है ब्रह्मप्रकरणमें ही यह श्रुति लिखीहै (योऽन्यां देवतामुपासते) इत्यादिश्रुतिनमें अभेदोपासनाकी स्तुति कीनी है। उन श्रुतिनकी भेदोपासनाकी निन्दामें तात्पर्य नहिं है जैसें (नासोमयाजी सन्नयेत्) इत्यादिश्रुतिनमें जैसे नित्यानुवाद नहिं है किन्तु विकल्पहै। ऐसें भेदनिन्दाभी विकल्पपर्यवसायिनी है अर्थात् अभेदकरकें अथवा भेदकरकें उपासना करनी योग्यहै । याविषयमें (एकत्वेन पृथक्त्वेन बहुधा-विश्वतोमुखम्) ये गीतावाक्य प्रमाणहै-अर्थ-एकत्वमानकें अथवा बहुत्व पृथक्त्व करकें अर्थात् भेदकरकें अथवा अभेदकरकें बहुतप्रकारकरकें सबतरफ मुखवालो मैंहूँ वाकी उपासना करें इत्यादि वाक्य प्रमाणहैं। तासों मूल ज्ञान है सो अभेदज्ञानरूप होकरकें मोक्षको साधन नहिं है किन्तु साक्षात्काररूप होकरकें मोक्षको साधनहै, साक्षात्कार होनों तो (यमेवैषवृणुते) इत्यादिश्रुतिमें (वरण) अङ्गीकारके आधीन लिखो है, अङ्गीकारकरनों भगवान्‌के आधीनहै, भगवान् प्रेमके आधीनहै तासों भगवान्‌के प्रकट-होवेमें प्रेमही साधनहै, यह निश्चय भयो प्रेमविना और कोई भगवान्‌की प्राप्तिमें साधन नहिं होयसके है या विषयमें श्रीकृष्ण-के प्रमाणभूत वाक्यनको वर्णन करे है (यन्न योगेनेति) योगकरके सांख्यके ज्ञानकरकें दान, वृत्त, तप, यज्ञ,इनकरकें ॥ ३२५ ॥ तथा व्याख्या वेदाध्ययन संन्यास इन साधननकरकें जाकी प्राप्ति नहिं वा मुख्य फलकी प्रेमभक्तिसों प्राप्ति होय है। तासों हे उद्धव ! सब प्रश्ननकूँ छोडके तथा जितने सुनवेयोग्य पदार्थ हैं, जितने सुनेभये पदार्थ हैं उनकों छोडकें सर्वात्मभावकरकें

मेरेही शरण आव अकुतोभयकूँ(मोक्षकूँ)प्राप्तहोवेगो इति याप्रकार भगवाननें उद्धवजीसों सर्वस्व मुख्यतत्व आज्ञा कियो है सब जीव भगवान्की प्राप्तिही चाहैं हैं तासों भगवान्ही फल है वे भगवान ही अपनें मुखसों योग,दान,यज्ञादिक मेरी प्राप्तिके उपाय नहिं हैं याप्रकार निषेध करे है तब यज्ञादिक भगवान्की प्राप्तिके उपायहैं याप्रकारको और पुरुषको बचन वृथा समुझनों तात्पर्य यहहै योगादिक सब साधन भक्तिके हैं, भक्ति भगवत्प्राप्तिको साधनहै। तहाँ योग, ज्ञान, भक्ति आदिकनमेंसों कोई साधन कियोजाय तो मोक्ष होय याप्रकारको विकल्प तो नहिं बनसके है। क्योंकि दोनों वाक्य समानबलवाले होयँ तहाँ विकल्पहोयहै। यहाँ तो यह भगवान्को वाक्य सबसों प्रबलहै (मत्तः परतरं नान्यत) अर्थ--भगवान् आज्ञा करे है मोसों पर अधिक श्रेष्ठ कोई नहिं है। इत्यादिक श्रीमुखके वाक्यनसों भगवान्ही फलहै यह निश्चय होयहै। तासों ज्ञानादिक मोक्षके साधक नहिं हैं। शङ्का-वेद भी भगवान्को वाक्यहै श्रुतिस्मृतिनमें परस्परविरोध होय तहाँ श्रुति बलवान होयहै तब श्रुतिके बतायो ज्ञान मोक्षको साधन क्यों नहिं होयसके ?उत्तर- भगवान् अपनों वेदवाक्य सत्यकरवेकेलिये कर्म ज्ञान योग आदि साधनकरकेभी प्रकट होवे हैं परन्तु निर्बन्ध करकें प्रकट होवें है जैसें लोकमें कोई पुरुष चक्रवर्तीराजाकूँ अपने गृहमें राजनीतिके अनुसार पधरानों चाहै तब तो वाही रीतिसों यथायोग्य साङ्गोपाङ्ग सब साहित्य करीजाय तब चक्रवर्तीराजाभी अपनेंकरेभये राजनीतिके क्रमके अनुसारही वा पुरुषके गृह पधारेहैं और जितनें समय वहाँ रहवेको नियम होय वितनें समयही वाके गृहमें बिराजे है और राजक्रमके अनुसार जितनों फल नियतहै उतनोही फल वाकूँ दे हैं। वासों अधिक फल नहिं

देवे हैं । याहीप्रकार यज्ञज्ञानादिक करकें भगवान् प्रकट होवें हैं । तब उनके अनुसारही फल देवे है वासों अधिक मुख्य फल नहिं देवे है क्योंकि इच्छा होय न होय उदासीन होयकरकै वेदमर्यादाकी रक्षा करवेकेलिये पधारकें वितनोसों फल देवे हैं या कथनसों प्रमाणबलविचारकरकें ज्ञानसाधक हैं तो भी प्रमेयबलविचारकरकें साधक नहिं होयसकें हैं यह बात जताई भक्तिमार्गमें बिशेषताको वर्णन करें हैं जैसें चक्रवर्त्तीराजा अधिक प्रेमदेखकें कोई पुरुषके गृह पधारें हैं तब तो अपनी इच्छाअनुसार जितनो फल देनो चाहे वितनों दे हैं स्नेहके वशहोयकें राज्यभी देदे हैं ऐसेही (भक्ति) मानसिक प्रेमप्रवाहकरके तो बडे आदरसों भगवान् प्रकट होवे हैं(स्मरतः पादयुगलमात्मानमपि यच्छति) इत्यादिवाक्यानुसार अपने वियोगकरके जो भक्तकूँ दुःख होय वाकूं नहिं सहतेभये करुणाकरकें अपने आत्माकूँ भी भक्तके अर्थ दे हैं तब स्वरूपानन्द देवेमें कहाँ परिवेदना है । दृष्टान्तकरकेभी ज्ञान, योग, भक्ति, इनको तारतम्य दिखावै हैं । जैसें जलकी तृषा बाधा करतीहोय तब वाकूं सहकरके वाकी निवृत्तिकरीजाय ऐसें ज्ञानमार्गमें ज्ञानीकूँ दुःख प्राप्त होवें तब दुःख देहादिकनकूं होवें है आत्मा तो निर्विकारहै वाकूँ दुःख नहिं है । इत्यादि ज्ञानकरके दुःख सहलेनो ही ज्ञान मार्गमें दुःख दूर होवेको उपायहै । जैसे जब तृषा लगे तब कुवा खोदनों सुरू कियो जाय ऐसे योगमार्गमें जब दुःख होय तब योगी योगके साधन करनों सुरूकरे है जब साधन संपूर्ण होय तब भगवान् प्रकट होयकें दुःखनिवृत्ति करे हैं । जैसें जो पुरुष श्रीगङ्गाजीके तीरपें जलके समीपही बैठो है वाकी तृषाकी निवृत्ति जलपान करकें शीघ्रही होजावें है या प्रकार भक्तिमार्गमें तो दुःख दूर

करवेवारे भगवान् सदा प्रकटही रहे हैं दुःख होतेही दूर करदेहैं जैसें अत्यन्त प्रेम होय तो श्रीगंगाजी स्वयं देवी रूप धारकें जल पीवावे हैं तैसे भगवान्भी प्रेमवाले भक्तके दुःख दूर करके सुख देहैं। तहां भगवान् फलरूपहैं सबनसूँ बडे हैं भक्तकूँ सुख देवेकेलिये हीन भावकूं क्यों प्राप्त होवे हैं जैसे अर्जुनके दुःख दूरी करवेके लीये सारथी भावकूं प्राप्तभये ऐसी शंका तो नहीं करनी क्योंकि जैसें पिता ज्या प्रकार बालककों सुखहोय वेसेंही आचरण करें है अपने हीन भावकूं नहीं बिचारें है ऐसें भगवान्भी भक्तकूँ सुखहोय तैसेंही चरित्र करेंहें या प्रेमके मार्गमें हीनभाव दोषकारी नहिं हैं तासों सारथी होनों तथा दूतभावको ग्रहण करनों भगवान्के भक्तवत्सलता करुणा आदि गुण जतायवेवालोहै या हीनभावके आश्रयकूँ लौकिकपर नहीं माननो यासों भगवान् प्रेमकरकें गोपीनकूँ अदेय अर्थात् नहीं देवेलायक ऐसे कामकूँ देतेभये लौकिक पुरुष जैसें कामके वशहोयकें स्त्रीनमें प्रवृत्त होयहै याप्रकार भगवान् नहिं प्रवृत्तभयेहैं क्योंकि आप तो पूर्णकामहैं प्रेमकरके सेवित भगवान् गोपीनकूँ कामके देवेवारेहैं लौकिकपुरुषकी यह सामर्थ्य नहिं है कि स्वयं इच्छारहित होयकें कामकूँ देसके तहाँ यह शंका होयहै देखेभये पदार्थनमें प्रेम होयहै भगवान् तो कभी देखे नहीं हैं उनमें प्रेम कैसे होय या शंकाकूँ दूरकरवेकेलियें भगवान्के दर्शनको उपाय वर्णन करेंहैं सब कामना छोडकें अपनी योग्यताके अनुसार निरन्तर सेवाकरवेसों भगवद्दर्शन होवेहै सेवाके विषयमें अल्पता तथा अधिकता प्रयोजक नहिंहै, बाहिरके साधनको बर्णन करेंहैं सम्पूर्ण भूतनमें दयाकरवेसों धर्मके अनुसार जितनों प्राप्तहोय वितनेंमें ही संतोष करलेवेसों तथा सब इन्द्रियनकी शांतिकरकें जनार्दन भगवान् शीघ्रंही सन्तुष्ट होवें हैं ॥ ३२६-३३४ ॥

शृण्वन्ति गायन्ति गृणंत्यभीक्ष्णशः स्मरन्ति
नन्दन्ति तवेहितञ्जनाः । त एव पश्यन्त्यचिरे-
ण तावकं भवप्रवाहोपरमं पदाम्बुजम् ॥ ३३५ ॥
अन्तर्बहिः साधनयोः स्वरूपं परिकीर्तितम् ।
प्रकारश्चाप्ययं प्रोक्तो दर्शने नान्यथा तु तत्
॥ ३३६ ॥ सर्वापेक्षापरित्यागात् पौरुषस्य
सभाजनम् । आसक्त्या भगवद्भक्तैः परं दर्शन-
साधनम् ॥ ३३७ ॥ कपिलादिर्महायोगी पूर्वं
येनोपलब्धवान् । तं प्रकारमिहोवाच पाक्षिकं
तद्धि साधनम् ॥ ३३८ ॥ राजवत्कुत्र चित्कृष्णः
कस्य चित्केन चित्फलम् । ददाति तावता नित्यं
सर्वत्रेति न निश्चयः ॥ ३३९ ॥ प्रेम्णा सेवा तु
सर्वत्र सेव्यवश्यत्वसाधनम् । किंचिद्भक्तियुत-
श्चेत्स्याद्योगादिः साधनं क्वचित् ॥ ३४० ॥ सर्वं
ब्रह्मात्मकं ज्ञानन्कर्म्म चापि चरन् तथा ।
पंचकर्म्मविधानेन षोढापिप्रकटःसदा ॥ ३४१ ॥
निर्बंधेन फलत्येष नच भक्त्या यथा तथा ।
कणादादिमुनिश्रेष्ठाः शुक्रमोहितबुद्धयः ३४२ ॥
वृथा शास्त्रकलापं हि जगुस्तेन न चान्यथा ।
प्रेम्णान्यत्साधनं लोके नास्ति मुख्यं परं महत्
॥ ३४३ ॥ श्रीभागवतमेवात्र परं तस्य हि
साधनम् । अधिकारमभिप्रायं ज्ञात्वा भक्तमु-

खेन हि ॥ ३४४ ॥ सकृच्छ्रवणमात्रेण कृष्णे प्रेम भवेद्ध्रुवम् । विरक्तो विपरीतादिभावनारहितः सुहृत् ॥ ३४५ ॥ लीलामात्रश्रुतौ तस्य भवेत्प्रेमाखिले किमु । श्रीभागवततत्वार्थमतो वक्ष्ये सुनिश्चितम् ॥ ३४६ ॥ यज्ज्ञानात्परमा प्रीतिः कृष्णे शीघ्रं फलिष्यति ॥ ३४७ ॥

इति श्रीवेदव्यासविष्णुस्वामिमतवर्त्तिवल्लभ-दीक्षितविरचिते भागवततत्वदीपे सर्वनिर्ण-यकथनन्नाम द्वितीयम्प्रकरणम् ॥ २ ॥

तत्त्वदीपप्रकाशः ।

॥ विशेषोपायमाह ॥ श्रृण्वन्तीतिश्लोकत्रयस्यार्थमाह ॥ अन्तर्बहिरिति ॥ इतोऽप्युत्तमं दर्शनोपायमाह ॥ सर्वापेक्षेति ॥ येऽन्योन्यतो भागवताः प्रसज्येत्यत्र निरूपयिष्यते । ननु कपिलेन भगवदवतारेण निरूपितः कथं नोपायस्तत्राह ॥ कपिलादिरिति ॥ न ज्ञायते भगवांस्तत्र केन हेतुनिमित्तेन देवहूत्यै मुक्तिं दत्तवान् । परं लोके तत्साधनं प्रकटितवान् पुष्टिमार्गप्रकारे तु तस्या अपि प्रवेशः । परं पाक्षिकं साधनं कथं पुष्टिमार्ग इत्याकांक्षायां निरूपयति ॥ राजवदिति ॥ राजा कदाचिद्भार्यामपि सेवकेन मारयति नैतावता सा महतामपि धृष्या भवति । तथा प्रेमापि भविष्यतीत्याशंक्याह ॥ प्रेम्णा सेवेति ॥ लोके वेदे च प्रेम्णा सेवायां क्रियमाणायां सेव्यो वश्यो भवति । किञ्च योगादीनां च साधकत्वं प्रेमसंबन्धात् । सम्पूर्णेन वेदमार्गेणाप्येतन्नभवतीति वक्तुं कांडद्वयार्थमनुवदति ॥ सर्वं ब्रह्मात्मकमिति ॥ तथापि निर्बंधेनैव फलति वाक्यानुरोधात् । लोकोऽत्र नियामकः । षट्पदार्थषोडशपदार्थज्ञानात् निःश्रेयसाधिगमेत्यादिऋषिवाक्यानां का नि[illegible]-

त्याह ॥ **कणादादिमुनिश्रेष्ठा इति** ॥ दैत्यानामर्थे शुक्रेण ऋषयो विमोहिता मोहदशायां शास्त्राणि कृतवंतः । अतो वेदविरुद्धत्वाद्भ्रान्तकृतित्वाच्च न तानि प्रमाणानि । एवं सर्वं निरूप्य प्रेमभक्तिमार्गमुपसंहरति ॥ **प्रेम्णोऽन्यदिति** ॥ रुच्यादिना जातं प्रेम दोषदर्शनान्निवर्त्तते। दोषश्च शास्त्राभावे लोकदृष्ट्या भवति । अतःश्रीभागवतमेव सर्वशास्त्रार्थनिर्द्धारकं सर्वमाहात्म्यज्ञापकं प्रेमोत्पादकं भवति ॥ **यस्यां वै श्रूयमाणायामिति** ॥ लोकस्याजानत इति वाक्यात् । तत्र लोके भागवतश्रोतॄणां प्रेमाभावं दृष्ट्वा न श्रवणं साधनमित्याशंक्य विशेषमाह ॥ **अधिकारमिति** ॥ श्रवणस्यांगत्रयम् । भागवतस्य सम्यक्तात्पर्यज्ञानं भक्तमुखाच्छ्रवणं श्रोतुश्च वैराग्यमिति । एतद्भावेन फलतीत्यर्थः ॥ इतोप्युत्तमाधिकारे भागवतैकदेशेनापि भक्तिर्भवतीति कैमुतिकन्यायेनाह ॥ **विरक्त इति** ॥ सर्वथा लोकेषु विरक्तो भागवतोक्ते असंभावनाविपरीतभावनारहितः । तीर्थादिना शुद्धान्तःकरणः विदुरतुल्यः । ततोऽप्यधिको वा उद्धवतुल्यः तस्य लीलामात्रश्रुतावपि भक्तिर्भवति । अतो मुख्याधिकारे संपन्ने भागवतश्रवणे भक्तौ न कोपि सन्देहः । नन्वेवं सति भगवतः कोपयोगस्तत्राह ॥ **श्रीभागवततत्वार्थमिति** ॥ भागवतार्थे अज्ञाते अन्यथाज्ञाते च भक्तिर्नभवतीति अधिकारेपि जाते फलं न भविष्यतीति मयोपायः क्रियते तत्वार्थो विविच्योच्यते यस्मिन् ज्ञाते सर्वथा भक्तिर्भवत्येव । नापि जाता भक्तिस्तूष्णीं तिष्ठति तादृशी भविष्यति या लतावत्प्रत्यहं वृद्धिमायातीति शीघ्रं कृष्णाख्यं फलं फलिष्यति । अतो भक्तीच्छायां सर्वथैतदनुसंधेयमिति ग्रंथारंभः समर्थितः ॥ ३३५-३४७ ॥ इति श्रीमद्भागवततत्त्वदीपिकायां श्रीमद्वल्लभदीक्षितविरचितायां सर्वनिर्धारविवरणं नाम

द्वितीयं प्रकरणं समाप्तम् ॥ २ ॥

आवरणभंगः ।

विशेषोपायमिति ॥ ॥ अत्राशुप्रसादमात्रस्योक्तत्वेनाशुदर्शनस्यानुक्तत्वात्तदाहेत्यर्थः ॥ इदं वाक्यं प्रथमस्कन्धे कुन्तीस्तुतौ ॥ अंतरित्यादि । अंतरङ्गबहिरङ्गयोः साधनयोरित्यर्थः । अत्राच्छिद्रसेवनरूपमंतरङ्गसाधनं प्रथम इति क्रमेण ज्ञेयम् ॥ ॥ इतोपीत्यादि ॥ तृतीयस्कन्धानुसारेण साधनांतरमाहेत्यर्थः ॥ ॥ ये इत्यादि ॥ ॥ अत्रापि "मत्पादसेवाभिरतिर्मदीहा" इति पूर्वार्द्धादस्मिन्नप्युपाये सेवानुसीव्यतीति प्रतिभाति ॥ कपिलादिरिति ॥ महायोगी पूर्वं येनोपलब्धवान् तं प्रकारं कपिलादिरिहोवाचेति संबन्धः । अत्र गमकमाहुः ॥ न ज्ञायत इत्यादि ॥ केन हेतुनिमित्तेनेत्यष्टभिरध्यायैर्मताष्टकमुक्त्वाग्रे मुक्तिकथनात् । केन साधनेन केन प्रयोजनेनेत्यर्थः ॥ प्रयोजनस्यापि प्रयोजकतया निमित्तत्वमविरुद्धम् ॥ ॥ तस्या इति ॥ ॥ मुक्तेरित्यर्थः ॥ ॥ तथेत्यादि ॥ ॥ राजभार्यावत् प्रेमापि साधनान्तराभिभाव्यं भविष्यति तथाच तस्यापि पाक्षिकत्वमित्याशंक्येत्यर्थः । एतेन तीर्थादावपि यामुक्तिरित्यादिनोक्ते युक्तिरुक्ता । सर्वत्रेत्यस्यार्थमाहुः ॥ ॥ लोके वेदे चेति ॥ ॥ महावाक्ये माहात्म्यं प्रतिपाद्याभेदप्रतिपादनेन निरुपधिस्नेह एवाभिप्रायात् भगवान् ब्रह्मकात्स्र्न्येनेत्यत्रापि तथोक्तत्वाल्लोकेपि तथादर्शनानादिति न प्रेम्णि पाक्षिकत्वशंकेति भावः । प्रेमसंबन्धादिति केचित्स्वदेहान्तरेत्यादौ द्वितीयस्कन्धे तथा निर्णयात्तथेत्यर्थः ॥ लोकेत्यादि ॥ ॥ स्ववाक्यानुरोधे क्रियमाणे लोकप्रवाहः कर्मयोगादयः सर्वं इत्यत्रोक्तरीत्या नियामक इत्यर्थः ॥ इत्याकांक्षायामाहेत्यर्थः ॥ दैत्यानामर्थ इति ॥ ॥ दैत्यानां हितार्थे तदिदं शुक्रमोहितत्वं पुराणान्तरादवधेयम् । पद्मपुराणे तेषां शिवकृतमोहकथनात्तेषु प्रकारान्तरेऽपि मोहितत्वानपायात् । तदुक्तमधस्तात् । यदि प्रेमैव साधनं तर्हि लौकिकप्रबंधादिभ्योऽन्यतोपि वा तद्भविष्यति । श्रीभागवतोक्तरीतौ किमित्याग्रह इत्याकांक्षायां पूर्वोक्तं स्मारयितुमाहुः ॥ रुच्यादिनेत्यादि व्यभिचारमाशंक्य परिहर्तुमाहुः ॥ तत्रेत्यादि ॥ अत्र तात्पर्यज्ञानस्यांगता तस्माद्भारतेत्यत्रोक्ता भक्तमुखाच्छ्रवणस्य शुकसूतादिवक्तृनिरूपणात्सिद्ध्यति वैराग्यस्य च राजशौनकादिभ्यः शेषं निगदव्याख्यातमिति । शुभम् अत्रैतद्बोध्यम् । उत्तरतन्त्रे साधनाध्यायप्रथमपादे रंहत्यधिकरणमारभ्यांतं पूर्वजन्मशुद्धिविचारपूर्वकं ज्ञानाधिकारिणः शरीरनिष्पत्तिर्विचारिता तादृशशरीरनिष्पत्तिरिदानीं दुर्घटा अन्नायशुद्ध्या तपोऽभावेन वेदानां यातयामतया च रेतःसिग्योन्योः शुद्ध्यभावात् । तथा द्वितीयपादे मुक्तियोग्यतां विचार्य ज्ञानविषयो य उभयनिलिंगाद्यधिकरणैर्विचारितस्तदवधारणमपि पूर्वोक्तदेहादिकं विना दुर्लभम् । नचेदमप्रयोजकम् । प्रथमपादेन तथावधारणात् ।अन्यथा द्वितीयेऽध्याये नामरूपव्याकर्तृत्वादिविचारोत्तरमेवो-

भयलिंगाद्यधिकरणानि भगवान् व्यासो वदेत् न शब्दात्सुविचारितादितिच। तथा तृतीयतुरीयपादयोरंतरंगबहिरंगसाधनं विचारितं तेन विद्योदयेपि तदभावे सर्वात्मनानाविद्यानाशः। तदेतदुक्तं स्वप्नोजागरणं चेत्यादि एवंसति तत्वमस्यादिवाक्योक्ताभेदज्ञानमात्रे शास्त्रस्य न पर्यवसानम्। किंतु साधनांतरे। तच्च भक्तिरूपमेव नेतरदिति गीतैकादशस्कंधस्थभगवद्वाक्यैरेवावसीयते। अतः सूत्राणामपितत्रैव तात्पर्यं तदेव लिंगभूयस्त्वाद्यधिकरणेषूपपादितम्। तदेतदुक्तं इदमेवेत्यारम्यान्यवचोमृषेत्यन्तेन। किंच। पूर्वाध्यायद्वये सर्वसामर्थ्यवत्वं भगवतः स्थापयित्वा मतांतराणि चापाकृत्य तृतीये यत्साधनं वैदिकं विचारितं तेन वैदिकसाधनादेव मुक्तिर्नेतरैः स्मार्त्तैः। वैदिके च कालादिवैगुण्यात्कुंठे तन्निरपेक्षा गीताश्रीभागवतयोरुक्ता भक्तिरेव साधनमिति जिज्ञासाशास्त्रादिप्रणयनोत्तरं श्रीभागवतकरणादवसीयते। इदं च प्रथमस्कंध एव स्फुटम्। ततश्च जिज्ञासाशास्त्रस्याप्येतदनुरोधित्वमेव। तदेतत्सर्वं तृतीयस्य तुरीयपादे उपपादितम्। आर्त्विज्यसूत्रे उक्तश्च "भक्तिमार्गप्रचारैकहृदयो बादरायणः। मानं भागवतं तत्र तेनैवं ज्ञेयमुत्तमैरिति" तदिदमुक्तं कर्मयोगादय इत्यारभ्य नच भक्त्या यथा तथेत्यन्तम्। एवमत्रोत्तरमीमांसानिर्णयोद्धारप्रतिज्ञा पूरिता अतःपरमेका प्रतिज्ञावशिष्यते। गुणानामपि त्रैविध्ये हेतुरग्रे वक्तव्य इति। सा श्रीभागवतार्थनिबंधे पूरणीयेति सर्वं निष्कलंकमिति शुभम्॥"स्निग्धं सितं रसघनं हृदयं स्वकीयं वक्त्रं निजेषु नवनीतमयं दधानः। प्रेंखांश्रितोति तरले जनमानसेऽपि ह्रासे दयालुरिति तस्य गुणं व्यनक्ति॥ १॥ यस्तस्य पूर्णैः करुणाकटाक्षैः पूर्णोऽभवत्सर्वविनिर्णयोपि। अत्यर्थगंभीरविशुद्धतत्त्वदीपप्रकाशावरणस्य भङ्गः॥ २॥" इति श्रीमद्वल्लभाचार्यचरणनखचंद्रचन्द्रिकानिरस्तहार्दतमसस्तद्दासदासपीतांबरसुतस्य पुरुषोत्तमस्य कृतौ तत्त्वदीपप्रकाशावरणभङ्गे सर्वनिर्णयप्रकरणं संपूर्णम्।

अदृष्टदोषान्मतिविभ्रमाद्वान्यूनाधिकं यल्लिखितं मया वै।
तत्सर्वमार्यैः परिशोधनीयं प्रायेण मुह्यन्ति हि ये लिखन्ति॥ १॥

व्रजभाषाटीका।

भगवान्के दर्शन होयवेको विशेष उपाय वर्णन करेहैं। कुन्तीनें भगवान्की स्तुति करी है जो मनुष्य आपके चरित्रकूँ सुनें हैं, तथा गावै हैं, परस्पर बर्णन करें हैं, बारंबार स्मरण करेहैं, तथा चरित्रनकी प्रशंसा करते रहे हैं वे भक्त शीघ्रही संसार प्रवाहके

मेटवेवाले चरणारविंदके दर्शन करें है ऐसें बाहिर भीतरके साध-
नको स्वरूप दिखायो ये प्रकार भगवान्के दर्शनको वर्णन कियो
या बिना और प्रकारसों भगवद्दर्शन नहिं होय है ॥ ३३५ ॥
॥ ३३६ ॥ यासोंभी दर्शनको उत्तम उपाय वर्णन करें हैं।
सबप्रकारकी अपेक्षा छोडकरकें भगवान्के चरित्रनको (सभा-
जन) प्रशंसापूर्वक गद्गदकण्ठहोयकें वर्णन करें हैं वे भक्त प्रसन्न
हाससहित नेत्रवाले मुखारविन्दनके दर्शन करें हैं। तथा भगवा-
न्के साथ मनोहर वार्ताभी करें हैं। यह उपाय तृतीय स्कन्धमें
(येऽन्योऽन्यतो भागवताः प्रसज्य) या श्लोकमें वर्णन कियोहै
॥ ३३७ ॥ भगवान्के कपिलावतारनें जो सांख्य निरूपण कियो
है वह उपाय क्यों नहिं है? तहाँ कहे हैं—कपिलादि महा-
योगी ज्या उपाय करकें भगवान्कूँ प्राप्त होते भये वा प्रकारको
यहां वर्णन कियोहै परन्तु वह प्रकार भी पाक्षिक साधन है नित्य
नहिं है क्योंकि कपिलदेवजीनें आठ अध्यायन करकें आठ
मतको बर्णन कियो आगे देवहूतीकी मुक्तिको बर्णन कियो
अब यहां नहिं मालूम पडसकैहै, इन आठ उपायनमेंसों कोन
निमित्त करके देवहूतीको मुक्ति दीनीहै, पुष्टिमार्गके प्रकारनमें
देवहूतीकी मुक्तिकोभी प्रवेशहै ॥ ३३८ ॥ वहां कैसें पुष्टिमार्ग है
ऐसी आकांक्षा भई तहाँ निरूपण करेहैं जैसें चक्रवर्ती राजा अपनी
इच्छानुसार कोई पुरुषकों कोई साधनसों फलदेहैं, कोई पुरुषकूँ
कोई साधनों फल देहैं, ऐसें परम स्वतंत्र श्रीकृष्ण जा साधनसों
मुक्ति देवेकी इच्छा होय वा साधनसों ही मुक्ति देहै। राजा सेव-
ककरकेभी कभी अपनी राणीकूँ ताडना करवावें हैं तासों और बडे
पुरुष राणीकूँ नहिं धर्षणा देसके हैं ॥ ३३९ ॥ प्रेम तो राजभार्याके

तुल्य और साधनकरके पीडित नहिं होयसकेहैं क्योंकि लोकमें तथा वेदमें प्रेमकरके सेवाकरवेसों सेव्य स्वामी अवश्य प्रसन्न होवेहैं वेदमें माहात्म्यको पूर्वकाण्डमें निरूपण करकें तत्त्वमसीत्यादिमहावाक्यमें अभेदको प्रतिपादनकरके निरुपाधि प्रेममें ही अभिप्राय जतायोहै। यह बातही (भगवान् ब्रह्मकात्स्र्येन) यामें निरूपण करीहै तासों और साधन जैसें पाक्षिकहैं। अर्थात् भगवान् इच्छा होय जा साधनसों मुक्तिदें, इच्छा होय जासों नहिंदें ऐसे प्रेम पाक्षिक साधन नहिं हैं अर्थात् प्रेमसें वासों तो अवश्य भगवान् प्राप्तहोवेहीहै योगादिकभीप्रेमसहितही फलदे हैं॥३४०॥ संपूर्ण वेदमार्गकरकें भी यह नहिं होय है यह जातयवेकेलिये दोनों कांडनके अर्थको अनुवादकरेंहैं (सर्वं ब्रह्मात्मकमिति) सब जगतकूँ ब्रह्मात्मक जानकें वेदोक्त कर्मकूँ मरण पर्यन्त करतो रहै तब पञ्चकर्मके विधानकरकें अग्निहोत्रादि षट्प्रकारकरकें प्रकटभये ॥ ३४१ ॥ भगवान् बडे हटकरकें फलदायक होवेहैं। वेदवाक्यके अनुसारसों यह ही निश्चय होयहै या वाक्यमें लोक नियामकहै न्यायशास्त्रमें षट्पदार्थके ज्ञानसों मोक्ष होय तथा षोडश पदार्थके ज्ञानसों मोक्ष होय इत्यादि ऋषिनके वाक्यकी कहा गतिहै ? तहां उत्तर देहैं (काणादादिमुनिश्रेष्ठा इति) दैत्यनकूँ सन्मार्गसों विमुख करवेकेलिये शुक्राचार्यजीने काणादादिऋषिनकूँ मोह करायो तब शुक्रमोहित ऋषिननें ॥ ३४२ ॥ मोहदशामें न्यायशास्त्रादिक बनाये तासों भ्रान्तनके बनाये वेदविरुद्ध न्यायादिक शास्त्र प्रमाण नहिं हैं याप्रकार सब पदार्थको निरूपणकरकें भक्तिमार्गको उपसंहार करें हैं (प्रेम्णोन्यदिति) लोकमें प्रेमसों बडो मुख्य और साधन नहिं है॥ ३४३ ॥ मनकी

रुचिकरके भयो प्रेम दोष देखवेसों निवृत्त होजावैहै । भगवानके विषयमें शास्त्र सुने पढे बिना लोकदृष्टिसों दोषन की संभावना होवेहैं तासों वा दोषदृष्टि मिटवेकेलिये शास्त्रको श्रवण पठन करनों तहाँ सर्वशास्त्रनको निर्द्धार करवेवालो, भगवान् के सर्व माहात्म्यको जतायवेवारो प्रेमको प्रकटकरवे वालो श्रीमद्भागवतशास्त्रहै (यस्यां वै श्रूयमाणायाम्) लोकस्याजाननो विद्वान् इत्यादि वाक्यनमें भागवत श्रवणसों भक्ति उत्पन्न होनों स्पष्ट लिख्यो है अभी लोकमें भागवत सुनवेवालेनके हृदयमें प्रेम प्रकटहोतो नहिं देखके भागवत श्रवण प्रेमको साधन नहिं है । ऐसी शंका होय ताको उत्तर देते भये भागवत श्रवणकी विशेष रीति दिखावें हैं (अधिकारमिति) भागवत सुनवेके तीन अंगहैं भागवतके तात्पर्यको आछी रीतिसों ज्ञान होनों चाहिये. भक्तमुखसों श्रवणहोनों चाहिये, सुनवे वारेके हृदयमें वैराग्य होनों चाहिये ॥ ३४४ ॥ पूर्वोक्त अधिकारीसोंभी उत्तम अधिकारीकूँ तो भागवतके एकदेशके सुनवेसोंही भक्ति होजावैहै । लोकनमें सर्वथा जो विरक्त होय, असंभावना विपरीतभावना करके रहित होय, सर्व जगतको सुहृदय होय ॥३४५॥ तीर्थादिक सेवनसों शुद्ध जाको अन्तःकरण होय, जैसें विदुर तुल्य हो अथवा वासों भी अधिक उद्धव तुल्य होय वैसें भक्तकूँ लीला मात्रके श्रवणकरके भक्ति उत्पन्न होयवेमें कोई संदेह नहिं है । तहाँ श्रीभागवतको अर्थ नहिं जानवे सों अथवा विपरीत अर्थ जानवेसों अधिकार होय तथापि श्रवणसोंभी भक्ति नहिं होय तासों श्रीभागवतके तत्वार्थको विवेचन तीसरे भागवतरूप प्रकरणमें कियोजायगो ॥ ३४६ ॥ ज्ञाके

जानवेसों सर्वथा भक्ति उत्पन्न होय फिर उत्पन्न भई भक्ति वैसीही नहिं स्थिर रहै किंतु प्रतिदिन बढतीभई शीघ्रही श्रीकृष्णरूप फलकूँ प्राप्तकरदे है तासों भक्तिकी इच्छाहोय तो सर्वथा श्रीभागवतरूप प्रकरणकों सर्वदा अनुसंधान करतेरहनों योग्य है इतने कथन करके तृतीय प्रकरणको आरंभ समर्थन कियो ॥ ३४७ ॥

इति श्रीमद्गोस्वामिरणछोडात्मजजीवनाचार्यविरचिते सतीपुरस्थविप्रवंशीधरात्मजपण्डितगोकुलेशदासप्रकाशिते सुलोचनाख्यव्रजभाषाव्याख्याने सर्वनिर्णयाख्यं द्वितीयं प्रकरणं संपूर्णम् ॥ २ ॥

शिवमस्तु.

